SASTRA SIDDHANTALESASANGRAHA

OF

APPAYA DIKSHITA

WITH THE COMMENTARY

"KRISHNALANKARA"

OF

ACHYUTAKRISHNANANDA TIRTHA

VOL. I.

with an English Introduction by

Vidyasagara, Vidyavachaspati

P. P. S. SASTRI B. A. (OXON), M. A.

Professor of Sanskrit & Comparative Philology,

Presidency College, Madras.



—— SRIRANGAM -

SRI VANI VILAS PRESS.

1935.

॥ श्रीः ॥

शास्त्रसिद्धान्तलेशसंग्रहः ॥

श्रीमद्भरद्वाजकुलजलधिकौस्तुभमणिभिः श्रीमच्छंकर-
गणांशभूतैः निरस्तविविधावैदिकपाषण्डवितण्डैः
चतुरधिकशतप्रबन्धनिर्मातृभिः अद्वैतविद्याचार्यैः
अप्पयदीक्षितसार्वभौमैः
विरचितः ॥

श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानन्द-
सरस्वतीशिष्य अच्युतकृष्णानन्दतीर्थविरचितया
कृष्णालंकाराख्यया व्याख्यया
संभूषितः ॥

॥ प्रथमः परिच्छेदः ॥

श्रीरङ्गम्
श्रीवाणीविलासमुद्रायन्त्रालयः ।
१९३५

PREFACE.

In pursuance of our intention to publish all the works of the illustrious Appaya Dikshita one after another, we have pleasure in issuing this first volume of Siddhantalesasangraha with the commentary of Achyuta Krishnananda Tirtha being the twentieth of the Dikshitar's works published by us and we hope, by God's grace, to complete thus remaining works also one after another and the bring out a Collected Edition of the third of the three master-intellects of India—the first two being Sri Sankaracharya and Sri Vidyaranya. The date of the author and the nature of the contents of the work are discussed in the Introduction by Vidya-sagara Vidyavachaspati Prof. P. P. S. Sastri B. A. (Oxon), M. A., to whom we are very grateful for this valuable contribution. Our grateful thanks are also due to Mahamahopadhyaya Brahmasri Yajnasvami Sastrigal and Brahmasri S. Subrahmanya Sastrigal for having kindly gone through the proofs. With his characteristic love of Sanskrit Literature and his deep interest in our Press, Brahmasri S. Subrahmanya

Sastrigal, as usual, bore the brunt of the work by collating the Mss., preparing the copy and seeing it through the Press. The Second Volume containing the remaining three Paricchedas will be published soon.

T. K. B.

I

In Adayappalam, a village near Arni in the North Arcot District of the Madras Presidency, there flourished in the early decades of the fifteenth century a renowned family of great brahmin scholars of the Bharadvaja gotra. Vakshasthala Ganapati was the first great ancestor of this race. To him was born Achchan Dikshita, known also as Narasimha Dikshita, who was a great poet at the court of King Krishnadevaraya of Vijayanagar, who ruled from 1509 to 1530 A. D. Achchan Dikshita was quite famous in his day. Of his eight sons by his two wives, Rangaraja was the fifth and the eldest by the second wife, known as Totaramba, a daughter of Sri Rangarajacharya who belonged to the famous orthodox Srivaishnava family called Sri Vaikuntacharyavamsa. Rangaraja was a great Sanskrit scholar. His reputed works are the *Advaitamukura* and the *Vivaranadarpana*. He was the court poet of King Bomma who ascended the *gadi* in 4630 Kali or 1528 A. D. As a result of his devout

meditations at the feet of Lord Nataraja at Chidambaram, Rangaraja was blessed with two sons the elder, the famous Appaya Dikshita and the younger, the reputed Achchan Dikshita, the grandfather of the famous Nilakantha Dikshita.

From his own works we learn that Appaya spent his early years at the feet of his own father and guru, the revered Rangarajadhvari.

In due course, after the completion of his education, Appaya spent his life, doing all the orthodox vaidic rites and duties of a grihastha or house-holder. At this stage of his life, his two great patrons were King Narasimha of Tanjore and King Chinna Bomma of Velur—the two great rulers in South India after the demise of Krishnadevaraya of Vijayanagar. His influence over King Chinna Bomma was indeed very considerable. We have a dated inscription on the wall of the Kalakantisvara temple at Adayappalam. The first notice of this inscription is made in the South Indian Epigraphical Report of 1912 of the Archaeological Department as No. 395 of 1911. This inscription has been recently published in pp. 148-149 of Vol. III of the Journal of Oriental Research, Madras, by Mr.

Y. Mahalinga Sastri. This inscription has very important bearings on the date of Appaya Dikshita, because Mr. Mahalinga Sastri has interpreted it in a peculiar manner to suit his conclusion that the great Dikshita must have been born about 1520 A. D. and not 1553 A. D.

Sivanandayogindra, in his Appayadikshitendra-vijaya, as published by Ganapati Sastri in 1920 at Madras, gives the date of Appaya Dikshita's birth as 1553 A. D. as indicated in his sloka.

वीणातत्त्वज्ञसङ्ख्याङ्कितकलिसमाभाक्प्रमातीचवर्षे
कन्यामासेऽथ कृष्णप्रथमतिथियुतेऽप्युत्तरप्रोष्ठपाद्रे ।
कन्यालग्नेऽद्रिकन्यापतिरमितदयाशेवधिर्वैदिकेषु
श्रीदेव्यै प्राक्पयोक्तं समजनि हि समीषेऽत्र काञ्चीनगर्याः ॥

(pp. 5 & 6.)

This date has been questioned as spurious by Mr. Y. Mahalinga Sastri in his articles on Appaya Dikshita in the Journal of Oriental Research. Mr. Mahalinga Sastri quotes with approval the opinion of L. D. Swamikannu Pillai, the author of the Indian Ephimeris. Mr. Pillai's Ephimeris is known to contain a large number of inaccuracies in calcula-

tions, probably due to his want of reliance on any single standard system of calculation. Be this as it may; we know however that all the planetary positions will not be satisfied if the horoscope is to be accepted as belonging to 1553 A. D. The Editor of Sivanandayogindra's work states in his introduction that he consulted five manuscripts in the preparation of the work for the press and that two were from Adyar. The two manuscripts of the work in the Adyar Library bear the following numbers: 33–E–9 and 30–I–14. The former closely resembles the printed text while the latter omits here and there a number of passages from the former and has some very important variations also. The passage beginning with the oft-quoted stanza वीणातस्त्रञ्जषड्ख्या... and ending with the stanza in which the planetary positions are described ...शुक्रे शिखिन्यलिगते शुभलग्न एवम्। (pp. 5 & 6) is conspicuous by its complete omission in the Ms. 30–I–14 and in its stead, we have the following new sloka not known heretofore.

चतुस्सहस्रोद्धृतषट्छतैकोनषष्टिवर्षेषु कलौ गतेषु।
स्वक्षेत्रवत्स्वात्मपजीवसौरिष्वाषाढशुद्धप्रथमातिथौ हि॥

as the date of birth of Appaya Dikshita. It means that Appaya Dikshita was born on the Prathama of the bright fortnight of the month of Ashada on the termination of 4659 years of the Kali Era, *i. e.*, Friday the 15th July of 1558 A. D. In the face of this distinct and clear evidence preserved in a manuscript of the Appayadikshitendravijaya, we feel that there is no room for any further controversy over the date of birth of the great Dikshita. Sivanandayogi, in his enthusiasm to get at greater details regarding the birth-moment of his illustrious ancestor must have consulted an astrologer (as he himself admits in his commentary on Appaya's Atmarpanastotra) to reconstruct the horoscope of the Dikshita and the reconstructed horoscope has been quite fruitful of a good deal of avoidable mischief. Whatever epigraphical and other evidence there may be, based on conjectural and inferential interpretations, these will have to be reinterpreted suitably to fit in with the definite data available in this manuscript, which happily is still available in the Adyar Library.

We give below a transcript of the Adayappalam Inscription referred to by Mr. Mahalinga

together with a rendering of the same in English.

The Inscription (No. 395 of 1911) reads as follows :— *

(1) विद्वद्गुरोर्विहितविश्वजिदध्वरस्य
श्रीसर्वतोमुखमहाव्रतयाजिसूनोः ।
श्रीरङ्गराजमखिनः श्रितचन्द्रमौलि-
रस्त्यप्पैदीक्षित इति प्रथितस्तनूजः ॥

(2) येन श्रीचिन्नबोम्मक्षितिपबलभिदः कीर्तिरव्याहताऽ
ऽसीत्
येन श्रीकण्ठभाष्यं परमशिवमतस्थापनायोद्धार ।
तेन श्रीरङ्गराजाध्वरिवरतनयेनाप्पयज्वाधिपेनाकारि
(3) प्रौढोन्नताग्रं रजतगिरिनिभं कालकण्ठेशधाम ॥

स्वस्ति श्री शकाब्धं 1504க்குமேல் செல்லாநின்ற
चित्रभानु வருஷம் स्वामि कालकण्ठेश्वर ருடகோவி
(4) லிலே श्रीकण्ठभाष्यं ஐஞ்ஞூறு विद्वांस ருக்கு
படிப்பிக்க அதுக்கு शिवार्कमणिदीपिकैव्याख्यान
மும்பண்ணி வேலூர் चिन्नबोम्म நாயக்கர்

* The inscription is in Grantha and Tamil scripts. In our transcription, we have used the Devanagari script wherever the Grantha script is used in the original. The Roman numerals in brackets refer to the line in the inscription.

(5) கைய்யிலே कनकाभिषेक மும் பண்ணிவிச்சுக் கொண்டு அதுக்குப்பின் வேலூரிலே शिवार्कमणिदीपिके யும் ஐஞ்ஞூறு विद्वांस குக்கு படிப்பிச்சு

(6) प्रति...ளி விச்சு न्यायरक्षामणिकल्पनदपरिमल மூதலான

(7) ஞூறு प्रबन्धं பண்ணின अप्पैदीक्षित ருடை க்ருதி இந்த शिवालयं शुभमस्तु अप्पैदीक्षितर् सदा सेवै, नील-कण्ठदीक्षितर् सदा सेवै, अरुणगिरिदीक्षितर् सदा सेवै

(8) विश्वजिदप्पैदीक्षितर् सदा सेवै

(9) उमामहेश्वरदीक्षितर् सदा सेवै

(10) यज्ञेश्वरदीक्षितर् सदा सेवै

(11) मरुतालं लक्ष्मन् सदा सेवै

"There is (was) the famous son, called Appai Dikshita, who was devoted to the crescent-moon-headed Lord, to Sri Rangarajamakhi, the preceptor of learned men, the performer of the Visvajit sacrifice and the son of one who had performed the Sarvatomukha and Mahavrata sacrifices.

By whom (Appaya Dikshita) the fame of the foremost of Kings, Chinna Bomma, through whose

(help) he (Appaya) resuscitated the Srikantha-bhashya for the re-establishment of the highest Siva-religion, was spread unrestricted, by him, (Appaya) the foremost of sacrificers named Appaya the son of the great Sacrificer Sri Rangaraja, the temple of Kalakanthesa was constructed with its proud and lofty pinnacle, resplendent like the Silver mountain.

"Hail ! Having caused himself to be bathed in gold in the year Chitrabhanu corresponding to Saka 1504 at the hands of Chinna Bomma Naik of Velur on the occasion of the composition of the commentary called Sivarkamanidipika in order to teach the Srikanthabhashya to five hundred learned men in the temple of the Lord Kalakanthesvara, *and after that,* having taught five hundred learned men the Sivarka-manidipika at Velur and having made (Chinna Bomma) the suzerain lord of the earth—this Siva temple is the work of Appai Dikshita who composed a hundred works like the *Nyayarakshamani* and *Kalpataruparimala* etc. May there be peace.

Appai Dikshtar's eternal obeisance.
Nilakantha Dikshitar's eternal obeisance.
Arunagiri Dikshitar's eternal obeisance.
Umamahesvara Dikshitar's eternal obeisance.

Yajnesvara Dikshitar's eternal obeisance.
Marutalam Lakshan's eternal obeisance.

After printing the text of the inscription, Mr. Mahalinga Sastri says as follows :—

"I will briefly notice the contents of this inscription. It records that the temple (dedicated to Kalakanthisvara) was constructed in 1582 A. D. by Appaya Dikshita and etc. etc."

From the text and translation given above, it will be observed that the inscription falls into two parts, the first part containing two stanzas and the second part consisting of a long prose passage followed at the end with a number of names. The first part is merely a *Prasasti* on Appaya Dikshita referring to his geneology and the fact of his having been responsible for the excellent construction of the temple dedicated to Kalakanthisvara.

The second part—the prose passage, records a number of events whose authenticity is vouchsafed by several signatories. A glance at the whole tenor of the inscription will easily convince any one that the inscription must have been carved after the demise of Appaya Dikshita and not during his life-

time. If the inscription had been put up during Appaya Dikshita's own time, the inscription would have stopped with the sentence अप्पैदीक्षित முடி कृति இங்க शिवालयं शुभमस्तु । Certainly, no son of his or any other junior relative of his would permit himself the impropriety of adding his name as well to that of his highly famous father, during the latter's life-time to a permanent record like an inscription. Evidently, the work of reconstruction was not complete when Appaya died and it was carried to a successful completion only by his own sons and others. When the building was completed, the inscription must have been carved in a language testifying to the fact of Appaya Dikshita being mainly responsible for the construction of the temple and the others being merely the persons responsible for the actual finishing of the project of Appaya Dikshita. It was because Appaya Dikshita was not actually present at the completion, that they allowed their names to be engraved as attestors of the event.

The question now arises as to the significance of the date Saka 1504 or 1582 A. D. inscribed in the wall. From the language of the Tamil passage, it is easy to see that the date refers to the greatest

event in Appaya Dikshita's life, namely, the fact of his being the recipient of a *Kanakabhisheka* (a bath of gold) at the hands of King Chinna Bomma, on the completion of his *Sivarkamanidipika* on the Srikanthabhashya. The words பண்ணிச்சுக்கொண்டு and அதுக்குப்பின் clearly show that two stages are referred to by the inscription, namely the fact of being bathed in gold and *after that* certain other events taking place like the assumption of overlordship by Chinna Bomma and the composition at a subsequent date of works like *Nyayarakshamani*, *Kalpataruparimala* etc.

From the geneological tree* of Appaya Dikshita's family preserved even today by his direct descendants at his own village Adayappalam, we find that most of the signatories to the inscription could be easily identified. From this table, we know that of Appaya Dikshita's eleven sons, three sons were called respectively as Nilakantha Dikshita, Umamahesvara Dikshita and Dharmayya Dikshita.

* I had occasion to see it personally during a visit in November 1933; a copy of it was also made available to me through the courtesy of Prof. N. Subrahmanya Iyer M. A. of the Teacher's College, Saidapet.

Appaya Dikshita's brother Achchan Dikshita had two sons called Narayana Dikshita and Appa Dikshita (Cf. Viraraghava's Achchandikshitendra-vamsavali). Thus the first signatory Appai Dikshita is Appaya Dikshita's brother's son, the second, fifth and sixth, signatories are Appaya Dikshita's own sons and the seventh signatory is the architect. Signatories 3 and 4 are probably two other sons of Appaya Dikshita. We are sure that the inscription was put up on the completion of the Temple begun by Appaya Dikshita and completed only during the time of the signatories, most of them being directly related to Appaya Dikshita or his brother. If our interpretation holds good, the date 1582 A. D. can only refer to Appaya Dikshita's coronation in gold and not to the completion of the temple. If this is conceded, there is nothing inherently wrong in accepting the traditional date of Appaya's birth to be 1558 A. D.

Appaya Dikshita lived to a ripe old age, till he attained 72 years. His period therefore will be 1558 A. D. to 1630 A. D. Sivanandayogi refers, in the concluding portions of his biography of Appaya Dikshita, to the fact that Nilakantha

Dikshita the grandson of Appaya Dikshita was twelve years of age when Appaya Dikshita shuffled off his mortal coil. This would give the date of Nilakantha Dikshita's birth as 1618. A. D. Nilakanta Dikshita has himself given the year of the composition of his Nilakanthavijayachampu as Kali 4738 or 1637 A. D. when he would have been barely nineteen years of age. A literary work at 19 is certainly nothing inherently impossible in a genius of the type of Nilakantha.

II

By his Bhashyas on the Brahma-sutras, the Bhagavad-gita and the Upanishads, Sri Sankara, standardised the main teachings of the Advaita philosophy of his day. Sankara's works evoked many interpreters. Two main currents are noticeable among these interpreters, one represented by the great Vachaspati Misra, called the *Bhamati Prasthana* and the other represented by Padmapada and Prakasatman, called the *Vivarana Prasthana.*

The essential feature of the *Bhamati Prasthana* is its adoption of नानाजीववाद and अवच्छेदवाद

while the essential feature of the *Vivarana Prasthana* is its adoption of the एकजीववाद and बिंबप्रतिबिंबवाद।

Chitsukha of the 13th century and following him, Bharatitirtha of the 14th century attempt a reconciliation between the Bhamati and the Vivarana schools, while Prakasananda of the 14th century developed the एकजीववाद in a radical form and Prakatarthakara gave knock-out blows to the Bhamati school.

Before proceeding further, we shall narrate succinctly the important implications of the differences between these two Prasthanas.

According to the नानाजीववाद, there is a plurality of Jivas who are either conditioned by or reflected in a plurality of ignorances. These ignorances may be considered a less pure form of nescience, being consequently distinguished therefrom or these alone may be recognised as nescience, no single nescience being recognised as distinct from these. Isvara, on one variety of the reflection theory, would be the prototype of which the Jivas are the reflections; and on another variety, Isvara himself would be a reflec-

tion of pure consciousness in the relatively pure Maya while the Jivas would be reflections of pure consciousness in the relatively impure Avidyas.

According to the अवच्छेदवाद, Isvara is related to the Jivas as the content of ignorances which are located in the Jivas. Each Jiva is ignorant of perfection. Ignorance is thus located in the Jiva but has for content Isvara i.e. Perfection.

According to the एकजीववाद, ignorance is located in Brahman and has Brahman itself, for content. Brahman itself through its own nescience, seems to transmigrate. Because of this unity in respect of locus and the content of Avidya which is also one, there can be only one Jiva. This Jiva imagines the distinctions between bondage and release, between itself and other Jivas, which are supposed to exist, as also between itself and an imaginary perfect Being, namely Isvara. The whole empirical world is in no better position than a dream projection of this sole Jiva.

According to the बिंबप्रतिबिंबवाद the Jiva whether one or many is essentially a reflection, whether of pure consciousness (Brahman) or of Isvara. In the

less radical form of the एकजीववाद, there is room made for Isvara too as a prototype, and this is the view favoured by the author of the *Vivarana*.

These were the several views current in the begining of the sixteenth century. Appaya Dikshita set himself to the task of expounding in detail all the minor differences existing among the various schools of Advaita as a preliminary towards his mastery of the principles of Advaita Vedanta. And we have his *Siddhantalesasangraha* as a result.

The *Siddhantalesasangraha* is the first systematic exposition of the chief points of doctrinal differences among the various schools of the Advaita Vedanta. A survey of the several authors and works quoted by Appaya Dikshita in his *Siddhantalesasangraha* gives us a bird's-eye-view of the development of the Advaita Vedanta from the time of Sankara to the time of Appaya Dikshita.

We give below in a compendious form, the names of authors in their chronological order, quoted by Appaya Dikshita in the first chapter of his work.

9th Century

1. Padmapada, author of *Panchapadika*. P. I

2. Suresvara, author of *Brihadvarttika* and *Naishkarmyasiddhi* 122

3. Sarvajnatma Muni, author of *Samkshepasariraka* 41

4. Vacaspati Misra, author of *Bhamati* 62

10th Century

5. Vimuktatman, author of *Ishtasiddhi*

6. Anandanubhava, author of *Padarthatattvanirnaya* 97

11th Century

7. Prakasatman, author of *Vivarana* 32

12th Century

8. Prakatarthakara, author of *Prakatarthavivarana* 11

13th Century

9. Amalananda, author of *Kalpataru*

10. Ramadvayacharya, author of *Vedanta Kaumudi* 68

11. Akhandananda, author of *Tattvadipana*

12. Chitsukha, author of *Tattvapradipika* 260

14th Century

13. Bharatitirtha > Vidyaranya author of *Panchadasi* 114
and *Brahmananda* 126
14. Narayana Sarasvati, author of *Varttika* on Samkara Bhashya 171 ? 44
15. Nrsimhabhattopadhyaya 310
16. Prakasananda, author of *Siddhanta-muktavali* 107

15th Century

17. Anandapurnamunindra alias Vidya-sagara, author of *Nyayachandrika* 233
18. Advaitavidyacharya>Rangarajadhvari 275
19. *Tattvaviveka* 110
20. *Drigdrisyaviveka* 137

III*

The topics dealt with in the first chapter of the

---

* A detailed table of contents and an introduction discussing the salient features of the whole of the Siddhantalesasangraha is prefixed to Professor S. Suryanarayana Sastri's edition of the work, published by the University of Madras, to which we are highly indebted.

Siddhantalesasangraha may be roughly divided under five heads :

1. The discussion as to whether there is an injunction in respect of vedanta-study and if so, of what kind ;

2. The definition of Brahman and the discussion as to which is the material cause, pure Brahman, Isvara, Jiva as Maya or any combination of these, together with incidental discussions of (a) the relation between the Jiva and Isvara (b) the various forms of non-absolute intelligence (c) the unity or multiplicity of Nescience ;

3. Consideration of the nature of Brahman's agency ;

4. Ways of intelligibly conceiving Brahman's omniscience ;


5. The need for psychoses ; three possible views of its utility as (a) effecting a relation with the object, as (b) manifesting non-difference from object-defined-intelligence, as (c) destroying the ignorance veiling the Jiva ; detailed consideration of these modes ; the distinction between primal ignorance

and modal ignorances; the function of the second and subsequent cognitions in a continuous stream of cognition; the nature of the witness-intelligence and its manifestation; discussion as to whether bliss is manifested while in bondage; and a discussion of the number and nature of the psychoses in a delusive experience such as 'this is silver'. The chapter ends with the statement that nondualism is the purport of the entire Scripture, thus leading on to a discussion of this topic in the succeeding chapters which will be published as the Second Volume.

The value of this Edition is considerably enhanced by the addition of the learned commentary of Achyutakrishnananda. A critical note on the commentator will appear in our Introduction to the Second Volume.

The Presidency College,
Madras, 3—7—1935.

P. P. S. Sastri.



॥ श्रीः ॥

शास्त्रसिद्धान्तलेशसंग्रहः ॥

अधिगतभिदा पूर्वाचार्यानुपेत्य सहस्रधा
सरिदिव महीभेदान्संप्राप्य शौरिपदोद्गता ।
जयति भगवत्पादश्रीमन्मुखाम्बुजनिर्गता
जननहरणी सूक्तिर्ब्रह्माद्वयैकपरायणा ॥ १ ॥

॥ श्रीः ॥

* वेदवेद्यमुमाकान्तं कुमाराभ्यामलंकृतम् ।
नन्दीशप्रमुखैः सेव्यं प्रणमामीष्टसिद्धये ॥ १ ॥

---

* कुमाराभ्यां विघ्नेश्वरसुब्रह्मण्याभ्याम् । शंकरं शंकरस्य शिवस्या-

शंकरं शंकराचार्यं व्यासं नारायणात्मकम् ।
सरस्वतीं च ब्रह्माणं प्रणमामि पुनः पुनः ॥ २ ॥

गोविन्देति समाक्रन्द्य रक्षां प्राप भयातुरः ।
यं गजः करुणामूर्तिं तं गोविन्दं भजेऽन्वहम् ॥ ३ ॥

आपन्ना यं समाश्रित्य रक्षां प्राप सुदुर्लभाम् ।
कृष्णा कृष्णस्य महिषी तं कृष्णं संश्रयेऽन्वहम् ॥ ४ ॥

प्रकाशितब्रह्मतत्त्वं प्रकृष्टगुणशालिनम् ।
प्रणवस्योपदेष्टारं प्रणमाम्यनिशं गुरुम् ॥ ५ ॥

यो मे विश्वेश्वरक्षेत्रं विश्वेश्वरसमो गुरुः ।
समध्यास्ते स्वयंज्योतिर्वाणीसंज्ञो भजामि तम् ॥ ६ ॥

यस्य शिष्यप्रशिष्याद्यैर्व्याप्तेयं सांप्रतं मही ।
सर्वज्ञस्य गुरोस्तस्य चरणौ संश्रये सदा ॥ ७ ॥

वतारूपं शंकराचार्यं भगवत्पादम् । तथा च शिवपुराणवचनम्— 'व्याकुर्वन्व्यासमूत्रार्थं श्रुतेरर्थं यथोचिवान् । श्रुतेर्न्याय्यः स एवार्थः शंकरः सविताननः' इत्यादि । व्यासं सूत्रकृतं बादरायणम्, नारायणात्मकं नारायणस्यावताररूपम् । तथा च वचनम्— 'द्वापरे द्वापरे विष्णुर्व्यासरूपी महामुनिः । न ह्यन्यः पुण्डरीकाक्षान्महाभारतकृद्भवेत्' इत्यादि । ब्रह्माणं सरस्वतीभर्तारं हिरण्यगर्भम् । आपन्ना सभायां वस्त्रापहारनिमित्तामापदं प्राप्ता । रक्षां वस्त्रकोटिलाभनिमित्ताम् । कृष्णा द्रौपदी । कृष्णस्य अर्जुनस्य । प्रकाशितं शिष्यशतेभ्य उपदिष्टं ब्रह्मतत्त्वं येन गुरुणा स तथोक्तस्तम् ।

गुरोरपि गरीयान्मे यः कलाभिरलंकृतः ।
अद्वैतानन्दवाण्याख्यस्तं वन्दे शमवारिधिम् ॥ ८ ॥

ओतप्रोतमिदं सर्वं यस्मिन्सच्चित्सुखात्मके ।
पर्यवस्यन्ति वेदान्ता यत्र चाहं तदक्षरम् ॥ ९ ॥

श्रीकृष्णचरणद्वन्द्वं प्रणिपत्य निबन्धनम् ।
व्याकुर्वे शास्त्रसिद्धान्तलेशसंग्रहसंज्ञितम् ॥ १० ॥

आचार्यचरणद्वन्द्वस्मृतिर्लेखकरूपिणम् ।
मां कृत्वा कुरुते व्याख्यां नाहमत्र प्रभुर्यतः ॥ ११ ॥

चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्तिप्रचयगमनयोः सिद्धये भगवत्पादीयभाष्यस्तुतिमुखेन भाष्यप्रतिपाद्यब्रह्मतत्त्वानुसंधानलक्षणं मङ्गलाचरणं करोति— **अधिगतभिदेति** । दृष्टान्तमुखेन श्रीमूर्तिचरणारविन्दगङ्गयोरनुसंधानलक्षणमपि मङ्गलं करोति— **शौरीति** । शौरिपदोद्गता सरिन्महीभेदान्संप्राप्य यथा सहस्रधा-

---

स्वयंज्योतिर्वाणीसंज्ञः स्वयंप्रकाशसरस्वतीसंज्ञः । गरीयान्गुरुः । इदं सर्वं यस्मिन्सच्चित्सुखात्मकेऽक्षरे ब्रह्मण्योतप्रोतमध्यस्तम्, वेदान्ताश्च यत्राक्षरे विषये पर्यवस्यन्ति तात्पर्येण बोधहेतवो भवन्ति, तदहमिति संबन्धः । अक्षरे सर्वस्योतप्रोतत्वोक्त्या ब्रह्मणः सर्वाधिष्ठानत्वरूपं तटस्थलक्षणमुक्तम् । सच्चित्सुखात्मक इत्यनेन सत्यज्ञानानन्दस्वरूपात्मकं स्वरूपलक्षणमुक्तम् । तत्र वेदान्तानां पर्यवसानोक्त्योक्तरूपे ब्रह्मण्यक्षरे वेदान्ता एव प्रमाणमित्युक्तम् । नाहमत्र प्रभुर्यत इत्यत्र अत्र व्याख्याने प्रभुः समर्थ इत्यर्थः ॥

धिगतभिदा, तथा भगवत्पादश्रीमन्मुखाम्बुजनिर्गता ब्रह्माद्वयैकपरायणा जननहरणी सूक्तिः पूर्वाचार्यान्व्याख्यातॄन्व्याख्येयत्वेनोपेत्यार्थतः सहस्रधाधिगतभिदा सती जयतीति संबन्धः। अत्र सूक्तिः सहस्रधाधिगतभिदेति सूक्तिविशेषणेन स्वग्रन्थे प्रदर्शयिष्यमाणानां सिद्धान्तभेदानां सर्वेषां भगवत्पादश्रीमन्मुखाम्बुजनिर्गता सूक्तिरेव मूलमिति सूचितम्। अधिगतभिदा प्राप्तभेदा। सरिद्गङ्गा। महीभेदान्भूप्रदेशान्। शौरेः श्रीमहाविष्णोः पदोद्गता पादाम्बुजनिर्गता। जयति सर्वोत्कर्षेण वर्तत इति स्तुतिः। भगवत्पादस्य श्रीमन्मुखमेवाम्बुजं कमलं तस्मान्निर्गता। मुखेऽम्बुजत्वारोपे कान्तिमत्त्वादिरूपं श्रीमत्त्वं निमित्तमिति सूचनार्थं श्रीमादिति विशेषणम्। जननहरणी जननं संसारस्तत्स्वजन्यब्रह्मज्ञानद्वारा हरतीति जननहरणी सूक्तिर्ग्रन्थतोऽर्थतश्च निरवद्यं भाष्यम्। ब्रह्माद्वयैकपरायणा, ब्रह्म च तदद्वयं च ब्रह्माद्वयम्, ब्रह्माद्वयं च तदेकं च ब्रह्माद्वयैकम्, ब्रह्माद्वयैकं परायणं परमतात्पर्यविषयो यस्याः सूक्तेः सा ब्रह्माद्वयैकपरायणा। अनेन विशेषणेन द्वितीयप्रपञ्चशून्यमेकरूपं सत्यज्ञानानन्दलक्षणं ब्रह्म सूक्तिपदसंगृहीतस्य भाष्यात्मकशास्त्रस्य विषय इत्युक्तं भवति। जननहरणीति विशेषणेन शास्त्रस्य मुक्तिः प्रयोजनमित्युक्तं भवति। अर्थान्मुक्तिकामः शास्त्रस्याधिकारी मुक्तेरधिकारिणश्च प्राप्यप्राप्तृभावलक्षणः संबन्धश्च सूचितः। एवं श्रुत्यर्थाभ्यां श्लोकेन भाष्यात्मकवेदान्तशास्त्रस्य विषयादिकं कथयता ग्रन्थकारेण स्वकीयग्रन्थस्य वेदान्तशास्त्रप्रकरणत्वात्तस्यापि तदेव विषयादीति सूचितं भवति॥ १॥

प्राचीनैर्व्यवहारसिद्धविषयेष्वात्मैक्यसिद्धौ परं
संनह्यद्भिरनादरात्सरणयो नानाविधा दर्शिताः ।
तन्मूलानिह संग्रहेण कतिचित्सिद्धान्तभेदान्धियः
शुद्ध्यै संकलयामि तातचरणव्याख्यावचःख्यापितान् ॥

इदानीं चिकीर्षितं प्रतिजानीते— **प्राचीनैरिति** । प्राचीनैराचार्यैरात्मैक्यसिद्धौ परमत्यन्तं संनह्यद्भिस्तात्पर्यवद्भिरात्मैक्यसिद्ध्युपायतया व्यवहारसिद्धविषयेषु भ्रान्तिमात्रसिद्धपदार्थेषु जीवेश्वरजगद्रूपेष्वनादरात्सरणयः प्रकारा नानाविधाः परस्परविरुद्धा दर्शिताः । अनादरादित्यनेन परस्परविरुद्धेषु जीवैकत्वनानात्वतत्प्रतिबिम्बत्वादिरूपप्रकारेष्वभिनिवेशवतामाचार्याणां भेदवादिनामिवानाप्तत्वं स्यादिति शङ्का निराकृता भवति । विवक्षितवस्तुप्रतिपत्त्युपायतया विरुद्धनानाप्रकारप्रदर्शनमाचार्याणां न दोषाय भवति, किं त्वलंकारायैव भवति ; प्रतिपत्तॄणां प्रज्ञावैचित्र्येण कस्यचित्प्रतिपत्तुः केनचित्प्रकारेण मुक्तिसाधनब्रह्मात्मैक्यज्ञानलाभात् । तदुक्तं सुरेश्वराचार्यैः— 'यया यया भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि । सा सैव प्रक्रियेह स्यात्साध्वी सा चानवस्थिता ॥' इति । व्युत्पत्तिर्बोधः । प्रत्यक्चासावात्मा च प्रत्यगात्मा सर्वान्तरश्चिदात्मा तस्मिन्विषये । प्रक्रिया प्रकारः । इह वेदान्तशास्त्रे । साध्वी निरवद्या गुणभूता । सा चानवस्थिता नानाविधा । परिमले दीक्षितैरप्येतदुक्तम्— 'अकल्पितवस्तुप्रतिपत्त्युपायतया कल्प्यमानेषु पदार्थेषु

तेषूपपादनापेक्षान्पक्षान्प्रायो यथामति ।
युक्त्योपपादयन्नेव लिखाम्यनतिविस्तरम् ॥ ३ ॥

तत्र तावत् 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इत्यधीतसाङ्गस्वाध्यायस्य वेदान्तैरापातप्रतिपन्ने ब्रह्मा-

---

विरोधो न दोषावहः, यथा तात्त्विकारुन्धतीप्रतिपत्त्युपायतया नानापुरुषैः कल्प्यमानासु तत्प्राच्योदीच्यादिनक्षत्ररूपासु स्थूलारुन्धतीषु विरोधो न दोषावहः' इति । तन्मूलान्प्राचीनप्रदर्शितनानाविधसरणिमूलान् । इह स्वग्रन्थे । धियः शुद्ध्यै स्वबुद्धिपरिष्काराय; वस्तुतस्तु लोकानुग्रह एव प्रयोजनमिति बोध्यम् । तातचरणानां पितृचरणानां व्याख्यारूपैर्वचोभिः ख्यापिताञ्ज्ञापितान् । अनेन स्वस्य ब्रह्मविद्यामाचार्यादेव लब्धां दर्शयति स्वग्रन्थस्योपादेयत्वसिद्धये ॥ २ ॥

इह संग्रहेण सिद्धान्तभेदान् संकलयामीत्युक्तमेव विवृण्वन्, ननु प्राचीनग्रन्थसिद्धान्तानामेव स्वग्रन्थे संग्रह इत्युक्तमयुक्तम्, प्राचीनग्रन्थेष्वविद्यमानस्यापि युक्तिभिरुपपादनस्य स्वकीयसंग्रहग्रन्थे तत्र तत्रोपलम्भादिति शङ्कां निराकरोति— तेष्विति ॥ ३ ॥

स्वग्रन्थे प्रथमं श्रवणाविधिर्विचार्यत इत्याह— तत्र तावदिति । श्रवणाविधावधिकारिणं निर्दिशति— अधीतेति । वेदान्तैर्जनितापातप्रतिपत्तिविषये ब्रह्माभिन्नात्मनि सम्यग्दार्ढ्येनोदितोत्पन्ना जि-

त्मनि समुदितजिज्ञासस्य तज्ज्ञानाय वेदान्तश्रवणे विधिः प्रतीयमानः किंविध इति चिन्त्यते । तिस्रः खलु विधेर्विधा अपूर्वविधिर्नियमविधिः परिसंख्याविधिश्चेति । तत्र कालत्रयेऽपि कथमप्यप्राप्तस्य प्राप्तिफलको विधिराद्यः । यथा 'व्रीहीन्प्रोक्षति' इति । नात्र व्रीहीणां प्रोक्षणस्य संस्कारकर्मणो विना नियोगं मानान्तरेण कथमपि प्राप्तिरस्ति । पक्षप्राप्तस्याप्राप्तांशपरिपूरणफलको विधि-

---

ज्ञासा निर्णयरूपज्ञानेच्छा यस्येत्यर्थः । अधीतवेदस्यापि शिक्षाकल्पव्याकरणादीनां वेदाङ्गानामध्ययनाभावे सति व्युत्पत्तेरभावाज्जिज्ञासाहेतुभूतापातप्रतिपत्तिरपि न संभवेदित्यभिप्रेत्याधीतसाङ्गस्वाध्यायस्येत्युक्तम् । न च निर्दोषवेदान्तजन्याया ब्रह्मात्मप्रतिपत्तेः कथमापातत्वमिति वाच्यम् । नाहं ब्रह्मेति प्रत्यक्षविरोधादिशङ्कया प्रमारूपायामपि ब्रह्मात्मप्रतिपत्तावप्रामाण्यशङ्कास्पदत्वरूपस्यापातत्वस्य संभवादिति भावः । वेदान्तश्रवणे श्रोतव्य इति विधिः प्रतीयमान इति संबन्धः । **तज्ज्ञानायेति** । अप्रामाण्यशङ्कानास्पदब्रह्मात्मज्ञानायेत्यर्थः । खलुशब्देनापूर्वविधित्वादिप्रकारत्रयस्य पूर्वतन्त्रे प्रसिद्धिर्द्योत्यते । **कालत्रयेऽपीति** । कथमपि दृष्टार्थत्वेनादृष्टार्थत्वेन वा केनापि प्रकारेण कालत्रयेऽपि कदापि विधिं विना प्राप्तिरहितस्य प्रोक्षणादेः प्राप्तिफलको विधिराद्योऽपूर्वविधिरित्यर्थः । व्रीहीनिति द्वितीयाश्रुत्या व्रीहीणां संस्कार्यत्वावगमात्प्रोक्षणस्य संस्कारकर्मत्वमुक्तमिति मन्तव्यम् । **नियोगमिति** । विधायकश-

द्वितीयः । यथा 'व्रीहीनवहन्ति' इति । अत्र विध्यभावेऽपि पुरोडाशप्रकृतिद्रव्याणां व्रीहीणां तण्डुलनिष्पत्त्याक्षेपादेवावहननप्राप्तिर्भविष्यतीति न तत्प्राप्त्यर्थोऽयं विधिः । किं त्वाक्षेपादवहननप्राप्तौ तद्वदेव लोकावगतकारणत्वाविशेषान्नखविदलनादिरपि पक्षे प्राप्नुयादित्यवहननाप्राप्तांशसद्भावात्तदंशपरिपूरणफलकः । द्वयोः शेषिणोरेकस्य शेषस्य वा, एकस्मिञ्शेषिणि द्वयोः शेषयोर्वा नित्यप्राप्तौ शेष्यन्तरस्य शेषान्तरस्य वा निवृत्ति-

---

न्दमित्यर्थः । **पुरोडाशेति** । दर्शपूर्णमासयोराग्नेयादियागानामुत्पत्तौ पुरोडाशद्रव्यं विहितम् । व्रीहयस्तूत्पन्ने यागे यागानुवादेन विहिताः । तथा च व्रीहीणामुत्पन्नशिष्टानामुत्पत्तिशिष्टपुरोडाशावरुद्धे यागे साक्षात्साधनत्वायोगात्पुरोडाशप्रकृतिद्रव्यत्वेन यागसाधनत्वं पर्यवस्यति । पुरोडाशप्रकृतित्वं च व्रीहीणां तण्डुलनिष्पत्तिद्वारकम् । तण्डुलनिष्पत्तिश्च स्वकारणमाक्षिपति । तण्डुलनिष्पत्तौ च कारणमन्वयव्यतिरेकाभ्यामवहननं निश्चितमिति विधिं विना विधित्सितावहननप्राप्तिरस्तीत्यर्थः । नन्ववहननस्य लोकतः प्राप्तौ तस्य लोकत एव नित्यप्राप्तिरपि स्यादित्यत आह— **किं त्वित्यादिना । आक्षेपादिति** । तण्डुलनिष्पत्त्याक्षेपादित्यर्थः । किं त्ववहननाप्राप्तांशसद्भावात्तदंशपरिपूरणफलक इति संबन्धः । **द्वयोरिति । द्वयोः** शेषिणोरेकस्य शेषस्य नित्यप्राप्तौ शेष्यन्तरस्य निवृत्तिफल-

फलको विधिस्तृतीयः । यथाग्निचयने 'इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते' इति, यथा वा चातुर्मास्यान्तर्गतेष्टिविशेषे गृहमेधीये 'आज्यभागौ यजति' इति । अग्निचयनेऽश्वरशनाग्रहणं गर्दभरशनाग्रहणं चेति द्वयमनुष्ठेयम् । तत्राश्वरशनाग्रहणे 'इमामगृभ्णन्रशनाम्—' इति मन्त्रो लिङ्गादेव रशनाग्रहणप्रकाशनसामर्थ्यरूपान्नित्यं प्राप्नोतीति न तत्प्राप्त्यर्थस्तदप्राप्तांशपरिपूरणार्थो वा विधिः । किं तु लिङ्गाविशेषाद्गर्दभरशनाग्रहणेऽपि मन्त्रः प्राप्नुयादिति तन्निवृत्त्यर्थः । तथा गृहमेधीयस्य दर्शपूर्णमासप्रकृतिकत्वादतिदेशादेव नित्यमाज्यभागौ प्राप्नुत इति न तत्र विधिस्तत्प्राप्त्यर्थस्तदप्राप्तांशपरिपूरणार्थो वा । किं त्वतिदेशात्प्रयाजादिकमपि प्राप्नुयादिति तन्निवृत्त्यर्थः । गृहमेधीयाधिकरणपूर्वपक्षरीत्येद-

---

कः, एकस्मिञ्शेषिणि द्वयोः शेषयोर्नित्यप्राप्तौ शेषान्तरस्य निवृत्तिफलको वा विधिस्तृतीय इति योजना । **न तदिति** । प्राप्तत्वान्न तत्प्राप्त्यर्थः, नित्यप्राप्तत्वान्न तदप्राप्तांशपरिपूरणार्थो वेत्यर्थः । **अतिदेशादेवेति** । 'प्रकृतिवद्विकृतिः कर्तव्या' इत्येवंरूपादित्यर्थः । **न तत्र विधिरिति** । 'आज्यभागौ यजति' इति विधिराज्यभागयोः प्राप्त्यर्थो न भवति, विधिं विना प्राप्तत्वात्; तयो-

मुदाहरणं यत्र क्वचिदुदाहर्तव्यमित्युदाहृतम्। न च नियमविधावपि पक्षप्राप्तावहननस्याप्राप्तांशपरिपूरणे कृते तदवरुद्धत्वात्पाक्षिकसाधनान्तरस्य नखविदलनादेर्निवृत्तिरपि लभ्यत इतीतरनिवृत्तिफलकत्वाविशेषान्नियमपरिसंख्ययोः फलतो विवेको न युक्त इति शङ्क्यम्। विधितोऽवहननियमं विनाक्षेपलभ्यस्य नखविदलनादेर्निवर्तयितुमशक्यतयाप्राप्तांशपरिपूरणरूपस्य नियमस्य

रप्राप्तांशपरिपूरणार्थो वा न भवति, नित्यप्राप्तत्वात्। किं तु तन्निवृत्त्यर्थ इति योजना। ननु 'आज्यभागौ यजति' इति विधेरतिदेशप्राप्तेतराङ्गपरिसंख्यायकत्वं न सिद्धान्त इत्यत आह— **गृहमेधीयाधिकरणेति**। **नियमविधावपीति**। परिसंख्याविधाविव नियमविधावपीत्यर्थः। **तदवरुद्धत्वादिति**। अवहननेनैवावरुद्धत्वात्तण्डुलनिष्पत्त्याक्षेपस्य शान्तत्वादित्यर्थः। **फलत इति**। नियमविधेः पक्षप्राप्तावहननादिक्रियादिविधायकत्वात्, परिसंख्याविधेश्च नित्यप्राप्तक्रियादिविधायकत्वान्नियमपरिसंख्याविध्योः स्वरूपतो विवेकलाभेऽपि फलतो भेदो न युक्त इत्यर्थः। नियमस्य नियमविधिफलत्वोपगमे हेतुद्वयमाह— **प्राथम्यादित्यादिना**। **प्रत्यासन्नत्वादिति**। विधिं प्रति प्रत्यासन्नत्वादित्यर्थः। विधेयक्रियागतत्वं प्रत्यासन्नत्वे हेतुः। इतरनिवृत्त्यपेक्षया प्रथमोपस्थितत्वरूपे प्राथम्ये हेतुमाह— **विधित इत्यादिना अशक्यतयेत्यन्तेन**।

प्राथम्याद्विधेयावहननगतत्वेन प्रत्यासन्नत्वाच्च तस्यैव नियमविधिफलत्वोपगमात्, तदनुनिष्पादिन्या अविधेयगतत्वेन विप्रकृष्टाया इतरनिवृत्तेः संनिकृष्टफलसंभवे फलत्वानौचित्यात् ॥

एवं विविक्तासु तिसृषु विधिविधासु किंविधः श्रवणविधिराश्रीयते ॥

प्रकटार्थकारादयः केचिदाहुः— अपूर्वविधिरेवायम-

इतरनिवृत्तेर्नियमविधिफलत्वानुपगमे हेतुद्वयमाह— **तदनुनिष्पादिन्या इत्यादिना** । अप्राप्तांशपरिपूरणोपस्थित्यनन्तरमुपस्थिताया इत्यर्थः । अनेन विलम्बितोपस्थितिकत्वमेको हेतुरुक्त इति मन्तव्यम् । द्वितीयहेतौ विप्रकृष्टत्वे हेतुमाह— **अविधेयेति** । निवृत्तिर्नामाननुष्ठेयता, अनङ्गता वा । सा चाविधेयनखविदलनादिगतेत्यर्थः ॥

इदानीं प्रकृतं श्रवणविधिविचारमारभते— **एवमिति ॥**

अप्राप्तत्वादिति । ब्रह्मसाक्षात्कारं प्रति वेदान्तश्रवणस्य साधनतया मानान्तरादनधिगतत्वेनाप्राप्तत्वादित्यर्थः । ननु मानान्तरादनधिगतत्वमसिद्धम्, अन्वयव्यतिरेकाभ्यां तदवगतिसंभवात्; वेदान्तश्रवणे हि सति ब्रह्मसाक्षात्कारो दृश्यतेऽसति च तस्मिन्न

प्राप्तत्वात् । न हि वेदान्तश्रवणं ब्रह्मसाक्षात्कारहेतुरित्यन्वयव्यतिरेकप्रमाणमस्ति । लोके कृतश्रवणस्यापि बहुशस्तदनुत्पत्तेरकृतश्रवणस्यापि गर्भगतस्य वामदेवस्य तदुत्पत्तेरुभयतो व्यभिचारात् । न वा श्रवणमात्रं श्रोतव्यार्थसाक्षात्कारहेतुरिति शास्त्रान्तरश्रवणे गृहीतः सामान्यनियमोऽस्ति, येनात्र विशिष्य हेतुत्वग्राहकाभावेऽपि सामान्यमुखेनैव हेतुत्वं प्राप्यत इत्याशङ्क्येत ।

दृश्यत इति तत्राह— **न हीति** । **तदनुत्पत्तेरिति** । साक्षात्कारानुत्पत्तेरित्यर्थः । **वामदेवस्येति** । तथा च श्रुतिः— 'गर्भ एवैतच्छयानो वामदेव एवमुवाच' इति । एवं पूर्वोक्तप्रकारेणैतद्ब्रह्मज्ञानजन्यां स्वकीयां शक्तिमुवाचेत्यर्थः । ननु गान्धर्वशास्त्रश्रवणे षड्जादिस्वरसाक्षात्कारस्तदभावे तदभाव इति दृष्टम् । तत्र श्रोतव्यार्थविशेषस्वरसाक्षात्कारं प्रति गान्धर्वशास्त्रविचारात्मकस्य श्रवणविशेषस्य कारणत्वग्रहकाले लाघवाच्छ्रोतव्यार्थसाक्षात्कारत्वावच्छिन्नं प्रति श्रवणमात्रस्य कारणत्वं गृह्यते । तथा च ब्रह्मसाक्षात्कारवेदान्तश्रवणयोर्विशिष्य कार्यकारणभावग्रहणाभावेऽपि ब्रह्मसाक्षात्कारस्यापि श्रोतव्यार्थसाक्षात्कारत्वाद्वेदान्तश्रवणस्यापि श्रवणत्वादुक्तसामान्यरूपेण वेदान्तश्रवणस्य ब्रह्मसाक्षत्कारहेतुत्वं प्राप्तमेवेति नासावपूर्वविधिरिति नेत्याह— **न वा श्रवणमात्रमिति** । धर्मश्रवणस्थलेऽदृष्टरूपस्यालौकिकश्रेयःसाधनताविशिष्टयागादिरूपस्य

गान्धर्वादिशास्त्रश्रवणस्य षड्जादिसाक्षात्कारहेतुत्वाभ्युपगमेऽपि कर्मकाण्डादिश्रवणात्तदर्थधर्मादिसाक्षात्कारादर्शनेन व्यभिचारात् । तस्मादपूर्वविधिरेवायम् । भाष्ये-

---

वा धर्मस्य साक्षात्कारायोग्यतया साक्षात्कारादर्शनेनोक्तसामान्यकार्यकारणभावस्य व्यभिचारान्न लाघवावतार इति तत्र गान्धर्वशास्त्रश्रवणस्यान्वयादिना स्वरसाक्षात्कारहेतुत्वग्रहेऽपि वेदान्तश्रवणस्य न ब्रह्मसाक्षात्कारहेतुत्वप्राप्तिरित्याह— **गान्धर्वादीति** । **कर्मेति** । अत्रादिपदेन हिरण्यगर्भादिदेवताप्रतिपादकवाक्यजातं गृह्यते । धर्मादीत्यादिपदेन हिरण्यगर्भादिदेवता गृह्यते । **तस्मादिति** । प्राप्त्यभावादित्यर्थः । अत्रार्थे संमतिमाह— **भाष्येऽपीति** । भाष्येऽप्यपूर्वविधिरेवाङ्गीकृत इति संबन्धः । अयमर्थो बृहदारण्यके श्रूयते— 'तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेद्बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः' इति । यस्मादतिक्रान्ता ब्राह्मणाः श्रवणादिसाधनैरात्मानं विदित्वा जीवन्मुक्तिव्यञ्जकं सकलविक्षेपरहितं परमहंसाश्रमं प्राप्ताः, तस्मादिदानींतनोऽपि ब्राह्मणो ब्रह्मसाक्षात्कारार्थी पाण्डित्यं निर्विद्य बाल्येन स्थातुमिच्छेत् । विचारप्रयोजिकापातरूपा बुद्धिरविद्यानिवृत्त्यादिकार्यासमत्वात्पण्डा, सास्य संजातेति पण्डितः, तस्य कृत्यं पाण्डित्यम्, श्रवणमित्यर्थः । बाल्यं नाम बालस्य शिशोः कृत्यं दम्भदर्पादिराहित्यम्; न तु बाले प्रसिद्धं यथेष्टचेष्टारूपम्, तस्य बहिर्मुखत्वापादकत्वेन विद्याविरोधित्वात् । दम्भादिराहित्यरूपभावशुद्धिवाचकेन बाल्यशब्देन

ऽपि 'सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्या-

भावशुद्धिसाध्यं मननं लक्ष्यते, श्रवणानन्तरभावित्वात्तस्य। बाल्य च पाण्डित्यं च निर्विद्य निश्चयेन लब्ध्वा। तदुभयं सम्यगनुष्ठायेति यावत्। अथानन्तरं मुनिः स्यान्मननशीलो भवेदिति विधिः। ध्यानमत्र मननम्, ध्याननिष्ठे व्यासादौ मुनिशब्दप्रयोगदर्शनाद्ध्यानं विना विचारमात्रविश्रान्ते तदप्रयोगाच्च। तथा चापूर्वत्वाद्यथा श्रवणे विधिः, एवं मौनस्य विद्यासहकारिणो विद्योत्पत्तौ साधनस्य विधिरेवाश्रयितव्यः, अपूर्वत्वादेवेति भाष्यार्थः। सूत्रार्थस्तु— तद्वतः श्रवणमननजनिततत्त्वनिर्णयरूपविद्यावतस्तत्त्वसाक्षात्कारार्थिनः संन्यासिनः पाण्डित्यबाल्यापेक्षया तृतीयं मौनम् 'अथ मुनिः' इति वाक्येन विधीयते। ननु बाल्यपाण्डित्याभ्यां निर्णीततत्त्वस्तत्त्वसाक्षात्कारार्थी ध्याने स्वयमेव प्रवर्तते रत्नतत्त्वसाक्षात्कारार्थीव रत्नतत्त्वगोचरप्रत्ययसंततौ। न च तत्त्वसाक्षात्कारार्थिनस्तत्साधनश्रवणादावपि स्वयमेव प्रवृत्तिः स्यादिति तत्रापि विधिवैयर्थ्यशङ्का तुल्येति वाच्यम्। विधिं विना वेदान्तश्रवणे प्रवृत्यसंभवस्य साधितत्वात्। तथा च मौनविधिर्व्यर्थ इत्यत्राह— पक्षेणेति। मौनस्य सहकार्यन्तरस्य विधिरङ्गीकर्तव्यः, पक्षेणाप्राप्तिसत्त्वात्। साक्षात्कारार्थं ध्याने स्वयमेव प्रवृत्तस्यापि विषयदर्शनप्राबल्याद्ध्यानस्य कदाचिदप्राप्तिः संभवति। तथा च मौनविधेरपूर्वविधित्वाभावेऽपि नियमविधित्वं सिध्यत्येव। सति च नियमविधौ तदतिक्रमे नियमादृष्टालाभेन साक्षात्कारानुदयभीत्या स्वभावप्राप्तमपि विषय-

दिवत्' इत्यधिकरणे 'विद्यासहकारिणो मौनस्य बाल्य-पाण्डित्यवद्विधिरेवाश्रयितव्यः, अपूर्वत्वात्' इति पा-ण्डित्यशब्दिते श्रवणेऽपूर्वविधिरेवाङ्गीकृत इति ॥

वेदान्तश्रवणस्य नित्यापरोक्षब्रह्मसाक्षात्कारहेतुत्वं

दर्शनं यत्नेन निवार्य ध्यान एव प्रवर्तत इति पक्षेणेति सूत्रभागा-भिप्रायः । ननु ब्रह्मविद्याप्रधाने प्रकरणे कथं ध्यानादिविधिः, वाक्यभेदप्रसङ्गादिति, नेत्याह— **विध्यादिवदिति** । अङ्गविधि-वदित्यर्थः । यथा प्रधानविधिपरे प्रकरणेऽवान्तरवाक्यभेदेन प्रया-जाद्यङ्गविधिः, तथा ब्रह्मविद्याङ्गध्यानादिविधिरित्यर्थः । उक्त-रीत्या मौनविधेर्नियमविधित्वे स्थिते भाष्यगतापूर्वत्ववचनं मौन-विध्यंशे पाक्षिकाप्राप्त्यभिप्रायं द्रष्टव्यम् । यथासूत्रं पक्षे प्राप्त्यभा-वादित्येव वक्तव्ये भाष्येऽपूर्वत्वादिति वचनं श्रवणविधिरपूर्वविधि-रेवेति ज्ञापनार्थम् । अप्राप्तिमात्रे च दृष्टान्तदार्ष्टान्तिकभावो विव-क्षित इति प्रकटार्थकारादीनामाशयः ॥

अपूर्वविधित्वपक्षं दूषयति— **वेदान्तश्रवणस्येति** । विचार-विशिष्टवेदान्तरूपस्य श्रवणस्य ब्रह्मसाक्षात्कारहेतुत्वं विधिं विनापि प्राप्तमित्यर्थः । ननु वाक्यस्य कथं साक्षात्कारहेतुत्वम्, इन्द्रियज-न्यज्ञानस्यैव साक्षात्कारत्वात्, अत आह— **अपरोक्षवस्त्विति** । अपरोक्षवस्तुविषयकत्वं ज्ञानस्यापरोक्षत्वम्, न त्विन्द्रियजन्यत्वम्; वस्त्वापरोक्ष्यं च वस्तुव्यवहारानुकूलचैतन्याभिन्नत्वमिति शाब्दाप-

नाप्राप्तम्, अपरोक्षवस्तुविषयकप्रमाणत्वावच्छेदेन साक्षात्कारहेतुत्वप्राप्तेः शाब्दापरोक्षवादे व्यवस्थापनात्। तदर्थमेव हि तत्प्रस्तावः। न च तावता ब्रह्मप्रमाणत्वे-

---

रोक्षवादे वक्ष्यते। तथा च नित्यापरोक्षत्वेन श्रुतिसिद्धब्रह्मरूपवस्तुविषयकत्वाद्वेदान्तजन्यज्ञानस्य साक्षात्कारत्वसिद्धिरित्यर्थः। नन्वस्मिञ्शास्त्रे शाब्दापरोक्षवादस्य का संगतिरत आह— **तदर्थमेव हीति।** वेदान्तानां ब्रह्मापरोक्षप्रमितिजनकत्वसिद्ध्यर्थमेव तद्वादसंगतिः, नान्यार्थमित्येतत्प्रसिद्धमित्यर्थः। नन्वपरोक्षवस्तुविषयकं प्रमाणं स्वविषये साक्षात्कारहेतुरिति शाब्दापरोक्षवादे प्रसाधनेन वेदान्तानामपि स्वविषये नित्यापरोक्षे ब्रह्मण्यपरोक्षज्ञानसामान्यहेतुत्वमेव प्राप्तम्, न तु सत्तानिश्चयरूपतत्साक्षात्कारहेतुत्वम्। तच्च विचारविशिष्टवेदान्तरूपश्रवणस्यैव युक्तम्, अन्यथा विचारात्प्रागपि सत्तानिश्चयप्रसङ्गात्। न च वाक्यजन्यसाक्षात्कारमात्रादेवाविद्यानिवृत्तिलक्षणफलसंभवात्सत्तानिश्चयरूपत्वं साक्षात्कारस्य नान्वेषणीयमिति वाच्यम्। तत्र तत्र ब्रह्मोपदेशप्रदेशेषु यावत्संशयनिवृत्ति पुनः पुनः प्रश्नप्रतिवचनलिङ्गेन, 'वेदान्तविज्ञानसुनिश्चितार्थाः' इत्यादिश्रुत्या, श्रुतब्रह्मणोऽपि यथापूर्वं संसारानुवृत्त्यनुमिताविद्यानिवृत्त्यभावरूपलिङ्गेन, श्रवणमननध्यानशमदमभक्तिवैराग्यादीनां ज्ञानपरिपाकहेतूनां विधिदर्शनलिङ्गेन च सत्तानिश्चयरूपब्रह्मसाक्षात्कारस्यैवाविद्यानिवृत्त्यर्थमिष्यमाणत्वात्। तथा च वेदान्तश्रवणस्योक्तरूपसाक्षात्कारहेतुत्वमप्राप्त-

नापातदर्शनसाधारणब्रह्मसाक्षात्कारहेतुत्वप्राप्तावप्यविद्यानिवृत्त्यर्थमिष्यमाणसत्तानिश्चयरूपतत्साक्षात्कारहेतुत्वं श्रवणस्य न प्राप्तमिति वाच्यम् । विचारमात्रस्य विचार्यनिर्णयहेतुत्वस्य ब्रह्मप्रमाणस्य तत्साक्षात्कारहेतुत्वस्य च प्राप्तौ विचारितवेदान्तरूपस्य श्रवणस्य तद्धेतुत्वप्राप्तेः । न चोक्त उभयतो व्यभिचारः, सहकारिवैकल्येनान्वयव्यभिचारस्यादोषत्वाज्जातिस्मरस्य जन्मान्तरश्रवणात्फलसंभवेन व्यतिरेकव्यभिचाराभावात् । अन्य-

---

मेवेति शङ्कते— न च तावतेति । वेदान्तानामिति शेषः । अपरोक्षवस्तुविषयकं प्रमाणं स्वविषये साक्षात्कारहेतुरिति प्रसाधनमात्रेणेत्यर्थः । अपरोक्षवस्तुविषयकं प्रमाणमपरोक्षज्ञानहेतुरिति स्थिते विचारो विचार्यनिर्णयहेतुरिति च स्थिते कार्यकारणभावद्वयमेलनेन प्रकृते विचारविशिष्टवेदान्तरूपं श्रवणं सत्तानिश्चयरूपब्रह्मसाक्षात्कारहेतुरिति सिध्यतीत्याह— **विचारमात्रस्येति** । **सहकारी**ति । चित्तैकाग्र्यादिरूपसहकारिवैकल्येनेत्यर्थः । उक्तकार्यकारणभावद्वयरूपप्रमाणबलेन श्रवणस्य ब्रह्मसाक्षात्कारहेतुत्वे सिद्धे वामदेवस्य जन्मान्तरीयं श्रवणादिकं कल्प्यते, यथा जातमात्रे जन्तौ दृश्यमानस्य भोगस्य कारणतया प्राग्भवीयं कर्म कल्प्यते तद्वत् । अतो न व्यतिरेकव्यभिचार इत्याह— **जातिस्मरस्ये**ति । पूर्वजातिं स्मरतो वामदेवस्येत्यर्थः । **अन्यथे**ति । उक्तरीत्या द्विवि-

था व्यभिचारेणैव हेतुत्वबाधे श्रुत्यापि तत्साधनासंभवात्, घटसाक्षात्कारे चक्षुरतिरेकेण त्वगिन्द्रियमिव ब्रह्मसाक्षात्कारे श्रवणातिरेकेणोपायान्तरमस्तीति शङ्कायां व्यतिरेकव्यभिचारस्याप्यदोषत्वात्। तथा च प्राप्तत्वान्नापूर्वविधिः। अत एव 'आवृत्तिरसकृदुपदेशात्' इत्यधिकरणभाष्ये 'दर्शनपर्यवसानानि हि श्रवणादीन्याव-

---

धव्यभिचारपरिहारानुपगम इत्यर्थः। व्यभिचारनिश्चयेन हेतुत्वाभावरूपबाधनिश्चयाच्छ्रवणविधेरबोधकतापत्त्या तवाप्यपूर्वविधिर्न स्यादित्यर्थः। ब्रह्मसाक्षात्कारे श्रवणमिव तपोविशेषादिकमुत्कृष्टजन्मप्राप्तिरूपं वा कारणान्तरमस्तीति शङ्काकाले वामदेवस्य कारणान्तराज्ज्ञानमुत्पन्नमिति शङ्कासंभवेन श्रवणस्य वामदेवे व्यतिरेकव्यभिचारज्ञानं श्रवणस्य साक्षात्कारहेतुत्वग्रहप्रतिबन्धकं न भवति। न चैकस्य पदार्थस्य ज्ञाने परस्परनिरपेक्षकारणद्वयासंभवेन ब्रह्मसाक्षात्कारे कारणान्तरसत्त्वशङ्कैव न जायत इति वाच्यम्। लोके तथा दृष्टत्वादित्याह— **घटेति**। वेदान्तश्रवणस्य ब्रह्मसाक्षात्कारहेतुत्वे विधिं विनैव प्राप्ते फलितमाह— **तथा चेति**। श्रवणविधेर्नियमविधित्वे सत्येवावृत्त्यधिकरणं संगच्छत इत्याह— **अत एवेति**। अपूर्वविधित्वाभावादेवेत्यर्थः। अत एवावृत्त्युपदेश इति संबन्धः। दर्शनपर्यवसानानीत्यारभ्य तण्डुलादिनिष्पत्तिपर्यवसानानीत्यन्तस्य भाष्यस्येयं योजना— दृष्टार्थानि श्रवणादीन्यावर्त्यमानानि सन्ति दर्शनपर्यवसानानि भवन्ति, यथावघातादीन्यावर्त्यमा-

र्त्यमानानि दृष्टार्थानि भवन्ति यथावघातादीनि तण्डुलादिनिष्पत्तिपर्यवसानानि' इति श्रवणस्य ब्रह्मदर्शनार्थस्य दृष्टार्थतया दार्शपूर्णमासिकावघातन्यायप्राप्तावृत्त्युपदेशः । अपूर्वविधित्वे तु स न संगच्छते, सर्वौषधावघातवत् । अग्निचयने 'सर्वौषधस्य पूरयित्वावहन्ति, अथैतदुपदधाति' इत्युपधेयोलूखलसंस्कारार्थत्वेन विहि-

---

नानि तण्डुलादिनिष्पत्तिपर्यवसानानि भवन्तीति । दृष्टार्थानीत्यत्र दृष्टं फलमात्मदर्शनमेव । अयं भावः— 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इत्यादिनात्मदर्शनोद्देशेन श्रवणादीनि विधीयन्ते । तत्र किमेतानि सकृदनुष्ठेयानि, किं वा यावदात्मदर्शनमावर्त्यानीति संशये; सकृदेवानुष्ठेयानि, तावता विधेश्चारितार्थ्यात्, यथाग्निचयने 'सर्वौषधस्य पूरयित्वावहन्ति' इतिवाक्यविहितं सर्वौषधीनामवहननमुपधेयोलूखलसंस्काररूपं सकृदेवानुष्ठीयते तद्वत् । तथा च सकृदनुष्ठितश्रवणादिजन्यमदृष्टं जन्मान्तरे ब्रह्मदर्शनहेतुरित्यपूर्वविधित्वं श्रवणादिविधीनामिति प्राप्ते, सिद्धान्तः— श्रवणाद्यावृत्तिः कर्तव्या । कुतः? असकृदुपदेशात् । तथा हि— भृगुवल्ल्यां भृगुं प्रति पितासकृत् 'तपसा ब्रह्म विजिज्ञासस्व' इत्युपदिशति । तप आलोचनं ब्रह्मविचारः । तथा च्छान्दोग्यषष्ठाध्याये श्वेतकेतुं पुत्रं प्रति पिता विचारपूर्वकमसकृत् 'तत्त्वमसि' इत्युपदिशति । किं च श्रवणादिभिरात्मदर्शनफले जननीये श्रवणाद्यावृत्तिरूपदृष्टद्वारसंभवेऽदृष्टद्वारकल्पनायोगात्तत्त्वंपदार्थयोः श्रवणाद्यावृत्तिं विना दुर्बो-

तस्यावघातस्य दृष्टार्थत्वाभावान्नावृत्तिरिति हि तन्त्रलक्षणे स्थितम्। अतो नियमविधिरेवायम्। तदभावे हि यथा वस्तु किंचिच्चक्षुषा वीक्षमाणस्तत्र स्वागृहीते सूक्ष्मे विशेषान्तरे केनचित्कथिते तदवगमाय तस्यैव चक्षुषः पुनरपि सप्रणिधानं व्यापारे प्रवर्तते, एवं मनसाहमिति गृह्यमाणे जीवे वेदान्तैरध्ययनगृहीतैरुपादिष्टं निर्विशेषब्र-

---

धत्वाच्च तण्डुलनिष्पत्तिफलकावघातवदावृत्तिरेव, न त्वग्निचयनान्तर्गतावघातवदनावृत्तिः, तदन्तर्गतावघातस्यादृष्टार्थत्वेन वैषम्यादिति व्युत्पादितमावृत्त्यधिकरणे। तदपूर्वविधिवादिनां न संगच्छत इति। तन्त्रलक्षणमेकादशाध्यायः। **अत इति**। प्राप्तत्वादित्यर्थः। अस्य हेतोरेवकारार्थेऽपूर्वविधित्वाभावेऽन्वयः। नियमविधित्वे हेतुमाह— **तदभावे हीति**। तदभावे मनस एव सावधानं तत्र प्रणिधाने कदाचित्पुरुषः प्रवर्तेतेति संबन्धः। मनसा गृह्यमाणात्मगतविशेषग्रहणाय मनोव्यापार एव यत्नेन प्रवृत्तौ दृष्टान्तमाह— **यथेति। किंचिदिति**। रत्नादीत्यर्थः। **तत्रेति**। रत्नादावित्यर्थः। **तस्यैवेति**। न तु व्यापारान्तर इत्येवकारार्थः। पुनरपि चक्षुषो व्यापारे प्रवर्तत इति संबन्धः। सप्रणिधानं यथा भवति तथा प्रवर्तत इति प्रवृत्तिक्रियाविशेषणं सप्रणिधानमिति। प्रणिधानं रत्नादिवस्त्वभिमुखतया चक्षुषः स्थापनम्, अनन्तरमुन्मीलनव्यापारानुकूलयत्नः प्रवृत्तिरिति प्रणिधानप्रवृत्त्योर्भेदः। **वेदान्तैरिति**। 'नेह नानास्ति किंचन' 'प्रज्ञानं ब्रह्म' 'अहं ब्रह्मास्मि' इत्यादिभि-

ब्रह्मचैतन्यरूपत्वमाकर्ण्य तदधिगमाय तत्र सावधानं मनस एव प्रणिधाने कदाचित्पुरुषः प्रवर्तेतेति वेदान्तश्रवणे प्रवृत्तिः पाक्षिकी स्यात् । 'अप्राप्य मनसा सह' इति

रित्यर्थः । इह ब्रह्मणि नाना ज्ञातृज्ञानज्ञेयरूपेण भिन्नं विशेषजातं किंचिदपि नास्ति, प्रकृष्टं ज्ञानं प्रज्ञानं नित्यस्वप्रकाशजीवचैतन्यं ब्रह्म, अहं बुद्ध्यादिसाक्षिभूतश्चिदात्मा ब्रह्मास्मि भवामीति श्रुतीनामर्थः । अध्ययनपदं साङ्गाध्ययनपरम् । आकर्ण्य परोक्षतया ज्ञात्वा श्रुतौ श्रद्दधानः । **तदधिगमायेति** । निर्विशेषस्वरूपत्वाधिगमायेत्यर्थः । **तत्रेति** । अहमिति गृह्यमाण आत्मनीत्यर्थः । सावधानमेकाग्रं यथा भवति तथा । नन्वहमिति गृह्यमाणे जीवे विशेषाकर्णनानन्तरं वेदान्तश्रवण इव कदाचिन्मनोव्यापारे वेदान्तविचारनिरपेक्षेऽपि प्रवृत्तिः स्यादित्ययुक्तम्, श्रुत्या ब्रह्मणि मनोविषयत्वनिषेधात्साङ्गाध्ययनवतस्तन्निषेधावगतिसंभवादिति नेत्याह— **अप्राप्येति** । 'अप्राप्य–' इति श्रुतिरनवहितमनोविषयेति संबन्धः । वाचः सत्यज्ञानादिशब्दा अप्राप्य शक्त्या ब्रह्माप्रतिपाद्य मनसा सह **निवर्तन्ते** लक्षणामाश्रयन्त इत्यर्थः । मनसा सहेत्यनेन मनसोऽपि **ब्रह्मणि** प्राप्तिर्निषिध्यत इति भावः । ब्रह्मणि मनोविषयत्वनिषेधवत्तद्विषयत्वमपि श्रुत्योच्यते । तथा च श्रुत्योर्विरोधे सति मनःशब्दितबुद्धिगम्यत्वप्रतिपादकश्रुतौ बुद्धेरग्रयत्वविशेषणबलात्तद्विषयत्वनिषेधश्रुतेरनवहितमनोविषयत्वनिषेधार्थकत्वप्रतीतेः साङ्गाध्ययनवत उक्तव्यवस्थाप्रतीतिसंभवान्मनस एव व्यापारे प्रवृत्तिर्दुर्वारेत्याह—

श्रुतिः 'मनसैवानुद्रष्टव्यम्' 'दृश्यते त्वग्रयया बुद्ध्या' इत्यपि श्रवणेनानवहितमनोविषयेति शङ्कासंभवात् । अथ वा 'जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः' इत्यादिश्रवणाद्भिन्नात्मज्ञानान्मुक्तिरिति भ्रमसंभवेन मुक्तिसाधनज्ञानाय भिन्नात्मविचाररूपशा-

---

मनसैवेति । अनवहितत्वमेकाग्रताशून्यत्वम् । **शङ्कासंभवादिति** । अग्रयत्वविशेषणसामर्थ्येन यथोक्तव्यवस्थानिश्चयसंभवादिति वक्तव्ये शङ्कासंभवादित्युक्तेरयमाशयः— निर्गुणब्रह्मसाक्षात्कारे मनसः करणत्वं नास्ति, औपनिषदत्वश्रुतिविरोधात् । सोपाधिकात्मसाक्षात्कारेऽपि न तस्य करणत्वम्, तत्साक्षात्कारस्य नित्यसाक्षिरूपत्वात् । 'मनसैवानुद्रष्टव्यम्' इत्यादौ तृतीया वाक्योत्थवृत्तिसाक्षात्कारं प्रति साधनत्वाभिप्रायेत्यादिकं सर्वं शाब्दापरोक्ष्यवादे वक्ष्यते । तथा च वस्तुतो मनसः करणत्वाभावान्मनस एव व्यापारे पुरुषः कदाचित्प्रवर्तेतेत्युत्प्रेक्षितं नियमविधिव्यावर्त्यमसंगतमेवेति । अत एव व्यावर्त्यान्तरमाह— **अथ वेति** । अधीतसाङ्गस्वाध्यायस्य हि 'तरति शोकमात्मवित्' इत्यादिश्रुत्यात्मज्ञानं मुक्तिसाधनमिति ज्ञानं भवति । न च साङ्गाध्ययनवतोऽपि लोके विचारमन्तरेणात्मतत्त्वज्ञानजन्मास्ति, आत्मप्रतिपादकवेदान्तेषु नानाविधयोजनासंभावनया तात्पर्यसंशयादेरनुभवसिद्धत्वात् । ततश्च मुक्तिसाधनज्ञानार्थी तज्ज्ञानप्रतिबन्धकतात्पर्यभ्रमसंशयादिनिरासाय वेदान्तविचारे प्रवर्तमानो यथा ब्रह्ममीमांसाशास्त्रविचारे प्रवर्तते तथैव

स्त्रान्तरश्रवणेऽपि पक्षे प्रवृत्तिः स्यादित्यद्वैतात्मपरवेदान्तश्रवणे नियमविधिरयमस्तु, इहात्मशब्दस्य 'इदं सर्वं

न्यायसांख्यादिशास्त्रविचारेऽपि कदाचित्प्रवर्तेत, तत्रापि तदभिमतयोजनया वेदान्तविचारसत्त्वात् । न च सांख्यादितर्कशास्त्रगतात्मविचारस्याद्वितीयात्मविचाररूपत्वाभावेन तादृशात्मनि वेदान्ततात्पर्यभ्रमसंशयाद्यनिवर्तकत्वाद्विशिष्य स्वयमेव तत्र तात्पर्यभ्रमादिहेतुत्वाच्च न तत्रात्मज्ञानार्थिनः प्रवृत्तिः संभवतीति वाच्यम् । जीवभिन्नपरमात्मज्ञानं मुक्तिसाधनमिति भ्रमेण तत्रापि प्रवृत्तिसंभवात् । न च साङ्गाध्ययनवतो भिन्नात्मज्ञानं मुक्तिसाधनमिति भ्रमो न संभवति 'अहं ब्रह्मास्मि' 'ब्रह्मविदाप्नोति परम्' इत्यादिवेदान्तेषु जीवाभिन्नपरमात्मज्ञानस्यैव मुक्तिसाधनत्वप्रतीतेरिति वाच्यम् । 'जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः' इति श्रुतिगतान्यशब्देन भ्रमसंभवात् । यदेशं सांनिधिमात्रेण बुद्ध्यादिप्रवर्तकमन्यं वस्तुगत्या बुद्ध्यादिभ्यो भिन्नम् । भ्रान्त्या बुद्ध्याद्यभिन्नत्वेन चिदात्मनो गृहीतत्वाद्भिन्नत्वोपदेशः सफलः । न तु जीवभिन्नमित्यर्थः, जीवब्रह्मभेदस्य प्रत्यक्षसिद्धतयोपदेशानपेक्षत्वात् । जुष्टमृषिसंघैः सेवितम्, 'ऋषिसंघजुष्टम्' इति श्रुत्यन्तरात् । पश्यतीशोऽहमिति साक्षात्करोति । तदास्येशस्य महिमानं महत्त्वोपलक्षितं स्वरूपमित्येति प्राप्नोति, वीतशोकश्च भवतीति श्रुतेर्वास्तवोऽर्थः । ननु श्रोतव्यवाक्य आत्मविचारमात्रं प्रतीयते न त्वद्वैतात्मविचारः, ततश्च कथमनेन विधिना भिन्नात्मविचारव्यावृत्तिलाभ इत्यत आह— **इहेति** ।

यदयमात्मा' इत्यादिप्रकरणपर्यालोचनयाद्वितीयात्मपरत्वात् । न हि वस्तुसत्साधनान्तरप्राप्तावेव नियमविधिरिति कुलधर्मः, येन वेदान्तश्रवणनियमार्थवत्त्वाय

अत्रादिपदेन 'आत्मनि दृष्टे सर्वं विदितं भवति' इति प्रतिज्ञावाक्यं गृह्यते । आत्मनः सर्वाधिष्ठानतया सर्वात्मकत्वे हि सत्यात्मनि विदिते तद्व्यतिरिक्तं सर्वं तत्त्वतो विदितं भवति, सर्वमात्मैवेति सामानाधिकरण्यं च सिध्यति, नान्यथा । तथा च श्रोतव्यवाक्यस्थमात्मपदमद्वितीयात्मपरमेवेति तद्विचारविधिना भिन्नात्मविचारव्यावृत्तिर्लभ्यत इति भावः । ननु तण्डुलनिष्पत्तावबहननस्येव नखविदलनादेरपि वस्तुतः साधनत्वात्तन्निवृत्तिफलको नियमविधिर्युक्तः । इह त्वद्वितीयब्रह्मसाक्षात्कारे भिन्नात्मविचारस्य न वस्तुतः साधनत्वमस्ति । अतस्तन्निवृत्तिफलको नियमविधिर्न युज्यते । न च मा भूद्भिन्नात्मविचारस्य व्यावर्त्यत्वम् ; नैतावता नियमविध्यनुपपत्तिः प्रकृतेऽस्ति, गुरुनिरपेक्षविचारभाषाप्रबन्धेतिहासपुराणादीनामुदाहरिष्यमाणानां सत्त्वानिश्चयरूपब्रह्मसाक्षात्कारहेतुत्वसत्त्वेन व्यावर्त्यत्वसंभवादिति वाच्यम् । तेषामप्यनन्तरमेव वक्ष्यमाणरीत्याविद्यानिवर्तकसत्त्वानिश्चयरूपसाक्षात्कारप्रतिबन्धककल्मषनिवृत्तिद्वारा गुर्वधीनवेदान्तविचारवत्साक्षात्कारहेतुत्वेन वस्तुतः साधनत्वाभावात् । तथा च न नियमविधिः संभवतीत्याशङ्क्याह— **न हीति । कुलधर्म इति ।** कुलक्रमागतधर्मस्य यथावश्यिकता, तथा वस्तुसत्साधनान्तरप्राप्तेरावश्यिकत्वं न हीत्यर्थः । **येनेति ।** आवश्यिकत्वेनेत्यर्थः । **नियमार्थवत्त्वायेति ।**

नियमादृष्टजन्यस्वप्रतिबन्धककल्मषनिवृत्तिद्वारा सत्तानिश्चयरूपब्रह्मसाक्षात्कारस्य वेदान्तश्रवणैकसाध्यत्वस्याभ्युपगन्तव्यत्वेन तत्र वस्तुसत्साधनान्तराभावान्न नियमविधिर्युज्यत इत्याशङ्क्येत । किं तु यत्र साधनान्तरतया संभाव्यमानस्य पक्षे प्राप्त्या विधित्सितसाधनस्य पाक्षिक्यप्राप्तिर्निवारयितुं न शक्यते तत्र नियमविधिः, तावतैवाप्राप्तांशपरिपूरणस्य तत्फलस्य सिद्धेः । अथ वा गुरुमुखाधीनादिव निपुणस्य स्वप्रयत्नमात्रसा-

---

विधित्सितगुर्वधीनवेदान्तश्रवणेनेव गुरुनिरपेक्षविचारादिनापि सत्तानिश्चयरूपसाक्षात्कारस्वरूपोत्पत्तिसंभवे सति गुर्वधीनवेदान्तश्रवणनियमस्य दृष्टप्रयोजनाभावान्नियमादृष्टमुपेयम् । तस्य च कल्मषनिवृत्तिद्वारा विद्यासाधनत्वं च कल्पनीयमेवेत्यर्थः । अदृष्टजन्यत्वं कल्मषनिवृत्तेर्विशेषणम् । स्वपदं साक्षात्कारपरम् । **आशङ्क्येतेति** । येनाशङ्क्येतेति संबन्धः । यत्र विधित्सितसाधनस्याप्राप्तिः पाक्षिकी निवारयितुं न शक्यते तत्र नियमविधिरित्यत्र हेतुमाह— **तावतैवेति** । अप्राप्तांशलाभमात्रेणेत्यर्थः । विधित्सितसाधनस्य पाक्षिक्यामप्राप्तौ हेतुमाह— **साधनान्तरतयेति** । सत्तानिश्चयरूपब्रह्मसाक्षात्कारस्य दृष्टफलतया तत्स्वरूपे वेदान्तविचारवद्भाषाप्रबन्धादेरप्यन्वयव्यतिरेकाभ्यामेव साधनत्वबुद्धिः संभाव्यते । पूर्वोक्तरीत्या वस्तुतः साधनत्वासंभवात्संभावनयेत्युक्तम् । व्यावर्त्यान्तरमाह— **अथ वेति** । मात्र-

ध्यादपि वेदान्तविचारात्संभवति सत्तानिश्चयरूपं ब्रह्मापरोक्षज्ञानम् । किं तु गुरुमुखाधीनवेदान्तवाक्यश्रवणनियमादृष्टमविद्यानिवृत्तिं प्रति कल्मषनिरासेनोपयुज्यत इति तदभावेन प्रतिबद्धमविद्यामनिवर्तयत्परोक्षकल्पमवतिष्ठते । न च ज्ञानोदयेऽज्ञानानिवृत्त्यनुपपत्तिः ।

पदेन गुरुर्व्यवच्छिद्यते । तर्ह्युक्तब्रह्मापरोक्षज्ञानेनैवाविद्यानिवृत्तिलक्षणफलसिद्धेः किं गुर्वधीनश्रवणविधिनेति शङ्कते— **किं त्विति** । श्रवणनियमविध्यर्थवत्त्वाय नियमादृष्टस्य ब्रह्मापरोक्षज्ञानेन स्वफलसिद्ध्यर्थमपेक्षणीयत्वकल्पनान्नोक्तापरोक्षज्ञानादविद्यानिवृत्तिसिद्धिरिति परिहरति— **गुरुमुखेति । निरासेनेति**। निरासद्वारेत्यर्थः । इतीत्यनन्तरं कल्पनीयत्वेनेति शेषः । **तदभावेनेति** । कल्मषनिरासाभावेन, कल्मषेणेत्यर्थः । **कल्पमिति** । तुल्यमित्यर्थः । न च नियमार्थवत्त्वायेत्यादिपूर्वग्रन्थे नियमादृष्टस्य कल्मषनिवृत्तिद्वारा ज्ञानोत्पत्तौ हेतुत्वमुक्तम्; अत्र चोत्पन्नेन ज्ञानेनाविद्यानिवृत्तौ जननीयायां तत्र प्रतिबन्धककल्मषनिरासद्वारा श्रवणनियमादृष्टस्य साधनत्वोक्तौ पूर्वापरविरोध इति वाच्यम् । मतभेदेन विरोधाभावात् । नन्वेवमप्युत्पन्ना ब्रह्मविद्या स्वकार्याविद्यानिवृत्तये नियमादृष्टसाध्यां कल्मषनिवृत्तिमपेक्षत इत्ययुक्तम्, प्रमात्वाच्छुक्त्यादिप्रमावदिति मत्वा शङ्कते— **न च ज्ञानोदय इति । अनिवृत्त्यनुपपत्तिरिति** । अज्ञाननिवृत्तिरेव स्यादित्यर्थः ।

प्रतिबन्धकाभावस्य सर्वत्रापेक्षितत्वेन सत्यपि प्रत्यक्षविशेषदर्शन उपाधिना प्रतिबन्धात्प्रतिबिम्बभ्रमानिवृत्तिवत्तदनिवृत्त्युपपत्तेः । एवं च लिखितपाठादिनापि स्वाध्यायग्रहणप्रसक्तौ गुरुमुखाधीनाध्ययननियमविधिवत्स्वप्रयत्नमात्रपूर्वकस्यापि वेदान्तविचारस्य सत्तानिश्चयरूपब्रह्मसाक्षात्कारार्थत्वेन पक्षे प्राप्तौ गुरुमुखाधीन-

---

शुक्तिप्रमास्थलेऽन्यापेक्षाभावेऽपि प्रतिबिम्बभ्रमस्थले विशेषदर्शनस्य प्रतिबन्धकाभावापेक्षादर्शनेन ब्रह्मविद्याया अपि तदपेक्षोपपत्तिरिति परिहरति— **प्रतिबन्धकाभावस्येति** । यद्यपि प्रतिबन्धकाभावस्य सिद्धान्ते न कुत्रापि हेतुत्वम्, तथाप्यप्रतिबद्धा सामग्री कार्यहेतुरित्युपगमादस्त्येवावच्छेदकतया प्रतिबन्धकाभावापेक्षेति भावः । **तदनिवृत्त्युपपत्तेरिति** । गुरुरहितविचारसाध्यविद्ययाविद्यानिवृत्त्यभावोपपत्तेरित्यर्थः । श्रवणनियमविधिं सदृष्टान्तमुपपादयति— **एवं चेति** । गुरुरहितविचारस्य व्यावर्त्यस्य लाभे सतीत्यर्थः । **लिखितेति** । अभ्युदयनिःश्रेयसकामस्य वेदार्थानुष्ठानं विना नाभ्युदयादिसिद्धिः । तदनुष्ठानं च वेदार्थज्ञानं विना न संभवति । तदर्थज्ञानं च स्वाध्यायपदवाच्यवेदावाप्तिं विना न संभवति । वेदावाप्तिं प्रति च गुरुमुखोच्चारणानूच्चारणलक्षणमध्ययनं लिखितपाठादिश्च साधनत्वेन लोके प्रसिद्धम् । तथा चाध्ययनविधिवाक्येन वेदाध्ययनं नियम्यते— अध्ययनेनैवाक्षरावाप्तिं संपादयेदिति । तेन च लिखितपाठादिव्यावृत्तिर्लभ्यते यथा,

श्रवणनियमविधिरयमस्तु । न च 'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्' इति गुरूपसदनविधिनैव गुरुरहितविचारव्यावृत्तिसिद्धेर्विफलो नियमविधिरिति शङ्क्यम् । गुरूपसदनस्य श्रवणाङ्गतया श्रवणविध्यभावे तद्विधिरेव नास्तीति तेन तस्य वैफल्याप्रसक्तेः । अन्यथाध्ययनाङ्ग-

---

तथा प्रकृतेऽपीत्यर्थः । ननु ब्रह्मविज्ञानार्थं गुर्वभिगमनं श्रूयते । न च तस्य श्रुतिजन्ये ब्रह्मज्ञाने साक्षात्साधनत्वमस्ति । अतस्तेन ज्ञाने जननीये द्वारापेक्षायां गुर्वधीनविचार एव योग्यतया द्वारत्वेन कल्प्यते न त्वदृष्टम्, दृष्टद्वारसंभवेऽदृष्टकल्पनायोगात् । गुर्वभिगमनस्य गुर्वधीनविचारद्वारा ज्ञानसाधनत्वेऽभिगमनविधिना सिद्धे, तेनैव गुरुरहितविचारव्यावृत्तिसिद्धेर्निष्फलः श्रोतव्यवाक्ये श्रवणनियमविधिरिति शङ्कते— **न चेति** । 'ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन' इति पूर्ववाक्ये निर्दिष्टो ब्राह्मणः स इति परामृश्यते । निर्वेदं वैराग्यं प्राप्नुयादिति यावत् । केन प्रकारेणेत्यत आह श्रुतिः— अकृतो नित्यो मोक्षः कृतेन कर्मणा नास्तीति । अतो मोक्षं ब्रह्मज्ञानसाध्यं ज्ञात्वा तज्ज्ञानार्थं गुरुमभिगच्छेदित्यर्थः । श्रोतव्यवाक्येन गुर्वधीनविचारे नियमिते सति तदङ्गतया गुर्वभिगमनं विधीयते । श्रवणविध्यभावे तूपगमनावधेरात्मलाभाभावान्न श्रवणविधिवैफल्यापादकतेति परिहरति— **गुरूपसदनस्येति** । अङ्गविधिना प्रधानविधिवैफल्यापादनेऽतिप्रसङ्गमाह— **अन्यथेति** ।

भूतोपगमनविधिनैव लिखितपाठादिव्यावृत्तिरित्यध्ययननियमो विफलः स्यात्। अथ वाद्वैतात्मपरभाषाप्रबन्धश्रवणस्य पक्षे प्राप्त्या वेदान्तश्रवणे नियमविधिरस्तु। न च 'न म्लेच्छितवै' इत्यादिनिषेधादेव तदप्राप्तिः। शास्त्रव्युत्पत्तिमान्यद्वेदान्तश्रवणमशक्यमिति पुरुषार्थनिषेधमुल्लङ्घ्यापि भाषाप्रबन्धेनाद्वैतं जिज्ञासमानस्य तत्रापि

विधिनैवेति। गुरूपगमनस्याक्षरावाप्तिं प्रत्यध्ययनरूपदृष्टद्वारसंभवे तत्त्यागायोगादिति भावः। व्यावर्त्यान्तरमाह— **अथ वेति**। **नियमविधिरस्त्विति**। अद्वैतं जिज्ञासमानेन वेदान्ता एव विचारणीया न भाषाप्रबन्धा इति विचारविषयनियमविधिरस्त्वित्यर्थः। ननु म्लेच्छशब्दितस्य भाषाप्रबन्धरूपाव्यक्तशब्दस्योच्चारणं पुरुषेण न कर्तव्यम्, अन्यथा पुरुषः प्रत्यवायी भवेदिति निषेधबलादेव श्रवणाधिकारिणो भाषाप्रबन्धव्यावृत्तिसिद्धेः किं विधिनेति शङ्कते— **न च नेति**। यदि भाषानिषेधस्य ज्ञानाङ्गत्वं स्यात्, तदा तन्निषेधमुल्लङ्घ्य तत्र प्रवृत्तौ ज्ञानानुत्पत्तिभयेन तत्र न प्रवर्तेत। न त्वेतदस्ति, पुरुषार्थत्वान्निषेधस्य। तथा च तन्निषेधमुल्लङ्घ्यापि कदाचिद्भाषाप्रबन्धश्रवणे प्रवृत्तिः संभवतीति परिहरति— **शास्त्रव्युत्पत्तीति**। उल्लङ्घने हेतुमाह— **अशक्यमितीति**। अशक्यत्वे हेतुर्व्युत्पत्तिमान्यम्। ननु यस्याधिकारिणो व्युत्पत्तिमान्यद्वेदान्तश्रवणमशक्यं तं प्रति वेदान्तविचारे नियमविधिः कथम्, अश-

प्रवृत्तिसंभवेन नियमविधेरर्थवत्त्वोपपत्तेः। अभ्युपगम्यते हि कर्त्रधिकरणे व्युत्पादितं पुरुषार्थेऽनृतवदननिषेधे सत्यपि दर्शपूर्णमासमध्ये कुतश्चिद्धेतोरङ्गीकृतनिषेधोल्लङ्घनस्याविकलां क्रतुसिद्धिं कामयमानस्यानृतवदने प्रवृत्तिः स्यादिति पुनः क्रत्वर्थतया दर्शपूर्णमासप्रकरणे 'नानृतं वदेत्' इति निषेध इति क्रत्वर्थनिषेधस्यार्थवत्त्वम्। यद्वा यथा 'मन्त्रैरेव मन्त्रार्थस्मृतिः साध्या' इति नियमस्तन्मूलकल्पसूत्रात्मीयग्रहणकवाक्यादीनामपि

क्यार्थे विध्यनुपपत्तेरिति चेत्, न। मन्दस्य भाष्यादिरूपवेदान्तविचारासंभवेऽपि वेदान्तप्रकरणविचारस्य मन्दाधिकारिणोऽपि संभवात्। तदुक्तं पञ्चदश्याम्— 'मन्दप्रज्ञं तु जिज्ञासुमात्मानन्देन बोधयेत्। बोधयामास मैत्रेयीं याज्ञवल्क्यो निजां प्रियाम्॥' इति। आत्मानन्दनामकप्रकरणेनेत्यर्थः। पुरुषार्थनिषेधमुल्लङ्घ्यापि महाफलसिद्ध्यर्थं निषिद्धे प्रवृत्तिस्तन्निवर्तनेन विधेरर्थवत्ता च मीमांसकैरपि स्वीकृतेत्याह— **अभ्युपगम्यते हीति**। अङ्गीकृतं निषेधोल्लङ्घनं येन स तथोक्तः। कुतश्चिदित्यनेन सूचितं हेतुमाह— **अविकलामिति। अर्थवत्त्वमिति**। व्युत्पादितमिति पूर्वेणान्वयः। व्यावर्त्यान्तरमाह— **यद्वेति। मन्त्रैरेवेति**। 'अग्निर्मूर्धा—' इत्यादयो मन्त्राः श्रुत्यादिभिः क्रतौ विनियुक्ताः। ते किमुच्चारणमात्रेणादृष्टं कुर्वन्तः क्रतावुपकारं कुर्वन्त्युत दृष्टेनैवार्थस्मरणेनेति संदेहे

पक्षे प्राप्तेः, तथा वेदान्तमूलेतिहासपुराणपौरुषेयप्रब-

कल्पसूत्रादिनाप्यनुष्ठेयाद्यर्थस्मृतिसंभवाददृष्टार्था मन्त्रा इति प्राप्ते, राद्धान्तः— मन्त्राणामर्थप्रकाशनद्वारा क्रतूपकारकत्वम्, दृष्टद्वार-संभवेऽदृष्टद्वारकल्पनानुपपत्तेः। तथा च फलवदनुष्ठानापेक्षितक्रि-यातत्साधनस्मरणद्वारा मन्त्राणां कर्माङ्गत्वम्। न च क्रियातत्साध-नस्मरणस्य मन्त्रैरिव कल्पसूत्रादिभिरपि संभवान्न तस्य द्वारत्वमिति वाच्यम्। 'मन्त्रैरेव मन्त्रार्थः स्मर्तव्यः' इति नियमविधिसंभवात्। नियमस्त्वदृष्टार्थो भविष्यति। तदुक्तम्— 'यत्र दृष्टं न लभ्येत स्यात्तत्रादृष्टकल्पना' इति। तथा च यथा मन्त्रनियमविधिना मन्त्रमूलककल्पसूत्रादिव्यावृत्तिः क्रियते तथाधीतसाङ्गस्वाध्यायेन ब्रह्म जिज्ञासुना वेदान्ता एव विचार्या इति वेदान्तनियमे कृते, तन्मूलकेतिहासादीनां व्यावृत्तिर्लभ्यत इति दृष्टान्तदार्ष्टान्तिकग्रन्थयो-रर्थः। याज्ञिकैः प्रणीतमनुष्ठानसमवेतपदार्थसंग्राहकं वाक्यं ग्रहणक-वाक्यम्। इतिहासो महाभारतम्। पौरुषेयप्रबन्धः प्रबोधचन्द्रोद-यादिः। उदाहृतानि व्यावर्त्यान्युपलक्षणम्, अन्येषामपि व्यावर्त्यानां संभवात्। तथा हि— 'तत्कारणं सांख्ययोगाभिपन्नम्' इति श्रुतौ ब्रह्मप्रतिपत्तिद्वारा तत्प्राप्तिं प्रत्युपायद्वयं निर्दिष्टम्— श्रवण-मननध्यानात्मकः सांख्यशब्दार्थ एकः, तृतीयपरिच्छेदे वक्ष्यमाणो योगपदोदित उपासनामार्गस्त्वपरः। तत्प्रकृतं कारणं जगत्कारण-त्वोपलक्षितं ब्रह्म सांख्ययोगाभ्यां ज्ञानद्वाराभिपन्नमाभिमुख्येन प्रत्यक्त्वेन प्राप्तमिति श्रुत्यर्थः। तथा सगुणब्रह्मोपासनमुपासकस्य

न्धानामपि पक्षे प्राप्तिसंभवान्नियमोऽयमस्तु । सर्वथा नियमविधिरेवायम् । 'सहकार्यन्तरविधिः—' इत्यधिकरणभाष्येऽपूर्वविधित्वोक्तिस्तु नियमविधित्वेऽपि पाक्षिकाप्राप्तिसद्भावात्तदभिप्रायेति तत्रैव पक्षेणेति पाक्षिकाप्राप्तिकथनपरसूत्रपदयोजनेन स्पष्टीकृतमिति विवरणानुसारिणः ॥

कृतश्रवणस्य प्रथमं शब्दान्निर्विचिकित्सं परोक्षज्ञान-

ब्रह्मलोकं गतस्य तत्त्वसाक्षात्कारद्वारा ब्रह्मप्राप्तिहेतुरिति ब्रह्ममीमांसायां प्रसिद्धम् । तथा तपोविशेषादिकं साक्षात्तत्त्वज्ञानसाधनत्वेन पुराणादिप्रसिद्धमुदाहर्तव्यम् । तथा च गुरुवेदान्तेषु श्रद्धावतः कुशलस्य श्रवणाधिकारिणस्तत्त्वज्ञानार्थमुक्तेषु योगमार्गसगुणब्रह्मोपासनतपोविशेषादिष्वपि वेदान्तश्रवण इव कदाचित्प्रवृत्तिः स्यादिति तन्निवृत्तिफलको नियमविधिः संभवति । नियमविधिपक्षमुपसंहरति— **सर्वथेति** । ननु नियमविधित्वपक्षे 'सहकार्यन्तरविधिः—' इत्यधिकरणभाष्यविरोध इत्यत आह—**सहकार्यन्तरेति** । अपूर्वविधित्वस्य निराकृतत्वादिति भावः । **तत्रैवेति** । तदधिकरणभाष्य एवेत्यर्थः ॥

श्रोतव्यवाक्येन निर्विचिकित्सपरोक्षशाब्दज्ञानोद्देशेनैव श्रवणं विधीयते न तु शाब्दसाक्षात्कारोद्देशेन, शब्दस्य स्वतः परोक्षज्ञानजननस्वाभाव्याद्विचारसहकृतस्यापि शब्दस्य क्वापि साक्षात्कार-

मेवोत्पद्यते, शब्दस्य परोक्षज्ञानजननस्वाभाव्येन क्लृप्त-सामर्थ्यानतिलङ्घनात्। पश्चात्तु कृतमननिदिध्यासनस्य सहकारिविशेषसंपन्नात्तत एवापरोक्षज्ञानं जायते । तत-स्तत्तांशगोचरज्ञानजननासमर्थस्यापीन्द्रियस्य तत्समर्थ-संस्कारसाहित्यात्प्रत्यभिज्ञानजनकत्ववत्स्वतोऽपरोक्षज्ञा-

---

हेतुत्वादर्शनाच्च । परोक्षज्ञानफलकोऽप्ययं नापूर्वविधिः, विधिं वि-नापि शब्दे शाब्दज्ञानहेतुत्वस्य विचारे विचार्यनिर्णयहेतुत्वस्य च प्राप्तौ तदुभयबलेन विचारविशिष्टवेदान्तरूपश्रवणस्य निर्वि-चिकित्सशाब्दज्ञानहेतुत्वप्राप्तेः साधितत्वात् । किं तु पूर्वोक्तान्येव व्यावर्त्यान्यादाय नियमविधिरेवेति मतमाह— **कृतश्रवणस्य प्रथ-ममिति** । ननु मननिदिध्यासने किं निर्विचिकित्सशाब्दपरोक्ष-ज्ञानोद्देशेनैव विधीयेते किं वा शाब्दापरोक्षं प्रति । नाद्यः, मनना-द्यनुष्ठानात्प्राक्छ्रवणमात्रादेव तत्सिद्धेः । न द्वितीयः, शब्दस्य परोक्ष-ज्ञानजनन एव सामर्थ्यस्य त्वदभिमतत्वादित्याशङ्कां द्वितीयपक्षप-रिग्रहेण परिहरति— **पश्चादिति** । शाब्दनिर्विचिकित्सपरोक्षज्ञानान-न्तरमित्यर्थः । कृते मननिदिध्यासने येन स तथोक्तः । **तत एवेति** । शब्दादेवेत्यर्थः । सहकारिवैचित्र्यात्कार्यवैचित्र्यदर्शनादिति भावः । तदेवोदाहरणेन दर्शयति— **तत्तांशेति** । **तत्समर्थेति** । तत्तांश-गोचरज्ञानजननसमर्थेत्यर्थः । **शब्दस्येति** । शब्दस्यापरोक्षज्ञानज-नकत्वं युक्तमित्युत्तरत्र संबन्धः । ननु तत्तासंस्कारस्येन्द्रियसह-

नजननासमर्थस्यापि शब्दस्य विधुरपरिभावितकामिनी-साक्षात्कारस्थलेऽन्तःकरणस्येव तत्समर्थत्वेन क्लृप्तभावनाप्रचयसाहित्यादपरोक्षज्ञानजनकत्वं युक्तम्। ततश्च शब्दस्य स्वतः स्वविषये परोक्षज्ञानजनकत्वस्य भावनाप्रचयसहकृतज्ञानकरणत्वावच्छेदेन विधुरान्तःकरणवदप-

---

कारित्वेन क्लृप्तावपि भावनाप्रचयस्य ज्ञानकरणसहकारित्वेन साक्षात्कारजननसामर्थ्यं न क्वापि क्लृप्तमित्याशङ्क्याह— **विधुरेति। अन्तःकरणस्येवेति।** अन्तःकरणस्य बाह्यपदार्थरूपकामिनीगोचरसाक्षात्कारासमर्थस्यापि कामिनीगोचरभावनाप्रचयसहकृतस्य कामिनीसाक्षात्कारहेतुत्ववदित्यर्थः। तत्समर्थत्वेनेत्यत्र साक्षात्कारजननं तच्छब्दार्थः। नन्वेवमपि शब्दसहकारित्वेन मननिध्यानात्मकभावनाप्रचयस्य मानान्तरेण शाब्दसाक्षात्कारं प्रति हेतुत्वाप्रसिद्धेर्मननादिविधेरपूर्वविधित्वप्रसङ्ग इति, नेत्याह—**ततश्चेति।** परोक्षज्ञानजनकत्वस्यापरोक्षज्ञानजनकत्वस्य च प्राप्तत्वादिति संबन्धः। परोक्षज्ञानहेतुत्वस्य प्राप्त्यभिधानं श्रवणविधेर्नियमविधित्वार्थमिति द्रष्टव्यम्। **विधुरेति।** भावनासहकृतस्य विधुरान्तःकरणस्य कामिनीसाक्षात्कारहेतुत्वदर्शनस्थले बहिरस्वतन्त्रमप्यन्तःकरणं बाह्यवस्तुभावनासहकृतं सत्तत्साक्षात्कारहेतुरिति विशिष्य कार्यकारणभावे ग्रहीतव्ये लाघवाद्बाधकाभावाच्च भावनाप्रचयसहकृतं ज्ञानकरणत्वावच्छिन्नमपरोक्षज्ञानं प्रति हेतुरिति कार्यकारणभावो गृह्यत इति भावः। अत्र शब्दस्य परोक्षज्ञानजननस्वाभाव्य-

रोक्षज्ञानजनकत्वस्य च प्राप्तत्वात्पूर्ववन्नियमविधिरिति तदेकदेशिनः ॥

वेदान्तश्रवणेन न ब्रह्मसाक्षात्कारः किं तु (मनसैव), 'मनसैवानुद्रष्टव्यम्' इति श्रुतेः 'शास्त्राचार्योपदेशशमादिसंस्कृतं मन आत्मदर्शने करणम्' इति गीताभाष्यवच-

---

मेवासिद्धम्, ज्ञानगतपरोक्षत्वादेः करणाविशेषप्रयुक्तत्वस्य निराकरिष्यमाणत्वात् । अतः शाब्दापरोक्षं प्रति मननादेरिव **श्रवण**स्यापि विधिर्नानुपपन्न इत्यम्बरसं सूचयति— तदेकदेशिन इति । विवरणैकदेशिन इत्यर्थः ॥

मतान्तरमाह— **वेदान्तश्रवणेन न ब्रह्मसाक्षात्कार इति ।** शब्दस्य परोक्षज्ञानजननस्वाभाव्येन क्लृप्तसामर्थ्यानतिलङ्घनादिति हेतुरत्रापि मते द्रष्टव्यः । किं तर्हि ब्रह्मसाक्षात्कारे करणमिति पृच्छति— **किं त्विति ।** मन एव करणमिति मन्वानस्तत्र मानमाह— **मनसैवेति** । क्वचित्किं त्वित्यनन्तरं मनसैवेति पाठोऽपि पृथगस्ति । तदा नानुपपत्तिः । **तत्रैव भाष्यसंमतिमाह— शास्त्रेति** । शास्त्रं तत्त्वमस्यादिवाक्यम् । अचार्योपदेश आचार्यकर्तृकवाक्यार्थविवरणरूपः । आदिपदं दमतितिक्षादिसंग्रहार्थम् । तथा चात्र ब्रह्मसाक्षात्कारस्य मानसत्वप्रतिपादनेन तत्करणमनःसहकारितयैव मननिदिध्यासनयोर्विधिः, न तु पूर्वमत इव शाब्दसाक्षात्कारकरणशब्दसहकारितयेति पूर्वमता-

नाच । श्रवणं तु निर्विचिकित्सपरोक्षज्ञानार्थमिति तादर्थ्येनैव नियमविधिरिति केचित् ॥

अपरोक्षज्ञानार्थत्वेनैव श्रवणनियमविधिः, 'द्रष्टव्यः' इति फलकीर्तनात् । तादर्थ्यं च तस्य करणभूतमनःसहकारितयैव न साक्षात्, शब्दादपरोक्षज्ञानानङ्गीकारात् । न च तस्य तेन रूपेण तादर्थ्यं न प्राप्तमित्यपूर्वविधित्व-

---

दस्य मतस्य विशेषः सूचितो भवति । श्रवणे तु पूर्वमतादविशेषमाह— **श्रवणं त्विति । तादर्थ्येनैवेति** । निर्विचिकित्सशाब्दपरोक्षज्ञानार्थत्वेनैवेत्यर्थः ॥

मतान्तरमाह— **अपरोक्षेति** । ननु तर्करूपविचारात्मकस्य श्रवणस्य स्वतः साक्षात्कारहेतुत्वायोगात्तदनुग्राह्यं प्रमाणं वक्तव्यम् । तच्च किमित्यपेक्षायामाह— **तादर्थ्यं चेति** । साक्षात्कारार्थत्वं चेत्यर्थः । **तस्येति** । वेदान्तश्रवणस्येत्यर्थः । **करणभूतेति** । ब्रह्मसाक्षात्कारकरणभूतेत्यर्थः । न तु ब्रह्मसाक्षात्कारकरणशब्दसहकारितयेत्येवकारार्थः । **न साक्षादिति** । वेदान्तश्रवणस्य साक्षात्त्वातन्त्र्येण साक्षात्कारजनकत्वं नास्ति, तस्य तर्करूपतया स्वतः प्रमाणत्वाभावादिति भावः । मनःसहकारितयैवेत्येवकारार्थे हेतुमाह— **शब्दादिति । तस्येति** । वेदान्तश्रवणस्येत्यर्थः । **तेन रूपेणेति** । साक्षात्कारकरणमनःसहकारित्वेन रूपेणेत्यर्थः । साक्षात्कारकरणमनःसहकारित्वेन प्राप्त्यभावेऽपि

प्रसङ्गः । श्रावणेषु षड्जादिषु समारोपितपरस्पराविवेकनिवृत्त्यर्थगान्धर्वशास्त्रश्रवणसहकृतश्रोत्रेण परस्परासंकीर्णतद्याथार्थ्यापरोक्ष्यदर्शनेन प्रकाशमाने वस्तुन्यारोपितविवेकनिवृत्त्यर्थशास्त्रसद्भावे तच्छ्रवणं तत्साक्षात्कारजनकेन्द्रियसहकारिभावेनोपयुज्यत इत्यस्य क्लप्तत्वादित्यपरे ॥

तत्करणेन्द्रियसहकारित्वेन प्राप्तिरस्तीत्याह— **श्रावणेष्विति ।** श्रोत्रजन्यप्रत्यक्षविषयेष्वित्यर्थः । **षड्जादिष्विति** । षड्जादयो ध्वनिविशेषाः । तेषु गान्धर्वशास्त्रश्रवणरहितस्य परस्परमविवेकः समारोपितो वर्तते । परस्परमविवेको नाम परस्परतादात्म्यरूपः परस्परधर्मवत्तारूपश्चेति बोध्यम् । गान्धर्वशास्त्रविचारवतश्च तद्विचारसहकृतश्रोत्रेन्द्रियेणैव षड्जादयः परस्परं विविक्ततयानुभूयन्ते । एवं मनसान्तरिन्द्रियेणानुभूयमानेषु चिदात्मनः प्राणशरीरादिषु परस्परं तादात्म्यादिरूपाविवेकः प्राणिनामनुभवसिद्धः । अत्रापि यद्यारोपनिवर्तकं शास्त्रमस्ति, तदा तत्सहकृतमन्तरिन्द्रियमेव बुद्ध्यादिविविक्तमात्मानं ब्रह्मस्वरूपतया वेदान्तैः प्रतीयमानं साक्षात्कारयेदिति विचारवान्पुरुषः षड्जादिसाक्षात्कारस्थले कार्यकारणभावं कल्पयतीत्याह— **प्रकाशमान इति** । तच्छ्रवणं शास्त्रश्रवणम् । **तत्साक्षात्कारेति** । प्रकाशमानवस्तुसाक्षात्कारेत्यर्थः । उपयुज्यते विविक्ततया वस्तुसाक्षात्कारहेतुर्भवतीत्यर्थः । **इत्यस्येति** । इत्युक्तप्रकारेणास्य साक्षा-

वेदान्तवाक्यानामद्वितीये ब्रह्मणि तात्पर्यनिर्णयानुकूलन्यायविचारात्मकचेतोवृत्तिविशेषरूपस्य श्रवणस्य न ब्रह्मणि परोक्षमपरोक्षं वा ज्ञानं फलम्, तस्य शब्दादिप्रमाणफलत्वात्। न चोक्तरूपविचारावधारिततात्पर्य-

---

त्कारकरणभूतेन्द्रियसहकारित्वस्य वेदान्तश्रवणे विधिं विनैव प्राप्तत्वान्नापूर्वविधित्वप्रसङ्ग इत्यर्थः ॥

उक्तेषु पक्षेषु शाब्दाद्यापरोक्ष्योद्देशेन वा शाब्दपरोक्षोद्देशेन वा **श्रवण**विधिरिति स्थितम्। इदानीं प्रतिबन्धनिरासोद्देशेनैव तद्विधिरिति मतान्तरमाह— **वेदान्तवाक्यानामिति**। प्रमेयासंभावनानिवृत्त्यनुकूलन्यायविचारात्मकमननव्यावृत्तये तात्पर्यनिर्णयानुकूलेत्युक्तम्। तन्निर्णयानुकूलन्यायश्चोपक्रमोपसंहारैकरूप्यादय इति बोध्यम्। चेतोवृत्तिविशेषपदेन यत्नसाध्यक्रियारूपा वृत्तिर्विवक्षिता। न तु तदसाध्या ज्ञानरूपा वृत्तिर्विवक्षिता, ज्ञानस्य विध्ययोग्यताया वक्ष्यमाणत्वात्। ब्रह्मणीति विषयसप्तमी। **तस्ये-ति**। ज्ञानस्येत्यर्थः। आदिपदं प्रत्यक्षादिसंग्रहार्थम्। ज्ञानोद्देशेन श्रवणं विधीयत इति मताभिमतं श्रवणशब्दार्थमनूद्य निराकरोति— **न चोक्तरूपेति**। ब्रह्मजिज्ञासासूत्रस्य साधनचतुष्टयसंपन्नेन ब्रह्मज्ञानाय वेदान्तविचारः कर्तव्य इत्यर्थः, सौत्रजिज्ञासापदस्य विचारलक्षकत्वात्। तस्य च श्रोतव्यवाक्यं मूलम्। ततश्च श्रोतव्यवाक्ये यदि श्रवणं ज्ञानरूपम्, तदा 'श्रोतव्यः' इत्यस्य

विशिष्टशब्दज्ञानमेव श्रवणमस्तु, तस्य ब्रह्मज्ञानं फलं युज्यत इति वाच्यम् । ज्ञाने विध्यनुपपत्तेः श्रवणविधेर्विचारकर्तव्यताविधायकजिज्ञासासूत्रमूलत्वोपगमाच्चोहापोहात्मकमानसक्रियारूपविचारस्यैव श्रवणत्वौचित्यात् । न च विचारस्यैव तात्पर्यनिर्णयद्वारा तज्जन्यतात्पर्यभ्रमादिपुरुषापराधरूपप्रतिबन्धकविगमद्वारा वा ब्रह्मज्ञानं

श्रवणरूपज्ञानकर्तव्यतार्थः स्यात् । तथा च जिज्ञासासूत्रश्रोतव्यवाक्ययोर्मूलमूलिभावो न स्यात्, एकार्थत्वाभावादित्याह— **श्रवणविधेरिति** । ऊहो न्यायाभासेभ्यो निष्कृष्य न्यायानामुपादानम् । न्यायाभासनिराकरणमपोहः । ननु 'सदेव सोम्य' इत्यादि 'तत्सत्यं स आत्मा तत्त्वमसि' इत्येतदन्तं वाक्यजातमद्वितीयवस्तुपरम्, तत्प्रतिपादकोपक्रमोपसंहारवत्त्वादित्येवमात्मकस्य विचारस्यानुमितिरूपं तात्पर्यनिर्धारणं साक्षात्फलम् । **तद्द्वारा** तात्पर्यभ्रमादिरूपप्रतिबन्धकनिवृत्तिर्विचारस्य फलम् । तन्निवृत्तौ च वाक्यमप्रतिबन्धं सदद्वितीयब्रह्मबोधं जनयति । एवं श्रुत्यन्तरेष्वपीति वस्तुगतिः । तथा च श्रवणस्य साक्षाद्ब्रह्मज्ञानफलकत्वाभावेऽपि परम्परया तत्फलकत्वं स्यादिति शङ्कते— **न च विचारस्यैवेति** । अप्यर्थ एवकारः । तथा च यथा ज्ञानं शब्दप्रमाणस्य फलं तथा तद्विचारस्यापि फलमस्तु, शब्दप्रमाणफले ज्ञाने विचारस्यापि तात्पर्यनिर्णयद्वारा तदधीनप्रतिबन्धनिरासद्वारा वा हेतुत्वसंभवादित्यर्थः । तज्जन्यत्वं विगमविशेषणम् । भ्रमादिरेव पुरुषापराधः ।

फलमस्त्विति वाच्यम् । तात्पर्यज्ञानस्य शाब्दज्ञाने कारणत्वानुपगमात्कार्ये क्वचिदपि प्रतिबन्धकाभावस्य कारणत्वानुपगमाच्च तयोर्द्वारत्वानुपपत्तेर्ब्रह्मज्ञानस्य विचाररूपातिरिक्तकारणजन्यत्वे तत्प्रामाण्यस्य परतस्त्वापत्तेश्च । तस्मात्तात्पर्यनिर्णयद्वारा पुरुषापराधनिरासार्थ-

---

तात्पर्यज्ञानस्य द्वारत्वाभावे हेतुमाह— **तात्पर्यज्ञानस्येति** । प्रतिबन्धनिरासोपजननेनान्यथासिद्धत्वादिति भावः । तात्पर्यज्ञानस्य **शाब्दबोधं प्रति हेतुत्वाभावे** विचारस्य तात्पर्यनिर्णयसाध्यप्रतिबन्धकनिवृत्तिद्वारा शाब्दबोधहेतुत्वं दूरापास्तमिति मत्वा प्रतिबन्धकाभावस्याहेतुत्वे हेतुमाह— **कार्ये क्वचिदपीति** । सत्यामपि सामग्र्यां प्रतिबन्धवशात्कार्यं न जातमिति लोकव्यवहारविरोधात्प्रतिबन्धकाभावस्य सामग्र्यामन्तर्भावो नाङ्गीक्रियते । किं त्वप्रतिबन्धा सामग्री कार्यहेतुरिति स्वीकृत्य सामग्र्यामवच्छेदकतया दण्डत्वादिवदन्यथासिद्धिरेव स्वीक्रियत इति भावः । तात्पर्यानुमितिहेतुविचारात्मकानुमानस्य **शाब्दप्रमितिहेतुत्वे** दूषणमाह— **ब्रह्मज्ञानस्येति** । **अतिरिक्तेति** । शाब्दप्रमाणातिरिक्तेत्यर्थः । **परतस्त्वापत्तेरिति** । प्रामाण्याश्रयज्ञानस्यातिरिक्तकारणजन्यत्वरूपं प्रामाण्यस्योत्पत्तौ परतस्त्वं स्यादित्यर्थः । ततश्चापसिद्धान्त इति भावः । यदि श्रवणस्य न ब्रह्मज्ञानं फलं तर्हि किमुद्देशेन तद्विधिरत आह— **तस्मादिति** । ब्रह्मज्ञानैफलकत्वासंभवादित्यर्थः । नन्

त्वेनैव विचाररूपे श्रवणे नियमविधिः । 'द्रष्टव्यः' इति तु दर्शनार्हत्वेन स्तुतिमात्रं न श्रवणफलसंकीर्तनमिति संक्षेपशारीरकानुसारिणः ॥

ब्रह्मज्ञानार्थं वेदान्तश्रवणे प्रवृत्तस्य चिकित्साज्ञानार्थं चरकसुश्रुतादिश्रवणे प्रवृत्तस्येव मध्ये मध्ये व्यापारान्तरेऽपि प्रवृत्तिः पसज्यत इति तन्निवृत्तिफलकः 'श्रोत-

---

तर्हि कथम् 'द्रष्टव्यः' इति श्रवणफलकीर्तनं तत्राह— **द्रष्टव्य इति त्विति । स्तुतिमात्रमिति** । आत्मन इति शेषः । स्तुतिश्च तच्छ्रवणादौ प्रवृत्त्यर्थेति भावः ।

परिसंख्याविधिपक्षमाह— **ब्रह्मज्ञानार्थमिति** । ननु वाचस्पतिमते वक्ष्यमाणरीत्या वेदान्तश्रवणस्य नित्यप्राप्तिं सिद्धां कृत्वा परिसंख्याविधिपक्षप्रवृत्तिर्वाच्या । तथा च सति ज्ञानमुद्दिश्य श्रवणाद्यनुतिष्ठतः कथं व्यापारान्तरं प्रसज्येत यतस्तन्निवृत्तिफलकः परिसंख्याविधिः संभवेदित्याशङ्क्य ब्रह्मज्ञानसाधनत्वेन व्यापारान्तराप्रसक्तावपि भेदवासनावशादेव व्यापारान्तरं संभवतीति सदृष्टान्तमाह— **चिकित्सेति** । चिकित्सौषधम्, तज्ज्ञानस्य वैद्यकग्रन्थैकसाध्यत्वेन तज्ज्ञानाय चरकसुश्रुतादिसंज्ञकग्रन्थश्रवणे प्रवृत्तस्य तादर्थ्येन व्यापारान्तराप्रसक्तावपि यथा विषयवासनावशादेव तत्प्रवृत्तिस्तद्वदित्यर्थः । ननु चरकसुश्रुतादिग्रन्थश्रवणे प्रवृत्तस्य व्यापारान्तरसत्त्वेऽपि यथा चिकित्साज्ञानं निष्प्रत्यूहमुत्पद्यते

व्यः' इति परिसंख्याविधिः 'ब्रह्मसंस्थोऽमृतत्वमेति' इति च्छान्दोग्येऽनन्यव्यापारत्वस्य मुक्त्युपायत्वावधारणात्संपूर्वस्य तिष्ठतेः समाप्तिवाचितया ब्रह्मसंस्थाशब्दिताया ब्रह्मणि समाप्तेरनन्यव्यापारत्वरूपत्वात् 'तमे-

---

तथा प्रत्यहं वेदान्तश्रवणमनुतिष्ठतो मध्ये मध्ये लौकिकवैदिकव्यापारसत्त्वेऽपि ब्रह्मज्ञानोदयसंभवान्निष्फलः परिसंख्याविधिरित्याशङ्क्य श्रवणविध्यर्थवत्त्वाय निरन्तरमनुष्ठितश्रवणस्यैव ज्ञानसाधनत्वं न कादाचित्कस्य, अतो न नैष्फल्यमिति परिहारमभिप्रेत्य यथोक्तवाक्यार्थे श्रुतिस्मृतिवाक्यान्युदाहरति— **ब्रह्मसंस्थ इति**। न विद्यतेऽन्यो व्यापारो यस्य पुरुषस्य स तथा, तस्याभावस्तत्त्वम्, तस्येत्यर्थः। ब्रह्मविषयकश्रवणादिव्यापाराच्छमदमाद्युपबृंहितादन्यव्यापारशून्यत्वस्येति यावत्। तथा च संन्यासाधिकरणभाष्यम्— 'शमदमाद्युपबृंहितं ब्रह्मनिष्ठत्वं तस्य स्वधर्मः। तदतिक्रमे च तस्य प्रत्यवायः' इति। अवधारणं निश्चयः। ब्रह्मसंस्थपदेनायमर्थः कथं लभ्यत इत्यत आह— **संपूर्वस्येति**। न च ब्रह्मणि समाप्तिर्नाम विदेहकैवल्यरूपो लय एवास्त्विति वाच्यम्। तथा सति पुनः 'अमृतत्वमेति' इति भागवैयर्थ्यापत्तेः। अतोऽमृतत्वप्राप्तिं प्रति ब्रह्मसंस्थतोपायत्वेन विधीयत इति वक्तव्यम्। अतो ब्रह्मणि समाप्तेरनन्यव्यापारत्वे पर्यवसानं भाष्ये कृतम्। तथा चानन्यव्यापारत्वस्य मुक्त्युपायत्वबोधकवाक्येनार्थान्मुमुक्षोर्व्यापारान्तरनिवृत्तिः क्रियत इति भावः। साक्षान्निवृत्तिबोधकवाक्यमुदाह-

वैकं जानथ आत्मानमन्या वाचो विमुञ्चथ' इत्याथर्वणे कण्ठत एव व्यापारान्तरप्रतिषेधाच्च, 'आ सुप्तेरा मृतेः कालं नयेद्वेदान्तचिन्तया' इत्यादिस्मृतेश्च । न च ब्रह्मज्ञानानुपयोगिनो व्यापारान्तरस्य श्रवणेन सहैकस्मिन्साध्ये समुच्चित्य प्राप्त्यभावान्न तन्निवृत्त्यर्थः परिसंख्याविधिर्युज्यत इति वाच्यम् । 'सहकार्यन्तरविधिः' इत्यादिसूत्रे 'यस्मिन्पक्षे भेददर्शनप्राबल्यान्न प्राप्नोति तस्मिन्नियमविधिः' इति तद्भाष्ये च कृतश्रवणस्य शाब्दज्ञानमात्रात्कृतकृत्यतां मन्वानस्याविद्यानिवर्तकसाक्षात्कारोपयोगिनि निदिध्यासने प्रवृत्तिर्न स्यादित्यसाधनपक्षप्राप्तिमात्रेण निदिध्यासने नियमविधेरभ्युपगत-

---

रति— तमेवैकमिति । यस्मिन्नाधारे द्यावापृथिव्यादि समस्तं जगदध्यस्तं तमेवाधारमेकरूपमात्मानं जानथ हे मुमुक्षवः । ज्ञानसाधनत्वेन चानात्मप्रतिपादकशब्दोच्चारणादित्यागः कर्तव्य इत्याह श्रुतिः— 'अन्या वाचो विमुञ्चथ' इति । नियमविधिवादी शङ्कते— **न च ब्रह्मज्ञानानुपयोगिन इति ।** प्रतिबन्द्या समाधत्ते— **सहकार्यन्तरेति ।** न प्राप्नोति, मौनमिति शेषः । उदाहृतसूत्रभाष्ययोर्नियमविधिवादिसंमतं तात्पर्यं परिसंख्याविधिवादी दर्शयति— **कृतश्रवणस्येति ।** मन्वानस्येत्यनन्तरं व्यापारान्तरेऽपि प्रवर्तमानस्येति शेषः । सूत्रे तद्भाष्ये चासा-

तया तन्न्यायेनासाधनस्य समुच्चित्य प्राप्तावपि तन्निवृत्तिफलकस्य परिसंख्याविधेः संभवादिति 'नियमः परिसंख्या वा विध्यर्थोऽत्र भवेद्यतः। अनात्मादर्शनेनैव परात्मानमुपास्महे ॥' इति वार्त्तिकवचनानुसारिणः केचिदाहुः ॥

'आत्मा श्रोतव्यः' इति मननादिवदात्मविषयकत्वेन निबध्यमानं श्रवणमागमाचार्योपदेशजन्मात्मज्ञानमेव, न

धनपक्षप्राप्तिमात्रेण नियमविधेरभ्युपगततयेति संबन्धः। वार्त्तिकेऽत्रेत्यस्य श्रोतव्यवाक्य इत्यर्थः। अत्र नियमो विध्यर्थो भवेदित्येकः संबन्धः। यदि नित्यप्राप्तत्वान्नियमविधिर्न संभवति तदा परिसंख्या वा विध्यर्थो भवेदित्यपरः संबन्धः। परिसंख्याया विध्यर्थत्वे हेतुर्यत इत्यादिः। परात्मोपासनेऽन्यव्यापाररहिते वयं मुमुक्षवो यतः प्रवृत्ता इत्यर्थः ॥

श्रवणादीनां विधेयत्वपक्षं मतभेदेन दर्शयित्वा तेषां विध्यभावपक्षमाह— **आत्मा श्रोतव्य इतीत्यादिना। निबध्यमानमिति।** यथात्मविषयकत्वेनोच्यमानं मननं निदिध्यासनं च ज्ञानरूपं तथा श्रवणमपि ज्ञानरूपमेवेत्यर्थः। **नेति।** विचारस्यानुष्ठेयक्रियारूपस्य साक्षादात्मविषयकत्वानुपपत्तेरिति भावः। ननु मननादिवदिति दृष्टान्तोऽनुपपन्नः, मननिदिध्यासनयोर्ज्ञानत्वाभावात्। मननं

हि युक्त्यालोचनरूपो व्यापारः । 'ध्यै चिन्तायाम्' इत्यनुशास्त्रानुरोधेन निदिध्यासनं ध्यानक्रिया, न ज्ञानम् । अतः कथं मननादिवदिति मननिदिध्यासनयोर्ज्ञानत्वं सिद्धतया निर्दिश्यत इति चेत्, उच्यते— आत्मा ब्रह्मस्वभावश्चिद्रूपत्वाद्ब्रह्मवत्, बुद्ध्यादिः कल्पितो दृश्यत्वाच्छुक्तिरजतादिवदित्याद्यनुमितेरेव मननत्वोपगमात् । तदुक्तं चतुर्थमैत्रेयीब्राह्मणवार्त्तिके— 'आगमार्थविनिश्चियै मन्तव्य इति भण्यते । वेदशब्दानुरोध्यत्र तर्कोऽपि विनियुज्यते । पदार्थविषयस्तर्कस्तथैवानुमितिर्भवेत्॥' इति । श्रुतार्थदार्ढ्याय तर्करूपं मननं विधीयते । सोऽपि तर्कः श्रुत्यविरुद्ध एव मननत्वेन विधीयते । तच्च मननं तत्त्वंपदार्थविषयकमेव । न तु वाक्यार्थविषयकम्, तस्य वाक्यैकमेयत्वात् । तथा-शब्दः समुच्चयार्थः । यथा मननात्मकतर्कस्य वेदाविरोधित्वं तथानुमितिरूपत्वं चेत्यर्थः । अत एव न्यायतन्त्रेऽपि मननस्यानुमितिरूपत्वमिष्यते । निदिध्यासनमपि वार्त्तिककारमते ज्ञानमेव । तथा हि—बृहदारण्यके चतुर्थाध्यायषष्ठाध्यायगतयोर्मैत्रेयीब्राह्मणयोराम्नायते— 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति, अनन्तरं चतुर्थे 'मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेन' इति, षष्ठे तु 'मैत्रेय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते' इति । तत्रोभयत्राक्षेपवार्त्तिकम्— 'अनुवादे यथोक्तानां प्रक्रान्ते दर्शनादिषु । विज्ञानेनेत्यथ कथं निदिध्यासनमुच्यते॥' इति । 'अयमात्मा द्रष्टव्यः' इत्यादिनोक्तानामनुवादे प्रक्रान्ते सति दर्शनादिषु मध्ये श्रुतं निदिध्यासनं विज्ञानेनेति पदेन कथमुच्यतेऽनूद्यते ।

दर्शनादीनां समानपदैरेवानुवाददर्शनेन निदिध्यासनस्यापि तद्वन्नि-दिध्यासनेनेत्यनुवादः स्यात्, न तु विज्ञानपदेनेत्यर्थः। तस्य समाधानवार्त्तिकम्— 'ध्यानाशङ्कानिवृत्त्यर्थं विज्ञानेनेति भण्यते। निदिध्यासनशब्देन ध्यानमाशङ्क्यते यतः॥' इति। निदिध्यासन-शब्दस्य ध्यानवाचित्वाच्छ्रवणमननानन्तरमनुभवाङ्गत्वेन ध्यानम् 'निदिध्यासितव्यः' इत्यनेन विधीयत इति यतः पूर्ववादिभिरा-शङ्क्यते, अतस्तदाशङ्कानिवृत्त्यर्थमनुवादावसरे स्थित्वा पूर्ववाक्ये निदिध्यासनं विज्ञानरूपं विवक्षितं न तु ध्यानम्, अतो नात्र ध्यानविधिशङ्कावकाश इत्याशयवती श्रुतिर्विज्ञानपदेन निदिध्यास-नमनुवदतीति वार्त्तिकार्थः। ध्यानस्यानुभवाङ्गत्वे को दोषो यत-स्तदाशङ्का श्रुत्या निरस्यत इत्यत आह तदनन्तरं वार्त्तिकार्धम्— 'विज्ञानोत्पत्तिहेतुत्वं ध्यानादेः प्रागवादिषम्' इति। ध्यानस्य तन्नियोगस्य वा विज्ञानोत्पत्तिहेतुत्वं प्रति यद्दूषणं वक्तव्यं तत्प्रागेव संबन्धग्रन्थादावुक्तवानस्मीत्यर्थः। तत्र ह्युक्तम्— तत्त्वंपदार्थगोच-रश्रवणमननाभ्यासकृदभ्यस्ताभ्यां तत्त्वंपदलक्ष्यार्थनिर्णये सति वाक्यार्थज्ञानस्यैवावसरप्राप्तत्वेन ध्यानविधेरनवकाशात्। न च ताभ्यां प्रमाणप्रमेयासंभावनानिवृत्तावपि विपरीतप्रत्ययेन प्रतिब-न्धान्न वाक्यार्थबोधोत्पत्तिरिति वाच्यम्। श्रवणमननयोरेवासकृद-भ्यासमहिम्ना विपरीतप्रत्ययस्यापि निवृत्तिसंभवाद्वाक्यार्थबोध-निवर्त्यस्य विपरीतप्रत्ययस्य तदप्रतिबन्धकत्वाच्च, लोके विपर्ययस्य स्वविरोधिदर्शनोत्पत्तिप्रतिबन्धकत्वादर्शनादिति। ननु यदि निदि-ध्यासनं न ध्यानं किं तर्हि तदित्यत आह वार्त्तिकम्— 'अपराय-

तात्पर्यविचाररूपमिति न तत्र कोऽपि विधिः । अत एव समन्वयसूत्र आत्मज्ञानविधिनिराकरणानन्तरं भाष्यम्— "किमर्थानि तर्हि 'आत्मा वा अरे द्रष्टव्यः'

त्तबोधोऽत्र निदिध्यासनमुच्यते' ध्यानस्येव पुरुषयत्नानपेक्षत्वमपरायत्तत्वम् । 'यावद्यथोक्तविज्ञानमाविर्भवति भास्वरम् । श्रवणादिक्रिया तावत्कर्तव्येह प्रयत्नतः ॥' मननमादिपदार्थः । 'श्रुत्वा मत्वाथ तं साक्षादात्मानं प्रतिपद्यते ।' अथ श्रवणमननपरिपाकजनिततत्त्वंपदलक्ष्यार्थनिर्णयानन्तरमेव वाक्येन ब्रह्मात्मानं साक्षादपरोक्षतया प्रतिपद्यतेऽनुभवतीत्यर्थः । वाक्यार्थज्ञानवतः कृतकृत्यतामाह— 'अनन्यायत्तविज्ञाने श्रवणादेरुपायतः । जाते नापेक्षते किंचित्प्रतीचोऽनुभवात्परम् ॥' इति । वृत्तिज्ञाने जाते सति तेन प्रतीचो ब्रह्मत्वस्फुरणादनन्तरं न किंचिदपेक्षत इत्यर्थः । एवं वार्त्तिककारमते निदिध्यासनस्य ज्ञानत्वाभ्युपगमान्न मननादिवदिति दृष्टान्तासिद्धिः । न च वार्त्तिककारमते 'निदिध्यासितव्यः' इत्यस्य 'द्रष्टव्यः' इत्यनेन पौनरुक्त्यं स्यादिति वाच्यम् । दर्शनोद्देशेन श्रवणमननविधानानन्तरं पुनः फलकीर्तनस्य तदुपसंहारपरत्वोपपत्तेः । अथ वा 'द्रष्टव्यः' इति विचारप्रयोजकापातदर्शनानुवादः, 'निदिध्यासितव्यः' इति तु विचारफलभूतसाक्षात्कारानुवाद इति पौनरुक्त्यपरिहारसंभवात् । श्रवणादौ विध्यभावे भाष्यसंमतिमाह— अत एवेति । श्रवणमननिदिध्यासनानां दर्शनवज्ज्ञानरूपत्वेन क्रियारूपत्वेऽपि वक्ष्यमाणविधया नि-

इत्यादीनि वचनानि विधिच्छायानि । स्वाभाविकप्रवृत्ति-

त्यप्राप्तत्वेन च विध्ययोग्यत्वादेवेत्यर्थः । **किमर्थानीति** । व्यर्थानि स्युरिति यावत् । आदिपदम् 'श्रोतव्यः' इत्यादेः संग्रहार्थम् । **विधिच्छायानीति** । 'अध्येतव्यः' इति प्रसिद्धविधितुल्यानीत्यर्थः । अत्र तव्यप्रत्ययैर्दर्शनश्रवणादिगता प्रशंसा लक्ष्यते । तथा च यो हि मुमुक्षुरात्मदर्शनश्रवणादीन्येव मुक्तिसाधनानीति ज्ञात्वापि संन्यासब्रह्मचर्यादिसहितश्रवणाद्यनुष्ठानक्लेशमनुसंचिन्त्य न तत्र सर्वोत्साहेन प्रवर्तते किं तु यथाप्राप्तान्येव वर्णाश्रमानुरूपाणि कर्माणि चोपासनानि चानुतिष्ठंस्तत्रापि निर्वृतिं न लभते तैरात्यन्तिकपुरुषार्थलाभानुसंधानेन, तं प्रत्यात्मदर्शनश्रवणादिप्रशंसात्मकं प्रवर्तते 'आत्मा वै' इत्यादिवाक्यं तस्य सर्वोत्साहेन श्रवणादावेव प्रवृत्तिर्भवत्वित्याशयेन । अतो न विधिप्रत्ययानां वैयर्थ्यमिति भाष्यकारः परिहरति— **स्वाभाविकेति** । आदिपदेन "यो हि बहिर्मुखः प्रवर्तते पुरुष इष्टं मे भूयादनिष्टं मे मा भूदिति न च तत्रात्यन्तिकं पुरुषार्थं लभते, तमात्यन्तिकपुरुषार्थावाप्तिं स्वाभाविकात्कार्यकरणसंघातप्रवृत्तिगोचराद्विमुखीकृत्य प्रत्यगात्मस्रोतस्तया प्रवर्तयन्ति 'आत्मा वा अरे द्रष्टव्यः' इत्यादीनि" इत्यन्तं भाष्यं संगृह्यते । स्वाभाविकत्वं विषयविशेषणम् । संग्रहभाष्यं विवृणोति— यो हीति । प्रवर्तत इति । नानाविधकर्मोपासनान्यनुतिष्ठतीत्यर्थः । इष्टं मे भूयादनिष्टं मे मा भूदित्यनेन दुःखसामान्यास्पृष्टसुखकामना

विषयविमुखीकरणार्थानीति ब्रूमः" इत्यादि । यदि च

ब्रह्मानन्दरूपात्यन्तिकपुरुषार्थगोचरेह विवक्षिता । अत एवाह— न च तत्रात्यन्तिकं पुरुषार्थं लभत इति । बाह्यसाधनं तत्र-शब्दार्थः । स्वाभाविकादिति । स्वभावोऽविद्या, तत्कार्यभूतादित्यर्थः । संघातस्य प्रवृत्तिः कर्मोपासनयोरनुष्ठानम्, तद्गोचराद्द्रव्यदेवतामन्त्रादिरूपादित्यर्थः । प्रत्यगात्मनि विषये स्रोतश्चित्तप्रावण्यं यस्य स प्रत्यगात्मस्रोताः, तस्य भावस्तत्ता, तयेत्यर्थः । तं बाह्यसाधनाद्विमुखीकृत्य श्रवणादिष्वेव प्रवर्तयन्तीत्यर्थः । एवं श्रवणादेर्ज्ञानरूपत्वान्न तत्र कोऽपि विधिरित्युक्तम् । इदानीं श्रवणादेः क्रियारूपत्वमुपेत्यापि न तत्र कोऽपि विधिरित्याह— **यदि चेति** । तस्य क्रियारूपत्वं च वार्त्तिककारैरेवोक्तम्— 'श्रवणादिक्रिया तावत्कर्तव्येह प्रयत्नतः' इति । आदिपदेन मननस्य संग्रहो न ध्यानस्य, वार्त्तिककारमते श्रवणमननानन्तरं ध्यानानुष्ठानाभावस्योक्तत्वात् । न च ध्यानस्याननुष्ठेयत्वे 'ओमित्येवं ध्यायथ आत्मानम्' 'विद्यामेतां योगविधिं च कृत्स्नम्' इत्यादिबहुवाक्यविरोध इति वाच्यम् । तेषाम् 'तत्कारणं सांख्ययोगाभिपन्नम्' इति श्रुतिगतयोगपदोदितमार्गान्तरप्रतिपादकतायास्तृतीयपरिच्छेदे ध्यानदीपोक्तप्रकारेण वक्ष्यमाणत्वात् । न च 'तत्कारणम्—' इति श्रुतिगतसांख्यपदोदितविचारमार्गेऽपि ध्यानान्तर्भावः पूर्वमुक्त इति वाच्यम् । निदिध्यासनपदस्य ध्यानार्थकत्वमताभिप्रायेण तदन्तर्भावस्योक्तत्वात् । ध्यानस्य सांख्यमार्गाद्बहिर्भाव एव भाष्यकारा-

वेदान्ततात्पर्यविचारः श्रवणं तदा तस्य तात्पर्यनिर्णय-

णामपि संमतः। तथा च 'एतेन योगः प्रत्युक्तः' इत्यधिकरण-भाष्यम्— "यत्तु दर्शनमुक्तम् 'तत्कारणं सांख्ययोगाभिपन्नम्' इति, वैदिकमेव तत्र ज्ञानं ध्यानं च सांख्ययोगशब्दाभ्यामभिलप्येते" इति। ध्यानपदं ज्ञानाभ्यासपरम्। वैदिकं वेदोक्तम्। एतेन वेद-विरोधादिना योगशास्त्रं निराकृतमिति सूत्रार्थः। सांख्यमार्गे ध्यानाभावमभिप्रेत्यैव सर्वज्ञात्ममुनिभिरपि निदिध्यासनपदस्य ज्ञा-नार्थकत्वमुक्तम्— 'श्रवणमननबुद्ध्योर्जातयोर्यत्फलं तन्निपुणमति-भिरुच्चैरुच्यते दर्शनाय। अनुभवनविहीना यैवमेवेति बुद्धिः श्रुतम-ननसमास्तौ तन्निदिध्यासनं हि॥' इति। अस्य श्लोकस्याश्रमश्रीचर-णानां व्याख्यानमिदम्— 'निदिध्यासने पक्षान्तरमाह— श्रव-णेति। श्रवणमननबुद्ध्योर्जातयोर्यत्फलं तद्दर्शनाय निपुणमतिभिरु-च्चैरुच्यत इति संबन्धः। एतदेव विशदयति— अनुभवनविहीनेति। श्रुतं श्रवणम्। दीर्घकालादरनैरन्तर्यानुष्ठानेन श्रवणमननपरिपाके सतीत्यर्थः। अनुभवनविहीना साक्षात्काररहिता, अविद्यानिवर्त-कवृत्तिरूपसाक्षात्कारभिन्नेति यावत्। यैवमेवेति बुद्धिः, अहं चि-दात्मा ब्रह्मस्वरूप एव ब्रह्म च चिदेकरसप्रत्यगात्मस्वभावमेवेति तत्त्वंपदलक्ष्यनिर्णयात्मिका बुद्धिः, तदेव निदिध्यासनं नाम न ध्यानम्। अस्मिन्पक्षे श्रवणमननयोरेवानुष्ठेयत्वम्। निदिध्यासनं तु नानुष्ठेयम्, दीर्घकालमनुष्ठितश्रवणमननफलरूपा बुद्धिर्यदा भव-ति तदैव साक्षात्कारोत्पत्तेः। पूर्वपक्षे तु निदिध्यासनमपि पृथग-

द्वारा वेदान्ततात्पर्यभ्रमसंशयरूपप्रतिबन्धकनिरास एव फलम्, न प्रतिबन्धकान्तरनिरासो ब्रह्मावगमो वा ।

नुष्ठेयमिति भेदः' इति । सांख्यमार्गे ध्यानाभावमभिप्रेत्यैव यावज्ज्ञानोदयं विचारस्यैव कर्तव्यत्वं ध्यानदीपे विद्यारण्यगुरुभिरप्युक्तम्— 'विचार्याप्यापरोक्ष्येण ब्रह्मात्मानं न वेत्ति चेत्। आपरोक्ष्यावसानत्वाद्भूयो भूयो विचारयेत् ॥ विचारयन्नामरणं नैवात्मानं लभेत चेत्। जन्मान्तरे लभेतैव प्रतिबन्धक्षये सति॥' इति। एवमानन्दपञ्चकेऽप्यात्मानन्दावसाने सांख्यमार्गस्य ध्यानरहितस्यापि ध्यानेन सर्वांशेऽपि तुल्यफलत्वं बहुधा प्रपञ्चितमिति संक्षेपः । एवकारव्यवच्छेद्यमाह— **नेति** । वाकारो नञनुकर्षणार्थः । विचारस्य प्रतिबन्धनिरासद्वारा ब्रह्मावगमोपयोगसंभवेऽपि न साक्षात्तत्फलकत्वम्, ज्ञानस्य प्रमाणफलत्वादित्युक्तत्वादिति भावः । ननूक्तप्रतिबन्धनिरासद्वारा विचारस्याविद्यानिवर्तकसाक्षात्कारोपयोगित्वप्राप्तावपि तादृशसाक्षात्कारप्रतिबन्धकपापनिवृत्तिद्वारा साक्षात्कारसाधनत्वस्य मानान्तरादप्राप्तत्वात् 'श्रोतव्यः' इत्यत्र श्रवणस्य पापनिवृत्तिद्वारा विद्यासाधनत्वमुपदिश्यते । न च विद्याप्रतिबन्धकपापनिवृत्तेर्यज्ञादिनैव सिद्धत्वाद्विधिवैयर्थ्यमिति वाच्यम् । प्रतिबन्धकपापानामानन्त्येन केषांचिद्यज्ञाद्यनुष्ठानेन केषांचिच्छ्रवणानुष्ठानेन निवृत्तिरिति विभागकल्पनोपपत्तेः । तथा च प्राप्तं पुनरपूर्वविधित्वम् । एवं च 'सहकार्यन्तरविधिः—' इत्यधिकरणभाष्ये पाण्डित्यशब्दितश्रवणेऽपूर्वत्वोक्तिश्च संगच्छत इति शङ्कां वारयति— **न प्रतिबन्धका-**

तत्फलकत्वं च तस्य लोकत एव प्राप्तं साधनान्तरं च किंचिद्विकल्प्य समुच्चित्य वा न प्राप्तमिति न तत्र विधित्रयस्याप्यवकाशः । विचारविध्यभावेऽपि विज्ञानार्थतया विधीयमानं गुरूपसदनं दृष्टद्वारसंभवेऽदृष्टकल्पनायोगाद्गुरुमुखाधीनवेदान्तविचारद्वारैव विज्ञानार्थं पर्यव-

---

न्तरनिरास इति । तात्पर्यभ्रमसंशयरूपप्रतिबन्धकापेक्षयान्यत्पापरूपं प्रतिबन्धकं प्रतिबन्धकान्तरम्, तन्निरासो न श्रवणफलम् । अतो न तद्द्वारा ज्ञानाय श्रवणं विधेयमित्यर्थः । अयं भावः— 'श्रोतव्यः' इत्यस्यापूर्वविधित्वमयुक्तम्, तस्यावृत्त्यधिकरणे निरस्तत्वाद्विवरणाद्युक्तरीत्या वेदान्तश्रवणस्यान्वयव्यतिरेकप्रमाणसिद्धं तात्पर्यभ्रमादिलक्षणप्रतिबन्धकनिवृत्तिरूपदृष्टफलकत्वमुपजीव्य श्रवणेनैव ज्ञानं प्रतिबन्धकनिवृत्तिं वा संपादयेदिति नियमविधित्वसंभवे 'स्वाभाविकप्रवृत्तिविषयविमुखीकरणार्थानीति ब्रूमः' इत्यादिभाष्यानुसारेण ब्रह्मप्रतिपत्तिसाधनश्रवणादिस्तुतिद्वारा तत्र प्रवृत्तिविशेषकरत्वमात्रेण ब्रह्मप्रकरणनिवेशसंभवे वापूर्वविधित्वायोगाद्भाष्यकारीयापूर्वत्वोक्तेः पाक्षिकाप्राप्त्यभिप्रायकत्वसंभवाच्चेति । **तत्फलकत्वं चेति** । भ्रमादिरूपप्रतिबन्धकनिरासफलकत्वं चेत्यर्थः । ननु प्राप्तत्वेऽपि नियमविधित्वादिसंभवात्कथं विधिलयाभाव इत्यत्राह— **साधनान्तरं चेति** । ननु गुर्वधीनविचारेण सह गुरुरहितविचारस्य विकल्पेन प्राप्तिरस्तीत्यत आह— **विचारविध्यभावेऽपीति** । **अत एवेति** । उपगमनविधित एवेत्यर्थः । व्यावृ-

स्यति । अत एव स्वप्रयत्नसाध्यविचारव्यावृत्तिः । अध्ययनविध्यभावे तूपगमनं विधीयमानमक्षरावाप्त्यर्थत्वेनाविधीयमानत्वान्न तदर्थं गुरुमुखोच्चारणानूच्चारणमध्ययनं द्वारीकरोतीति लिखितपाठादिव्यावृत्त्यसिद्धेः सफलोऽध्ययननियमविधिः । न च तात्पर्यभ्रमादिनिरासाय वेदान्तविचारार्थिनः कदाचिद्वैतशास्त्रेऽपि प्रवृत्तिः स्यात्, तत्रापि तदभिमतयोजनया वेदान्तविचार-

---

त्तिरित्यनन्तरं लभ्यत इति श्रोतव्यवाक्ये गुर्वधीनविचारनियमविधिरनर्थक इति शेषः । न चोपगमनविधेर्विचारविध्यङ्गतया तदभाव उपगमनविधेरात्मलाभ एव नास्तीत्युक्तमिति वाच्यम् । गुरूपसदनस्य ब्रह्मज्ञानं प्रति द्वारापेक्षायां लोकसिद्धस्यैव गुर्वधीनविचारस्य द्वारत्वेन स्वीकारोपपत्तौ श्रोतव्यविध्यपेक्षाभावेन तच्छेषत्वासिद्धेर्विचारवदुपगमनस्यापि विद्याङ्गत्वोपपत्तेश्चेति भावः । पूर्वोक्तमतिप्रसङ्गं परिहरति— **अध्ययनविध्यभावे त्विति** । अध्ययनविध्यभावे तु लिखितपाठादिव्यावृत्त्यसिद्धेः सफलोऽध्ययननियमविधिरिति संबन्धः । **तदर्थमिति** । अक्षरावाप्त्यर्थमित्यर्थः । अध्ययनाङ्गोपगमनस्य विद्यार्थोपगमनापेक्षया विशेषार्थकस्तुशब्दः । तमेवाह— **उपगमनमित्यादिना** । अध्ययनस्याक्षरावाप्तिफलकत्वं विवरणादौ साधितमिति भावः । व्यावर्त्यान्तरं दूषयति— **न च तात्पर्येति** । ननु वस्तुतस्तन्निरासकत्वाभावेऽपि भिन्नात्मज्ञानं मुक्तिसाधनमिति भ्रमद्वारा तद्ग्रमात्तत्र प्रवृत्तिः संभवतीत्युक्तमिति

सत्त्वादित्यद्वैतात्मपरवेदान्तविचारनियमविधिरर्थवानिति वाच्यम् । स्वयमेव तात्पर्यभ्रमहेतोस्तस्य तन्निरासकत्वाभावेन साधनान्तरप्राप्त्यभावात् । तन्निरासकत्वभ्रमेण तत्रापि कस्यचित्प्रवृत्तिः स्यादित्येतावता 'श्रोतव्यः' इति नियमविधेरभ्युपगम इत्यपि न । ईश्वरानुग्रहलब्धाद्वैतश्रद्धारहितस्य श्रोतव्यवाक्येऽपि पराभिम-

---

नेत्याह— **तन्निरासकत्वभ्रमेणेति** । इह जन्मनि जन्मान्तरे वा यज्ञाद्यनुष्ठानजनितदृढविविदिषावतः साधनचतुष्टयसंपन्नस्य श्रवणविधावधिकार इत्यविवादम् । यज्ञादिजनितादृष्टं च निष्प्रपञ्चाद्वितीयब्रह्मसाक्षात्कारस्य साङ्गाध्ययनलब्धैर्वेदान्तैर्मुक्तिसाधनत्वनिश्चयं संपाद्य तादृशब्रह्मसाक्षात्कारे दृढेच्छां च विविदिषाशब्दितामुत्पाद्य तद्द्वाराद्वितीयात्मसाक्षात्कारसाधनभूताद्वितीयात्मश्रवणादावेव मुमुक्षुं प्रवर्तयति । न तु जीवभिन्नात्मज्ञानस्य मुक्तिसाधनत्वभ्रमापादनद्वारा भिन्नात्मज्ञानतत्साधनविचारादाविच्छाप्रवृत्त्यादिकमप्युत्पादयति, तदिच्छादेर्भिन्नात्मविचारद्वारा यज्ञादिफलभूतनिष्प्रपञ्चब्रह्मसाक्षात्कारहेतुत्वाभावात् । तथा च स्मृतिः— 'ईश्वरानुग्रहादेव पुंसामद्वैतवासना' इति । यज्ञादिसंपादितादीश्वरानुग्रहादेव पुंसामद्वैतब्रह्मज्ञानेच्छारूपा तद्वासना भवतीति तदर्थः । तथा च यथोक्तभ्रमवतोऽद्वैतब्रह्मतत्त्वसाक्षात्कारादाविच्छाश्रद्धादिशून्यस्य श्रवणविधावनधिकारान्न तं प्रति नियमविधिरर्थवानित्याह— **ईश्वरानुग्रहेति । पराभिमतेति** । 'आत्मा... श्रोतव्यः'

तयोजनया सद्वितीयात्मविचारविधिपरत्वभ्रमसंभवेन भ्रमप्रयुक्तायां अन्यत्र प्रवृत्तेर्विधिशतेनाप्यपरिहार्यत्वात् । न च व्यापारान्तरनिवृत्त्यर्थो परिसंख्येति युक्तम् । असंन्यासिनो व्यापारान्तरनिवृत्तेरशक्यत्वात्संन्यासिनस्तन्निवृत्तेर्ब्रह्मसंस्थया सह संन्यासविधायकेन 'ब्रह्मसंस्थोऽमृतत्वमेति' इति श्रुत्यन्तरेण सिद्धतया संन्यासविधायकश्रुत्यन्तरमुपेक्ष्य श्रोतव्यवाक्येन तस्य व्यापारान्तरनिवृत्त्युपदेशस्य व्यर्थत्वात् । न च विचारविध्य-

---

इति श्रुतावात्मशब्दस्तावज्जीवपर एव । न परमात्मपरः, 'आत्मनस्तु कामाय सर्वं प्रियं भवति' इति पूर्ववाक्ये जीवस्य प्रकृतत्वात् । न च 'इदं सर्वं यदयमात्मा' इति वाक्यशेषे सर्वात्मकस्य परमात्मनः प्रतिपादनाच्छ्रोतव्यवाक्यस्थमात्मपदमद्वितीयात्मपरमिति वाच्यम् । तत्रापि तत्प्रतिपादनासिद्धेः । न हि प्रपञ्चपरमात्मनोरभेदः संभवति, चेतनाचेतनयोरैक्यस्य विरुद्धत्वाच्छ्रुतेरभेदध्यानविधिपरत्वोपपत्तेश्चेत्यादियोजना पराभिमता द्रष्टव्या । **अन्यत्रेति** । भिन्नात्मविचार इत्यर्थः । परिसंख्याविधिं दूषयति— **न चेति** । श्रवणाविधिना किं गृहस्थादेर्व्यापारान्तरनिवृत्तिरुपादिश्यते किं वा संन्यासविधिसिद्धस्य संन्यासिन इति विकल्पं मनसि निधाय क्रमेण दूषयति— **असंन्यासिन इति** । **अशक्यत्वादिति** । विध्यन्तरविरोधापत्तिरशक्यत्वे हेतुः । त-

संभवेऽपि विचारविषयवेदान्ते नियमविधिः संभवति, भाषाप्रबन्धादेर्व्यावर्त्यस्य सत्त्वादिति वाच्यम् । संनिधानादेव वेदान्तनियमस्य लब्धत्वेन विधिविषयत्वायोगात्, 'स्वाध्यायोऽध्येतव्यः' इत्यर्थावबोधार्थनियमविधिबलादेवाध्ययनगृहीतवेदोत्पादितं वेदार्थज्ञानं फलपर्यवसायि न कारणान्तरोत्पादितमित्यस्यार्थस्य लब्धत्वेन वेदार्थे ब्रह्मणि मोक्षाय ज्ञातव्ये भाषाप्रबन्धादी-

---

निवृत्तेः सिद्धतयोपदेशस्य व्यर्थत्वादिति संबन्धः । 'ब्रह्मसंस्थोऽमृतत्वमेति' इति श्रुत्यन्तरस्य ब्रह्मसंस्थताधर्मकसंन्यासाश्रमविधायकत्वम् 'परामर्शं जैमिनिः' इत्यधिकरणभाष्ये स्फुटमिति भावः । विचारविषयत्वेन वेदान्तनियमविधिरिति पक्षं दूषयति— **न च विचारेति । संनिधानादेवेति ।** अधीतसाङ्गस्वाध्यायस्य वेदान्तैरापातप्रतिपन्नब्रह्मात्मजिज्ञासोर्जिज्ञासानिवर्तकनिर्णयाय कर्तव्यत्वेन विचारे प्राप्ते सति विचारविषयमन्वेषमाणस्य वेदान्तानां बुद्धिस्थत्वाद्वेदान्ता एव मया विचारणीया इति बुद्धिरुत्पद्यते । तथा च विधिं विनैव वेदान्तनियमस्य लब्धत्वेन विधिना तन्नियमनं व्यर्थमिति भावः । विधिं विनैव वेदान्तनियमलाभे हेत्वन्तरमाह— **स्वाध्याय इति । अर्थावबोधेति ।** मीमांसकमतमाश्रित्योक्तमिदम् । अक्षरावाप्तिफलकोऽध्ययनविधिरिति सिद्धान्तेऽपि येषां वाक्यानामध्ययनावाप्तानामर्थज्ञानद्वारा पुरुषार्थोपयोगः संभवति तेषां वाक्यानामर्थज्ञानमध्ययनलब्धैर्वाक्यैरेवोत्पादितं

नामप्राप्तेश्च । न च 'सहकार्यन्तरविधिः—' इत्यधिकरणे पाण्डित्यबाल्यमौनशब्दितेषु श्रवणमननिदिध्यासनेषु विधिरभ्युपगत इति वाच्यम् । विचारे विचार्यतात्पर्यनिर्णयहेतुत्वस्य वस्तुसिद्ध्यनुकूलयुक्तघनुसंधानरूपे मनने तत्प्रत्ययाभ्यासरूपे निदिध्यासने च वस्त्ववगमवैशद्यहेतुत्वस्य च लोकसिद्धत्वेन तेषु विध्यनपेक्षणाद्विधिच्छायार्थवादस्येव प्रशंसाद्वारा प्रवृत्त्यतिशयक-

---

फलपर्यवसायि, न तदतिरिक्तभाषाप्रबन्धादिजनितामितिरीत्याध्ययनविधिफलाक्षरावातेः पुरुषार्थपर्यवसानकल्पनान्न भाषाप्रबन्धादिप्रसक्तिरित्यर्थः । इतिहासपुराणमादिपदार्थः । श्रवणादीनामविधेयत्वे सूत्रभाष्यविरोधं शङ्कते— **न चेति । अभ्युपगत इति** । सूत्रभाष्यकाराभ्यामिति शेषः । विरोधं परिहर्तुं प्रथमं श्रवणादीनां विधियोग्यक्रियारूपत्वेऽपि नित्यप्राप्तत्वान्न विधेयत्वमित्याह— **विचार इति** । तत्प्रत्ययेत्यत्र तत्पदं वस्तुपरम् । अवगमस्य वैशद्यं प्रतिबन्धराहित्यम् । सूत्रभाष्ययोः श्रवणादिविधित्वव्यवहारो गौणः, मुख्यासंभवस्य दर्शितत्वादिति विरोधं परिहरति— **विधिच्छायार्थवादस्येवेति** । 'विष्णुरुपांशु यष्टव्यः' इत्यादेरित्यर्थः । तथा हि— 'उपांशुयाजमन्तरा यजति' इत्याम्नाय पुनराम्नायते— 'विष्णुरुपांशु यष्टव्यः' 'प्रजापतिरुपांशु यष्टव्यः' 'अग्नीषोमावुपांशु यष्टव्यौ' इति । अत्रान्तरावाक्यमाग्नेयाग्नीषोमीयपुरोडाशयोरन्तरालकालविशिष्टयागविधायकम् । विष्ण्वादिवाक्यत्रयं तु म-

न्त्रवर्णप्राप्तवैकल्पिकदेवतानुवादेनान्तरावाक्यविहितयागस्तावकम - र्थवादमात्रमिति व्यवस्थापितं पूर्वतन्त्रे। तदत्र दृष्टान्तत्वेनोदाहृत- मिति द्रष्टव्यम्। यत्तु 'तत्कारणं सांख्ययोगाभिपन्नम्' इति श्रुतौ योगपदोपात्तस्य व्यावर्त्यस्य संभवाद्विचारसमर्थाधिकारिणं प्रति तद्व्यावृत्तिफलको नियमविधिः संभवतीति, तन्न। विचारसमर्थ- स्याधिकारिणः कालान्तरे स्वोद्भावितानुपपत्तिवशेनान्योद्भावितानु- पपत्तिवशेन वा पुनस्तत्त्वसंशये सत्यवधारणात्मकं वेदान्तार्थज्ञानं न संभवतीति योग्यतावशेन तं प्रति विधिं विना विचारस्यैव नि- त्यतया प्राप्तत्वात्। यत्तु सगुणब्रह्मोपासनं व्यावर्त्यमुक्तं तन्न। श्रवण- विध्यधिकारिणः सर्वतो निःस्पृहस्य ब्रह्मलोकप्राप्तिद्वारा मुक्तिसा- धनसगुणोपासने पक्षेऽपि प्रवृत्तेरसंभवेन तस्य व्यावर्त्यत्वासंभवात्स- गुणोपासनस्यापि श्रवणादिद्वारैव विद्यासाधनत्वेन नखविदलनादे- रवघाततुल्यकक्ष्यत्ववत्सगुणोपासनस्य श्रवणादिना सह विकल्पेन प्राप्त्यभावाच्च न तद्व्यावृत्तिफलको नियमविधिः संभवति। न च सगुणोपासनया श्रवणादिकं विनैव सगुणसाक्षात्कारवन्निर्गुणसाक्षा- त्कारोदयः संभवतीति वाच्यम्। प्रमाणप्रमेयासंभावनादिप्रतिबन्ध- कानिवृत्तिद्वारा श्रवणादेः सत्तानिश्चयरूपब्रह्मज्ञानोपायत्वग्राहकतया पूर्वोक्तप्रमाणानुरोधेन श्रवणादेर्नित्यवदनुवादलिङ्गेन च सगुणोपास- नया क्रमेण परममुक्तिप्रतिपादकशास्त्रस्यापि श्रवणादिद्वारकज्ञानो- त्पत्त्यविरोधित्वकल्पनात्, श्रवणादिकं विना सगुणोपासनमहिम्नैव तत्त्वज्ञानोदयोपगमे देवताधिकरणविरोधाच्च। तदधिकरणे हि दे- वादीनां शरीराद्यभावात्सगुणब्रह्मोपासनेषु निर्गुणब्रह्मविद्यासाधन-

श्रवणादिषु च नास्ति सामर्थ्यम्, अतो न तेष्वधिकार इति पूर्वपक्षयित्वा मन्त्रार्थवादेतिहासपुराणप्रामाण्यात्तेषामपि शरीरादिसङ्घातादस्त्यधिकार इति सिद्धान्तितम्। तत्रेदं पूर्वपक्षप्रयोजनमुक्तम्— देवादीनां श्रवणाद्यधिकाराभावे क्रममुक्तिफलकब्रह्मोपासनया प्राप्तदेवभावस्यापि श्रवणाद्यसंभवेन विद्योदयासंभवात्पुनरावृत्त्यापत्तौ क्रममुक्तिकामस्य सगुणोपासनेषु प्रवृत्त्यसंभव इति। सिद्धान्ते तु देवादीनां श्रवणाद्यधिकारसत्त्वादुक्तप्रवृत्तिसिद्धिरिति प्रयोजनं दर्शितम्। इदं च प्रयोजनं देवताधिकरणावसानभाष्ये संग्रहेण दर्शितम्। तथा च भाष्यम्— 'ततश्चार्थित्वादिसंभवादुपपन्नो देवादीनामपि ब्रह्मविद्यायामधिकारः। क्रममुक्तिदर्शनान्यप्येवमेवोपपद्यन्ते' इति। एवमेवेत्यस्य देवादीनां श्रवणाद्यधिकारे सत्येवेत्यर्थः। तेषां श्रवणाद्यधिकारे यानि श्रौतलिङ्गानि पूर्वमुपन्यस्तानि 'तद्धो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणामेकशतं ह वै वर्षाणि मघवान्प्रजापतौ ब्रह्मचर्यमुवास' इत्येवमादीनि, तानि यथोपपद्यन्ते तथेत्यपिशब्दार्थः। ननु सगुणब्रह्मोपासकानामपि सर्वेषां श्रवणादिनैव ज्ञानोदय इति नियमो नास्ति, सगुणोपासकस्यापि हिरण्यगर्भस्य बृहदारण्यकभाष्ये पुरुषविधब्राह्मणव्याख्यानावसरे श्रवणादीनां प्रणिपातादीनां चाभावेऽपि ज्ञानजन्मप्रतिपादनादिति चेत्, न। हिरण्यगर्भस्यापि वामदेववज्जन्मान्तरीयश्रवणादिनैव ज्ञानजन्मसंभवात्, तत्रैव भाष्ये 'श्रवणमननिदिध्यासनानां साक्षाज्ज्ञेयविषयत्वात्' इति वाक्ये साक्षात्पदेन श्रवणादेर्ज्ञेयब्रह्मव्यञ्जकस्य प्रणिपाताद्यपेक्षयावश्यिकत्वसूच-

नेन जन्मान्तरीयश्रवणादिकल्पनस्य तद्भाष्यवाक्याभिप्रेतत्वेऽवगम्यमाने सति तत्पूर्वभाष्ये श्रवणादिकं विना कार्यकरणशुद्ध्यादिमात्रेण ज्ञानजन्मप्रतिपादनस्याभ्युपगमवादत्वोपपत्तेर्हिरण्यगर्भस्य वामदेवादेरिव जन्मान्तरीये ज्ञानसाधने कल्पनीये सति क्लृप्तश्रवणादिकल्पनस्यैव न्याय्यत्वाच्च । न च हिरण्यगर्भस्य पूर्वजन्मनि सगुणोपासनानिष्ठत्वेन निर्गुणविचारो न संभवतीति वाच्यम् । हिरण्यगर्भस्य पूर्वकल्पे जन्मभेदेन सगुणनिर्गुणोपासनयोः संभवात् । न ह्येकस्मिञ्जन्मनि कृतात्सगुणोपासनामात्रादेव हैरण्यगर्भपदप्राप्तिरस्ति, तथा सति सगुणोपासकानामेव सर्वेषां साक्षाद्धिरण्यगर्भत्वप्रसङ्गात् । किं तु हिरण्यगर्भस्य ब्रह्मलोकस्वामित्वं सरस्वतीभर्तृत्वं जन्मप्रभृति तत्त्वसाक्षात्कारसंपन्नत्वं सर्वज्ञत्वं सकलभौतिकजगत्सृष्ट्यादिसामर्थ्यं भक्तानां त्रैलोक्यैश्वर्यप्रदानसामर्थ्यं कार्यविशेषेषु शिवविष्ण्वादिप्रवर्तकत्वं ललाटाद्रुद्रप्रादुर्भावहेतुत्वं महाविष्णुनाभिकमलजातत्वाद्यैश्वर्यं च श्रुत्यादिभ्यो निश्चित्यागामिकल्पे यथाहिरण्यगर्भत्वाय तत्साधनानि सगुणनिर्गुणोपासनानि तपोविशेषरूपाणि च बहुषु जन्मसु ध्रुवप्रह्लादविश्वामित्रागस्त्यभृग्वादिवदनुष्ठितवतो महापुरुषस्य कस्यचिदेव निरतिशयेश्वरप्रसादाद्धिरण्यगर्भत्वं संपद्यत इति हिरण्यगर्भस्यापि जन्मान्तरीयश्रवणकल्पनं वामदेवस्येव नानुपपन्नम् । हिरण्यगर्भस्य पूर्वजन्मन्यनुष्ठितश्रवणादेर्हिरण्यगर्भपदप्राप्तिकामनया प्रतिबद्धत्वेन तदा तत्त्वसाक्षात्कारानुत्पादकत्वोपपत्तेः । तदुक्तं वृद्धैः— 'ब्रह्मलोकाभिवाञ्छायां सम्यक्सत्यां निरुध्य ताम् । विचारयेद्य आत्मानं ननु साक्षात्करोत्ययम्' इति । न

च ज्ञानोत्पत्तिस्थले सर्वत्र श्रवणादिनियमो नास्ति, योगमार्गे प्रवृत्तस्य श्रवणाद्यभावेऽपि तत्त्वसाक्षात्कारोदयस्वीकारादिति वाच्यम्। 'ओमित्यात्मानं युञ्जीत' 'ओमित्येवं ध्यायथ आत्मानम्' इत्यादिध्यानविधिबलेन 'तत्कारणं सांख्ययोगाभिपन्नं विद्यामेतां योगविधिं च कृत्स्नम्' इत्यादिश्रौतलिङ्गसहकृतेन विचारासमर्थस्य योगमार्गेऽधिकार इति तृतीयपरिच्छेदे वक्ष्यमाणतया विचारसमर्थस्य विचारं विना ज्ञानोत्पत्त्यनभ्युपगमात्। एवं यद्यत्साधनमदृष्टद्वारा तत्त्वज्ञानसाधनत्वेन शास्त्रसिद्धं तत्सर्वं सगुणोपासनवदृष्टसामग्रीभूतसांख्यमार्गेण तदशक्तौ योगमार्गेण वा तत्त्वज्ञानसाधनमिति कल्प्यते। न त्वदृष्टमात्राज्ज्ञानलाभः कल्पयितुं युक्तः। अन्यथा जीवनादृष्टमात्रादेव स्तन्यपानादिप्रवृत्तिकल्पनापत्त्या तत्रापीष्टसाधनतास्मरणं जन्मान्तरीयसंस्कारहेतुकं सर्वसंप्रतिपन्नं न कल्पनीयं स्यात्, क्लृप्तदृष्टकारणं विना कार्योत्पत्त्ययोगस्योभयत्र तुल्यत्वात्। अत एव पञ्चदश्यां तत्त्वज्ञानं प्रति मार्गद्वयनियम उक्तः— सांख्ययोगौ प्रकृत्य 'इति मार्गौ विचार्याथ जगाद परमेश्वरः' इति। संग्रहकर्तापि तृतीयपरिच्छेदे सांख्ययोगशब्दितं मार्गद्वयमेव विद्यावाप्त्युपायत्वेन वक्ष्यति— 'एवं श्रवणमननादिसाधनानुष्ठानप्रवणस्य विद्यावाप्तिरित्यस्मिन्नर्थे सर्वसंप्रतिपन्ने स्थिते, भारतीतीर्था ध्यानदीपे विद्यावाप्तावुपायान्तरमप्याहुः' इति ग्रन्थेन। तदयं निष्कर्षः— विद्याधिकारिणो विचारसमर्थस्य प्रतिषेधाभावे वेदान्तश्रवणमनुष्ठेयम्। सति तु प्रतिषेध इतिहासपुराणभाषाप्रबन्धादिश्रवणमनुष्ठेयम्। विद्याधिकारि-

रत्वमात्रेण तत्र विधित्वव्यवहारात् । एवं च श्रवणविध्यभावात्कर्मकाण्डविचारवद्ब्रह्मकाण्डविचारोऽप्यध्ययनविधिमूल इत्याचार्यवाचस्पतिपक्षानुसारिणः ॥

विचार्यस्य च ब्रह्मणो जगज्जन्मस्थितिलयकारणत्वं लक्षणमुक्तम् 'यतो वा इमानि भूतानि जायन्ते' इत्या-

---

णो विचारासमर्थस्य तु त्रैवर्णिकस्य योगशब्दितं निर्गुणोपासनमनुष्ठेयम् । मार्गद्वयासंभवे च तत्संभवयोग्यजन्मप्राप्त्या तदन्यतरानुष्ठानद्वारा ज्ञानलाभ इति । तथा च श्रवणाधिकारिणि श्रवणस्य नित्यप्राप्तत्वात्तत्तुल्यकक्ष्यतया साधनान्तरस्य कस्यचिद्विकल्प्य समुच्चित्य वा प्राप्त्यभावान्न तत्र विध्यवकाश इति सिद्धम् । एवं ब्रह्मसाक्षात्कारं प्रति श्रवणादेर्नित्यप्राप्तत्वाद्विधिं विनैव श्रवणाद्यनुष्ठानं सिध्यतीति प्रतिपादितम् । इदानीं श्रवणाद्यनुष्ठापकविध्यपेक्षायामपि यथा कर्मकाण्डश्रवणम् 'कर्मवाक्यविचारः कर्तव्यः' इति पृथग्विध्यभावेऽप्यध्ययनविधिबलादेव सिध्यति, एवं वेदान्तश्रवणमपि तद्बलादेव सिध्यतीति न श्रोतव्यवाक्ये पृथग्विचारविध्यपेक्षास्तीत्याशयेनोपसंहरति— **एवं चेति** । लोकत एव श्रवणादेः प्राप्तत्वे सति श्रवणविध्यपेक्षाभावादित्यक्षरार्थः ।

श्रोतव्यवाक्यार्थविचारेण प्रथमसूत्रार्थः संगृहीतः । क्रमप्राप्तं द्वितीयसूत्रं संगृह्णाति— **विचार्यस्य चेति** । चकारोऽवधारणार्थः सञ्श्रुत्येत्यनेन संबध्यते । श्रुत्यैव लक्षणमुक्तम्, न तु व्याप्त्यादि-

दिश्रुत्या । जगज्जन्मस्थितिलयेष्वेकैककारणत्वमप्यन-

लक्षणवत्पुरुषोत्प्रेक्षितमित्यर्थः । 'येन जातानि जीवन्ति, यत्प्रय-न्त्यभिसंविशन्ति. तद्विजिज्ञासस्व, तद्ब्रह्म' इति वाक्यशेष आदि-पदार्थः । श्रुतौ 'यतः' इति यच्छब्देन ब्रह्मवल्ल्यां निरूपितं सत्यज्ञानानन्दानन्तात्मकं ब्रह्म परिगृह्यते, सर्वनाम्नां प्रकृतप्रधान-परामर्शकत्वस्वाभाव्यात् । ततश्च यच्छ्रुतिसामर्थ्यादेव ब्रह्मणः स-च्चिदानन्दस्वरूपात्मकं स्वरूपलक्षणं लभ्यते । पञ्चमी च प्रकृतित्वं हेतुत्वसामान्यं वा वक्ति । हेतुत्वसामान्यं च प्रकृतिकर्तृभयसाधारण-मित्यविशेषादभिन्ननिमित्तोपादानत्वरूपं लक्षणं लभ्यते । इदंश-ब्देन प्रत्यक्षाद्युपस्थितं सर्वमुच्यते । भूतशब्दश्च पृथिव्यादिमहाभू-तेषु प्राणिषु च रूढः । प्रकृते च विनिगमनाविरहेण रूढ्यो-रनुन्मेषाद्भवन्तीति व्युत्पत्त्या कार्यमात्रं भूतशब्देनोच्यते । जीवन्ति स्थितिं लभन्ते । प्रयन्ति लीयमानानि सन्ति यदभिसंविशन्ति येन तादात्म्यं गच्छन्तीति यावत् । तत्कारणं ब्रह्म तद्विजिज्ञासस्व विशेषेण सच्चिदानन्दैकरसपूर्णप्रत्यग्रूपेण ज्ञातुं साक्षात्कर्तुमिच्छ । इच्छामात्रेणोक्तसाक्षात्कारालाभात्सन्प्रत्ययेन विचारो लक्ष्यते । उक्तलक्षणमुखेन ब्रह्म विचारयेत्यर्थः । अत्र यतो भूतानि जायन्ते तद्ब्रह्म, येन जीवन्ति तद्ब्रह्म, यदभिसंविशन्ति तद्ब्रह्मेति श्रुतिपाठे सति जगज्जन्मकारणत्वं तत्स्थितिकारणत्वं तल्लयकारणत्वं च प्रत्ये-कमेव श्रुत्या ब्रह्मलक्षणमुक्तं स्यात् । न तु तथा पाठोऽस्ति । अतो जन्मादित्रितयकारणत्वं श्रुत्या लक्षणमुक्तमिति प्रतिभाति ।

न्यगामित्वाल्लक्षणं भवितुमर्हतीति चेत्, सत्यम्। लक्षणत्रयमेवेदं परस्परनिरपेक्षम्। अत एव 'अत्ता चराच-

---

तदाक्षिपति— **जगज्जन्मस्थितिलयेष्विति**। निर्धारणार्था सप्तमी। 'यतो भूतानि जायन्ते' इत्युपक्रम्य 'तद्ब्रह्म' इति श्रुत्या लक्ष्ये ब्रह्मणि कारणत्वस्य सत्त्वप्रतिपादनान्नासंभवः, 'तद्ब्रह्म' इत्येकवचनेन लक्ष्यब्रह्मव्यक्तेरेकत्वावगमान्नाव्याप्त्यवकाश इति दोषद्वयाभावं सिद्धं कृत्वातिव्याप्तिरपि नास्तीत्याह— **अनन्यगामित्वादिति**। ब्रह्मान्यगामित्वाभावादित्यर्थः। ननु प्रधानेऽतिव्याप्तिः, तस्य सांख्यैरुपादानत्वाभ्युपगमेनोपादानतया जगज्जन्महेतुत्वस्य स्थित्याधारतया स्थितिहेतुत्वस्य लयाधारतया लयहेतुत्वस्य च तत्रापि सत्त्वादिति चेत्, न। तत्तत्कर्तृत्वस्यापि लक्षणे विशेषणत्वेन विवक्षिततया जडे प्रधाने तदयोगात्। न च तत्तत्कर्तृत्वमेव प्रत्येकं लक्षणमस्तु, किं तदुपादानत्वरूपविशेष्येणेति वाच्यम्। अदृष्टद्वारा जगज्जन्मादिकर्तरि जीवेऽतिव्याप्तिवारकत्वात्परिच्छिन्नजीवस्य च तदुपादानत्वायोगात्। न च साक्षाज्जगज्जन्मकर्तृत्वं नियन्तृतया जगत्स्थितिहेतुत्वं संजिहीर्षया जगत्संहर्तृत्वं च लक्षणमिति विवक्षायां जीवेऽतिव्याप्त्यभावादुपादानत्वरूपं विशेष्यं व्यर्थमेवेति वाच्यम्। तर्ह्युपादनत्वमपि पृथगेव लक्षणमस्तु। मायाया ब्रह्मोपादानतामात्रघटकत्वेन पृथगुपादानत्वाभावात्प्रधानादिकारणान्तरस्य चाप्रामाणिकत्वेनातिव्याप्त्यभावादिति भावः। प्रत्येकं लक्षणत्वसंभवमङ्गीकरोति— **सत्यमिति**। तर्हि श्रुत्या त्रितयकारणत्वं कथं

लक्षणमुक्तमित्याशङ्क्य श्रुतेरपि प्रत्येकलक्षण एव तात्पर्यम्, मेलनस्य प्रयोजनाभावादित्याशयेनाह— **लक्षणत्रयमेवेदमिति** । इदं जगत्कारणत्वं जन्मादीनां मध्य एकैकनिरूपितं परस्परनिरपेक्षं सल्लक्षणत्रयमेव श्रुत्यभिमतम्, न तु त्रितयनिरूपितकारणत्वरूपमेकं लक्षणमित्यर्थः । त्रयपदमनेकपरं न तु त्रित्वनियमपरम्, ततोऽप्याधिक्यस्य शङ्कावसरे दर्शितत्वादिति बोध्यम् । जगत्संहर्तृत्वादेः प्रत्येकं ब्रह्मलक्षणत्वे सूत्रकारादिसंमतिमाह— **अत एवेति** । अत्रादिपदेनान्तर्याम्यधिकरणजगद्वाचित्वाधिकरणयोः सग्रहः । अयमर्थः । कठवल्ल्यां पठ्यते— 'यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः । मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः ॥' इति । अत्र ब्रह्मक्षत्रयोः प्रयुक्त ओदनशब्दस्तावन्न मुख्यः, किं तु गौणः । लोके चौदनशब्दमुख्यार्थस्यादनीयत्वप्रसिद्धेरदनीयत्वेन गुणेन तयोरोदनशब्दः प्रवर्तते । तथा च यस्य ब्रह्मक्षत्रे ओदनवददनीये इत्युक्तौ यच्छब्दार्थस्यात्तृत्वं प्रतीयते । अनेनैवाभिप्रायेणोक्तं सूत्रेऽत्तेति । ओदनपदवाच्यार्थस्यादनीयत्वं द्विविधमस्ति— भुजिक्रियाकर्मत्वात्मकभोज्यत्वरूपमेकं विनाश्यत्वरूपमपरम् । परं तु भोज्यत्वगुणः प्रसिद्धो न तु विनाश्यत्वगुणः । गौणप्रयोगे च प्रसिद्धगुण एव गृह्यते । यथा 'अग्निर्माणवकः' इत्यत्राग्निगतशुचित्वादिगुण एवोपादीयते प्रसिद्धत्वान्न तु तद्गतोऽपि विनाशकत्वादिगुणः । एवं प्रकृतेऽपि लोकप्रसिद्धिबलाद्भोज्यत्वगुण एवौदनशब्दात्प्रतीयते । अस्ति च ब्रह्मक्षत्रयोरपि स्त्रीपिण्डरूपयोर्भोज्यत्वं पुमांसं प्रति । ब्रह्मक्षत्रयोश्च भोज्यत्वप्रतीतौ सत्यां तत्प्र-

तिसंबन्धिनि यच्छब्दार्थे पूर्वं प्रतीतमत्तृत्वं भोक्तृत्वरूपं जीवलिङ्गं पर्यवस्यति । यदा त्वोदनपदस्य मृत्यूपसेचनपदसंनिधानाद्ब्रह्मक्षत्रयोर्विनाश्यत्वगुणः स्वीक्रियते न तु भोज्यत्वगुणः स्त्रीपिण्डरूपब्रह्मक्षत्रकर्मकभुजिक्रियायां मृत्योरुपसेचनत्वासंभवेन 'मृत्युर्यस्योपसेचनम्' इत्यंशस्यानन्वयप्रसङ्गात्, ब्रह्मक्षत्रयोर्विनाशने तु मृत्योः सहायत्वरूपमुपसेचनत्वमस्तीति न तदनन्वयप्रसक्तिः, तदा तत्प्रतिसंबन्धिनि यच्छब्दार्थे पूर्वं प्रतीतमत्तृत्वं संहर्तृत्वरूपं पर्यवस्यति । विनाश्यत्वगुणग्रहणपक्षे त्वयं विशेषो लभ्यते—लोके हि दध्यादिरूपमुपसेचनं स्वमिश्रितान्नादिनाशे साधनं दृष्टमिति मृत्यूपसेचनपदयोगबलात्समृत्युकस्य चराचरात्मकस्य जगतो विनाशनं प्रतीयते । तदनुसाराद्ब्रह्मक्षत्रपदयोरजहल्लक्षणया कृत्स्नजगत्परत्वं च प्रतीयते । तत्प्रतिसंबन्धिन्यपि यच्छब्दार्थे कृत्स्नजगत्संहर्तृत्वरूपं ब्रह्मलिङ्गं भाति । एवं स्थिते प्रथममदनीयत्वगुणयोगात्प्रतीतोऽत्ता किं जीव उत परमात्मेति संशयः । तत्र पूर्वपक्षः—जीव एव, लोकप्रसिद्ध्यनुसारेणात्तृत्वस्य भोक्तृत्वरूपताप्रतीतेः । न परमात्मा, 'अनश्नन्' इति वचनेन तस्य भोक्तृत्वनिषेधादिति । सिद्धान्तस्तु—अत्ता परमात्मा । कुतः, चराचरग्रहणात्, मृत्यूपसेचनपदानुरोधेन पूर्वोक्तरीत्यात्तृत्वस्य चराचरात्मकसकलजगत्संहर्तृत्वरूपत्वप्रतीतेः । न च परमात्मनोऽन्यस्य जगत्संहर्तृत्वं संभवति । न च लोकप्रसिद्धिबलादत्तृत्वं भोक्तृत्वरूपं भातीत्युक्तमिति वाच्यम् । तत्प्रसिद्ध्यपेक्षया वाक्यशेषाधीनविनाश्यत्वगुणप्रसिद्धेः शीघ्रतरत्वेन बलवत्त्वात् । अतोऽत्ता पर एवेति निर्णयः । स संहर्ता

परमेश्वरो यत्र निर्विशेषे भेदकल्पनया वर्तते तं निर्विशेषं परमात्मानमित्येतत्सर्वं को वेद न कोऽपीति तस्य दुर्विज्ञेयत्वमुदाहृतमन्त्रचतुर्थपादेन विवक्षितमिति बोध्यम्। 'अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्।' 'य इमं च लोकं परं च लोकं सर्वाणि च भूतानि योऽन्तरो यमयति' इत्युपक्रम्य 'यः पृथिव्यां तिष्ठन्—' 'योऽप्सु तिष्ठन्—' इत्यादिना कांश्चित्पर्यायानुक्त्वा 'इत्यधिदैवतम्' इत्युपसंहृत्य पुनः 'यः सर्वेषु भूतेषु तिष्ठन्—' 'यः सर्वेषु लोकेषु—' 'यः सर्वेषु देवेषु—' 'यः सर्वेषु यज्ञेषु—' इत्यादयः केचन पर्यायाः काण्वमाध्यंदिनपाठभेदेनाम्नाताः। तत्राधिदैवादिषु देवतभूतलोकवेदयज्ञादिषु श्रुतोऽन्तर्यामी परमात्मा। कुतः। तद्धर्मव्यपदेशात्, तद्धर्मस्य परमात्मधर्मस्याविशेषेण सर्वस्थितिकर्तृत्वरूपसर्वनियन्तृत्वस्य 'येन जातानि जीवन्ति' इति श्रुतिसिद्धस्य वाक्योपक्रमे 'य इमं च लोकम्' इत्यादिना व्यपदेशात्। न जीवादिरन्तर्यामी, तस्योक्तधर्मासंभवादिति सूत्रार्थः। 'जगद्वाचित्वात्।' कौषीतकिब्राह्मणे बालाक्यजातशत्रुसंवादे बालाकिं ब्राह्मणं प्रत्यजातशत्रोर्वचनं श्रूयते—'यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वैतत्कर्म स वै वेदितव्यः पुरुषः' इति। अत्र वेदितव्यत्वेन श्रुतः पुरुषो जीवः परो वेति संशये, जीव इति पूर्वः पक्षः, पुरुषपदस्य जीवे रूढत्वात् 'पुण्यो वै पुण्येन कर्मणा भवति' 'कर्म हैव तदूचतुः' इत्यादौ वेदे, लोके च 'पुण्यकर्मायं यतः सुखी वर्तते' इत्यादौ कर्मपदस्य धर्मादौ प्रयोगदर्शनेन तत्र रूढत्वाच्च। ऊचतुरार्तभा-

रग्रहणात्' इत्याद्यधिकरणेषु सर्वसंहर्तृत्वादिकं प्रत्येकं ब्रह्मलिङ्गतयोपन्यस्तमिति कौमुदीकाराः ॥

गयाङ्गवल्क्याविति्यर्थः । कर्मसंबन्धी पुरुषो जीव एव । न परमात्मा, तस्य धर्माद्यभावात् । न च 'एतेषां पुरुषाणां कर्ता' इति वाक्येन वेदितव्यपुरुषस्य प्रकृतादित्यचन्द्रादिपुरुषकर्तृत्वमुच्यमानं जीवे कथं संभवतीति वाच्यम् । भोगोपकरणभूतानादित्यादिपुरुषान्प्रति भोक्तुर्जीवस्यादृष्टद्वारा कर्तृत्वोपपत्तेः । अत एव 'यस्य वैतत्कर्म' इति वाक्यं संगतम्, अदृष्टद्वारा प्रकृतपुरुषकर्तृत्वोपपादकत्वात्, इत्येवं प्राप्ते, सिद्धान्तः— कर्मशब्दस्य न धर्मादौ रूढिः, 'चलनात्मकं कर्म' इति प्रसिद्ध्यनुरोधेन परिस्पन्दे तस्य रूढत्वात् । कथं तर्हि धर्मादौ तत्प्रयोगनिर्वाहः, विहितप्रतिषिद्धरूपदेहादिपरिस्पन्दजन्ये धर्मादौ लक्षणया प्रयोगोपपत्तेः । न च देवताध्यानादिरूपमनोमात्रव्यापारजन्ये धर्मादौ परिस्पन्दजन्यत्वाभावेन लक्षणया प्रयोगेऽसति परिस्पन्द इव धर्मादावपि रूढिरपरिहार्येति वाच्यम् । तर्हि प्रकृते विनिगमनाविरहेण रूढ्योरनुन्मेषे सति क्रियत इति कर्मेति व्युत्पत्त्या कर्मपदं कार्यमात्रमाह । एतत्पदमपि प्रत्यक्षाद्युपस्थितवस्तुमात्रमाह, प्रकृतस्य तत्परामर्शयोग्यस्य कस्यचिदभावात् । तथा चैतत्कृत्स्नं जगद्यस्य कर्म कार्यमित्यर्थलाभेन वेदितव्यपुरुषस्याशेषजगदुत्पत्तिकर्तृत्वं सिध्यति । तच्च ब्रह्मलिङ्गम् । आदित्यादिपुरुषकर्तृत्वमपि न मुख्यं जीवस्य संभवति, 'एतेषां पुरुषाणां कर्ता' इत्यत्र मुख्यकर्तृग्रहणसंभवे गौणकर्तृग्रहणायो-

अन्ये तु— जन्मकारणत्वस्य स्थितिकारणत्वस्य च

गात् । न चाशेषजगत्कर्तृत्वोक्तौ तत एवादित्यादिकर्तृत्वस्यापि लाभात्पृथक्तदुक्तिर्व्यर्थेति वाच्यम् । मन्त्रार्थवादादिष्वादित्यचन्द्रादिपुरुषाणां महामहिमसंकीर्तनेन तेषु संजातपरब्रह्मत्वभ्रान्तिनिवर्तकत्वेन पृथगुक्तिसाफल्यात् । पुरुषपदस्यापि न जीवे रूढिः, पूरणात्पुरुष इति क्लृप्तयोगेनैव कृत्स्नजगद्व्यापिनि ब्रह्मणीव कृत्स्नशरीरव्यापिनि जीवेऽपि प्रयोगोपपत्त्या तत्र रूढेरकल्पनात् । तत्कल्पनेऽपि योगवद्रूढेरपि जीवब्रह्मसाधारणचैतन्यमात्रे कल्पनोपपत्तेश्च न पुरुषश्रुतिर्जीवपक्षपातिनी । श्रुतिपाठे क्वचित्पुरुषपदाश्रवणाच्च । तथा चायं सूत्रार्थो वेदितव्यः— पुरुषः परमात्मा, कृत्स्नजगत्कर्तृत्वात् । न च हेत्वसिद्धिः, कर्मपदस्य जगद्व्याचित्वात् । तस्माद्वेदितव्यः पुरुषः परमात्मेति सिद्धम् । एवं च सर्वसंहर्तृत्वादिकमित्यत्रादिपदेनान्तर्याम्यधिकरणोक्तं सर्वनियन्तृत्वरूपसर्वस्थितिकर्तृत्वं जगद्व्याचित्वाधिकरणोक्तं सर्वजगदुत्पत्तिकर्तृत्वं च गृह्यते ।।

ननु 'यतो वा—' इत्यादिश्रुत्या जीवव्यावृत्तेश्वरस्य तत्पदवाच्यस्य ब्रह्मणो लक्षणमुक्तमिति तात्पर्यवर्णनमयुक्तम्, 'तद्विजिज्ञासस्व तद्ब्रह्म' इति वाक्यशेषानुसारेण श्रुतेर्वाक्यार्थभूताद्वितीयजिज्ञास्यब्रह्मलक्षणप्रतिपादकत्वस्यैवावगमादित्याशङ्क्य श्रुतेस्तथाभूतब्रह्मलक्षणपरत्वमुपगच्छतां मतमाह— **अन्ये त्विति** । चेतनाचेतनात्मककृत्स्नभूतोपादानत्वप्रतिपत्तिर्हि ब्रह्मणोऽद्वितीय-

निमित्तसाधारण्यादुपादानत्वप्रत्यायनाय प्रपञ्चस्य ब्रह्मणि लयो दर्शितः । अस्तु ब्रह्म जगदुपादानम्, तज्ज-

---

यत्वबोधहेतुः । न च चेतनानां नित्यत्वात्कथं तदुपादानत्वं ब्रह्मण इति वाच्यम् । तेषां स्वरूपेण नित्यत्वेऽपि शरीरद्वयविशिष्टतया कार्यत्वोपगमात् । न चैवमपि ब्रह्मापेक्षया द्वितीयस्य तत्कार्यस्य जगत एव विद्यमानत्वात्कथं तदुपादानत्वमद्वितीयत्वप्रत्यायकमिति वाच्यम् । कार्यस्य ह्युपादानमेव वास्तवं स्वरूपम्, न तु तदतिरिक्तं वास्तवं स्वरूपमस्ति, नामरूपात्मकजगद्रूपं तु मिथ्याभूतमित्यारम्भणाधिकरणेषु व्यवस्थापितत्वात् । अतः सर्वोपादानत्वं सर्वस्य वास्तवं स्वरूपं ब्रह्मैवेति बोधनद्वारा ब्रह्मणो वास्तवाद्वितीयत्वबोधहेतुर्भवति । अद्वितीयब्रह्मबोधश्च मुक्तिहेतुरिति मुक्तिप्रयोजकब्रह्माद्वितीयत्वबोधहेतुभूतोपादानत्वप्रत्यायनार्थम् 'यत्प्रयन्त्यभिसंविशन्ति' इति श्रुतिभागेन ब्रह्मणि सर्वभूतलयो दर्शित इत्याह— **उपादानत्वेति** । ननु घटाद्युपादाने मृदादौ घटादिलयाधारत्ववज्जन्मादिकारणत्वस्यापि सत्त्वेन तद्बलादप्युपादानत्वप्रत्ययः स्यादिति, नेत्याह— **जन्मकारणत्वस्येति** । निमित्तं कुलालदण्डचक्रादि । तर्हि श्रुतौ जन्मादिकारणत्वप्रतिपादनं व्यर्थम्, लयमात्रप्रतिपादनादेवेष्टसिद्धेरिति, नेत्याह— **अस्त्विति** । घटजन्मन्युपादानमृदतिरिक्तकुलालवज्जगज्जन्मन्यप्युपादानब्रह्मापेक्षयान्यत्कर्तृरूपं निमित्तं भविष्यतीति भ्रमव्यवच्छेदाय तस्यैव ब्रह्मण एव श्रुतौ जगज्जननकर्तृत्वमुक्तम् । तथा राज्यस्थेमनि पाल-

न्मनि घटजन्मनि कुलालवत्तिस्थतौ राज्यस्थेमनि राजवच्चोपादानादन्यदेव निमित्तं भविष्यतीति शङ्काव्यवच्छेदाय तस्यैव जगज्जननजीवननियामकत्वमुक्तम् । तथा चैकमेव लक्षणमिदमभिन्ननिमित्तोपादानतयाद्वितीयं ब्रह्मोपलक्षयतीत्याहुः ॥

नरूपे पालनीयप्रजाद्युपादानातिरिक्तराजवज्जगतः स्थितौ जगदुपादानब्रह्मापेक्षयान्यन्निमित्तं नियन्तृतया स्थितिहेतुभूतं भविष्यतीति शङ्काव्यवच्छेदाय तस्यैव ब्रह्मणो जगज्जीवननियामकत्वं श्रुत्योक्तमित्यर्थः । **तथा चेति** । जगज्जननजीवननियामकत्वाभ्यां जगदुपादानब्रह्मण एव तन्निमित्तत्वप्रतीतौ सिद्धायामित्यर्थः । इदं श्रुत्युक्तं लक्षणमेकं सदेवाभिन्ननिमित्तोपादानत्वे पर्यवस्यदद्वितीयं ब्रह्मोपलक्षयति ब्रह्मव्यतिरिक्तवस्त्वस्तित्वशङ्कानिराकरणद्वारेण ज्ञापयति, न तु प्रत्येकलक्षणं सदित्यर्थः । निमित्तं च तदुपादानं चेति निमित्तोपादानम्, अभिन्नं च तन्निमित्तोपादानं चेति पुनः कर्मधारयः । आद्यकर्मधारयादेव निमित्तोपादानयोरभेदे सिद्धेऽपि पुनरभिन्नपदं कर्मधारयावगतोऽभेद ऐक्यलक्षण एव, न तु नीलोत्पलादौ गुणगुणिनोरिव तादात्म्यरूप इति ज्ञापनार्थमिति बोध्यम् ॥

ननु 'यतः' इति पञ्चमीश्रुत्या सर्वभूतलयाधारत्वलिङ्गेन च निश्चितं ब्रह्मण उपादानत्वं प्रधानस्येव परिणामित्वरूपं वा, पर-

ब्रह्मणश्चोपादानत्वमद्वितीयकूटस्थचैतन्यरूपस्य न परमाणूनामिवारम्भकत्वरूपं न वा प्रकृतेरिव परिणामित्वरूपम्, किं त्वविद्यया वियदादिप्रपञ्चरूपेण विवर्तमानत्वलक्षणम्। वस्तुनस्तत्समसत्ताकोऽन्यथाभावः प-

---

माणूनामिवारम्भकत्वरूपं वा, रज्ज्वादेरारोपितसर्पाद्युपादानस्येव जगद्रूपविवर्ताधिष्ठानत्वरूपं वा। तत्र नाद्यः, ब्रह्मणः कूटस्थत्वात्। परिणामवादे हि परिणामपरिणामिनोर्वास्तवाभेदस्वीकारेण ब्रह्मणः परिणामित्वे परिणामजन्मादयोऽपि ब्रह्मणि प्रसज्येरन्। तथा च जन्ममरणादिविकारशून्यत्वलक्षणं श्रुतिसिद्धं कूटस्थत्वं तस्य भज्येत। ततश्च कूटस्थत्वात्तस्य परिणामित्वं न संभवति। न द्वितीयः, अद्वितीयत्वाद्ब्रह्मणः। ब्रह्मणः सद्वितीयत्वे हि परमाणुद्वयसंयोगवदसमवायिकारणलाभसंभवादारम्भकत्वं भवेदित्याशयेनाह— **ब्रह्मणश्चेति**। तृतीयः प्रकारः परिशिष्यत इत्याह— **किं त्वित्यादिना**। ननु ब्रह्मतद्विवर्तप्रपञ्चयोरभेदः सिद्धान्त उपेयते, आरम्भवादे त्वारभ्यमारम्भकादत्यन्ताभिन्नमुपेयत इत्यारभ्यविवर्तयोर्भेदः स्पष्टः। सिद्धान्त इव परिणामवादेऽपि सांख्याद्यभिमते परिणामपरिणामिनोरभेदाभ्युपगमाद्विवर्तपरिणामयोर्भेदः कथमवगन्तव्य इत्याशङ्क्य लक्षणभेदादित्याह— **वस्तुन इति**। वस्तुन उपादानत्वाभिमतस्य। अन्यथा पूर्वरूपापेक्षया रूपान्तरेण भावो भवनमवस्थानमन्यथाभावः, अवस्थाविशेष इति यावत्। तत्समसत्ताकः, तेन वस्तुना समा सत्ता यस्यान्यथाभावस्य स

रिणामस्तदसमसत्ताको विवर्त इति वा, कारणसलक्षणोऽन्यथाभावः परिणामस्तद्विलक्षणो विवर्त इति वा,

---

तथा । तथा चोपादानत्वाभिमतवस्तुसत्तासमानसत्ताकत्वे सति तदवस्थाविशेषरूपत्वं तत्परिणामत्वमिति परिणामलक्षणं पर्यवस्यति । तत्र विवर्तवारणाय सत्यन्तम् । घटस्य तन्तुपरिणामत्ववारणाय विशेष्यम् । विवर्तलक्षणमाह— **तदिति** । वस्तुनस्तदसमसत्ताकोऽन्यथाभावो विवर्त इति संबन्धः । उपादानत्वाभिमतवस्तुसत्ताविषमसत्ताकत्वे सति तदवस्थाविशेषरूपत्वं तद्विवर्तत्वमिति विवर्तलक्षणम् । उपादानत्वाभिमतमृद्वस्तुसत्ताविषमसत्ताकत्वं चैतन्यस्याप्यस्तीति तस्य मृद्वस्तुविवर्तत्ववारणाय विशेष्यम् । परिणामवारणाय सत्यन्तम् । ब्रह्मचैतन्यस्य पारमार्थिकी सत्ता, घटादिप्रपञ्चस्य व्यावहारिकी सत्ता, शुक्तिरजतादेः प्रातिभासिकी सत्तेति सत्तात्रैविध्याङ्गीकारमते लक्षणभेद उक्तः । ब्रह्मणि घटादौ शुक्तिरजतादौ च सर्वत्र ब्रह्मस्वरूपभूतैकैव सत्ता, न तदतिरिक्तेतिमतसाधारण्येन लक्षणान्तरमाह— **कारणसलक्षण इति** । उपादानत्वाभिमतवस्तुसलक्षणत्वे सति तदवस्थाविशेषत्वं तत्परिणामत्वमिति परिणामलक्षणम् । अत्र सालक्षण्यं जडत्वरूपं बोध्यम् । परिणामपरिणामिनोर्जडत्वनियमान्न काप्यव्याप्तिः शङ्क्या । मृद्वस्तुनो घटपरिणामत्ववारणाय विशेष्यम् । प्रपञ्चस्य संवित्परिणामत्ववारणाय सत्यन्तम् । विवर्तलक्षणमाह— **तदिति** । उपादानत्वाभिमतवस्तुविलक्षणत्वे सति तदवस्थाविशेषत्वं तद्वि-

कारणाभिन्नं कार्यं परिणामस्तदभेदं विनैव तद्व्यतिरेकेण दुर्वचं कार्यं विवर्त इति वा विवर्तपरिणामयोर्भेदः ॥

वर्तत्वमिति विवर्तलक्षणम् । अत्र चित्त्वजडत्वरूपं वैलक्षण्यं विवक्षितम् । वियदादिप्रपञ्चवच्छुक्तिरजतादेरपि तत्तदवच्छिन्नचैतन्य एवाध्यासाङ्गीकाराज्जडमात्रे चैतन्यविवर्ते तद्विलक्षणत्वमस्तीति लक्षणसंगतिः । उपादानत्वाभिमतजडविलक्षणे चैतन्ये जडविवर्तत्ववारणाय विशेष्यम् । मृत्परिणामे घटादौ मृद्विवर्तत्ववारणाय सत्यन्तम् । प्रकारान्तरेण विवर्तपरिणामयोर्लक्षणमाह— **कारणाभिन्नमिति** । कारणत्वाभिमतवस्त्वभिन्नत्वे सति तत्कार्यत्वं तत्परिणामत्वम् । वियदादौ ब्रह्मकार्यत्वमस्ति तत्परिणामत्वं तु नास्तीति तद्वारणाय सत्यन्तम् । ब्रह्मप्रपञ्चयोरारोपितभेदसत्त्वेऽपि लक्षणे विवक्षितस्य धर्मिद्वयसमानस्वभावाभेदस्याभावान्नातिव्याप्तिः । परिणामवादे मृदोऽपि घटाद्यभिन्नत्वमस्तीति तस्या घटादिपरिणामत्ववारणाय विशेष्यम् । **तदभेदमिति** । वस्तुतस्तदभेदं विनेवेत्यर्थः । व्यतिरेको भेदः । अस्मिँल्लक्षणे कार्यत्वमविवक्षितम्, अनाद्यविद्यादेरपि विवर्तत्वाङ्गीकारात् । यद्वा कार्यरूपस्यैव विवर्तस्येदं लक्षणम् । तथा चोपादानत्वाभिमतवस्तुनः सकाशाद्वस्तुतो भेदाभेदाभ्यां दुर्निरूपत्वे सति कार्यत्वं कार्यरूपविवर्तलक्षणम् । अत्राविद्यां प्रत्युपादानत्वाभिमतचैतन्याद्वस्तुतो भेदाभेदाभ्यां निरूपयितुमशक्यायामविद्यायामतिव्याप्ति-

वारणाय विशेष्यम् । आरम्भवाद उपादानादभेदेन दुर्निरूपे कार्येऽतिव्याप्तिवारणाय भेदेनेत्युक्तम् । परिणामवाद उपादानाद्भेदेन दुर्निरूपे कार्येऽतिव्याप्तिवारणायाभेदेनेत्युक्तम् । सिद्धान्ते कार्यकारणयोरभेदोपगमादसंभववारणाय वस्तुत इत्युक्तम् । ननु कार्यकारणयोर्वास्तवौ भेदाभेदौ कथं दुर्निरूपाविति, उच्यते— तत्र तयोर्भेदस्तावदुर्निरूपः, निम्नोन्नतादियुक्तमृद्वस्तुव्यतिरेकेण घटानुपलम्भात्संयोगविशेषयुक्ततन्त्वतिरेकेण पटानुपलम्भाच्च। 'मृद्घटः' 'तन्तवः पटः' 'सुवर्णं कुण्डलम्' इत्यादिसामानाधिकरण्याच्च । न हि वस्तुतो भिन्नयोः सामानाधिकरण्यप्रत्ययः संभवति । किं च कारकव्यापारात्पूर्वं मृदादौ घटादेः सत्त्वमभ्युपगन्तव्यम्, तदसत्त्वे शशशृङ्गादिवदुत्पत्त्यनुपपत्तेः । उत्पत्तिक्षणात्पूर्वमसतः कार्यस्योत्पत्तिक्रियां प्रति कर्तृत्वानुपपत्तेश्च, पूर्वसिद्धस्यैव कर्तृत्वदर्शनात् । उत्पत्तिक्षण उपादानेन सह कार्यस्य संबन्धानुपपत्तेश्च, पूर्वक्षणे कार्यस्यासिद्धत्वात् । पूर्वसिद्धयोरेव हि पश्चात्संबन्धसंभवः, अन्यथा शशशृङ्गादेरपि कारणसंबन्धस्य दुर्वारत्वात् । कारकव्यापारात्पूर्वं कार्यस्य तुच्छवैलक्षण्यानङ्गीकारे तद्वदेव पश्चादात्मलाभासंभवस्य दुर्वारत्वाच्च । सिद्धे च प्राक्कार्यस्य सत्त्वे प्राक्काले कार्यकारणयोर्भेदे मानाभावादभेदसिद्धौ पश्चादपि तयोरभेद एव स्वीकर्तव्य इति कार्यकारणाभेदवादिनः सांख्यादयः । तद्भेदवादिनस्तार्किकादयस्तु वदन्ति— कार्यकारणयोरभेदो न संभवति, तद्भावविरोधात् । न हि तस्यैव तत्कार्यत्वं तत्कारणत्वं च संभवतीति । अर्थक्रियाभेदाभावप्रसङ्गाच्च । न हि

जलाहरणाद्यर्थक्रिया मृद्वस्तुनः संभवति, घटोत्पत्तेः प्रागपि तत्प्रसङ्गात्। नापि मृदोऽर्थक्रिया घटस्य संभवति, मृद्बद्धटस्यापि घटोत्पादकत्वप्रसङ्गात्। कार्यस्य कारकव्यापारात्पूर्वं सत्त्वे च कारकव्यापारवैयर्थ्यप्रसङ्गात्तदा मृद्वदेवोपलम्भप्रसङ्गाच्च। तदुक्तं पञ्चदश्याम्— 'स घटो न मृदो भिन्नो वियोगे सत्यनीक्षणात्। नाप्यभिन्नः पुरा पिण्डदशायामनवेक्षणात्॥' इति। वियोगे सति मृदः सकाशाद्बुद्ध्या विवेचने क्रियमाण इत्यर्थः। एवं कार्यकारणयोर्भेदवादिभिरभेदवादिभिश्च दर्शितैः परस्परं प्रतिक्षेप्तुमशक्यैर्न्यायैः कार्यस्य कारणाद्भेदाभेदाभ्यां प्रागुत्पत्तेः सत्त्वासत्त्वाभ्यां च दुर्निरूपत्वात्तस्यानृतत्वं सिद्धम्। कारणं तु कार्योत्पत्तेः पूर्वकाले कार्यकाले कार्यनाशकाले चानुवर्तमानं कार्याद्भेदेन सत्त्वेन च निरूपयितुं शक्यत्वात्सत्यमेव कार्यापेक्षया। एवं मृदादेरवान्तरकारणस्य तत्तत्कार्यापेक्षया सत्यत्वे सिद्धेऽपि परमार्थसत्यत्वं नोपेयते, श्रुत्या ब्रह्मव्यतिरिक्तस्य सर्वस्यैव बाधितत्वात्। ब्रह्मणस्तु परमार्थसत्यत्वं सर्वात्मना बाधशून्यत्वादभ्युपगम्यते। अत एव जगत्कारणस्य सत्यत्वे मृदादिसत्यत्वं जगतो मिथ्यात्वे च मृदादिकार्यस्य घटादेरनृतत्वं च दृष्टान्तत्वेन श्रुत्योपादीयते। तदुक्तं पञ्चदश्याम्— 'एवं मायामयत्वेन विकारस्यानृतात्मताम्। विकाराधारमृद्वस्तुसत्यत्वं चाब्रवीच्छ्रुतिः॥' इति। विकारानृतत्वादौ पूर्वोक्तन्यायकलाप एवंशब्दार्थः। श्लोके दृष्टान्तत्वेनेति शेषः। उक्तं च भामतीनिबन्धने— 'तदनेन प्रमाणेन विकारजातस्यानिर्वाच्यतया सिद्धमनृतत्वं कारणस्य निर्वाच्यतया सिद्धं सत्यत्वं

अथ शुद्धं ब्रह्मोपादानमिष्यत ईश्वररूपं जीवरूपं वा ? अत्र संक्षेपशारीरकानुसारिणः केचिदाहुः— शुद्धमेवो-

---

च 'मृत्तिकेत्येव सत्यम्' इत्यादिना प्रबन्धेन दृष्टान्ततयानुवदति श्रुतिः' इति। 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इति श्रुतिरित्यर्थः । विकारो घटादिर्वाचा घटशरावादिरस्तीति शब्देन, आरभ्यते व्यवह्रियत इत्यारम्भणम्, वाचा व्यवह्रियत एव न वस्तुतोऽस्ति विकारः, तस्य दुर्निरूपत्वादिति भावः । कथं तर्हि मृद्स्तुनः सकाशाद्घटादिर्जात इति कार्यकारणयोर्भेदव्यवहार इत्यत आह— नामधेयम्, भेदव्यवहारो नाममात्रमर्थशून्यः, यथा 'राहोः शिरः' 'पुरुषस्य चैतन्यम्' इति व्यवहारः । विकारवद्भेदोऽप्यनिर्वाच्य इति भावः । किं तर्हि सत्यम्, तत्राह—मृत्तिकेति । मृत्तिकेत्यनेन मृत्तिकात्वेन रूपेण घटशरावादिविकारेषु प्रतीयमानं कारणरूपं वस्तु सत्यम् । विकारसत्यत्वमेवकारेण व्यवच्छिद्यते । तत्प्रसिद्धं दुर्वचत्वं कारणाद्भेदाभेदाभ्यां कार्यस्येति ॥

पृच्छति— **अथेति** । ननु वाक्यार्थभूतशुद्धब्रह्मण एव श्रुतौ लक्षणमुक्तम्, 'तद्विजिज्ञासस्व' इति वाक्यशेषे लक्षणीयस्य ब्रह्मणो जिज्ञास्यत्वाभिधानात् । तथा च निश्चितेऽर्थे प्रश्नानुपपत्तिरिति चेत्, न । यथा शुद्धस्य जिज्ञास्यत्वमेवं तत्त्वंपदार्थभूतयोर्जीवेश्वरयोरपि शुद्धब्रह्मप्रतिपत्तिहेतुत्वेन जिज्ञास्यत्वमस्ति । तथा तयोरपि वक्ष्यमाणरीत्याभिन्ननिमित्तोपादानत्वं च संभवतीति जि-

पादानम्, जन्मादिसूत्रतद्भाष्ययोरुपादानत्वस्य ज्ञेयब्र-

ज्ञास्यत्वकारणत्वयोः साधारणत्वेन प्रश्नोपपत्तेरिति भावः। 'जीव ईशो विशुद्धा चित्तथा जीवेशयोर्भिदा। अविद्या तच्चितोर्योगः षडस्माकमनादयः॥' इति संप्रदायविद्वचने चैतन्यत्रैविध्यस्यैव प्रसिद्धत्वात्तदनुसारेण त्रेधा प्रश्नः। सामान्यज्ञानस्य विशेषबुभुत्साहेतुत्वाद्ब्रह्मणः सामान्यरूपेणोपादानत्वज्ञानानन्तर्यमथशब्दार्थः। प्रश्नो वा तदर्थः। ईश्वररूपं जीवरूपं वा ब्रह्म नोपादानमित्येवकारार्थः। 'जन्माद्यस्य यतः' इति सूत्रम्। जन्मादिरस्येति बहुव्रीहिः। जन्मस्थितिभङ्गमन्यपदार्थः, 'जन्मादि' इति नपुंसकैकवचनेनान्यपदार्थे समाहारद्वन्द्वसूचनात्। अन्यपदार्थभूतजन्मस्थितिभङ्गेष्वितरेतरयोगद्वन्द्वाश्रयणे तु 'जन्मादयः—' इति सूत्रापत्तेः। जन्मन आदित्वं च जायमानपदार्थेषु स्थितिभङ्गावपेक्ष्य दृष्टमिति सूत्रे जन्मनः प्राथम्यरूपादित्वनिर्देशः। अस्येति सर्वनाम्ना सूत्रकर्तुर्बुद्धिस्थसकलप्रपञ्चनिर्देशः। षष्ठ्या च जगतो जन्मादेश्च संबन्धनिर्देशः, यत इति कारणनिर्देशः। सूत्रे तत्पदाध्याहारः। पूर्वसूत्राद्ब्रह्मपदानुषङ्गः। तथा यतः कारणादस्य जगतो जन्मादि, तद्ब्रह्मेति सूत्रार्थः। **ज्ञेयब्रह्मेति।** वाक्यार्थभूतशुद्धब्रह्मण एव प्राधान्येन लक्षणीयत्वात्तस्यैव जन्मादिसूत्रे लक्षणमुच्यते। 'अथातो ब्रह्मजिज्ञासा' इति पूर्वसूत्रे शास्त्रविषयसमर्पकेण ब्रह्मपदेन शुद्धब्रह्मण एवोपात्तत्वेन तस्यैव लक्षणाकाङ्क्षणाचेति भावः। ननु 'आत्मन आकाशः संभूतः' 'सोऽ-

ह्मलक्षणत्वोक्तेः । तथा च 'आत्मन आकाशः संभूतः' इत्यादिकारणवाक्येषु शबलवाचिनामात्मादिशब्दानां शुद्धे लक्षणैवेति ॥

विवरणानुसारिणस्तु— 'यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः । तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते ॥'

कामयत' 'यः सर्वज्ञः सर्ववित्' इत्यादिकारणवाक्येष्वीश्वररूपब्रह्मणः कारणत्वमुच्यते । न शुद्धस्य, तस्य कामयितृत्वसर्वज्ञानकर्तृत्वाद्यनुपपत्तेः । अतस्तद्वाक्यगतात्मपदतत्पदसर्वज्ञादिपदानां शबलवाचित्वान्न कारणवाक्येभ्यः शुद्धस्योपादानत्वसिद्धिरिति, नेत्याह— **तथा चेति** । जन्मादिसूत्रतद्वाक्ष्ययोः स्वारस्येन शुद्धस्योपादानत्वावगमे सतीत्यर्थः । **लक्षणैव** स्वीक्रियते । अतः कारणवाक्येभ्यः शुद्धस्य कारणत्वावगतिर्युक्तेति भावः ॥

'अथ शुद्धं ब्रह्मोपादानम्—' इत्यादिप्रश्ने द्वितीयपक्षमादाय प्रतिवचनमुत्थापयति— **विवरणेति** । यस्य प्रकृतस्य भूतयोनेः पूर्वमन्त्रोपात्तं तपो ज्ञानमयं स्वरूपज्ञानविकारो मायावृत्तिप्रतिबिम्बरूपमिति यावत्, तस्मात्सर्वज्ञाद्भूतयोनेः सकाशादेतत्संनिहितमपरोक्षतां नीतं कार्यरूपमिति यावत् । ब्रह्म हिरण्यगर्भाख्यं जायत इति श्रुतेरीश्वररूपमेव ब्रह्मोपादानमिति संबन्धः । न शुद्धं जीवरूपं वेत्येवकारार्थः । सर्वज्ञत्वादीत्यादिपदेन सर्वविषयकामयितृत्वसर्वेश्वरत्वादीनि गृह्यन्ते । मायोपाधिनिरूपितबिम्बत्वविशिष्टं सर्व-

इति श्रुतेः सर्वज्ञत्वादिविशिष्टं मायाशबलमीश्वररूपमेव ब्रह्मोपादानम्। अत एव भाष्ये 'अन्तस्तद्धर्मोपदेशात्' 'सर्वत्र प्रसिद्धोपदेशात्' इत्याद्यधिकरणेषु 'सैवर्क्त्स्साम तदुक्थं तद्यजुस्तद्ब्रह्म सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः' इत्यादिश्रुत्युक्तं सर्वोपादानत्वप्रयुक्तं सर्वात्मकत्वं जीवव्यावृत्तमीश्वरलिङ्गमित्युपवर्णितम्।

ज्ञत्वादिगुणयुक्तं च यदीश्वररूपं ब्रह्मचैतन्यं तदेवोपादानमित्यर्थः। 'अथ शुद्धं ब्रह्मोपादानमिष्यते—' इति प्रश्नस्य प्रतिवचनावसर ईश्वररूपमेव ब्रह्मोपादानमित्येतावति वक्तव्ये तस्य मायाशबलत्वविशेषणमीश्वरोऽपि शुद्धचैतन्यमेवेति भ्रान्तिनिरासार्थम्। तस्य सर्वज्ञत्वाद्यनेकविशेषणोपादानं चेश्वररूपब्रह्मण उपादानत्वे 'यः सर्वज्ञः' इत्यादिकारणवाक्यानां सर्वेषामैककण्ठ्यप्रदर्शनार्थमिति मन्तव्यम्। जीवशुद्धब्रह्मव्यावृत्तेश्वररूपब्रह्मण उपादानत्वे भाष्यसंमतिमाह— **अत एवेति**। ईश्वररूपब्रह्मण एवोपादानत्वाभ्युपगमादेवेत्यर्थः। इत्यादिश्रुत्युक्तं सर्वोपादानत्वप्रयुक्तं सर्वात्मकत्वमीश्वरलिङ्गमित्युपवर्णितं भाष्य इति संबन्धः। यस्य सर्वोपादानत्वं तस्य सर्वात्मकत्वम्, उपादानोपादेययोस्तादात्म्यात्, नान्यस्येत्यविवादम्। यदि प्रतिबिम्बत्वविशिष्टचैतन्यरूपे जीवे बिम्बत्वविशिष्टचैतन्यरूप ईश्वरे च विशेष्यतयानुस्यूतशुद्धचैतन्यरूपब्रह्मणः सर्वोपादानत्वमिष्यते तदा तस्यैव सर्वात्मकत्वं स्यान्नेश्वरस्येति सार्वात्म्यस्य भाष्ये जीवव्यावृत्तेश्वरलिङ्गत्वोपन्यासो न

जीवेश्वरानुस्यूतचैतन्यमात्रस्य सर्वोपादानत्वे तु न त-

स्यात्। न च विशेष्यभूतशुद्धब्रह्मगतं सर्वात्मकत्वं बिम्बत्वविशिष्ट-चैतन्यरूपेश्वरलिङ्गतया भाष्ये वर्णितमिति वाच्यम्। तथा सति तस्य जीवव्यावृत्तत्वं न स्यात्, विशेष्यधर्मस्य सर्वात्मकत्वस्येश्वरधर्मत्वव-ज्जीवधर्मत्वस्यापि सत्त्वादित्याशयेनाह— **जीवेश्वरानुस्यूतेति**। छान्दोग्ये श्रूयते— 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आ प्रणखात्सर्व एव सुवर्णः' इत्युपक्रम्य 'तस्य ऋक्च साम च गेष्णौ' इत्युक्त्वोत्तरत्र 'य एषोऽन्तर-क्षिणि पुरुषो दृश्यते सैव ऋक्तत्साम तदुक्थं तद्यजुस्तद्ब्रह्म' इति चोक्त्वा 'तद्य इमे वीणायां गायन्त्येतं ते गायन्ति' इति। अस्या-र्थः— आदित्येऽन्तर्यः पुरुषः शास्त्रतो दृश्यत एष हिरण्मयो ज्योतिर्मयः, स्वतः स्वप्रकाशचैतन्यस्वरूप इत्यर्थः। तस्योपास-नार्थं शरीरमाह— हिरण्यश्मश्रुरित्यादिना। हिरण्यसुवर्णशब्दौ ज्योतिःपरौ। प्रणखं नखाग्रम्। आङभिव्याप्तौ। तस्य हिरण्म-यपुरुषस्य ऋक्सामनी गेष्णौ परिमलोत्करीत्या स्तुतिसाधनभूते इत्यर्थः। इदमृक्सामगेष्णत्वं समस्तऋक्सामस्तुत्यत्वरूपं हिरण्म-यपुरुषविशेषणं तस्य वेद ऋक्सामस्तुत्यतया प्रसिद्धेन्द्राद्यात्मकत्व-मादाय पर्यवस्यति। हिरण्मयपुरुषस्येन्द्रादिभ्यः सकाशाद्भिन्नत्वे तु तद्विशेषणं न सिध्यति, अन्यस्तुतेरन्यविषयकत्वायोगात्। तस्यैव पुरुषस्यादित्यस्थानवदुपासनार्थं स्थानान्तरमाह— य एषोऽन्तर-क्षिणीति। सैव ऋगित्यादौ विधेयापेक्षया लिङ्व्यत्ययः। स

एव ऋक् । स पुरुषः । साम सः । उक्थं सः । यजुः सः । ब्रह्म वेदः । ब्रह्मपदमृगाद्यतिरिक्तवेदपरम् । तथा च गेष्णवाक्येन सर्वदेवात्मकत्वमुक्तम् । 'सैव ऋक्–' इति वाक्येन सर्ववेदात्मकत्वमुक्तम् । तथा य इमे प्रसिद्धा गायका वीणायां लौकिकपुरुषं गायन्ति तेऽप्येतं प्रकृतं हिरण्मयं पुरुषं गायन्तीत्युक्त्येन्द्राद्यात्मकत्ववल्लौकिकपुरुषात्मकत्वमपि सिध्यति । तथा च सर्वदेवात्मकत्वसर्ववेदात्मकत्वसर्वलौकिकपुरुषात्मकत्वानि मिलित्वा सर्वात्मकत्वे पर्यवस्यन्ति, तिर्यगात्मकत्वस्याप्युक्तप्रायत्वात् । एवं स्थिते संशयः— आदित्येऽक्षिणि चान्तः श्रूयमाणो हिरण्मयः पुरुषो मण्डलाभिमानिदेवताविशेषो वा नित्यसिद्धः परमेश्वरो वेति । तत्र देवताविशेष एव हिरण्मयः पुरुषः, तस्य संसारित्वेन हिरण्यश्मश्रुत्वादिरूपवत्त्वोपपत्तेः सर्वात्मकत्वस्याप्युपासनार्थं तत्रारोपोपपत्तेश्च । न परमेश्वरः, तस्य शरीरासंभवादिति प्राप्तम् । एवं प्राप्ते, ब्रूमः— 'अन्तस्तद्धर्मोपदेशात्' इति । आदित्यादावन्तरवस्थितो हिरण्मयः पुरुषो नित्यसिद्धः परमेश्वर एव । कुतः, तद्धर्मस्य सर्वात्मकत्वस्य 'सैव ऋक्तत्साम' इत्यादावुपदेशात् । सर्वात्मकत्वं हीश्वरस्यैव धर्मः, तस्य सर्वोपादानत्वेन सर्वात्मकत्वोपपत्तेः । न च मुख्यसंभवे सत्यारोपकल्पना न्याय्या । परमेश्वरस्यापि साधकानुग्रहार्थमिच्छावशान्मायागतशुद्धसत्त्वांशपरिणामरूपशरीरसंभवात्, 'उमासहायं परमेश्वरं प्रभुम्' इत्यादिश्रुतिषु 'जन्म कर्म च मे दिव्यम्' इत्यादिस्मृतिषु च प्रसिद्धत्वाच्चेति निर्णयः । 'सर्वं खल्विदं ब्रह्म' इति प्रकृत्य 'स क्रतुं कुर्वीत'

इति वाक्येन क्रतुशब्दवाच्यमुपासनं विधायोपास्याकाङ्क्षायां पठ्यते— 'मनोमयः प्राणशरीरो भारूपः सत्यसंकल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादर एष म आत्मान्तर्हृदये' इति। अयमर्थः— मनोमयो मनःप्रधानः। प्राणः शरीरमस्येति प्राणशरीरः। भाश्चैतन्यं रूपमस्येति भारूपः। सत्या अप्रतिहताः संकल्पाः सृष्ट्यादिगोचरा अस्य। आकाशवदात्मा व्यापकत्वनिर्लेपत्वसूक्ष्मत्वादियुक्तं स्वरूपमस्य। सर्वाणि कर्माणि क्रियन्त इति व्युत्पत्त्या कार्याण्यस्य। यद्वा भूतगुणगन्धरसादिसंनिधानात्कर्मपदं परिस्पन्दपरम्। सर्वे परिस्पन्दा अस्येत्यर्थः। सर्वे कामा इच्छारूपाः सुखविशेषरूपा वास्य। सर्वे गन्धाः पुण्यरूपा अस्य, 'पुण्यो गन्धः पृथिव्यां च' इति स्मृतेः। सर्वे रसा अस्य। इदं दृश्यं सर्वमभ्याभिमुख्येन तादात्म्येनात्तो व्याप्तः। वागेव वाकः, वाकोऽस्यास्तीति वाकी, न वाकी वागिन्द्रियशून्य इति यावत्। वाग्ग्रहणं कर्मेन्द्रियाणां मुख्यप्राणस्य चोपलक्षणम्, क्रियाशक्तिमत्त्वाविशेषात्। आदरः कामः, सोऽस्य नास्तीत्यनादरः। आदरनिषेधेन तत्परिणामि मनो निषिद्धं भवति। मनोनिषेधेन च ज्ञानेन्द्रियाणां निषेधः सिद्धो भवति, ज्ञानशक्तिमत्त्वाविशेषात्। अत्र परिस्पन्देच्छागन्धरसवत्त्वं तदाश्रयैर्वायुमनःपृथिवीजलैर्भूतविशेषैस्तादात्म्यं विना न संभवतीति सर्वकर्मत्वादिवचनेनाविशेषेण सर्वतादात्म्यप्रतिपादकसर्वमिदमभ्यात्त इति वचनेन च मनोमयत्वादिगुणकस्य सर्वात्मकत्वं प्रतीयते। तच्च ब्रह्मण एवोपपद्यते, तस्य सर्वोपादानत्वेन

ज्जीवव्यावृत्तमीश्वरलिङ्गं स्यात्। संक्षेपशारीरके शबलोपादानत्वनिराकरणमपि मायाविशिष्टोपादानत्वनिराकरणाभिप्रायम्, न तु निष्कृष्टेश्वररूपचैतन्योपादानत्वनि-

---

सर्वात्मकत्वोपपत्तेः। न जीवो मनोमयत्वादिगुणकः, तस्य सार्वात्म्यासंभवात्। न च मनोमयत्वप्राणशरीरत्वयोर्जीवधर्मयोर्ब्रह्मण्यसंभव इति वाच्यम्। भूतताद्रात्म्येन गन्धादिमत्त्ववज्जीवतादात्म्येन मनोमयत्वाद्युपपत्तेरिति। सूत्रार्थस्तु— मनोमयत्वादिगुणकं ब्रह्मैवेहोपास्यत्वेन निर्दिश्यते। कुतः, सर्वत्र वेदान्तेषु प्रसिद्धस्य ब्रह्मणः 'सर्वं खल्विदं ब्रह्म' इति पूर्ववाक्ये स्वशब्देनैवोपदेशात्, अस्मिन्नपि वाक्ये 'प्राणः शरीरमस्य' इत्यादिविग्रहवाक्येषु प्रकृतब्रह्माकर्षकसर्वनामश्रुतीनां सत्त्वाच्च ब्रह्मैव सगुणमुपास्यमत्रेति सिद्धम्। **सर्वोपादानत्वे त्विति**। शुद्धब्रह्मवज्जीवस्य सर्वोपादानत्वोपगमेऽपि सर्वात्मकत्वं जीवव्यावृत्तमीश्वरलिङ्गं न स्यादिति तुशब्दार्थः। ननु संक्षेपशारीरके मायाशबलस्योपादानत्वं निरस्तमिति तद्विरोध इत्यत आह— **संक्षेपशारीरक इति**। मायाया अपि बिम्बभूतेश्वरविशेषणतयोपादानत्वाश्रयकोटौ निवेश एव तत्र दूषितः, न तु बिम्बत्वविशिष्टचैतन्यरूपेश्वरस्य तन्निरस्तमिति न तद्विरोध इत्यर्थः। ननु शबलस्योपादानत्वं निराकृत्य जगदुपादानत्वस्य ज्ञेयब्रह्मलक्षणत्वसमर्थनपरस्य संक्षेपशारीरकग्रन्थस्य कथमेवमभिप्रायः कल्पयितुं शक्यते, स्वरसतस्तस्य बिम्बप्रतिबिम्बानुगतशुद्धब्रह्मोपादानत्वप्रतिपादनपरत्वावगमादिति, नेत्याह— त-

राकरणपरम्, तत्रैव प्रथमाध्यायान्ते जगदुपादानत्वस्य तत्पदार्थवृत्तित्वोक्तेः। एवं चेश्वरगतमपि कारणत्वं तदनुगतमखण्डचैतन्यं शाखाचन्द्रमसमिव तटस्थतयोपलक्ष-

---

त्रैवेति। संक्षेपशारीरक एवेत्यर्थः। न च तत्पदार्थवृत्तित्वं तत्पदलक्ष्यार्थवृत्तित्वं विवक्षितम्, लक्ष्यार्थश्च शुद्धं ब्रह्मेति न संक्षेपशारीरकग्रन्थस्य पूर्वापरविरोधो न वा तेन बिम्बभूतेश्वरस्योपादानत्वलाभ इति वाच्यम्। लक्ष्यार्थत्वस्य वाक्यार्थसाधारणतया तत्पदार्थवृत्तित्वविशेषणवैयर्थ्यापत्तेः। अतस्तत्पदार्थवृत्तित्वं तत्पदवाच्यार्थवृत्तित्वमेव वक्तव्यमिति तदविरोधाय सर्वज्ञत्वादिगुणकस्येश्वरस्य जगत्कारणत्वप्रतिपादकबह्वृश्रुत्यविरोधाय च शबलोपादानत्वनिराकरणं मायाविशिष्टोपादानत्वनिराकरणरूपमेव वक्तव्यमिति न संक्षेपशारीरकविरोध इति भावः। तर्हि जन्मादिसूत्रतद्भाष्ययोर्ज्ञेयब्रह्मलक्षणत्वोक्तिविरोध इति नेत्याह— **एवं चेति**। अभिन्ननिमित्तोपादानत्वरूपलक्षणस्यान्तस्तद्धर्माद्यधिकरणभाष्यपर्यालोचनया बिम्बभूतेश्वरगतत्वे सिद्धे सतीत्यर्थः। अपिशब्दश्चैतन्यमित्यनेन संबध्यते। कारणत्वमित्यनन्तरमीश्वरमितरव्यावृत्ततया बोधयत्सादिति शेषः। **तदनुगतमिति**। बिम्बत्वविशिष्टचैतन्यरूपेश्वरानुगतमित्यर्थः। **अखण्डचैतन्यमिति**। विशेष्यंभूतशुद्धचैतन्यमित्यर्थः। तटस्थत्वं च लक्ष्यस्वरूपबहिर्भूतत्वं वा लक्ष्यावृत्तिधर्मत्वं वोपलक्षणत्वं वा बोध्यम्। क्व चन्द्र इति प्रश्ने शाखायामित्युत्तरं भवति। तत्र यथा शाखा दिगन्तरगतनक्षत्र-

यितुं शक्नोतीति तस्य ज्ञेयब्रह्मलक्षणत्वोक्तिरिति मन्यन्ते ॥

व्यावृत्तं चन्द्रमुपलक्षयति तथेश्वरगतं कारणत्वमीश्वरमितरव्यावृत्ततया बोधयत्सच्चटस्थतयेश्वरानुगतमखण्डचैतन्यमपीतरव्यावृत्ततयोपलक्षयितुं शक्नोत्येवेत्यर्थः । ईश्वरगतेनाभिन्ननिमित्तोपादानत्वेन बिम्बत्वविशिष्टचैतन्यरूपस्येश्वरस्य जगदुपादानत्वसंभवशून्याज्जीवात्तत्कर्तृत्वसंभवरहितात्प्रधानादेश्च सकाशाद्व्यावृत्तौ गम्यमानायां सत्यां विशेष्यभूतज्ञेयब्रह्मणोऽपि प्रधानादिव्यावृत्तिर्गम्यत इत्यभिप्रेत्य तस्य ज्ञेयब्रह्मलक्षणत्वं जन्मादिसूत्रतद्भाष्ययोः संक्षेपशारीरके चोक्तमिति भावः । एवं तटस्थलक्षणेन प्रधानादिव्यावृत्तत्वेनावगतं ब्रह्म कीदृक्स्वरूपमिति विशेषजिज्ञासायां सत्यां सत्यज्ञानानन्दात्मकं ब्रह्मेति स्वरूपलक्षणं प्रवर्तते । 'अनेनैवाभिप्रायेण भाष्यकारैरुक्तम्— 'तस्य च निर्णयवाक्यम् 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते" इति । 'यतो वै' इत्यादिवाक्येन यस्मात्कारणादिमानि भूतानि जायन्त इत्युक्तम्, तद्वस्तुतः सत्यज्ञानानन्तस्वरूपादानन्दादेव नान्यस्मात्कारणादित्येतद्धि प्रसिद्धं पूर्ववल्ल्यामिति श्रुत्यर्थः । अनेन स्वरूपलक्षणेन बिम्बभूतेश्वरानुगतं तत्पदलक्ष्यं वस्तुतो वाक्यार्थभूतं ज्ञेयं ब्रह्म विशेषतो निर्धारितं भवति । इयं च स्वरूपलक्षणविवक्षा मूलेऽखण्डपदेन सूचिता ॥

जगत्प्रकृतिभूतमायाप्रतिबिम्ब ईश्वरः । माया चेश्वराश्रिता । न च प्रतिबिम्बत्वस्य मायाकल्पितत्वात्तद्विशिष्टचैतन्याश्रितत्वं मायाया न संभवति, प्रतिबिम्बत्वकल्पनात्प्रागेव तस्याश्चैतन्याश्रि-

तत्वस्य वक्तव्यत्वादिति वाच्यम् । मायावत्प्रतिबिम्बत्वस्याप्यनादित्वेन तस्यास्तद्विशिष्टचैतन्याश्रितत्वोपपत्तेः । वस्तुतो निर्विशेषचैतन्येऽनादिकालमारभ्य कल्पितप्रतिबिम्बत्वस्थितेरनिर्वचनीयमायाधीनत्वमात्रेण प्रतिबिम्बत्वस्य तत्कल्पितत्वम् । न तु प्रतिबिम्बत्वस्य वियदादेरिव मायापरिणामित्वमुपेयते, तथा सति प्रतिबिम्बभूतेश्वरस्य सादित्वप्रसङ्गात् । न च मायानादिकालमारभ्य चैतन्ये प्रतिबिम्बत्वं घटयन्ती तद्विशिष्टमेव चैतन्यमाश्रयत इति कथं संभावयितुं शक्यमिति वाच्यम् । मायाया अघटितघटनापटीयस्त्वात् । न च शुद्धचैतन्याश्रितैव माया तत्र प्रतिबिम्बभावं घटयतीति कुतो नाश्रीयत इति वाच्यम् । 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' इति श्रुतिविरोधात्, 'मायिनम्' इति पदेन मायाया ईश्वराश्रितत्वप्रतीतेः । जीवास्तवविद्याप्रतिबिम्बाः, 'जीवेशावाभासेन करोति' इति श्रुतेः । प्रकृता मूलप्रकृतिर्जीवेशौ प्रतिबिम्बरूपौ करोतीत्यर्थः । न ह्युपाधिभेदं विना प्रतिबिम्बभेदः संभवति । न चैकस्मिन्नपि दर्पणेऽनेकप्रतिबिम्बदर्शनात्प्रतिबिम्बभेद उपाधिभेदव्याप्यो न भवतीति वाच्यम् । एकस्मिन्दर्पणे बिम्बभेदेन प्रतिबिम्बभेदेऽपि सूर्यादिबिम्बैक्यस्थल उपाधिभेदं विना प्रतिबिम्बभेदादर्शनात्, बिम्बभूतचैतन्यस्य चैकत्वात् । तस्मादीश्वरोपाधिमायापेक्षया भिन्ना एव जीवोपाधिभूता अविद्याः स्वीकर्तव्याः । न च मूलप्रकृतिं प्रकृत्य प्रवृत्तायाम् 'जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवति' इति श्रुतौ जीवेशरूपप्रतिबिम्बाधारयोर्मायाऽविद्ययोः 'स्वयमेव' इत्यनेन

वियदादिप्रपञ्च ईश्वराश्रितमायापरिणाम इति तत्रे-

प्रकृतमूलप्रकृत्यात्मकत्वप्रतिपादनं मायाऽविद्ययोर्भेदपेक्ष विरुध्यत इति वाच्यम्। मायाया वियदादिप्रकृतित्ववदविद्याया अपि लिङ्ग-शरीरादिप्रकृतित्वस्य वक्ष्यमाणत्वेन मायाऽविद्ये प्रकृतित्वेनैकीकृत्य 'स्वयमेव' इत्येकप्रकृत्यात्मकत्वप्रतिपादनस्याविरोधात्। 'अविद्या च' इत्येकवचनस्यापि जात्यभिप्रायत्वोपपत्तेर्न तन्नानात्वविरोधोऽपि, बिम्बैक्यस्थल उपाधिभेदं विना प्रतिबिम्बभेदासंभवस्य दर्शितत्वात्प्रतिबिम्बजीवानां च नानात्वात्। अदृश्यत्वाधिकरण-भाष्येऽपि 'अव्याकृतम्.... ईश्वराश्रयं तस्यैवोपाधिभूतम्' इति मायाया ईश्वरोपाधित्वतदाश्रयत्वयोरुक्तत्वात्। तथानुमानिकाधिकरणभाष्ये 'मुक्तानां च न पुनरुत्पतिः, तस्या अविद्याबीजशक्तेर्विद्यया दाहात्' इत्यत्र जीवनानात्वस्य तदुपाधिभूताविद्यानानात्वस्य च स्पष्टमभिहितत्वात्, भामतीनिबन्धने तद्भाष्यस्य जीवोपाधिभूताविद्यैक्यनिराकरणपरतयैव व्याख्यातत्वाच्च। 'आभास एव च' इति सूत्रतद्भाष्ययोर्जीवानां प्रतिबिम्बरूपतायाः स्पष्टमभिहितत्वाच्च। तथा च मायाऽविद्याभेदः श्रुत्यादिसंमत इति ये मन्यन्ते तेषां मतमुपन्यस्यति— **वियदादिप्रपञ्च इत्यादिना**। पूर्वमत ईश्वररूपं ब्रह्मोपादानमित्युक्तम्। तत्सत्यमेव। परं तु क्वचिज्जगति जीवस्याप्युपादानत्वमभ्युपगन्तव्यमित्यभिप्रायेणास्य मतस्य प्रवृत्तिर्बोध्या। **ईश्वराश्रितमायापरिणाम इति**। 'मायां तु प्रकृतिं विद्यात्' इति श्रुतेरिति भावः। **तत्रेति**। वियदादावी-

श्वर उपादानम् । अन्तःकरणादिकं त्वीश्वराश्रितमाया-परिणाममहाभूतोपसृष्टजीवाविद्याकृतभूतसूक्ष्मकार्यमिति तत्रोभयोरुपादानत्वम् । अत एव 'एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति' इति श्रुतौ कलाशब्दवाच्यानां प्राणमनःप्रभृतीनां विदुषो विदेहकैवल्यसमये विद्यानिवर्त्याविद्याकार्यांशाभिप्रायेण विद्ययोच्छेदो दर्शितः, 'गताः कलाः पञ्चदश प्रतिष्ठाः' इति श्रुत्यन्तरे तदनिवर्त्यमायाका-

---

श्वर एवोपादानमित्यर्थः । अन्तःकरणादौ तुशब्दसूचितं विशेषं दर्शयति— **ईश्वरेति** । भूतैरुपष्टम्भकलक्षणैः संसृष्टत्वं भूतोपसृष्टत्वम् । तच्च जीवाविद्याकृतानां भूतसूक्ष्माणां विशेषणम् । भूतानां सूक्ष्मत्वं परिच्छिन्नत्वम् । **अत एवेति** । अन्तःकरणादौ जीवाविद्यापरिणामसूक्ष्मभूतानां तदुपष्टम्भकतया मायापरिणाममहाभूतानां चोपादानतया प्रविष्टत्वादेवेत्यर्थः । यथा गङ्गाद्या नद्यः समुद्रं प्राप्यास्तं गच्छन्ति, एवमेवास्य विदुषः परितः सर्वत्रात्मानं पूर्णं पश्यतः कला लिङ्गशरीरैकदेशभूताः पुरुषायणाः पुरुषश्चिदात्मायनमधिष्ठानं यासां ताः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति पुरुषे लीयन्त इत्यर्थः । **दर्शित इति** । पुरुष इति शेषः । प्रतिष्ठा इति द्वितीयाबहुवचनम् । मायापरिणामात्मकमहाभूतानीति द्वितीयाबहुवचनार्थः । पञ्चदश कलाः प्रतिष्ठाः प्रति गताः, तासु लीना इति यावत् । **तदनिवर्त्येति** । ईश्वरोपाधि-

र्यमहाभूतपरिणामरूपोपष्टम्भकांशाभिप्रायेण तेषां स्व-स्वप्रकृतिषु लयो दर्शित इति मायाविद्याभेदवादिनः ॥

भूतमायाया जीवगतविद्यानिवर्त्यत्वाभावादिति भावः । यदि कलानां जीवाविद्यामात्रपरिणामत्वं तदा तासामशेषतः पुरुष एव लयः स्यात् । तथा च तासां भूतेषु लयप्रतिपादकं वचनं निर्विषयं स्यात् । अतो मायाकार्यमहाभूतानामपि लिङ्गशरीरोपादानत्वं वाच्यमिति तत्रोभयोरुपादानत्वे श्रुतिद्वयव्यवस्थासिद्धिरेव फलमित्यर्थः । न च मायायास्तत्त्वज्ञाननिवर्त्यत्वाभावे मिथ्यात्वसिद्धिर्न स्यादिति वाच्यम् । ब्रह्मणि सर्वदृश्यनिषेधश्रुतिबलादृश्यत्वादिलिङ्गैश्च तन्मिथ्यात्वसिद्धेः । न च मायाया विद्यया निवृत्यभावे निवर्तकान्तराभावात्सर्वमुक्तावपि तदनुवृत्तिप्रसङ्ग इति वाच्यम् । महाप्रलयकाले सर्वप्राणिभोगप्रदकर्मणां युगपदुपरमे सतीश्वरसंकल्पमात्रादेव सर्वप्रपञ्चलयवत्सर्वमुक्तिकाल इतः परं सकार्याया मायायाः प्रयोजनं नास्तीत्यनुसंधानवत ईश्वरस्य सत्यसंकल्पस्य माया स्वकार्यैः सह मयि वस्तुतश्चिदेकरसे निःशेषं लयं यात्विस्येवंरूपादेवं मायापरिणामलक्षणसंकल्पात्तल्लयोपपत्तेः । श्रुतिस्मृतिपुराणादिषु तत्त्वज्ञानान्मायानिवृत्तिप्रतिपादकं ग्रन्थजातमविद्यानिवृत्त्यभिप्रायम् । यद्वा तत्त्वज्ञानमात्रमविद्याया इव मायाया निवर्तनयोग्यमपि नानाप्राणिकर्मप्रतिबन्धान्न तस्या निवर्तकम्, चरमं मुच्यमानस्यैव तत्त्वज्ञानं प्रतिबन्धकाभावात्तन्निवर्तकमित्यादि कल्पनीयमिति संक्षेपः ॥

यथा वियदादिप्रपञ्च ईश्वराश्रितमायापरिणाम इति तत्रेश्वर उपादानं तथान्तःकरणादिर्जीवाश्रिताविद्यामात्रपरिणाम इति तत्र जीव एवोपादानम् । न चान्तःकरणादौ मायाकार्यमहाभूतानामप्यननुप्रवेश उदाहृतश्रुतिद्वयव्यवस्थानुपपत्तिः, कलानां विद्ययोच्छेदश्रुतिस्तत्त्वविद्दृष्टिविषया 'गताः कलाः' इति श्रुतिस्तु म्रियमाणे तत्त्वविदि समीपवर्तिनः पुरुषा नश्यद्घटवत्तदीयशरीरादीनामपि भूम्यादिषु लयं मन्यन्त इति तटस्थपुरुषप्रतीतिविषयेति व्यवस्थायाः कलाप्रलयाधिकरणभाष्ये स्पष्टत्वादिति मायाविद्याभेदवादिष्वेकदेशिनः ॥

अन्तःकरणादावुभयोरुपादानत्वमसिद्धम्, श्रुतिद्वयव्यवस्थाया भाष्यकारैरेवान्यथा प्रतिपादितत्वादिति मतान्तरं दर्शयति— **यथा वियदादीति** । तत्त्वविदो दृष्टिस्तत्त्वसाक्षात्कारः । अत्र दृष्टिपदेन तत्फलभूतः कलाक्षयो विवक्षितः । तद्विषया पुरुषे कलाप्रलयश्रुतिरित्यर्थः । भूतेषु कलाप्रलयवचनं तु कलानामपि मायापरिणाममहाभूतकार्यत्वभ्रमवतां भ्रान्तिसिद्धार्थानुवादकमिति भावः । चूर्णीभावपर्यन्तो घटनाशो यथा भूमौ दृश्यते तद्वन्मन्यन्त इत्यक्षरार्थः । **प्रतीतिविषयेति** । प्रतीतिरत्र भ्रान्तिरूपा । तद्विषयविषयिकेत्यर्थः । **स्पष्टत्वादिति** । 'तानि परे तथा ह्याह' इति तदधिकरणसूत्रम् । तानि मनआदीनि परे पुरुषे निरवशेषं

तदभेदवादिष्वपि केचित्— यद्यपि वियदादिप्रपञ्चस्येश्वर उपादानं तथाप्यन्तःकरणादीनां जीवतादात्म्यप्रतीतेर्जीव एवोपादानम् । अत एवाध्यासभाष्येऽन्तःकरणादीनां जीव एवाध्यासो दर्शितः । विवरणे

लीयन्ते । तथा हि श्रुतिराह 'एवमेवास्य' इत्याद्या श्रुतिर्निरवशेषं लयमाह हीति सूत्रार्थः । अन्तःकरणादीनां मायाकार्यत्वाभाव ईश्वरस्यान्तःकरणाद्युपादानत्वप्रतिपादकश्रुतिविरोध इति दोषं सूचयति— **एकदेशिन इति** ॥

मायैवाविद्या, सा चेश्वरस्यैवोपाधिः, जीवानां तु प्रतिबिम्बरूपाणामन्तःकरणान्येवोपाधय इति मायाऽविद्ययोरभेदवादिनोऽपि केचिदन्तःकरणादौ जीवस्यैवोपादानत्वं तद्भेदवादिन इव वदन्तीत्याह— **तदभेदवादिष्वपीति** । अपिशब्दः क्वचिदंशे पूर्वमतसाम्यार्थकः । **तच्च** साम्यं तथापीत्यादिना **स्पष्टं** भविष्यति । ननु वियदादिप्रपञ्चेऽपि जीव एवोपादानं **किं** न स्यादित्यत **आह— यद्यपीति** । ईश्वराश्रितमायापरिणामत्वादीश्वर एव वियदादावुपादानं न जीव इत्यर्थः । **ननु** मायाऽविद्ययोरभेदोपगमेऽविद्यापरिणामान्तःकरणादीनामपीश्वराश्रितमायापरिणामत्वाविशेषादीश्वर एवान्तःकरणादावप्युपादानमिति वक्तुमुचितमिति, नेत्याह— **तथापीत्यादिना । जीवेति** । 'अहं कर्ता' 'अहं प्राणिमि' 'अहं काणः' 'अहं मूकः' 'अहं स्थूलः' इत्यादिप्रकारेणान्तः-

च प्रतिकर्मव्यवस्थायां ब्रह्मचैतन्यस्योपादानतया घटादिसङ्गित्वं जीवस्य तदसङ्गित्वेऽप्यन्तःकरणादिसङ्गित्वं

करणादीनां शरीरान्तानां जीवतादात्म्यं प्रतीयते । तच्च तेषां जीवेऽध्यस्तत्वं विना न संभवतीति जीवस्यैव तदधिष्ठानत्वरूपमुपादानत्वम्, नेश्वरस्येत्यर्थः । **प्रतिकर्मव्यवस्थायामिति** । ब्रह्मणः स्वरूपचैतन्येन सर्वदा सर्वावभासकत्वरूपे सर्वज्ञत्व उक्ते, तर्हि जीवस्यापि स्वरूपचैतन्येनैव सर्वदा सर्वद्रष्टृत्वमिति दोषप्रसक्तौ, जीवं प्रति विषयव्यवस्थाप्रतिपादकग्रन्थ इत्यर्थः । **ब्रह्मेति** । बिम्बचैतन्यरूपब्रह्मणः सर्वोपादानतया घटादितादात्म्यरूपः संसर्गः क्लृप्त इत्यर्थः । अविद्याया व्यापकत्वेन तत्प्रतिबिम्बरूपजीवस्य व्यापकत्वेऽपि न घटादिभिस्तस्य तादात्म्यम्, उपादानत्वाभावात् । अन्तःकरणादिभिस्तु जीवस्य तादात्म्यलक्षणः संसर्गोऽस्तीति प्रतिपादितं विवरण इत्यर्थः । अनेन जीवस्यान्तःकरणादावुपादानत्वमुक्तं भवति । अन्यथा घटादिभिरिवान्तःकरणादिभिरप्युक्तं सङ्गित्वं जीवस्य न स्यात्, उपादानत्वाभावाविशेषादिति भावः । अत्रान्तःकरणादिपरिणाम्युपादानभूताया अविद्याया ईश्वराश्रितमायया सहाभेदाङ्गीकार ईश्वरस्यैवान्तःकरणादावुपादानत्वं वक्तुमुचितम् । यदि जीवतादात्म्यप्रतिपत्त्यादिभिरुक्तहेतुभिर्जीवस्यैवान्तःकरणादावुपादानत्वं वक्तव्यम्, तदान्तःकरणादिपरिणामिभूताविद्याया जीवाश्रितत्वमीश्वराश्रितमायायाः सकाशाद्भिन्नत्वं च वक्तव्यम्, कार्यात्मना परिणममानप्रकृत्याश्रयत्वातिरिक्तस्य चैतन्यग-

च वर्णितमित्याहुः ॥

'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ॥' इत्यादिश्रुतेः कृत्स्नस्य व्यावहारिकप्रपञ्चस्य ब्रह्मैवोपादानम् । जीवस्तु प्रातिभासिकस्य स्वप्नप्रपञ्चस्य । 'कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा' इत्यधिकरणे ब्रह्मणो जगदुपादानत्वे तस्य कात्स्न्र्येन जगदाकारेण परिणामे विकारातिरेकेण ब्रह्माभावो वैकदेशेन परिणामे निरवयवत्व-

---

तोपादानत्वस्याभावात् । अतो मायाऽविद्ययोरभेदाङ्गीकारो जीवस्यैवान्तःकरणादावुपादानत्वाङ्गीकारश्च परस्परविरुद्ध इत्यस्वरसस्तदभेदवादिष्वपीत्यपिशब्देन सूचितः ॥

ईश्वरस्यान्तःकरणादावप्युपादानत्वमुपेत्यापि तस्य कार्यमात्र उपादानत्वं नास्तीति विशेषं वक्तुं मतान्तरमवतारयति— **एतस्मादिति** । प्रकृतादीश्वरादित्यर्थः । प्रकृतित्वं पञ्चम्यर्थः । **जीवस्त्विति** । तुशब्दोऽवधारणार्थः । स्वप्नप्रपञ्चस्येत्यनन्तरमुपादानमित्यनुषङ्गः । किं कृत्स्नं ब्रह्म जगदाकारेण परिणमत एकदेशेन वा । नाद्य इत्याह— **तस्येति** । यथा दध्याकारेण परिणतस्य क्षीरस्य पूर्वरूपात्प्रच्युतिरेवं ब्रह्मणोऽपि स्वरूपात्प्रच्युतिः स्यादित्यर्थः । ब्रह्मण एकदेशः परिणमत इति द्वितीयंकल्पं दूषयति—

श्रुतिविरोधो वा प्रसज्यत इति पूर्वपक्षे, 'आत्मनि चैवं विचित्राश्च हि' इति सूत्रेण विवर्तवादाभिप्रायेण स्वप्नदृशि जीवात्मनि स्वरूपानुपमर्देनानेकाकारस्वप्नप्रपञ्चसृष्टिवद्ब्रह्मणि वियदादिसृष्टिरुपपद्यत इति सिद्धान्तितत्वादित्यन्ये ॥

जीव एव स्वप्नद्रष्टृवत्स्वस्मिन्नीश्वरत्वादिसर्वकल्पक-

एकदेशेनेति । पूर्वपक्ष इति । उभयथापि ब्रह्मण उपादानत्वं न संभवतीति पूर्वपक्षे प्राप्ते सतीत्यर्थः । यदि ब्रह्मण उपादानत्वं क्षीरपृथिव्यादिवत्परिणामित्वरूपमभ्युपगम्येत तदा कृत्स्नप्रसक्त्यादिदोषः प्रसज्येत । न तु तथाभ्युपगम्यते । किं तु रज्ज्वादेः सर्पाद्युपादानत्ववद्विवर्तोपादानत्वं ब्रह्मण उपेयते । अतो नोक्तदोषावकाश इति सिद्धान्तयति— आत्मनि चेति । एकश्चकारो यथाशब्दसमानार्थकः । द्वितीयश्चकारस्तथाशब्दसमानार्थकः । हिशब्दो हेत्वर्थः । ततश्च यथात्मनि जीवे स्वप्नद्रष्टरि विचित्रा रथादिसृष्टयो जीवचैतन्यस्वरूपोपमर्दं विनैव भवन्ति स्वप्नावस्थानिवृत्त्यनन्तरमपि बुद्ध्यादिसाक्षितया जीवचैतन्यस्य यथापूर्वमवस्थानात्, एवं ब्रह्मणि तत्स्वरूपप्रच्युतिं विनैव विचित्रा वियदादिसृष्टयः संभवन्ति सृष्टिस्थितिसंहारेषु सच्चिदानन्दस्वरूपेण ब्रह्मानुवृत्तेः श्रुतिसिद्धत्वादिति सूत्रार्थः ॥

'अथ शुद्धं ब्रह्मोपादानम्' इत्यादिग्रन्थे तृतीयं पक्षमादाय

त्वेन सर्वकारणमित्यपि केचित् ॥

अथ 'मायां तु प्रकृतिं विद्यात्' इति श्रुतेर्मायाजा-

प्रतिवचनमवतारयति— **जीव एवेति** । परिपूर्णश्चिदात्माविद्यया-वच्छेदप्रतिबिम्बभावौ विनापि प्राप्तजीवभावः सन्नात्मानमेव सर्वेश्वरं कल्पयति । प्राप्तेश्वरभावात्स्वस्मादेव गगनादिसृष्टिं कल्पयति । स्वस्य स्वकल्पितादीश्वराद्भेदं तन्नियम्यत्वं च कल्पयति । तथा क्रमेण मनुष्यादिभावं कल्पयति । यथा वियदादिप्रपञ्चो व्यावहारिकसत्यः स्वप्नप्रपञ्चः प्रातिभासिक इति पक्षे स्वप्नद्रष्टा जीव एव देवतिर्यङ्मनुष्यादिभावेन तन्नियन्तृपरमेश्वररूपेण ततो भिन्नत्वादिरूपेण चात्मानं कल्पयति तद्वत् । **तथा च स्वस्मिन्नेव सर्वप्रपञ्चकल्पकत्वाज्जीवभावापन्नं ब्रह्म सर्वोपादानमिति दृष्टिसृष्टिवादिन आहुरित्यर्थः** । जीवभावापन्नस्य ब्रह्मणः सर्वोपादानत्वमित्यस्मिन्पक्षे जीवादधिकस्येश्वरस्याभावादीश्वरस्य सर्वजीवनियन्तृत्वप्रतिपादकश्रुतिस्मृतिन्यायसूत्रभाष्यादिविरोधो बन्धमोक्षव्यवस्थानुपपत्तिश्चेति दोषं सूचयति— **इत्यपि केचिदिति** । तथा च जीवेऽतिव्याप्त्यभावादीश्वररूपमेव ब्रह्म सर्वोपादानमिति स्थितम् ॥

इदानीं ब्रह्मलक्षणस्योपादानत्वस्यासंभवमाशङ्कते— **अथेति** । श्रुतौ तुशब्दो मायायाः प्रकृतित्वमवधारयति । यथा मृदादिगतश्लक्ष्णत्वादेर्घटादावनुगमाद्घटादौ मृदादेरुपादानत्वं तथा मायागतजाड्यस्य जगत्यनुगमात्तस्यास्तदुपादानत्वमिति युक्तिमप्याह—

ज्यस्य घटादिष्वनुगमाच्च माया जगदुपादानं प्रतीयते । कथं ब्रह्मोपादानम् । अत्राहुः पदार्थतत्त्वनिर्णयकाराः— ब्रह्म माया चेत्युभयमुपादानमित्युभयश्रुत्युपपत्तिः सत्ताजाड्यरूपोभयधर्मानुगत्युपपत्तिश्च । तत्र ब्रह्म विवर्तमानतयोपादानमविद्या परिणममानतया । न च वि-

---

मायाजाड्यस्येति । कथमिति । ननु ब्रह्मण उपादानत्वं बहुश्रुत्युदाहरणेन पूर्वं दर्शितम् । सत्यं दर्शितम् । तत्तु न संभवति, निरवयवस्य तस्य मृदादेरिव परिणाम्युपादानत्वासंभवात् । न च विवर्तोपादानत्वं निरवयवस्यापि संभवति, गगनादौ नैल्याद्यारोपदर्शनादिति वाच्यम् । परिणामिष्विव विवर्ताधिष्ठानेषु लोक उपादानत्वप्रसिद्ध्यभावेन तत्रोपादानत्वाभ्युपगमस्य परिभाषामात्रत्वादित्याक्षेपाभिप्रायः । उपादानत्वघटितब्रह्मलक्षणस्यासंभवं निराचष्टे— **अत्राहुरित्यादिना** । सत्तेति । न च बाधायोग्यस्वरूपभूतायास्तस्या ब्रह्मस्वरूपत्वात्सत्तायास्तद्धर्मत्वोक्तिरयुक्तेति वाच्यम् । 'राहोः शिरः' इतिवद्भेदकल्पनया तद्धर्मत्वव्यवहारोपपत्तेरिति भावः । ननूपादानद्वयं व्यर्थमिति, नेत्याह— **तत्रेति** । यद्वा निरवयवस्य ब्रह्मण उपादानत्वमनुपपन्नमिति, नेत्याह— **तत्रेति** । मायाब्रह्मणोर्मध्य इत्यर्थः । आक्षेपाभिप्रायमनूद्य निराचष्टे— **न चेति** । मृदादिषु प्रसिद्धस्योपादानलक्षणस्य विवर्ताधिष्ठानेष्वपि सत्त्वात्तेषूपादानत्वाभ्युपगमस्य परिभाषामात्रत्वं नास्तीत्यर्थः

वर्ताधिष्ठाने पारिभाषिकमुपादानत्वम्, स्वात्मनि कार्यजनिहेतुत्वस्योपादानलक्षणस्य तत्राप्यविशेषादिति ॥

केचित्तूक्तामेव प्रक्रियामभ्युपगम्य विवर्तपरिणामोपादानद्वयसाधारणमन्यल्लक्षणमाहुः— स्वाभिन्नकार्यजनकत्वमुपादानत्वम्। अस्ति च प्रपञ्चस्य सद्रूपेण ब्रह्म-

---

स्वात्मनीति। अत्र स्वशब्द उपादानत्वाभिमतवस्तुपरः। तथा च कार्याधारत्वे सति कार्यजनिहेतुत्वमुपादानत्वम्। निमित्तकारणवारणाय सत्यन्तम्। भूतलादेरपि कार्याधारत्वात्तद्वारणाय विशेष्यम्। **तत्रापीति**। विवर्ताधिष्ठानेऽपीत्यर्थः ॥

उक्तामेवेति। प्रपञ्च उभयोरपि मायाब्रह्मणोरुपादानत्वम्, तत्र च परिणामितया मायाया उपादानत्वमधिष्ठानतया च ब्रह्मण उपादानत्वम्, उभयोरुपादानत्वे श्रुतिन्याययोरुपपत्तिश्चेत्येतामित्यर्थः। **स्वाभिन्नेति**। स्वशब्देन घटाद्युपादानभूतं मृदादि जगत्परिणाम्युपादानभूतमज्ञानं जगद्विवर्तोपादानभूतं ब्रह्म च गृह्यते। तत्र घटादेर्मृदादेः सकाशादभेदः स्फुटः, मृदेव घट इत्यनुभवात्। अज्ञाने ब्रह्मणि च कार्यभेदमनुभवेन दर्शयति— **अस्ति चेति**। ननु 'मृद्घटः' इतिवत् 'ब्रह्म घटः' 'ब्रह्म पटः' इत्यनुभवो नास्ति। तथा 'अज्ञानं घटः' इत्याद्यनुभवोऽपि नास्ति। अतः प्रपञ्चस्याज्ञानेन ब्रह्मणा च कथमभेदोऽस्तीति शङ्कानिरासाय ब्रह्मणः सद्रूपत्वं विशेषणं दत्तमज्ञानस्य च जडत्वम्। तथा च ब्रह्मा-

णा विवर्तमानेन जडेनाज्ञानेन परिणामिना चाभेदः, 'सन्घटः' 'जडो घटः' इति सामानाधिकरण्यानुभवात् । न च 'तदनन्यत्वमारम्भणशब्दादिभ्यः' इति

ज्ञानाभ्यां सह ब्रह्मत्वाज्ञानत्वाकारेणाभेदानुभवाभावेऽपि सत्त्वजडत्वरूपेण ताभ्यां सह प्रपञ्चस्याभेदानुभवोऽस्तीत्याह— **सन्घट इत्यादिना** । ननु घटोत्पत्तेः पूर्वं तत्कारणद्रव्यस्य मृत्त्वानुभवान्मृत्त्वस्य कारणधर्मत्वे सिद्धे सति 'मृद्घटः' इति प्रत्यक्षानुभवः कार्यकारणद्रव्ययोरभेदावगाहीति युक्तम् । सत्त्वजडत्वयोस्तु कारणधर्मत्वे किं मानं येन 'सन्घटः' 'जडो घटः' इत्यनुभवबलेन सद्रूपजडरूपाभ्यां ब्रह्माज्ञानाभ्यां प्रपञ्चस्याभेदः सिध्येदिति चेत्, उच्यते— **ब्रह्मणः सद्रूपत्वम् 'सदेव' इत्यादिश्रुतिसिद्धम्** । 'तदेतज्जडं मोहात्मकम्' इति श्रुत्याज्ञानस्य जडत्वं सिद्धम् । तथा च घटादौ मृद्द्रव्याभेदान्मृत्त्वानुभववत्सद्रूत्वादिरूपकारणद्रव्याभेदादेव प्रपञ्चे सत्त्वजडत्वानुभवोपपत्तौ पृथक्सत्त्वादिधर्मो नोपेयते । तथा च 'सन्घटः' 'जडो घटः' इत्याद्यनुभवोऽपि कार्यकारणद्रव्याभेदावगाहीति भावः । न च जडरूपाज्ञानस्य प्रपञ्चाभेदसिद्धावपि मायायाः किमायातमिति वाच्यम् । तयोरभेदाभ्युपगमादिति भावः । कार्यकारणयोरभेदाभ्युपगमेऽपसिद्धान्तं शङ्कते— **न चेति** । तयोः कार्यकारणयोरनन्यत्वमभ्युपगन्तव्यम् । कुतः, आरम्भणशब्दादिभ्यः । वाचारम्भणश्रुतिरारम्भणशब्दार्थः । 'आत्मैवेदं सर्वम्' इत्यादिसार्वात्म्यप्रतिपादकश्रुतिः 'नेह नानास्ति

सूत्रे 'अनन्यत्वं व्यतिरेकेणाभावः' 'न खल्वनन्यत्वमित्यभेदं ब्रूमः, किं तु भेदं व्यासेधामः' इति भाष्य-

---

किंचन' इत्यादिनिषेधश्रुतिश्चादिपदार्थः। वाचारम्भणश्रुतिर्विवर्तलक्षणकथनावसरे व्याख्याता। कार्यस्य कारणात्तत्त्वान्तरत्वे जगत्कारणस्य ब्रह्मणः सर्वात्मकत्वश्रुतिरनुपपन्ना स्यात्। तथा ब्रह्मोपादानकस्य जगतः सत्यत्वे ब्रह्मणि जगन्निषेधो न स्यात्। अतः कारणीभूतब्रह्मानन्यत्वं प्रपञ्चस्याभ्युपगन्तव्यमिति भावः। ननु सौत्रानन्यत्वपदेन कार्यकारणयोरैक्यं प्रतीयते। तदनुपपन्नम्, कार्यकारणभावविरोधाच्चिज्जडयोर्ब्रह्मप्रपञ्चयोरैक्यायोगाच्चेति शङ्कां निराकर्तुं सौत्रानन्यत्वपदं व्याचष्टे भाष्यकारः—**अनन्यत्वं व्यतिरेकेणाभाव इति**। न च कारणव्यतिरेकेण कार्यस्याभावे कथं कार्यकारणभाव इति वाच्यम्। कारणसत्त्वव्यतिरेकेण कार्यसत्त्वाभावस्य विवक्षिततया कार्यस्वरूपापलापशङ्कानवकाशात्। सौत्रानन्यत्वपदतात्पर्यप्रदर्शकं भामतीनिबन्धनवाक्यमुदाहरति—**न खल्विति**। अनन्यत्वमिति पदेन कार्यकारणयोरभेदं न ब्रूमः। चेतनाचेतनयोरभेदानुपपत्तिस्तन्निषेधहेतुः खलुशब्देन द्योत्यते। तर्हि कारणब्रह्मविज्ञानात्सर्वविज्ञानं श्रुतिसिद्धं न संभवेत्, अभेदानभ्युपगमादिति शङ्कते—**किं त्विति**। परिहरति—**भेदमिति**। कार्यकारणयोः सत्त्वभेदं व्यासेधाम इत्यर्थः। तथा च कारणब्रह्मस्वरूपभूतं सत्त्वमेव कार्यस्य वास्तवं स्वरूपमिति तस्मिन्विदिते तद्व्यतिरिक्तं सर्वं तत्त्वतो विदितं भवतीति नैकविज्ञानेन सर्वविज्ञानप्रतिज्ञाविरोधः।

भामतीनिबन्धनाभ्यां प्रपञ्चस्य ब्रह्माभेदनिषेधाद्भेदा-

न च ब्रह्मस्वरूपज्ञानेन सर्वप्रपञ्चस्य वास्तवस्वरूपे विदितेऽपि तत्तदसाधारणरूपज्ञानासंभवात्प्रतिज्ञाविरोधस्तदवस्थ एवेति वाच्यम्। 'आत्मनि विदिते सर्वं विदितं भवति' इत्यादिप्रतिज्ञावाक्येषु सर्वपदस्य सर्वतत्त्वपरत्वेन तत्तदसाधारणरूपेण सर्वज्ञानस्याविवक्षितत्वात्। न च तथा कल्पनायां किं विनिगमकमिति वाच्यम्। सर्वप्रपञ्चतत्त्वज्ञानमात्रेणाद्वितीयब्रह्मज्ञानस्य मुक्तिसाधनस्य लाभेन तत्तदसाधारणरूपज्ञाननैष्फल्यस्यैव विनिगमकत्वात्। कारणे ब्रह्मणि विदितेऽपि सर्वप्रपञ्चगततत्तदसाधारणरूपज्ञानस्यासंभवेन सर्वविज्ञानश्रुतेस्तत्परत्वे प्रामाण्याभावप्रसङ्गाच्च भेददर्शनस्यानर्थहेतुतया श्रुतिषु तत्र तत्र निन्दितत्वाच्च प्रतिज्ञाश्रुतेर्न नानारूपज्ञाने तात्पर्यम्। तदुक्तं पञ्चदश्याम्— 'अद्वैतेऽभिमुखीकर्तुमेवात्रैकस्य बोधतः। सर्वबोधः श्रुतो नैव नानात्वस्य विवक्षया॥' इति। अस्यार्थः— अत्र वेदान्तेष्वेकस्य ब्रह्मणो बोधेन सर्वस्य प्रपञ्चस्य बोधोऽद्वैते ब्रह्मणि मुमुक्षुमभिमुखीकर्तुमेव मुमुक्षोरद्वितीयब्रह्मबोधार्थमेव श्रुतः। अद्वितीयब्रह्मबोधश्च सर्वस्य ब्रह्मैव वास्तवं स्वरूपमिति ज्ञानमात्रात्सिध्यतीति भावः। ननु 'ब्रह्मणि विदिते सर्वं विदितं भवति' इति श्रुतौ स्वरसतः प्रतीयमानं तत्तदसाधारणरूपेण सर्वज्ञानमेव श्रुत्यर्थः किं न स्यादिति, नेत्याह— नैवेति। नानात्वबोधविवक्षया सर्वबोधो नैव श्रुत इति योजना। प्रयोजनाभावाद्बाधितत्वान्निन्दितत्वाच्चेति

भ्युपगमेऽपसिद्धान्त इति वाच्यम्। तयोर्ब्रह्मरूपधर्मि-समानसत्ताकाभेदनिषेधे तात्पर्येण शुक्तिरजतयोरिव प्रातीतिकाभेदाभ्युपगमे विरोधाभावादिति ॥

भावः। **तयोरिति**। भाष्यभामतीनिबन्धनयोरित्यर्थः। न च प्रपञ्चब्रह्मणोर्वास्तवाभेदनिषेधे सति वास्तवो भेदः स्यादिति वाच्यम्। भेदस्य वास्तवत्वं हि धर्मिप्रतियोगिनोर्वास्तवत्वापेक्षम्, तत्र ब्रह्मणो वास्तवत्वेऽपि प्रपञ्चस्यारम्भणशब्दादिभ्यो मिथ्यात्वावगमेन तयोर्भेदस्य सत्यत्वायोगादिति भावः। **प्रातीतिकेति**। यथा 'इदं रजतम्' इति भ्रान्तिसिद्धं रजतेदमर्थयोरभिन्नत्वं तथा 'सन्घटः' इत्यादिभ्रान्तिसिद्धाभेदोपगमे सिद्धान्तविरोधाभावादिति भावः ॥

'मायां तु प्रकृतिं विद्यात्' इति श्रुत्यावधारणार्थकतुशब्दवत्या मायाया एवोपादानत्वावगमेन ब्रह्मण उपादानत्वाभावादुपादानत्वघटितब्रह्मलक्षणस्यासंभवशङ्कायां सत्याम्, मायाब्रह्मणोरुभयोरपि प्रकृतित्वमस्ति श्रुतियुक्त्योरविशेषात्, 'मायां तु' इति श्रुतौ तुशब्दो नावधारणार्थः किं तु सद्रूपब्रह्मापेक्षया मायाया वैलक्षण्यद्योतनार्थः, तच्च वैलक्षण्यं परिणामित्वरूपं प्रकृतित्वं मायाया इत्याशयवतां पदार्थतत्त्वनिर्णयकारादीनां मतभेदेन लक्षणासंभवशङ्का परिहृता। इदानीं ब्रह्मैवोपादानं न माया, अतो न लक्षणासंभवशङ्कावकाश इति मन्यमानानां मतद्वयमाह—

संक्षेपशारीरककृतस्तु— ब्रह्मैवोपादानम् । कूटस्थस्य

संक्षेपशारीरककृतस्त्वित्यादिना । तर्हि व्यर्था मायेति, नेत्याह— **कूटस्थस्येति** । यदि मायां विनैव ब्रह्मोपादानं स्यात्तदा ब्रह्मणः स्वतः परिणामित्वमेव स्यात् । तथा च परिणामवादिभिः परिणामपरिणामिनोर्वास्तवाभेदाभ्युपगमात्परिणामस्य जन्मादिविकारैर्ब्रह्मापि विकारवदेव स्यात् । न चेष्टापत्तिरत्र वक्तुं शक्यते, 'न जायते' इत्यादिबहुश्रुतिषु ब्रह्मणो जन्मादिविकारराहित्यरूपकूटस्थत्वप्रतिपादनविरोधात् । अतो मायाद्वारा ब्रह्मणः कारणत्वं वक्तव्यमिति न व्यर्था मायेत्यर्थः । यथा मृद्वस्तुन उपादानत्वेऽपि तद्गतश्लक्ष्णत्वादिसंस्कारो द्वारकारणम्, न ह्यसंस्कृतस्य मृद्वस्तुनो घटाद्युपादानत्वं घटते, तथा कूटस्थचैतन्यरूपे ब्रह्मणि समारोपिता माया तत्र जगत्प्रकृतित्वं घटयन्ती सहकारिकारणमुपेयत इति भावः । न च मायाया उपादानत्वाभावे 'मायां तु प्रकृतिं विद्यात्' इति श्रुतिविरोध इति वाच्यम् । ब्रह्मगतप्रकृतित्वनिर्वाहकतामात्रेण तस्यां प्रकृतित्वश्रुत्युपपत्तेः । मायायाः प्रकृतित्वनिर्वाहकत्वमात्रं न स्वतः प्रकृतित्वमस्तीत्याशयेनैव तस्यां शक्तित्वव्यवहारः श्रुतौ दृश्यते— 'परास्य शक्तिर्विविधैव श्रूयते' इति । न हि मृदादिपदार्थगतशक्तेः किंचित्कार्यं प्रत्युपादानत्वं प्रसिद्धं लोके । अत एव विनिगमकाभावान्मायाब्रह्मणोरुभयोरप्युपादानत्वमिति निरस्तम्, मायाया ब्रह्मशक्तित्वेन स्वत उपादानत्वासंभवात् । न च तस्याः प्रकृतित्वानुपगमे जगतः परिणा-

स्वतः कारणत्वानुपपत्तेर्माया द्वारकारणम् । अकारणमपि द्वारं कार्येऽनुगच्छति, मृद इव तद्गतश्लक्ष्णत्वादेरपि घटेऽनुगमदर्शनादित्याहुः ॥

वाचस्पतिमिश्रास्तु— जीवाश्रितमायाविषयीकृतं ब्रह्म स्वत एव जाड्याश्रयप्रपञ्चाकारेण विवर्तमानत-

---

म्युपादानं न स्यात्, ब्रह्मणः परिणामितायाः कूटस्थत्वविरोधेनासकृत्प्रत्युक्तत्वादिति वाच्यम् । वाचस्पतिमत इव प्रपञ्चस्य चिदध्यस्तमायाविषयीकृतब्रह्मविवर्तत्वमात्राङ्गीकारोपपत्तेः । न च संक्षेपशारीरकग्रन्थे तत्र तत्र मायायाः परिणामित्वव्यवहारविरोध इति वाच्यम् । तथा व्यवहारस्य मतान्तराभिप्रायत्वोपपत्तेः । ननु जडभूतमायाप्रकृतिकत्वाभावे प्रपञ्चस्य जाड्यं न स्यादिति, नेत्याह— **अकारणमपीति** । अनुपादानमपीत्यर्थः ॥

जगत्यनुगतं जाड्यं न कारणगुणः, किं तु जगत एव स्वाभाविकम् । अतस्तात्सिद्धये मायाया उपादानत्वं कार्यानुगतद्वारकारणत्वं वा न कल्पनीयमित्याशयेनाह— **वाचस्पतिमिश्रास्त्विति** । **जीवाश्रितेति** । नन्वक्षरब्राह्मण आकाशशब्दितायाः मायाया अक्षरशब्दितनित्यचैतन्याश्रितत्वस्य प्रतिपादितत्वात्कथं तस्या जीवाश्रितत्वमुपेयते, 'मायिनं तु महेश्वरम्' इति श्रुतिविरोधाच्च । अत्र 'मायिनम्' इत्यनेन महेश्वरशब्दितब्रह्माश्रितत्वप्रतिपादनात् । किं च जीवस्य मायाश्रयत्वे तस्यैव जगदुपादानत्वं स्यात्,

योपादानमिति माया सहकारिमात्रम्, न कार्यानुगतं द्वारकारणमित्याहुः ॥

प्रपञ्चस्य मायापरिणामत्वात्प्रपञ्चपरिणामिमायाश्रयत्वं हि ब्रह्मणः प्रपञ्चोपादानत्वम् । जीवस्य मायाश्रयत्वे तु तस्यैव जगदुपादानत्वं स्यान्न ब्रह्मणः । किं च जीवाश्रितमायाविषयीकृतं ब्रह्मेति मते ब्रह्मण उपाध्यनङ्गीकारेण नियन्तृत्वजगत्कर्तृत्वादेरभावप्रसङ्गश्चेति चेत्, उच्यते— जीवाश्रितेति पदेन जीवत्वविशिष्टचैतन्याश्रितत्वं न विवक्षितं भवति, किं त्वक्षरब्राह्मणानुरोधेन चैतन्याश्रितत्वमेव । जीवत्वं तु मायापदवेदनीयाविद्यायाश्चैतन्ये वृत्तावच्छेदकमिति जीवाश्रिता मायेत्युच्यते । न च जीवत्वस्यापि चैतन्ये वृत्तौ मायैवावच्छेदिका वाच्येति परस्पराश्रयप्रसङ्ग इति वाच्यम् । द्रव्यत्वगुणाश्रयत्वयोरिव परस्परस्थितिप्रयोजकतया परस्परापेक्षत्वलक्षणपरस्पराश्रयत्वस्यादोषत्वात् । परस्पराश्रयो ह्युत्पत्तौ ज्ञप्तौ वा दोषो भवेत् । स च प्रकृते नास्ति, अविद्याजीवत्वयोरनादित्वान्नित्यसाक्षिभास्यत्वाच्च । न च जीवत्वस्याविद्यास्थितिं प्रति नियामकत्वकल्पनं व्यर्थमिति वाच्यम् । ब्रह्मणि तस्याः स्थितिनिवारकत्वात् 'निरवद्यं निरञ्जनम्' इति श्रुत्या ब्रह्मणो निर्दोषत्वावगमेन तस्याविद्यारूपदोषाश्रयत्वानुपपत्तेः । न च वस्तुतो निर्दोषत्वपरा सा श्रुतिरिति वाच्यम् । तथा संकोचे मानाभावात्, ईश्वररूपब्रह्मवज्जीवस्यापि वस्तुतो निर्दोषत्वाच्च । न च 'मायिनं तु महेश्वरम्' इति श्रुतिविरोधः, 'गृही धनी देवदत्तः' इत्यादौ

देवदत्तस्य गृहाद्याश्रयत्वाभावेऽपि प्रत्ययस्य स्वस्वामिभावलक्षणसंबन्धान्तरबोधकत्ववन्महेश्वरशब्दितब्रह्मणो मायाश्रयत्वाभावेऽपि मायाब्रह्मणोर्विषयविषयिभावलक्षणसंबन्धान्तरबोधकतया 'मायिनम्' इति श्रुत्युपपत्तेः। प्रपञ्चस्य च जीवाश्रितमायाविषयीकृतब्रह्मविवर्तत्वमात्राभ्युपगमान्न जीवस्य जगदुपादानत्वप्रसङ्गः। ब्रह्मण उपाध्यभावेऽपि सर्वनियन्तृत्वादि जीवाविद्याविषयीकृतब्रह्मविवर्ततया ब्रह्मधर्मत्वेनैव कल्प्यते। न जीवाविद्यापरिणामतया जीवधर्मत्वेन, अनुभवाविरोधाद्ब्रह्मणि च सर्वनियन्तृत्वसर्वकर्तृत्वसर्वज्ञत्वादिप्रतिपादकशास्त्रस्य कल्पकस्य सत्त्वाच्च। तस्मात्सिद्धं जीवाश्रितमायाविषयीकृतं ब्रह्म प्रपञ्चाकारेण विवर्तमानतयोपादानमिति। उक्तं चारम्भणाधिकरणभाष्ये— 'मूलकारणमेवान्त्यात्कार्यात्तेन तेन कार्याकारेण नटवत्सर्वव्यवहारास्पदत्वं प्रतिपद्यते' इति। आन्त्यात्कार्यादिति। अन्त्यकार्यपर्यन्तमित्यर्थः। नटो हि द्रष्टृभिरविज्ञातनिजरूप एव तत्तदभिनेयासत्यरूपतां प्रतिपद्यते, एवं जीवैरविज्ञाततत्त्वं सद्ब्रह्मासत्यवियदादिप्रपञ्चाकारतां तद्द्वारा व्यवहारविषयतां च प्रतिपद्यत इति भाष्यार्थः। अत्र नटदृष्टान्तोक्त्या वाचस्पतिमतं भाष्याभिमतं निश्चीयते। तदुक्तं कल्पतरौ— 'अज्ञातनटवद्ब्रह्म कारणं शंकरोऽब्रवीत्। जीवाज्ञातं जगद्बीजं जगौ वाचस्पतिस्तथा॥' इति॥

इदानीं मायाया एव 'मायां तु प्रकृतिं विद्यात्' इति श्रुतिस्वारस्यानुरोधेन मुख्यमुपादानत्वमिति स्वीकृत्यापि ब्रह्मलक्षणासंभवं

सिद्धान्तमुक्तावलीकृतस्तु— मायाशक्तिरेवोपादानम् । न ब्रह्म, 'तदेतद्ब्रह्मापूर्वमनपरम्' 'न तस्य कार्यं करणं च विद्यते' इत्यादिश्रुतेः । जगदुपादानमायाधिष्ठानत्वेन तूपचारादुपादानम् । तादृशमेवोपादानत्वं लक्षणैर्विवक्षितमित्याहुः ॥

अथ क ईश्वरः कश्च जीवः । अत्रोक्तं प्रकटार्थविव-

परिहरति— **सिद्धान्तमुक्तावलीकृतस्त्विति** । तत्प्रकृतम् । एतद्बुद्ध्यादिसाक्षिरूपम् । पूर्वं कारणं न विद्यते यस्य तदपूर्वम् । अपरं कार्यं न विद्यते यस्य तदनपरम् । तस्य ब्रह्मणः । करणं च जगत्सृष्टिसाधनं चेत्यर्थः । इत्यादिश्रुतेर्न ब्रह्मोपादानमित्यर्थः । तर्हि ब्रह्मणो जगदुपादानत्वप्रतिपादकश्रुतिसूत्रभाष्यादिविरोध इत्यत आह— **जगदिति** । तुशब्दोऽवधारणे । **तादृशमेवेति** । जगदुपादानमायाधिष्ठानत्वमेवेत्यर्थः ॥

पूर्वलेश्वरस्य जगदुपादानत्वमुक्तम् । 'जीवाश्रितमाया—' इत्यादौ जीवोऽपि व्यवहृतः । इदानीं तयोः स्वरूपं निरूपयितुं प्रश्नमवतारयति— **अथेति** । 'मायां तु प्रकृतिम्' इति श्रुतौ या भूतप्रकृतित्वेन माया प्रसिद्धा तस्यां चैतन्यप्रतिबिम्ब ईश्वरः । ननु 'मायिनं तु महेश्वरम्' इति वाक्यशेषे मायाया ईश्वराश्रितत्वप्रतिपादनादीश्वरस्य मायाप्रतिबिम्बत्वं न संभवति, उपाधेः प्रतिबि-

रणे— अनादिरनिर्वाच्या भूतप्रकृतिश्चिन्मात्रसंबन्धिनी माया । तस्यां चित्प्रतिबिम्ब ईश्वरः । तस्या एव परि-

---

म्बाश्रितत्वादर्शनादिति शङ्कां निराचष्टे— **चिन्मात्रसंबन्धिनी-ति** । चिन्मात्राश्रितेत्यर्थः । मात्रपदेन बिम्बत्वादेर्व्यवच्छेदः । वाक्यशेषेऽपि महेश्वरपदं चिन्मात्रलक्षकमिति भावः । सांख्याभिमतप्रकृतेरिव मायायाः सत्यत्वं वारयति— **अनिर्वाच्येति** । माया तावद्ब्रह्मचैतन्यान्न वस्तुतो भिन्ना, ब्रह्मव्यतिरिक्तस्य सर्वस्य मिथ्यात्वप्रतिपादकश्रुतिविरोधेन वस्तुतस्तस्यास्ततो भेदासंभवात् । नाप्यभिन्ना, चैतन्यजडयोरैक्यायोगात् । नापि चैतन्याद्भिन्नाभिन्ना, एकत्र भिन्नत्वाभिन्नत्वयोर्विरोधेनासंभवात् । एवं न तावन्माया सती, अद्वैतश्रुतिविरोधात् । नाप्यसती, भूतप्रकृतित्वानुपपत्तेः । नापि सदसती, सत्त्वासत्त्वयोरेकत्र विरोधात् । एवं न तावन्माया सावयवा, तस्याः सादित्वप्रसङ्गेन तत्प्रतिबिम्बभूतेश्वरस्यापि सादित्वप्रसङ्गान्मायायाः सादित्वे तत्प्रकृतित्वेन मायान्तरापेक्षायामनवस्थाप्रसङ्गाच्च । नापि निरवयवा, प्रकृतित्वाभावप्रसङ्गात्सावयवपदार्थानामेव लोके प्रकृतित्वदर्शनात् । नाप्युभयरूपा, सावयवत्वनिरवयवत्वयोरेकत्र विरोधात् । तस्मात्सर्वप्रकारेण निर्वक्तुमशक्यतया मायानिर्वाच्येत्यर्थः । तस्याः परिच्छिन्नानन्तप्रदेशेषु चैतन्यप्रतिबिम्बो जीवः । न साक्षात्तस्यामेव चित्प्रतिबिम्बो जीव इत्येवकारार्थः । प्रदेशानां परिच्छिन्नत्वविशेषणं तत्प्रतिबिम्बरूपजीवानां परिच्छिन्नत्वलाभार्थम् । तथा च भाष्ये तत्र तत्र जीवानां परिच्छिन्नत्व-

च्छिन्नानन्तप्रदेशेष्वावरणविक्षेपशक्तिमत्स्वविद्याभिधानेषु चित्प्रतिबिम्बो जीव इति ॥

निरूपणं संगच्छते । तथा हि— 'सर्वत्र प्रसिद्धोपदेशात्' इत्यधिकरणे सौत्रशारीरपदव्याख्यानरूपं भाष्यम्— 'शारीर इति शरीरे भव इत्यर्थः । नन्वीश्वरोऽपि शरीरे भवति । सत्यं शरीरे भवति । न तु शरीर एव भवति, 'ज्यायान्पृथिव्या ज्यायानन्तरिक्षात्' इति 'आकाशवत्सर्वगतश्च नित्यः' इति च व्यापित्वश्रवणात् । जीवस्तु शरीर एव भवति, तस्य भोगाधिष्ठानाच्छरीरादन्यत्र वृत्त्यभावात्' इति । तथा द्युभ्वाद्यधिकरणगतं भाष्यम्— 'न चोपाधिपरिच्छिन्नस्याविभोः प्राणभृतो द्युभ्वाद्यायतनत्वं सम्यक्संभवति' इति । प्राणभृतो जीवस्य द्युभ्वादिशब्दितजगदायतनत्वं मुख्यं न संभवति, अविभुत्वादिति भाष्यार्थः । पटस्यारम्भकतन्तव इव मायाया न प्रदेशाः सन्ति, तस्या अनादित्वात् । किं तु मायायां विक्षेपावरणशक्तीनामानन्त्याद्विक्षेपावरणशक्तिमद्भागा एव प्रदेशा विवक्षिता इत्याशयेनाह— **आवरणविक्षेपशक्तिमत्स्विति** । ब्रह्मचैतन्यावरणानुकूला शक्तिरावरणशक्तिः । आवरणं च 'ब्रह्म नास्ति, न प्रकाशते' इति व्यवहारयोग्यत्वम् । विक्षेपपदेन तत्तज्जीवासाधारणदुःखादिकं विवक्षितम् । तदनुकूला शक्तिर्विक्षेपशक्तिरित्यर्थः । ननु मायाप्रदेशानां जीवोपाधित्ववर्णनमनुपपन्नम्, आनुमानिकाधिकरणभाष्यादाववियाया जीवोपाधित्वव्यवहारविरोधप्रसङ्गात् । अत आह— **अविद्याभिधानेष्विति** ।

तत्त्वविवेके तु— त्रिगुणात्मिकाया मूलप्रकृतेः 'जीवेशावाभासेन करोति, माया चाविद्या च स्वयमेव भवति' इति श्रुतिसिद्धौ द्वौ रूपभेदौ। रजस्तमोनभिभूतशुद्धसत्त्वप्रधाना माया तदभिभूतमलिनसत्त्वा त्वविद्येति मायाविद्याभेदं परिकल्प्य, मायाप्रतिबिम्ब ईश्वरोऽविद्याप्रतिबिम्बो जीव इत्युक्तम्॥

एकैव मूलप्रकृतिर्विक्षेपप्राधान्येन मायाशब्दितेश्वरोपाधिरावरणप्राधान्येनाविद्याज्ञानशब्दिता जीवोपाधिः।

मायाप्रदेशानामेव भाष्यगताविद्यापदाभिलप्यत्वान्न तद्विरोध इति भावः॥

एकस्यामेव मूलप्रकृतौ प्रदेशप्रदेशिभावेनानिर्वचनीयं भेदं कल्पयित्वा जीवेश्वरयोः प्रतिबिम्बरूपत्वमुक्तम्। इदानीं तस्यामेव प्रकारान्तरेण रूपभेदं कल्पयित्वा तदुपपादयति — तत्त्वविवेके त्विति। भेदकल्पनावैलक्षण्यद्योतनार्थस्तुशब्दः। रूपभेदाविति। स्त इति शेषः। रजस्तमोनभिभूतत्वमेव शुद्धत्वम्। शुद्धसत्त्वप्रधाना प्रकृतिर्माया। मलिनसत्त्वप्रधाना प्रकृतिरविद्येत्यर्थः। रजस्तमोभिभूतत्वमेव सत्त्वस्य मलिनत्वम्॥

सत्त्वशुद्धयशुद्धिभ्यां मायात्वाविद्यात्वाख्यौ श्रुत्युक्तरूपभेदौ निरूप्य विक्षेपावरणशक्तिभेदेन श्रुत्युक्तरूपभेदावेव निरूपयति—

अत एव तस्या जीवेश्वरसाधारणचिन्मात्रसंबन्धित्वेऽपि जीवस्यैव 'अज्ञोऽस्मि' इत्यज्ञानसंबन्धानुभवो नेश्वरस्येति जीवेश्वरविभागः क्वचिदुपपादितः ॥

संक्षेपशारीरके तु 'कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः' इति श्रुतिमनुसृत्य— अविद्यायां चित्प्रति-

---

एकैवेति । अत एवेति । जीवस्यावरणशक्तिमदुपाधिमत्त्वादेवेत्यर्थः । तस्या इति । जीवेश्वरोपाधिभूतायाः प्रकृतेः प्रतिबिम्बरूपजीवेश्वरसाधारणबिम्बचैतन्याश्रितत्वेऽपीत्यर्थः । नेश्वरस्येति । अत्राप्यत एवेत्यस्यानुषङ्गः । आवरणशक्तेरीश्वरोपाधिकोटावननुप्रवेशादेवेति तदर्थः । तथा च जीवेश्वरौ प्रति प्रकृतेः साधारणत्वादेकस्य सर्वज्ञत्वमपरस्याज्ञत्वमिति यद्वैलक्षण्यं श्रुत्यनुभवसिद्धं तत्कथं संभवतीति शङ्काया अनवकाश इति भावः ॥

मतान्तरमाह— संक्षेपेति । श्रुतौ कारणपदमविद्यापरं कार्यपदमन्तःकरणपरमिति मत्वाह— अविद्यायामित्यादिना । ननु 'जीवेशावभासेन करोति, माया चाविद्या च स्वयमेव भवति' इति श्रुतिविरोधः, तस्यां श्रुतौ जीवस्य कारणोपाधिकत्वप्रतीतेरिति चेत्, उच्यते— 'जीवेशावभासेन करोति' इति पूर्वभागेण हि जीवेश्वरयोरुभयोरपि प्रतिबिम्बभावः प्रतीयते । न च बिम्बैक्यस्थल उपाधिभेदं विना प्रतिबिम्बभेदः संभवति, सूर्यादिप्रतिबिम्बस्थल उपाधिभेदं विना प्रतिबिम्बभेदादर्शनात् । तथा चोदाहृत-

बिम्ब ईश्वरः । अन्तःकरणे चित्प्रतिबिम्बो जीवः । न चान्तःकरणरूपेण द्रव्येण घटेनाकाशस्येव चैतन्यस्यावच्छेदसंभवात्तदवच्छिन्नमेव चैतन्यं जीवोऽस्तीति वाच्यम् । इह परत्र च जीवभावेनावच्छेद्यचैतन्यप्रदेशस्य

श्रुतौ प्रतिबिम्बरूपयोर्जीवेशयोर्यथाक्रमं मायाविद्यापदाभ्यामुपाधी समर्प्येते । मायापदं चात्र मायाकार्यान्तःकरणपरम् । न चैवं मूलप्रकृतिं प्रकृत्य प्रवृत्तायाम् 'जीवेशौ' इति श्रुतौ 'माया चाविद्या च स्वयमेव भवति' इति वाक्येन मायाविद्ययोरुभयोरपि मूलप्रकृत्यभेदोपपादनविरोध इति वाच्यम् । मूलप्रकृत्यविद्ययोरिव मायाशब्दितान्तःकरणमूलप्रकृत्योर्मुख्याभेदाभावेऽपि प्रकृतिविकारभावप्रयुक्ताभेदसत्त्वेन तावता 'माया चाविद्या च स्वयमेव भवति' इति वाक्यशेषोपपत्तेरिति भावः । नन्वविद्यावच्छिन्नचैतन्यमेवेश्वरोऽस्तु, तथान्तःकरणावच्छिन्नचैतन्यमेव जीवोऽस्तु, अविद्यान्तःकरणाधिष्ठानचैतन्ययोस्तदवच्छिन्नत्वस्य क्लृप्तत्वात्तदतिरिक्तप्रतिबिम्बकल्पनायां गौरवाच्चेत्याशयेन शङ्कते— न चेति । न तु प्रतिबिम्बचैतन्यमित्येवकारार्थः । जीवग्रहणमीश्वरस्याप्युपलक्षणम् । जीवेश्वरयोः प्रतिबिम्बतायाः श्रुतिसिद्धत्वान्न कल्पनागौरवदोषोऽस्तीत्याभिप्रेत्य जीवस्यावच्छिन्नत्वपक्षे दोषमाह— इहेति । अस्मिँल्लोके ब्राह्मणादिशरीरगतान्तःकरणावच्छिन्नचैतन्यप्रदेशस्य कर्मकर्तृत्वाल्लोकान्तरे देवादिशरीरगतान्तःकरणावच्छिन्नचैतन्यप्रदेशस्य चाकर्तुर्भोक्तृत्वात्कृतहानादिप्रसङ्गः ।

भेदेन कृतहानाकृताभ्यागमप्रसङ्गात् । प्रतिबिम्बस्तूपाधेर्गतागतयोरवच्छेद्यवन्न भिद्यत इति प्रतिबिम्बपक्षे नायं दोष इत्युक्तम् ॥

एवमुक्तेष्वेतेषु जीवेश्वरयोः प्रतिबिम्बत्वविशेषपक्षेषु यद्बिम्बस्थानीयं ब्रह्म तन्मुक्तप्राप्यं शुद्धचैतन्यम् ॥

येन कर्म कृतं न तस्य कर्मफलभोगः, येन कर्म न कृतं तस्याकृतकर्मफलाभ्यागम इत्यर्थः । न च ब्राह्मणादिशरीरगतस्यैवान्तःकरणस्य लोकान्तरे गमनाभ्युपगमात्तदवच्छिन्नचैतन्यप्रदेशस्यैव तत्रापि गमनमस्तिवति वाच्यम् । घटस्य देशान्तरगमनेऽपि तदवच्छिन्नाकाशप्रदेशस्य गमनादर्शनादिति भावः । प्रतिबिम्बस्यावच्छेद्यचैतन्यापेक्षया वैलक्षण्यद्योतनार्थस्तुशब्दः । **गतागतयोरिति** । गमनागमनयोः सतोरप्यवच्छेद्यप्रदेशवन्न भिद्यत इत्यर्थः । सूर्यादिप्रतिबिम्बवति जलपूर्णघटादौ देशान्तरं नीयमानेऽपि प्रतिबिम्बभेदादर्शनादिति भावः ॥

ननु चन्द्रादिप्रतिबिम्बवतां जलपात्राणां मध्य एकस्य नाशे तद्गततया प्रतीतस्य प्रतिबिम्बस्य बिम्बेनैकीभावः प्रत्यक्षेणानुभूयते न तु प्रतिबिम्बान्तरेण । एवं प्रतिबिम्बरूपजीवस्यापि विदेहकैवल्यसमये बिम्बभूतशुद्धब्रह्मभाव एव स्यान्न तु प्रतिबिम्बेश्वरभावापत्तिः, दृष्टविरोधादित्याशङ्क्याभिष्टापत्त्या परिहरति—**एवमुक्तेष्वित्ति** । **बिम्बस्थानीयमिति** । लोकप्रसिद्धचन्द्रादिरूपबिम्बस्थानीयमि-

चित्रदीपे 'जीव ईशो विशुद्धा चित्' इति चित्त्रैविध्यप्रक्रियां विहाय, यथा घटावच्छिन्न आकाशो घटाकाशः, तदाश्रिते जले प्रतिबिम्बितः साभ्रनक्षत्रो जलाकाशः, अनवच्छिन्नो महाकाशः, महाकाशमध्यवर्तिनि मेघमण्डले वृष्टिलक्षणकार्यानुमेयेषु जलरूपतदवयवेषु

त्यर्थः । ननु बिम्बत्वविशिष्टं चैतन्यं कथं शुद्धमिति चेत्, न । शुद्धपदेन सर्वज्ञत्वसर्वकर्तृत्वादिधर्मराहित्यस्य विवक्षितत्वादिति ॥

चित्रदीप इति । चित्रदीपे चित्त्रैविध्यप्रक्रियां विहाय चैतन्यस्य चातुर्विध्यं परिकल्प्य जीवेश्वरविभागो दर्शित इति संबन्धः । तथा च चित्रदीपवचनम्— 'कूटस्थो ब्रह्म जीवेशाविद्येवं चिच्चतुर्विधा । घटाकाशमहाकाशौ जलाकाशाभ्रखे यथा ॥' इति । एतच्छ्लोकोपात्तसिद्धान्तभागं संगृह्णाति— **यथेत्यादिना** । **तदाश्रित इति** । घटस्थाकाशाश्रित इत्यर्थः । अभ्रनक्षत्रसाहित्यविशेषणमाकाशस्य जले प्रतिबिम्बाभावशङ्कानिरासार्थम् । इत्थं च तन्निरासप्रकारो विवक्षितः—यदा जलेऽभ्रनक्षत्राणां प्रतिबिम्बोऽनुभूयते तदा तैः सहाकाशप्रतिबिम्बोऽप्यनुभूयत एवेति नाकाशप्रतिबिम्बाभावशङ्कावकाश इति । **अनवच्छिन्न इति**। घटानवच्छिन्न इत्यर्थः । मेघमण्डले ये जलरूपास्तदवयवास्तेषु प्रतिबिम्बित इति संबन्धः । तच्छब्दो मेघमण्डलपरः । मेघमण्डले जलानि सन्ति चेत्कुतो नोपलभ्यन्त इत्याशङ्का न कार्या, तेषां तुषारव-

तुषाराकारेषु प्रतिबिम्बितो मेघाकाश इति वस्तुत एकस्याप्याकाशस्य चातुर्विध्यम्, तथा स्थूलसूक्ष्मदेहद्वयस्याधिष्ठानतया वर्तमानं तदवच्छिन्नं चैतन्यं कूटवन्निर्विकारत्वेन स्थितं कूटस्थम्, तत्र कल्पितेऽन्तःकरणे

त्सूक्ष्मरूपत्वादित्याशयेनाह— **तुषारेति** । तत्र जलसत्त्वे मानमाह— **वृष्टिलक्षणेति** । श्लोकोपात्तदार्ष्टान्तिकभागं संगृह्णाति— **तथेति** । **सूक्ष्मेति** । घ्राणरसनचक्षुःश्रोत्रत्वगाख्यानि पञ्च ज्ञानेन्द्रियाणि, वाक्पाणिपादपायूपस्थाख्यानि पञ्च कर्मेन्द्रियाणि, प्राणापानादयः पञ्च वायवः, मनो बुद्धिश्चेत्यन्तःकरणं द्विविधम्, आहत्य सप्तदशकं लिङ्गशरीरं दार्ष्टान्तिके घटस्थानीयं सूक्ष्मदेहशब्दार्थः । देहद्वयावच्छिन्नं चैतन्यं घटाकाशस्थानीयं कूटस्थशब्दार्थः । चैतन्यस्य देहद्वयावच्छिन्नत्वे हेतुरधिष्ठानतया वर्तमानत्वम् । काष्ठविशेषलग्नायःपिण्डविशेषः कूटशब्दार्थः । तद्वदचलतया तिष्ठतीति कूटस्थम् । तत्र कूटस्थे कल्पितं घटगतजलस्थानीयं यदन्तःकरणं तस्मिन्प्रतिबिम्बितमित्यर्थः । कूटस्थचैतन्यातिरिक्तचिदाभासकल्पनायाः प्रयोजनमाह— **संसारेति** । कूटस्थचैतन्यस्य न संसाराश्रयत्वम्, तस्य जन्ममरणादिलक्षणसंसाराश्रयत्वे कूटस्थत्वव्याघातादिति भावः । महाकाशस्थानीयब्रह्माश्रिते मेघमण्डलस्थानीये मायाख्यतमसि स्थिता या धीवासनास्तासु प्रतिबिम्बितमित्यर्थः । जाग्रत्स्वप्नावस्थाद्वयगतानि स्थूलान्तःकरणानि धियः । तासां सुषुप्त्यवस्थागताः सूक्ष्मावस्था

प्रतिबिम्बितं चैतन्यं संसारयोगी जीवः, अनवच्छिन्नं चैतन्यं ब्रह्म, तदाश्रिते मायातमसि स्थितासु सर्वप्राणिनां धीवासनासु प्रतिबिम्बितं चैतन्यमीश्वर इति चैतन्यस्य चातुर्विध्यं परिकल्प्यान्तःकरणधीवासनोपरक्ताज्ञानोपाधिभेदेन जीवेश्वरविभागो दर्शितः। अयं चापरस्तदभिहितो विशेषः— चतुर्विधेष्वेषु चैतन्येषु जीवः 'अहम्' इति प्रकाशमानः कूटस्थेऽविद्यातिरोहितात्म-

---

वासना विवक्षिताः। **अन्तःकरणेति** । अन्तःकरणं च धीवासनोपरक्ताज्ञानं च ते एवोपाधी, तयोर्भेदेनेत्यर्थः । धीवासनानामानन्त्यात्तासु प्रतिबिम्बचैतन्यरूपेश्वरस्य नानात्वशङ्काव्यावृत्त्यर्थं वासनोपरक्ताज्ञानोपाधिकत्वमुक्तम् । पूर्वमतेषु बिम्बप्रतिबिम्बयोर्भेदमात्रं कल्पितम्, स्वतस्तयोरभेद एवेतीममर्थं सिद्धं कृत्वास्मिन्मते ततो विशेषमाह— **अयं चेति** । अस्मिन्मते पूर्वं चिच्चातुर्विध्यलक्षण एको विशेष उक्तः । तदपेक्षयापरोऽन्यः प्रतिबिम्बमिथ्यात्वरूपो विशेषः । तदभिहितः, तत्र चित्रदीपेऽभिहित इत्यर्थः । अपरं विशेषमेव दर्शयति— **चतुर्विधेष्विति** । अहमिति प्रकाशमानो जीवः शुक्तौ रूप्यवदध्यस्त इति संबन्धः । नन्विदंत्वेन सामान्यरूपेण ज्ञाते शुक्तित्वादिविशेषरूपेणाज्ञाते शुक्त्यादौ रूप्याध्यासो दृष्टः । इह तु तथा सामान्यरूपेण ज्ञातं विशेषरूपेण चाज्ञातं किंचिदधिष्ठानं नोपलभ्यत इत्या-

ङ्गानन्दरूपविशेषांशे शुक्तौ रूप्यवदध्यस्तः । अत एवेदं-त्वरजतत्वयोरिवाधिष्ठानसामान्यांशाध्यस्तविशेषांशरूप-योः स्वयंत्वाहंत्वयोः सहप्रकाशः 'स्वयमहं करोमि' इत्यादौ । अहंत्वं ह्यध्यस्तविशेषांशरूपम्, पुरुषान्तरस्य

शङ्क्याह—**कूटस्थ इति** । नन्वविद्यया कूटस्थस्यासङ्गत्वानन्द-त्वपूर्णत्वादिविशेषांशस्यावृततया शुक्तित्वादिवदप्रतीतावपि शुक्ते-रिदंत्वेनेव कूटस्थस्य केनचित्सामान्येन रूपेण प्रकाशो न दृश्यते । किं च 'इदं रजतम्' इत्यत्राधिष्ठानसामान्यांशस्यारोप्यविशेषांशस्य च सह प्रकाशो दृश्यते । प्रकृते त्वहमर्थरूपो विशेष एव 'अहम्' इति प्रकाशते, न तु सामान्यांशः कश्चित् । अतोऽहमर्थस्य रूप्य-वदध्यस्तत्वकल्पनं न युक्तमित्याशङ्क्याह— **अत एवेति** । अह-मर्थस्य कूटस्थेऽध्यस्तत्वकल्पनादेवेत्यर्थः । **स्वयंत्वाहंत्वयोरिति** । कूटस्थस्य हि स्वयंत्वं सामान्यरूपम् । न कूटस्थत्वम्, तस्य शास्त्रैकगम्यत्वात् । स्वयंत्वं च कूटस्थस्याहमर्थारोपकाले तेन सह प्रकाशते । तत्पूर्वकालेऽपि स्वयंत्वस्य भानमविरुद्धम्, तस्य नित्यचैतन्यात्मककूटस्थस्वरूपत्वाभ्युपगमात्स्वयंत्वकूटस्थचैतन्ययोः 'राहोः शिरः' 'पुरुषस्य चैतन्यम्' इतिवद्भेदकल्पनया धर्मधर्मि-भावोपपत्तेश्च । अतः कूटस्थस्य स्वयंत्वेन सामान्यरूपेण सदा प्रकाशमानत्वादहमर्थरूपचिदाभासाध्यासाधिष्ठानत्वमविरुद्धमिति भावः । अहमर्थस्य रूप्यवद्विशेषरूपत्वं दर्शयति— **अहंत्वं हीति** । अहमर्थ इत्यर्थः । **अध्यस्तविशेषांशरूपमिति** । शुक्त्या-

पुरुषान्तरे 'अहम्' इति व्यवहाराभावेन व्यावृत्तत्वात्। स्वयंत्वं चान्यत्वप्रतियोग्यधिष्ठानसामान्यांशरूपम्, 'स्वयं देवदत्तो गच्छति' इति पुरुषान्तरेऽपि व्यवहारेणानुवृत्तत्वात्। एवं परस्पराध्यासादेव कूटस्थजीवयो-

---

दावध्यस्तो यो विशेषांशो रूप्यादिस्तद्रूपं तत्सदृशमित्यर्थः। सादृश्यं च व्यावृत्तत्वम्। **व्यावृत्तत्वादिति**। व्यावृत्तत्वावगमादित्यर्थः। तेन न हेतुसाध्ययोरभेदः। व्यावृत्तत्वावगमे हेतुर्व्यवहाराभावः। स्वयंत्वस्येदंत्ववत्सामान्यरूपत्वं दर्शयति— **स्वयंत्वं चेति**। 'स्वयम्' 'अन्यः' इति लोकव्यवहारे स्वयंत्वमन्यत्वप्रतिद्वन्द्वितया प्रसिद्धमिति दर्शयितुमन्यत्वप्रतियोगीति स्वयंत्वस्य विशेषणमिति बोध्यम्। **स्वयमिति**। तदुक्तं चित्रदीपे— 'देवदत्तः स्वयं गच्छेत्त्वं वीक्षस्व स्वयं तथा। अहं स्वयं न शक्नोमीत्येवं लोके प्रयुज्यते॥' इति। ननु 'स्वयम्' 'अहम्' इति प्रकाशमानयोः कूटस्थजीवयोः शुक्तिरजतयोरिव भेदसत्त्वे सर्वेषां कुतो भेदो नोपलभ्यते, **तत्राह— एवमिति**। अहमर्थजीवस्य शुक्तौ रूप्यवत्कूटस्थाध्यस्तत्वे सतीत्यर्थः। **परस्परेति**। तयोरभेदाध्यासादेवाविवेको विवेकाभावः, भेदानुभवाभाव इत्यर्थः। ननु 'इदं रजतम्' इति भ्रमस्थले 'शुक्तिरियम्' इति विशेषदर्शनेन 'इदम्' 'रजतम्' इति प्रतीतयोः सामान्यविशेषपदार्थयोः शुक्तित्वरजतत्वरूपविरुद्धधर्मवत्त्वनिश्चयात्तयोर्भेद उपेयते। इह तु जीवकूटस्थयोः कथं भेदोऽवगन्तव्यः, तदभावे हि 'स्वयम्' 'अहम्'

रविवेको लौकिकानाम् । विवेकस्तु तयोर्बृहदारण्यके 'प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति' इति जीवाभिप्रायेणोपाधिविनाशानुविनाश-प्रतिपादनेन 'अविनाशी वा अरेऽयमात्मा' इति कूट-

---

इति सामान्यविशेषभावेन प्रकाशमानयोस्तयोः सत्यरजतस्थले रजतेदमर्थयोरिव वस्तुत ऐक्यापत्त्याहमर्थरूपजीवस्य स्वयंशब्दार्थ-भूतकूटस्थे कल्पितत्वासिद्धेरित्याशङ्क्य श्रुत्या तयोर्भेदं दर्शयति—**विवेकस्त्विति** । तुशब्दः शङ्काव्यावृत्यर्थः । विवेको भेदानुभवः । एतेभ्यः संनिहितेभ्यो देहादिसंघातरूपेण परिणतेभ्य उपाधिभ्यो भूतेभ्यः समुत्थाय साम्येनोत्थाय, उपाधिरूपबुद्ध्याद्युत्पत्त्योत्पत्तिं-प्राप्येत्यर्थः । तान्युपाधिभूतानि बुद्ध्यादीनि तत्त्वज्ञानेन यदा विनश्यन्ति तदा तान्यनु विनश्यतीति श्रुत्यौपाधिकस्यात्मनो विना-शित्वं प्रतिपाद्यते । **तच्चान्तःकरणप्रतिबिम्बरूपस्योपाध्यायत्तस्य** जी-वस्य मिथ्यात्वे सति संभवति । औपाधिकजीवस्य सत्यत्वे तु तस्य विनाशित्वप्रतिपादकं वचनं न संगच्छेत । **तथायं प्रज्ञानघन आत्मेति मैत्रेयि, अविनाशी वा अविनाश्येव, न तूपाधिनाशा-न्नश्यतीति** कूटस्थचैतन्यस्य श्रुत्या नाशाभावः प्रतिपाद्यते । एतदुक्तं भवति—'अयमात्मा प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय' इत्यादिश्रुत्या चिदेकरस आत्मैवोपाध्युत्पत्तिमनूत्पद्यते तन्नाशमनु नश्यतीत्युपाध्युत्पत्तिविनाशाव्यतिरेकेणोत्पत्तिविनाशौ तस्य न प्रतिपाद्येते, 'अनु विनश्यति' इत्यनुशब्दप्रयोगात् । न च

स्थाभिप्रायेणाविनाशप्रतिपादनेन च स्पष्टः । अहमर्थस्य जीवस्य विनाशित्वे कथमविनाशिब्रह्माभेदः । नेद-

---

तस्य स्वतो विनाशित्वं संभवति, 'अविनाशी वा अरे अयमात्मा' इति वाक्येन विज्ञानघनात्मनो विनाशाभावप्रतिपादनविरोधात् । अतश्चिदात्मन उत्पत्तिविनाशवता प्रतिबिम्बचैतन्यरूपजीवेन तादात्म्यमादाय विनाशादिवचनमुपपादनीयम् । ततश्च भ्रमस्थलीयरजतेदमर्थयोरिवात्रापि विनाशित्वाविनाशित्वरूपविरुद्धधर्मवत्त्वनिश्चयादेव जीवकूटस्थयोर्भेदः स्पष्टं भासत इति ततः प्राक्कूटस्थचैतन्ये जीवरूपाहमर्थस्याध्याससिद्धिरिति । उदाहृतश्रुत्या प्रतिबिम्बजीवस्य विनाशित्वोपगमे श्रुत्यन्तरविरोधमाशङ्कते—**अहमर्थस्येति** । अभेद इत्यनन्तरम् 'अहं ब्रह्मास्मि' इति वाक्येन प्रतिपाद्यत इति शेषः । विनाश्यविनाशिनोरभेदायोगादिति भावः । परिहरति— **नेदमिति** । 'सोऽयम्' इत्यादिसमानाधिकरणवाक्यस्य यथाभेदो वाक्यार्थो दृश्यते तथा 'यः स्थाणुः स पुरुषः' इत्यादिसमानाधिकरणवाक्यस्य बाधारूपो वाक्यार्थो दृश्यते । 'यः स्थाणुः स पुरुषः' इत्यत्र हि पुरुष आरोपितस्य प्रातिभासिकस्य स्थाणोर्व्यावहारिकपुरुषेण सहाभेदो न वाक्यार्थः, बाधितत्वात् । किं तु स्थाण्वारोपाधिष्ठानभूते पुरुषे वस्तुतः स्थाणुतादात्म्याभावरूपा बाधा वाक्यार्थः । तथा च 'यः स्थाणुः स पुरुषः' इति वाक्येन 'वस्तुतः स्थाणुतादात्म्याभाववानयं पुरुषः' इति बोधो

मभेदे सामानाधिकरण्यम्, किं तु बाधायाम्। यथा 'यः स्थाणुरेष पुमान्' इति पुरुषत्वबोधेन स्थाणुत्व-

---

जायते। तेन च बोधेन पुरुषे स्थाण्वारोपः सविषयो निवर्तते। एवम् 'अहं ब्रह्मास्मि' इति वाक्येन 'अहमर्थभूतजीवतादात्म्य-शून्यं ब्रह्मैवास्मि' इति ज्ञानं जायते। तेन ज्ञानेन 'अहं ज्ञाता कर्ता सुखी दुःखी' इत्याद्यारोपः कर्तृत्वादिधर्मविशिष्टेनाहमर्थेन स्वविषयेण सह निःशेषं निवर्तते। आरोपिताहमर्थनिवृत्तौ च सत्यां जीवस्य यद्वास्तवं रूपं कूटस्थचैतन्यात्मकं तत्पूर्णब्रह्म-रूपेणावतिष्ठत इति न श्रुत्यन्तरविरोध इति भावः। अक्षरा-र्थस्तु— इदं ब्रह्माहंपदयोः समानविभक्तिमत्त्वरूपं सामानाधिकर-ण्यमभेदरूपेऽर्थे नाभ्युपगम्यते येनाभेदासंभवो दोषः स्यादिति। ननु यद्यभेदो न वाक्यार्थः कस्तर्हि स इति शङ्कते— किं त्विति। बाधात्र वाक्यार्थो विवक्षित इत्याह— बाधायामिति। पुरुषत्वपदेन कल्पितस्थाणुतादात्म्याभाववत्त्वं विवक्षितम्, बा-धाया वाक्यार्थत्वस्वीकारात्। 'अहं ब्रह्मास्मि' इतीत्य-त्रेतिपदानन्तरं वाक्यजन्येनेति शेषः। अत्र वाक्यार्थज्ञान-स्य 'अहं ब्रह्मास्मि' इत्याकारकत्वाभावात्कूटस्थब्रह्मरूपत्वपदे-नापि वस्तुतोऽहमर्थतादात्म्याभाववत्कूटस्थब्रह्मरूपत्वं विवक्षितम्, बाधाया एव वाक्यार्थबोधविषयत्वाभ्युपगमात्। दृष्टान्तदा-र्ष्टान्तिकयोरधिष्ठानस्यारोपितार्थाभाववत्त्वमारोपितात्यन्ताभावस्या-धिष्ठानातिरिक्तत्वमिति मतमाश्रित्यास्माभिरुक्तमिति ध्येयम्।

बुद्धिर्निवर्त्यत एवम् 'अहं ब्रह्मास्मि' इति कूटस्थब्रह्मरूपत्वबोधेनाध्यस्ताहमर्थरूपत्वं निवर्त्यते, 'योऽयं स्थाणुः पुमानेष पुंधिया स्थाणुधीरिव। ब्रह्मास्मीति धियाशेषा ह्यहंबुद्धिर्निवर्त्यते॥' इति नैष्कर्म्यसिद्धिवच-

---

अध्यस्ताहमर्थरूपत्वमिति। अध्यस्तो योऽहमर्थस्तद्रूपत्वं तत्तादात्म्यं निवर्त्यत इति बोधफलमुक्तम्। महावाक्यस्य बाधार्थकत्वं न स्वकपोलकल्पितम्, किं तु सुरेश्वराचार्यैरुक्तमित्याह—**योऽय-**मिति। 'मन्दान्धकारे यः स्थाणुर्गृहीत एषोऽयं पुमान्' इत्याप्तवाक्यजन्यया पुंधिया 'वस्तुतो नायं स्थाणुः, किं तु पुमान्' इति धिया 'स्थाणुरयम्' इति धीरारोपितस्थाणुतादात्म्येन सह यथा निवर्तते, एवम् 'अहं ब्रह्मास्मि' इति वाक्यजन्यया धिया 'अहमर्थभूतजीवतादात्म्यशून्यं ब्रह्मैवास्मि' इत्याकारयाहंबुद्धिः 'अहं करोमि भुञ्जे' इत्यादिबुद्धिरशेषारोपिताहमर्थसहिता निवर्त्यते। महावाक्यार्थज्ञानादशेषानर्थनिवृत्तिर्विदुषामनुभवसिद्धेति द्योतनार्थो हिशब्दः। ननु समानाधिकरणवाक्येष्वभेदरूपवाक्यार्थस्य मुख्यतयौत्सर्गिकत्वाद्विवरणादिषु प्रकृतेऽभेदरूपवाक्यार्थस्यैव स्वीकाराच्च भगवत्पादैरपि वाक्यवृत्तौ 'तादात्म्यमात्रं वाक्यार्थस्तयोरेव पदार्थयोः' इति श्लोकेन महावाक्येषु तत्त्वंपदार्थयोस्तादात्म्यशब्दिताभेदस्यैव वाक्यार्थतया स्वीकाराच्च वार्त्तिककारवचनस्य 'बाधाया अपि प्रकृते वाक्यार्थता वक्तुं शक्यते' इति**

नात् । यदि तु विवरणाद्युक्तरीत्येदमभेदे सामानाधिकरण्यं तदा जीववाचिनोऽहंशब्दस्य लक्षणया कूटस्थपरत्वमस्तु, तस्याबाध्यस्य ब्रह्माभेदयोग्यत्वात् । यस्तु मेघाकाशकल्पो धीवासनाप्रतिबिम्ब ईश्वर उक्तः सोऽयम्

प्रौढिमाश्रित्य प्रवृत्त्युपपत्तेश्च 'अहं ब्रह्मास्मि' इत्यत्राभेदो वाक्यार्थे इति स्थिते विनाशिजीवस्याविनाशिब्रह्माभेदो न संभवतीति चोद्य तदवस्थमेवेत्यस्वरसादाह— **यदि त्विति** । 'कूटस्थो ब्रह्म जीवेशावित्येवं चिच्चतुर्विधा' इति श्लोकसंगृहीतानां कूटस्थब्रह्मजीवेश्वराणां चतुर्णां मध्ये ब्रह्मचैतन्यं तावत्सत्यज्ञानादिवाक्येषु सुप्रसिद्धमिति तत्र वाक्यं प्रमाणत्वेन नोदाहृतम् । कूटस्थचैतन्ये 'अविनाशी वै' इति वाक्यं प्रमाणत्वेन दर्शितम् । उपाध्युत्पत्तिविनाशानुविधाय्युत्पत्तिविनाशवचनमन्तःकरणगतचैतन्यप्रतिबिम्बरूपे जीवे प्रमाणमुक्तम् । परिशेषात्पूर्वोक्तेश्वरे प्रमाणं वक्तव्यम् । तदाह— **यस्त्विति** । तुशब्दोऽवधारणे । य ईश्वर उक्तः सोऽयं श्रुत्युक्तानन्दमय एव नान्य **इत्यर्थः** । सुष्ठुतं स्थानमस्येति सुषुप्तस्थानः । जागरणे हि विज्ञानशब्दितेऽन्तःकरणे तादात्म्याध्यासाद्विज्ञानमयत्वमनोमयत्वकर्तृत्वादीनि रूपाणि सन्ति । तथा देहे 'स्थूलोऽहम्' इत्याद्यभेदाध्यासात्स्थूलत्वकृशत्वब्राह्मणत्वादीनि रूपाणि सन्ति । तथा चक्षुरादिषु 'काणोऽहम्' 'मूकोऽहम्' इत्यादिरूपादध्यासात्काणत्वमूकत्वादीनि रूपाणि सन्ति । एवमाकाशादिषु पदार्थेष्वध्याससिद्धानि 'आकाशमयः' 'वायुमयः'

'सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक्' इति माण्डूक्यश्रुतिसिद्धसौषुप्तानन्दमयः, तत्रैव तदनन्तरम् 'एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम्' इति श्रुतेः

इत्यादिश्रुतिसंगृहीतान्यनन्तरूपाणि जीवस्य सन्ति । सुषुप्ते तु बुद्ध्याद्युपाधिलयेन सर्वप्रकारभ्रान्तिलयाद्भ्रान्तिसिद्धानि सर्वाण्यपि रूपाणि लीयन्त इत्यभिप्रेत्य 'एकीभूतः' इत्युक्तम् । तदुक्तम्— 'विज्ञानमयमुख्यैर्यो रूपैर्युक्तः पुराधुना । स लयेनैकतां प्राप्तो बहुतण्डुलपिष्टवत् ॥' इति । पुरा सुप्तात्पूर्वकाले । लयेन रूपाणां लयेनेत्यर्थः । प्रज्ञानं चैतन्यम् । तच्च जाग्रदादौ वृत्तिभेदेन भेदरूपं शैथिल्यं प्राप्य स्थितम । सुषुप्ते वृत्तीनां विलयात्पुनरेकत्वं प्राप्तमित्यभिप्रेत्य प्रज्ञानघनत्वमुक्तम् । आनन्दोऽत्र बिम्बभूतो ब्रह्मानन्दो विवक्षितः । तस्य प्रतिबिम्बभूतो जीव आनन्दमयः । स च स्वरूपभूतमानन्दं सुषुप्तिकालेऽविद्यावृत्तिभिर्भुङ्क्त इत्यानन्दभुगिति श्रुत्यर्थः । ननु जाग्रत्स्वप्नयोः स्थूलावस्थान्तःकरणप्रतिबिम्बरूपो जीवो विज्ञानमयः, स्थूलान्तःकरणस्य विज्ञानशब्दवाच्यत्वात् । स एव विज्ञानमयो जीवः स्वापकाले सूक्ष्मरूपेण विलीनावस्थान्तःकरणोपाधिकः सन्नानन्दमय इत्युच्यते । तथा चानन्दमयस्य जीवत्वादीश्वरत्वमसिद्धमित्याशङ्क्य सौषुप्तानन्दमयस्यैवेश्वरत्वं वाक्यशेषो दर्शयतीत्याह— **तत्रैवेति** । माण्डूक्यश्रुतावेवेत्यर्थः । सर्वेश्वरत्वं सर्वजगदुत्पत्तिकर्तृत्वम् । योनिरुपादानम् । आनन्दमयस्य सर्वोपादानत्वे

सर्ववस्तुविषयसकलप्राणिधीवासनोपाधिकस्य तस्य स-

हेतुमाह— **प्रभवेति** । हि यस्माद्भूतानां प्रभवाप्ययौ जन्मलयौ सौषुप्तानन्दमयाद्ब्रह्मतस्तस्मादेष सर्वस्य योनिरित्यर्थः । आनन्द-मयस्य श्रुत्युक्तसर्वज्ञत्वे युक्तिमप्याह— **सर्ववस्त्विति** । एकैका धीः किंचित्किंचिद्विषयीकरोतीति सर्वाभिर्धीभिर्मिलित्वा सर्वं ज-गद्विषयीक्रियते । एवं च सर्वबुद्धीनां सर्वविषयकत्वे सिद्धे सति सर्वबुद्धिसूक्ष्मावस्थारूपाणां सर्वबुद्धिवासनानामपि सर्वविषयकत्वं सिध्यति । तथा च सर्वप्राणिबुद्धिवासनोपाधिकस्यानन्दमयस्य सर्वज्ञत्वसिद्धिरित्यर्थः । ननु धीवासनोपरक्ताज्ञानोपाधिक ईश्वर इति यदुक्तं तत्र किं प्रतिबिम्बेश्वरस्याज्ञानमेवोपाधिः, किं वा वा-सनोपरक्ताज्ञानम्, अथ वा सर्वा धीवासनाः, उत प्रत्येकं वास-ना । नाद्यः, धीवासनासु प्रतिबिम्बितं चैतन्यमीश्वर इत्युक्तिवि-रोधादज्ञानमात्रस्येश्वरोपाधित्वे धीवासनानुसरणवैफल्याच्च । न चाज्ञानोपाधिकस्यैवेश्वरस्य सर्वज्ञत्वलाभार्थं सर्वविषयकधीवासनानु-सरणमिति वाच्यम् । अज्ञानगतसत्त्वांशपरिणामरूपाभिः सर्वविषयकवृत्तिभिरेव सर्वज्ञत्वोपपादनसंभवेन तदर्थं धीवासनानपेक्षणात् । अत एव न द्वितीयः । अज्ञानमात्रस्य तदुपाधित्वसंभवाद्युगपत्सर्वप्राणिनां सुषुप्त्यसंभवेन सर्वबुद्धिवासनानां यौगपद्या-संभवाच्च न तासामज्ञानविशेषणतयेश्वरोपाधित्वसंभवः । तासां यौ-गपद्यासंभवेन न तृतीयोऽपि कल्पः संगच्छते, सर्वासु धीवासनासु व्यासक्ततयैकस्येश्वररूपप्रतिबिम्बस्यासंभवाच्च, लोके व्यासज्यवृ-

र्वज्ञत्वस्य तत एव सर्वकर्तृत्वादेरभ्युपपत्तेश्च । न चास्मद्बुद्धिवासनोपहितस्य कस्यचित्सार्वज्ञ्यं नानुभूयत इति वाच्यम् । वासनानां परोक्षत्वेन तदुपहितस्यापि परोक्षत्वादिति ॥

ब्रह्मानन्दे तु सुषुप्तिसंयोगान्माण्डूक्योक्त आनन्दम-

स्तिप्रतिबिम्बादर्शनात् । तस्माच्चतुर्थः कल्पः परिशिष्यते । तत्रानुभवविरोधमाशङ्कते— **न चास्मदिति** । अस्माकं प्राणिनामेकैकबुद्धिवासनोपहितस्यानन्दमयस्य कस्यापि स्वापकाले 'अहं सर्वज्ञः' इत्याद्यनुभवो नास्तीत्यर्थः । **वासनानामिति** । जाग्रदादौ स्थूलावस्थान्तःकरणानामिव सुषुप्तौ वासनात्मकान्तःकरणानां साक्षिप्रत्यक्षयोग्यत्वाभावेन तदुपाधिकानन्दमयानामपि नाहमनुभवयोग्यत्वमित्यर्थः ॥

माण्डूक्यश्रुत्युक्तानन्दमयस्य सकलधीवासनोपाधिकस्योक्तरीत्यैकस्यासंभवात्प्रत्येकमेव धीवासनोपाधिक आनन्दमयो वाच्यः । स च जीव एवेत्याह— **ब्रह्मानन्दे त्विति** । चित्रदीपे श्रीविद्यारण्यगुरुभिरीश्वरत्वेनोक्तानन्दमयस्य तैरेव ब्रह्मानन्दाख्यग्रन्थे जीवत्वोक्तिरूपविशेषार्थकस्तुशब्दः । सुषुप्तिसंयोगादित्युपलक्षणम् । वासनोपाधिकस्येश्वरत्वे जाग्रदादावीश्वराभावप्रसङ्गादेकैकवासनोपाधिकस्य **नानात्वेनेश्वरनानात्वप्रसङ्गात्सकलवासनोपाधिकस्य** कस्यचिदसंभवाच्चेत्यपि द्रष्टव्यम् । तत्रोक्तप्रकारं दर्श-

यो जीव इत्युक्तम् । तथा हि— जाग्रदादिषु भोगप्रदस्य कर्मणः क्षये निद्रारूपेण विलीनमन्तःकरणं पुनर्भोगप्रदकर्मवशात्प्रबोधे घनीभवति । तदुपाधिको जीवो विज्ञानमय इत्युच्यते । स एव पूर्वं सुषुप्तिसमये विलीनावस्थोपाधिकः सन्नानन्दमय इत्युच्यते । स एव माण्डूक्ये 'सुषुप्तस्थानः' इत्यादिना दर्शित इति । एवं सति तस्य सर्वेश्वरत्वादिवचनं कथं संगच्छताम् । इत्थम्— सन्त्यधिदैवतमध्यात्मं च परमात्मनः सवि-

---

यति— **तथा हीति** । जाग्रदादिषु भोगप्रदं यत्कर्म तस्य क्षये सतीत्यर्थः । आदिपदं स्वप्नपरम् । बहुवचनं तु जाग्रत्स्वप्नव्यक्तिभेदापेक्षम् । **निद्रारूपेणेति** । सुषुप्तिरूपेणेत्यर्थः । तदुक्तं पञ्चीकरणे— 'बुद्धेः कारणात्मनावस्थानं सुषुप्तिः' इति । आनन्दमयस्य जीवत्वे तस्येश्वरत्वप्रतिपादकवाक्यशेषविरोधं शङ्कते— **एवं सतीति** । सुषुप्तजीवरूपानन्दमयस्य वस्तुत ईश्वरत्वाभावेऽपीश्वराभेदविवक्षया तस्येश्वरत्ववचनं संगच्छत इति परिहरति— **इत्थमित्यादिना** । माण्डूक्यश्रुतौ जीवेश्वरयोरभेदविवक्षां दर्शयितुं पीठिकां करोति— **सन्तीति** । परमात्मनोऽधिदैवतं सविशेषाणि त्रीणि रूपाणि सन्ति । तथा परमात्मनोऽध्यात्मं च सविशेषाणि त्रीणि रूपाणि सन्तीति संबन्धः । परमात्मन इत्यस्य निर्विशेषचैतन्यस्येत्यर्थः । अधिदैवतमित्यस्य देवतात्म-

शेषाणि त्रीणि त्रीणि रूपाणि । तत्राधिदैवतं त्रीणि शुद्धं चैतन्यं चेति चत्वारि रूपाणि चित्रपटदृष्टान्तेन चित्रदीपे समर्थितानि— यथा स्वतः शुभ्रः पटो धौतः, अन्नलिप्तो घट्टितः, मध्याकारयुक्तो लाञ्छितः, वर्णपूरितो रञ्जित इत्यवस्थाचतुष्टयमेकस्यैव चित्रपटस्य; तथा परमात्मा मायातत्कार्योपाधिरहितः शुद्धः, मायोपहित

कानीत्यर्थः । अध्यात्ममित्यस्य च जीवात्मकानीत्यर्थः । अधिदैवतमध्यात्ममिति च पदद्वयमव्ययम् । उक्तं प्रपञ्चयति— **तत्रेति** । अध्यात्माधिदैवतरूपाणां मध्य इत्यर्थः । जीवस्य त्रीणि सविशेषरूपाणि तुरीयपादात्मकं निर्विशेषरूपं च माण्डूक्यश्रुतौ कण्ठतो दर्शितानि । ईश्वरस्य तु निर्विशेषसाविशेषरूपाणि तच्छ्रुत्यभिप्रेतान्यपि श्रुत्या कण्ठतो नोक्तानि । तानि तु श्रुतितात्पर्याभिज्ञैः श्रीविद्यारण्यगुरुभिश्चित्रदीपे सदृष्टान्तं निरूपितानीत्याह— **चित्रपटेति** । तत्रायं दृष्टान्तसंग्राहकः श्लोकः—'स्वतः शुभ्रोऽत्र धौतः स्याद्घट्टितोऽन्नविलेपनात् । मध्याकारैर्लाञ्छितः स्याद्रञ्जितो वर्णपूरणात् ॥' इति । एतच्छ्लोकसंगृहीतं दृष्टान्तं विवृणोति— **यथेति** । 'स्वतश्चिदन्तर्यामी तु मायावी सूक्ष्मसृष्टितः । सूत्रात्मा स्थूलसृष्ट्यैष विराडित्युच्यते परः ॥' इति श्लोकसंगृहीतं दार्ष्टान्तिकं दर्शयति— **तथेति** । श्लोके परः स्वताश्चिदिति संबन्धः । अमुमंशं विवृणोति— **परमात्मेति** । श्लोके तुशब्दोऽवधारणे । तथा च पर एव मायावी सन्नन्तर्यामीत्युच्यत इति

ईश्वरः, अपञ्चीकृतभूतकार्यसमष्टिसूक्ष्मशरीरोपहितो हिरण्यगर्भः, पञ्चीकृतभूतकार्यसमष्टिस्थूलशरीरोपहितो वि-

---

संबन्धः । अमुमंशमाह— **मायोपहित ईश्वर इति** । श्लोके पर एव सूक्ष्मसृष्टितः सूत्रात्मेति संबन्धः । अमुमंशं व्याचष्टे— **अपञ्चीकृतेति** । अपञ्चीकृतानां भूतानां यत्कार्यं व्यापकं सूक्ष्मशरीरं तदुपहित इत्यर्थः । न च सूत्रात्मनो हिरण्यगर्भशब्दितस्य श्रुतिस्मृत्योर्जीवत्वप्रसिद्धेः कथं तस्येश्वररूपत्वमिति वाच्यम् । जीवरूपहिरण्यगर्भस्य समष्टिसूक्ष्मशरीराभिमानविशिष्टस्य सत्यलोकस्वामिन ईश्वरान्यत्वाभ्युपगमात्, ईश्वरस्य तु समष्टिसूक्ष्मशरीराभिमानाभावेऽपि समष्टिसूक्ष्मशरीरनियन्तृतया तदुपाधिकस्य समष्टिसूक्ष्मोपाध्युपहितत्वगुणयोगेन हिरण्यगर्भसूत्रात्मपदाभ्यां निर्देशस्येह विवक्षितत्वात् । तथा च गौणमीश्वरस्य हिरण्यगर्भत्वमिति भावः । अत एव चित्रदीप ईश्वररूपहिरण्यगर्भापेक्षया सत्यलोकाधिपतेर्ब्रह्मणस्तत्तद्वाद्यभिमतेश्वरपरिगणनावसरे पृथगुपादानं कृतमिति मन्तव्यम् । श्लोक एष एव परः स्थूलसृष्ट्या विराडित्युच्यत इति संबन्धः । अमुमंशं व्याकुर्वन्संगृह्णाति— **पञ्चीकृतेति** । अयमीश्वररूपो विराट्पुरुषः पुरुषसूक्तवैश्वानरविद्यावाक्यादिरूपश्रुतिसिद्धो द्रष्टव्यः । सत्यलोकाधिपतेर्हिरण्यगर्भस्य पुत्ररूपो विराट्पुरुषः समष्टिस्थूलाभिमानी जीवो बृहदारण्यकश्रुतिसिद्धोऽन्य एवेत्यपि द्रष्टव्यम् । **इत्यवस्थेति** । उक्तप्रकारेण वस्तुत एकस्यैव रूपचतुष्टयं द्रष्टव्यमित्यर्थः । एवं प्रकृतोप-

राट्पुरुष इत्यवस्थाचतुष्टयमेकस्यैव परमात्मनः। अस्मिन्-श्चित्रपटस्थानीये परमात्मनि चित्रस्थानीयः स्थावरजङ्गमात्मको निखिलः प्रपञ्चः। यथा चित्रार्पितमनुष्याणां चित्राधारवस्त्रसदृशा वस्त्राभासा लिख्यन्ते तथा परमात्माध्यस्तदेहिनामधिष्ठानचैतन्यसदृशाश्चिदाभासाः कल्प्यन्ते। ते च जीवनामानः संसरन्तीति। अध्यात्मं तु विश्वतैजसप्राज्ञभेदेन त्रीणि रूपाणि। तत्र सुषुप्तौ

युक्तं रूपचतुष्टयं दर्शयित्वा प्रसङ्गादाह— **अस्मिन्निति**। ननु कृत्स्नस्य जगतश्चित्रस्थानीयत्वे तद्वदेव सर्वमचेतनं स्यात्, तथा च चेतनाचेतनविभागो न स्यादिति शङ्कां दृष्टान्तेन परिहरति— **यथेति**। **वस्त्राभासा इति**। वर्णविशेषात्मकवस्त्राणां चित्राधारेण वस्त्रेणाकृतिसाम्येऽपि शीतादिनिवर्तकत्वाभावादाभासत्वम्। **देहिनामिति**। स्थूलदेहवतामहंकाराणामित्यर्थः। अन्तःकरणात्मकाहंकारेषु चैतन्यस्य प्रतिबिम्बकल्पनस्य प्रयोजनमाह— **ते चेति**। तथा च चिदाभासयुक्ताः कार्यकरणसंघाताश्चेतनाः, अन्ये गिरिसमुद्रादयोऽचेतना इति विभागसिद्धिरिति भावः। एवमीश्वरस्य रूपाणि दर्शितानि। जीवस्य श्रुत्युक्तानि सविशेषनिर्विशेषरूपाणि दर्शयति— **अध्यात्मं त्विति**। तुशब्द ईश्वरस्य सविशेषरूपाण्यपेक्ष्य जीवस्य सविशेषरूपाणां वैलक्षण्यसूचनार्थः। तदेव वैलक्षण्यं दर्शयति— **विश्वेति**। **रूपाणीति**। सविशेषा-

विलीनेऽन्तःकरणेऽज्ञानमात्रसाक्षी प्राज्ञः, योऽयमिहानन्दमय उक्तः । स्वप्ने व्यष्टिसूक्ष्मशरीराभिमानी तैजसः ।

णीति शेषः । तत्रेति । रूपत्रयमध्य इत्यर्थः । विलीन इति । अन्तःकरणे विलीने सति सूक्ष्मरूपेण विलीनान्तःकरणोपाधिकः संपद्यत इति भावः । स्थूलान्तःकरणादिसाक्षित्वव्यवच्छेदार्थं मात्राग्रहणम् । ननु पूर्वं सौषुप्तजीव आनन्दमय इत्युक्तम् । इदानीं कथं स एव प्राज्ञ इत्युच्यते । तत्राह—योऽयमिति । इहेति । माण्डूक्यश्रुतावित्यर्थः । तत्रैव 'आनन्दभुक्' इत्यनन्तरम् 'चेतोमुखः प्राज्ञस्तृतीयः पादः' इति वाक्यशेषदर्शनादिति भावः । चेतांसि चित्प्रतिबिम्बोपेतान्याविद्यावृत्तिरूपाणि मुखानि स्वापकालीनानन्दानुभवसाधनानि यस्य स चेतोमुखः । ननु सौषुप्तजीवस्यानन्दभुक्त्वं चेतोमुखत्वं च श्रुतमपि कथमुपपन्नमिति चेत्, उच्यते—सुषुप्तादुत्थितस्य हि 'सुखमहमस्वाप्सम्' इति स्वापकालीनविशिष्टसुखस्मरणं दृश्यते । तच्च तदा सुखानुभवमन्तरेण न संभवति, अननुभूतस्य सुखस्य स्मरणायोगात् । न च सुषुप्तावात्मस्वरूपसुखस्यान्तःकरणवृत्तिभिरेवानुभवः संभवतीति वाच्यम् । तदा विलीनस्यान्तःकरणस्य वृत्युत्पादनयोग्यत्वाभावात् । न च मुक्तिकाल इव स्वापकालेऽपि स्वरूपचैतन्येनैव सुखानुभवसंभवात्किमविद्यावृत्तिप्रतिबिम्बरूपचेतःकल्पनयेति वाच्यम् । जाग्रत्स्वप्नयोश्चैतन्यप्रतिबिम्बोपेतवृत्तिभिरानन्दानुभवदर्शनेन सुषुप्तावपि तथा संभवे परित्यागायोगात्, मुक्तिकाले चोपाधिमात्रविलया-

जागरे व्यष्टिस्थूलशरीराभिमानी विश्वः। तत्र माण्डूक्यश्रुतिरहमनुभवे प्रकाशमानस्यात्मनो विश्वतैजसप्राज्ञतुरीयावस्थाभेदरूपं पादचतुष्टयम् 'सोऽयमात्मा चतुष्पात्' इत्युपक्षिप्य, पूर्वपूर्वपादप्रविलापनेन निष्प्रप-

---

भ्युपगमाद्वृत्त्यसंभव इति वैषम्यसत्त्वात्, सौषुप्तसुखानुभवस्य केबलनित्यसाक्षिरूपत्वेऽनुभवनाशरूपसंस्काराभावप्रसङ्गेन 'सुखमहमस्वाप्सम्' इत्यनुसंधानाभावापत्तेश्च। तस्माद्यथोक्ता श्रुतिरुपपन्नैव। **व्यष्टीति**। परिच्छिन्नेत्यर्थः। एते पादाः साक्षाच्छ्रुत्युक्ता इत्याह— **तत्रेति**। उक्तरीत्या पादकल्पनोपपत्तौ सत्यामित्यर्थः। श्रुतिः पादचतुष्टयमुपक्रम्य विश्वादिपादान्न्यरूरुपादिति संबन्धः। पद्यते गम्यतेऽवगम्यते ब्रह्मात्मैक्यमेभिरिति पादा विश्वादयः। इमां व्युत्पत्तिमभिप्रेत्य श्रौतपादकल्पनायाः प्रयोजनमाह— **पूर्वपूर्वेति**। अयमर्थः— 'सोऽयमात्मा चतुष्पात्' इति वाक्येन जीवस्य पादचतुष्टयवत्त्वमुपक्रम्य 'जागरितस्थानो वैश्वानरः प्रथमः पादः' इत्युक्तम्। अत्र जीवपादानामेव वक्तुमुपक्रान्तत्वाद्विश्वः प्रथमः पाद इति वक्तव्ये वैश्वानरशब्दितस्य विराट्पुरुषरूपेश्वरस्य प्रथमपादत्वोक्तिर्विश्वे वैश्वानरस्यान्तर्भावं सूचयति। न च हिरण्यगर्भेश्वरौ विहाय वैश्वानरस्यैव विश्वान्तर्भावे किं नियामकं श्रुत्याभिमतमिति वाच्यम्। तयोः स्थूलोपाधिकत्वरूपसाम्यस्येश्वरहिरण्यगर्भव्यावृत्तस्य नियामकतया विवक्षितत्वात्।

तथा द्वितीयपादप्रतिपादकवाक्ये 'स्वप्नस्थानस्तैजसो द्वितीयः पादः' इत्युक्तम् । अत्र सूक्ष्मोपाधिकत्वसाम्येन हिरण्यगर्भस्य तैजसेऽन्तर्भावो विवक्षितः, 'वैश्वानरः प्रथमः पादः' इत्युपक्रमानुसारात् । तथा तृतीयपादप्रतिपादकम् 'सुषुप्तस्थान एकीभूतः' इत्यादिवाक्यं प्रागेवोदाहृतम् । अत्रापि तृतीयपादत्वेनोक्ते प्राज्ञशब्दितानन्दमये सूक्ष्मतरोपाधिकत्वसामान्येनेश्वरस्यान्तर्भावो विवक्षितः । तथा च वाक्यशेषस्य 'एष सर्वेश्वरः' इत्यादेरानन्दमयेश्वरयोरभेदविवक्षया प्रवृत्तत्वान्नानुपपत्तिः । तथा तुरीयपादप्रतिपादकमिदं वाक्यम्— 'अदृश्यमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते' इति । अदृश्यं चक्षुराद्यविषयम् । अव्यवहार्यं प्रवृत्तिनिवृत्तिलक्षणव्यवहारागोचरम् । अग्राह्यं कर्मेन्द्रियागोचरम् । अलक्षणमसाधारणधर्मशून्यम् । अचिन्त्यं शुष्कतर्कागोचरम् । अव्यपदेश्यं शब्दशक्त्यगोचरम् । एकात्मप्रत्ययसारम् । एकादिपदचतुष्टयस्य कर्मधारयः । स्वगतभेदशून्यत्वमेकत्वम् । सर्वदेहेषु पूर्णत्वमात्मत्वम् । प्रत्ययत्वं चिद्रूपत्वम् । सारत्वमानन्दत्वम्, 'सार आनन्द इत्यर्थः' इत्यानन्दमयाधिकरणभाष्यात् । प्रपञ्चोपशमं प्रपञ्चाभावरूपम्, कल्पितपदार्थाभावस्याधिष्ठानानतिरेकात् । यद्वा प्रपञ्चध्वंसरूपम्, ज्ञानसाध्यायाः सकारणद्वैतनिवृत्तेरधिष्ठानात्मकताया वक्ष्यमाणत्वात् । शिवं शुद्धं सर्वदोषरहितम् । अद्वैतं द्वैतरहितम् । चतुर्थं विश्वतैजसप्राज्ञरूपपादत्रयापेक्षया चतुःसंख्यापूरकं पादम् । मन्यन्ते चिन्तयन्तीति श्रुत्यर्थः । अत्र विश्वतैजसप्राज्ञलक्षणपादेषु वै-

श्वानरहिरण्यगर्भेश्वराणामन्तर्भाववचनं तैरेतेषामेकत्वचिन्तनपरम्। तथा विश्वादिपादानामोंकारावयवभूतमात्राणां चैकत्वचिन्तनमत्र विवक्षितम्। तथा च श्रुतिः— 'पादा मात्रा मात्राश्च पादाः' इति। तथा गौडपादीयवचनमपि— 'ओंकारं पादशो विद्यात्पादा मात्रा न संशयः' इति। न संशय इत्यस्यायमभिप्रायः— विश्वादिपादानां मात्राणां च यावत्संशयनिवृत्त्येकत्वं चिन्तनीयमिति। मात्रास्वरूपं च श्रुत्यैव दर्शितम— 'अकार उकारो मकार इति' इति। एवं विश्वादिपादानां वैश्वानरादीनां मात्राणां चैकत्वचिन्तनं सर्वेषामेतेषां निष्प्रपञ्चब्रह्मात्मकतुर्यपादे चिन्मात्रे प्रविलापनार्थम्। तत्र चायं क्रमः— विश्ववैश्वानराकाराणामेकत्वं प्रथमं संचिन्त्य पश्चात्तैजसहिरण्यगर्भोकाराणामेकत्वं चिन्तयेत्। तत ईश्वरप्राज्ञमकाराणामप्येकत्वं चिन्तयेत्। तथा चिन्ताक्रमेणैव प्रविलापयेत्। अकारादित्रयमुकारे, उकारादित्रयं मकारे, मकारादित्रयं चिन्मात्रे तुरीयपादे प्रविलापयेत्। चिन्मात्रे प्रविलाप्य च चित्तं तत्रैव स्थापयेत्। उकारादौ प्रविलापनं नामाकारादित्रयमुकारव्यतिरेकेण नास्तीत्याहार्यनिश्चयः। एवं प्रत्यहमुक्तप्रकारेण समाधिं कुर्वतो ब्रह्मसाक्षात्कारो भवति। ततश्च ब्रह्मप्राप्त्या कृतकृत्यतेति माण्डूक्यश्रुत्यभिप्रायः। इदं सर्वं माण्डूक्यश्रुतेः संग्रहेण तात्पर्यकथनपरस्य भाष्यकृद्भिः कृतस्य पञ्चीकरणस्य व्याख्यानरूपे वार्त्तिके सुरेश्वराचार्यैरभिहितम्— 'अकारमात्रं विश्वः स्यादुकारस्तैजसः स्मृतः। प्राज्ञो मकार इत्येवं परिपश्येत्क्रमेण तु॥' अत्र विश्वादिषु वैश्वानरादीनामन्तर्भावं

सिद्धं कृत्वा न पृथगुपादानं कृतमिति मन्तव्यम् । 'समाधिकालात्प्रागेवं विचिन्त्यातिप्रयत्नतः । स्थूलसूक्ष्मक्रमात्सर्वं चिदात्मनि विलापयेत् ॥ अकारं पुरुषं विश्वमुकारे प्रविलापयेत् ।' पुरुषोऽत्र वैश्वानरः । 'उकारं तैजसं सूक्ष्मं मकारे प्रविलापयेत् ॥' अत्र समष्टिसूक्ष्मशरीरनियन्तृतया तदुपहितः परमेश्वरः सूक्ष्मशब्दार्थः । 'मकारं कारणं प्राज्ञं चिदात्मनि विलापयेत् ।' अत्रान्तर्यामी मायामात्रोपाधिकः कारणशब्दार्थः । 'चिदात्माहं नित्यशुद्धबुद्धमुक्तसद्द्वयः ॥ परमानन्दसंदोहवासुदेवोऽहमोमिति ।' यतोऽहं चिदात्मावशेषितः, अतोऽहं नित्यशुद्धादिरूपो वासुदेव इत्यर्थोऽङ्गीकारात्मक ओंकार इत्यर्थः । इतिशब्दश्चोत्तरश्लोकान्वयी । 'ज्ञात्वा विवेचकं चित्तं तत्साक्षिणि विलापयेत् ॥' इत्युक्तप्रकारेण केवलं चिदात्मानमवशिष्टं ज्ञात्वा विवेचकं विलापकं तच्चित्तं साक्षिणि यथोक्ते वासुदेवे विलापयेत्स्थापयेदित्यर्थः । 'चिदात्मनि विलीनं चेत्तच्चित्तं नैव चालयेत् । पूर्णबोधात्मनासीत पूर्णाचलसमुद्रवत् ॥' चिरकालं समाधिं कुर्यादिति वार्त्तिकार्थः । 'एवं समाहितो योगी श्रद्धाभक्तिसमन्वितः । जितेन्द्रियो जितक्रोधः पश्येदात्मानमद्वयम् ॥ आदिमध्यावसानेषु दुःखं सर्वमिदं यतः । तस्मात्सर्वं परित्यज्य तत्त्वनिष्ठो भवेत्सदा ॥' यतस्तत्त्वनिष्ठाव्यतिरिक्तं पुरुषार्थसाधनत्वेन लोकशास्त्रसिद्धं सर्वं कालत्रयेऽपि दुःखाविनाभूतम्, तस्मात्सर्वं विधिना संन्यस्योक्तरीत्या तत्त्वनिष्ठां समाधिलक्षणां कुर्यादित्यर्थः । तदेवाह— 'इमां विद्यां प्रयत्नेन योगी संध्यासु सर्वदा । समभ्यस्योदहामुत्रभोगानासक्तधीः

अब्रह्मात्मकतुरीयपादप्रतिपत्तिसौकर्याय स्थूलसूक्ष्मसूक्ष्मतरोपाधिसाम्याद्विराडादीन्विश्वादिष्वन्तर्भाव्य, 'जागरितस्थानो बहिःप्रज्ञः' इत्यादिना विश्वादिपादान्नय-

---

सुधीः ॥' इति । इमां समाधिलक्षणां विद्यां सुधीरास्तिकतमो विरक्तो भूत्वा संध्यासूपक्रम्य सदाभ्यस्येदित्यर्थः । 'यः पश्येत्सर्वगं शान्तमानन्दात्मानमद्वयम् । न तेन किंचिदाप्तव्यं ज्ञातव्यं वावशिष्यते ॥ कृतकृत्यो भवेद्विद्वाञ्जीवन्मुक्तो भवेत्सदा । अविद्यातिमिरातीतं सर्वाभासविवर्जितम् ॥ आनन्दममलं शुद्धं मनोवाचामगोचरम् । वाच्यवाचकनिर्मुक्तं हेयोपादेयवर्जितम् ॥ प्रज्ञानघनमानन्दं वैष्णवं पदमश्नुते ।' इति । आभासपदं चिदाभासपरम् । वाच्या विश्वादयः । वाचका अकारादयः, प्रकृतत्वात् । हेयं दुःखम् । उपादेयं विषयसुखमित्यर्थः । तथा माण्डूक्यश्रुतौ समाधिनिष्ठाविवक्षामभिप्रेत्य गौडपादीयेऽप्युक्तम् — 'युञ्जीत प्रणवे चेतः प्रणवो ब्रह्म निर्भयम् । प्रणवे नित्ययुक्तस्य न भयं विद्यते क्वचित् ॥' इति संक्षेपः । ननु श्रवणादिरूपेण सांख्यमार्गेणैव तत्त्वप्रतिपत्तिसंभवात्किं मुमुक्षोर्योगविधिनेत्यत आह—**प्रतिपत्तिसौकर्यायेति** । यस्य मुमुक्षोः संन्यासिनो बुद्धिमान्द्याद्वा कौशलसत्त्वेऽपि न्यायव्युत्पादनकुशलाचार्याद्यभावाद्वा साख्यमार्गो न संभवति, तस्यानायासेन ब्रह्मतत्त्वप्रतिपत्तिसाधनतया बुद्धिपूर्वकप्रविलापनक्रमेण समाधिविधानं माण्डूक्यादावुक्तम् । माण्डूक्यतापनीयपञ्चीकरणादौ विहितं ब्रह्मोपासनं प्र-

रूरुपत् । अतः प्राज्ञशब्दित आनन्दमयेऽव्याकृतस्येश्वरस्यान्तर्भावं विवक्षित्वा तस्य सर्वेश्वरत्वादितद्धर्मवचनमिति । इत्थमेव भगवत्पादैर्गौडपादीयविवरणे व्याख्यातम् ॥

दृग्दृश्यविवेके तु चित्रदीपव्युत्पादितं कूटस्थं जीवकोटावन्तर्भाव्य चित्त्रैविध्यप्रक्रियैवालम्बितेति विशेषः ।

कृत्य ध्यानदीपे श्रीविद्यारण्यगुरुभिरधिकारी दर्शितः— 'अत्यन्तबुद्धिमान्द्वा सामग्र्या वाप्यसंभवात् । यो विचारं न लभते ब्रह्मोपासीत सोऽनिशम् ॥' इति । अव्याकृतस्येति । अनभिव्यक्तजगद्बीजनाव्याकृतपदेन लक्षणया परमेश्वरस्तत्र तत्र व्यवहृत इति कृत्वा तेन तन्निर्देशः कृतः । माण्डूक्यश्रुत्युक्तानन्दमयस्येश्वरत्ववचनं तदभेदविवक्षयेत्येतन्माण्डूक्यश्रुतिव्याख्यानरूपस्य गौडपादीयस्य विवरणरूपे भाष्ये भाष्यकारैरेवोक्तमित्याह— इत्थमेवेति ॥

श्रीविद्यारण्यगुरुभिश्चित्रदीपे स्वोक्तं चिच्चातुर्विध्यं विहाय ग्रन्थान्तरे 'जीव ईशो विशुद्धा चित्' इति वृद्धवचनसिद्धं चित्त्रैविध्यमेवावलम्ब्य जीवस्य त्रैविध्याख्यो विशेष उक्त इत्याह— दृग्दृश्यविवेके त्विति । तुशब्द उक्तविशेषार्थः । जीवकूटस्थस्य

तत्र युक्तम्— जलाशयतरङ्गबुद्बुदन्यायेनोपर्युपरिकल्पनाज्जीवस्त्रिविधः पारमार्थिको व्यावहारिकः प्रातिभासिकश्चेति। तत्रावच्छिन्नः पारमार्थिको जीवः, तस्मिन्नवच्छेदकस्य कल्पितत्वेऽप्यवच्छेद्यस्य तस्याकल्पि-

---

जीवकोटावन्तर्भावमेव दर्शयति— **तत्रेति**। दृग्दृश्यविवेकाख्यग्रन्थ इत्यर्थः। हिशब्दः प्रसिद्धिद्योतकः। **जलाशयतरङ्गेति**। न्यायो दृष्टान्तः। यथा समुद्रादिजलाशये तरङ्गा उपरिभावेन तिष्ठन्ति तेषु चोपरिभावेन बुद्बुदास्तिष्ठन्ति; एवं कूटस्थस्योपरि व्यावहारिकान्तःकरणप्रतिबिम्बरूपो यावद्व्यवहारमनुवर्तमानो व्यावहारिकजीवः कल्प्यते, तस्य चोपरिभावेन स्वप्नकाले वासनामयप्रातिभासिकरथादिवद्वासनामयान्तःकरणप्रतिबिम्बरूपः प्रातिभासिकजीवः कल्प्यत इत्यर्थः। **तत्रेति**। त्रिविधजीवमध्य इत्यर्थः। **अवच्छिन्न इति**। देहद्वयावच्छिन्नकूटस्थचैतन्यरूप आत्मा पारमार्थिकजीव इत्यर्थः। 'अहं ब्रह्मास्मि' इत्यादिमहावाक्येषु जीवब्रह्मणोरभेदः प्रतिपाद्यते। स च पारमार्थिकजीवकल्पने सति निर्वहति, अन्यथा प्रातिभासिकव्यावहारिकजीवयोः शुक्तिरूप्यादिवत्स्वरूपतो मिथ्यात्वेन सत्यब्रह्माभेदायोगात्। देहद्वयावच्छिन्नकूटस्थरूपपारमार्थिकजीवस्य त्ववच्छेदकीभूतदेहद्वयस्य कल्पितत्वेऽपि स्वतः सत्यत्वात्संभवति ब्रह्माभेद इति पारमार्थिकजीवकल्पनायाः प्रयोजनं दर्शयति— **तस्मिन्निति**। अवच्छिन्न-

तत्त्वेन ब्रह्मणोऽभिन्नत्वात् । तमावृत्य स्थितायां माया-यां कल्पितेऽन्तःकरणे चिदाभासोऽन्तःकरणतादात्म्या-पत्त्या 'अहम्' इत्यभिमन्यमानो व्यावहारिकः, तस्य मायिकत्वेऽपि यावद्व्यवहारमनुवृत्तेः । स्वप्ने तमप्यावृत्य

जीव इत्यर्थः । व्यावहारिकजीवं निरूपयति— **तमिति** । कूट-स्थमात्मानमावृत्याविद्यायां स्थितायां सत्यां कूटस्थात्मनि कल्पितं यदन्तःकरणं तत्र यश्चिदाभासः स व्यावहारिकजीव इत्यर्थः । तदुक्तम्— 'कूटस्थे कल्पिता बुद्धिस्तत्र चित्प्रतिबिम्बकः' इति । **अहमित्यभिमन्यमान इति** । 'अहम्' इत्येवमाकाराभिमान-कर्तेत्यर्थः । नन्वहमाकारवृत्तिरूपेण परिणममानस्यान्तःकरणस्यै-वाहमभिमानवत्त्वं युक्तं न तु चित्प्रतिबिम्बस्य, अत आह— **अन्तःकरणेति** । तस्य व्यावहारिकत्वे युक्तिमाह— **तस्येति** । न च व्यावहारिकजीवे मानाभाव इति वाच्यम् । 'अहं कर्ता भोक्ता' इत्यादिरूपाहमनुभवस्य तत्र मानत्वात्, कर्तृत्वभोक्तृत्वाद्यात्मकसं-साराश्रयत्वस्यान्यत्रायोगाच्च । न चान्तःकरणे तत्संभवः, तस्य चि-दाभासशून्यस्य चेतनधर्मत्वेन प्रसिद्धकर्तृत्वाद्याश्रयत्वायोगात्, चि-दाभासस्य तु चेतनात्मप्रतिबिम्बतया मिथ्याभूतस्यापि चेतनत्व-व्यवहारयोग्यत्वेन तद्धर्माणां चेतनधर्मत्वप्रसिद्धिविरोधाभावात् । पा-रमार्थिकजीवस्य च संसाराश्रयत्वं न संभवति, तस्य कूटस्थत्वादि-ति भावः । **तमपीति** । व्यावहारिकजीवमपीत्यर्थः । व्यावहारिक-जीवो हि जाग्रदवस्थायामात्मानं ब्राह्मणं देवदत्तं यज्ञदत्तपुत्रं विष्णुभक्तं

स्थितया मायावस्थाभेदरूपया निद्रया कल्पिते स्वाप्न-देहादावहमभिमानी प्रातिभासिकः, स्वप्नप्रपञ्चेन सह तद्द्रष्टुर्जीवस्यापि प्रबोधे निवृत्तेरिति। एवमेते प्रतिबिम्बेश्वरवादिनां पक्षभेदा दर्शिताः॥

मन्यते। स्वाप्नजीवस्तु स्वप्नावस्थायामात्मानं क्षत्रियं विष्णुशर्मनामानं नारायणपुत्रं महादेवभक्तं मन्यते। अतो जाग्रज्जीवस्यावरणं सिद्धम्। प्रातिभासिकजीवकल्पकमाह— **निद्रयेति**। ननु मायायाः सर्वकल्पकत्वाभ्युपगमात्कथं निद्रायाः कल्पकत्वम्, अपसिद्धान्तापत्तेरित्याशङ्क्य निद्रायास्तदवस्थारूपत्वाभ्युपगमान्नोक्तदोष इत्याशयेनाह— **मायेति**। न च निद्राया मायालक्षणाभावात्कथं तदवस्थाविशेषरूपत्वमिति वाच्यम्। आवरणविक्षेपशक्तिमत्त्वं हि मायालक्षणम्, तस्य लक्षणस्य जाग्रज्जीवावारिकायां स्वाप्नजगदात्मकविक्षेपकारिण्यां च निद्रायामक्षतत्वादिति भावः। प्रातिभासिकजीवकल्पनायाः प्रयोजनमाह— **स्वाप्नदेहादाविति**। व्यावहारिकजीवस्यावृतत्वेन स्वप्नकालेऽहमभिमानकर्तृत्वासंभवादिति भावः। तस्य प्रातिभासिकत्वे हेतुमाह— **स्वप्नप्रपञ्चेनेति**। प्रबोधकाले 'ब्राह्मणोऽहम्, न क्षत्रियः' इत्यादिरूपेण बोधेन स्वप्नद्रष्टुः क्षत्रियादिरूपस्य बाधानुभवादिति भावः। ईश्वरविषय उक्तवक्ष्यमाणप्रकारभेदज्ञानार्थमुपसंहरति— **एवमिति**॥

बिम्बचैतन्यमेवेश्वरो न प्रतिबिम्बविशेष इति वक्ष्यमाणविशे-

विवरणानुसारिणस्त्वाहुः— 'विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते । आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥' इति स्मृत्यैकस्यैवाज्ञानस्य जीवेश्वरविभागोपाधित्वप्रतिपादनाद्बिम्बप्रतिबिम्बभावेन जीवेश्वरयोर्विभागः । नोभयोरपि प्रतिबिम्बभावेन, उपाधिद्वयमन्तरेणोभयोः प्रतिबिम्बत्वायोगात् । तत्रापि प्रतिबि-

---

षार्थकस्तुशब्दः । विभेदजनकत्वं जीवेश्वरभेदस्थितिप्रयोजकत्वं विवक्षितम् । न तु यथाश्रुतम्, तद्भेदस्यानादित्वाभ्युपगमात् । **आत्यन्तिकमिति** । स्वापप्रलयादावज्ञानकार्यनाशेन तत्कारणाज्ञानस्यापि नाशोऽस्ति, परिणामपरिणामिनोरभेदात् । स चाज्ञाननाशो नात्यन्तिकः, पुनरुत्थानात् । मुक्तौ तु तत्त्वज्ञानेन स्वरूपेणापि नाशोऽस्ति । स चात्यन्तिकः, पुनरुत्थानाभावादिति मत्वाज्ञाननाशस्यात्यन्तिकत्वं विशेषणं दत्तम् । यद्वा जीवन्मुक्तिकालेऽज्ञानस्यावरणांशेन नाशेऽपि विक्षेपांशेन नाशाभावादनात्यन्तिकः स नाशः । विदेहमुक्तौ त्वात्यन्तिकोऽज्ञाननाश इति तदभिप्रायं तद्विशेषणमिति भावः । **प्रतिबिम्बत्वायोगादिति** । न च 'जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवति' इति श्रुत्योभयोः प्रतिबिम्बत्वप्रतिपादनविरोध इति वाच्यम् । प्रतिबिम्बत्ववद्बिम्बत्वस्यापि कल्पिततया श्रुतिगताभासपदेन प्रतिबिम्बवद्बिम्बस्यापि ग्रहणोपपत्तेः । ननु लोके प्रतिबिम्बत्वविशिष्टमुखे

म्बो जीवो बिम्बस्थानीय ईश्वरः। तथा सत्येव लौकि-

मुखाभासत्वव्यवहारवद्बिम्बत्वविशिष्टमुखे तथा व्यवहाराभावादाभासपदं मुख्यवृत्त्या बिम्बचैतन्यं प्रतिपादयितुं न शक्नोतीति खलु प्रतिबिम्बवद्बिम्बस्यापि विशिष्टरूपेण कल्पिततया कल्पितत्वगुणयोगेन बिम्बपरमाभासपदं वक्तव्यम्। तच्च न संभवति, सकृदुच्चरितस्याभासपदस्य मुख्यवृत्त्या प्रतिबिम्बपरत्वं गुणवृत्त्या बिम्बपरत्वमिति कल्पनस्य व्युत्पत्तिविरुद्धत्वात्। न चाजहल्लक्षणयाभासपदस्य बिम्बप्रतिबिम्बोभयपरत्वाभ्युपगमे नायं विरोध इति वाच्यम्। उभयोरपि प्रतिबिम्बरूपतामादायाभासपदस्य मुख्यार्थपरत्वे संभवति लक्षणाकल्पनाया एव निर्मूलत्वादिति चेत्, उच्यते— यथाश्रुतं जीवेशयोरुभयोरपि प्रतिबिम्बरूपत्वं न संभवति, बिम्बभूतचैतन्यस्य पूर्ववदेकत्वेनोपाधिभेदं विना प्रतिबिम्बद्वयासंभवात्। न च 'माया चाविद्या च स्वयमेव भवति' इति वाक्यशेषेण मायाविद्यारूपोपाधिद्वयप्रतिपादनान्न प्रतिबिम्बद्वयानुपपत्तिरिति वाच्यम्। तेन स्वयंशब्दोपात्तायाः प्रकृतमूलप्रकृतेर्मायात्वाविद्यात्वलक्षणरूपभेदप्रतिपादनेऽपि प्रतिबिम्बद्वयापेक्षितोपाधिद्वयाप्रतिपादनान्मायाविद्ययोः स्वरूपतो भेदस्य सिद्धान्तविरुद्धत्वाच्च। तस्माद्यथाश्रुतासंभवादेकस्यैवाज्ञानस्य जीवेशविभागप्रयोजकत्वप्रतिपादकस्मृत्यनुरोधाच्च 'जीवेशावाभासेन करोति' इति श्रुतावाभासपदमजहल्लक्षणया बिम्बप्रतिबिम्बोभयपरमिति विवरणानुसारिणामाशयः। तत्रापीति। बिम्बप्रतिबिम्बयोरुभयोर्मध्येऽपीत्यर्थः। तत्र युक्तिमाह— तथा सत्येवेति।

कबिम्बप्रतिबिम्बदृष्टान्तेन स्वातन्त्र्यमीश्वरस्य तत्पारतन्त्र्यं जीवस्य च युज्यते ; 'प्रतिबिम्बगताः पश्यन्नृजुवक्रादिविक्रियाः । पुमान्क्रीडेद्यथा ब्रह्म तथा जीवस्थविक्रियाः ॥' इति कल्पतरूक्तरीत्या 'लोकवत्तु लीलाकैवल्यम्' इति न्यायेन लीलामात्रपर्यवसायिनी । तथा च लोकेऽपि सार्वभौमादेः सर्वैर्मानुषैर्भोगैः संपन्नतमस्य प्रयोजनाभिसंधिं विनैव क्रीडा दृश्यते तद्वत् । किं चेश्वरस्य प्रयोजनोद्देशाभावेऽपि स्वभावादेव सृष्ट्यादिप्रवृत्तिरुपपद्यते । दृश्यते

बिम्बचैतन्यस्येश्वरत्वाभ्युपगमे सत्येवेत्यर्थः । **स्वातन्त्र्यमिति** । 'एष सर्वेश्वर एष भूताधिपतिः' इत्यादिश्रुतिसिद्धमिति शेषः । **तत्पारतन्त्र्यमिति** । 'एष ह्येव साधु कर्म कारयति' 'य आत्मानमन्तरो यमयति' 'ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा' इत्यादिश्रुतिस्मृतिसिद्धमिति शेषः । लौकिकदृष्टान्तमेव कल्पतरुश्लोकोदाहरणेन दर्शयति— **प्रतिबिम्बगता इति** । यथा लोके कश्चित्पुरुषः स्वप्रतिबिम्बगता ऋजुवक्रादिविक्रिया बिम्बभूतस्वप्रयुक्ताः पश्यन्क्रीडति, तथा ब्रह्मापि जीवस्थविक्रियाः प्राणिकर्मानुसारेण स्वप्रयुक्ताः पश्यन्क्रीडतीति योजना । कल्पतरूक्तरीत्येश्वरस्य स्वातन्त्र्यप्रतिपत्त्युपयोगिन्येश्वरस्य स्वातन्त्र्यप्रतिपादकं सूत्रमपि संगच्छत इत्यर्थः । सूत्रार्थस्तु— ईश्वरस्याप्तकामत्वेन प्रयोजनोद्देशाभावात्सृष्ट्यादिव्यापारेषु प्रवृत्तिर्न संभवतीति पूर्वपक्षव्यावृत्त्यर्थस्तुशब्दः । ईश्वरस्य सृष्ट्यादिप्रवृत्तिर्लक्षणक्रिया केवलं प्रयोजनोद्देशं विनैव लीला । लोकवत्, यथा लोके सार्वभौमादेः सर्वैर्मानुषैर्भोगैः संपन्नतमस्य प्रयोजनाभिसंधिं विनैव क्रीडा दृश्यते तद्वत् । किं चेश्वरस्य प्रयोजनोद्देशाभावेऽपि स्वभावादेव सृष्ट्यादिप्रवृत्तिरुपपद्यते । दृश्यते

लाकैवल्यम्' इति सूत्रमपि संगच्छते। अज्ञानप्रतिबिम्बितस्य जीवस्यान्तःकरणरूपोऽज्ञानपरिणामभेदो विशेषाभिव्यक्तिस्थानं सर्वतः प्रसृतस्य सवितृप्रकाशस्य दर्पण इव। अतस्तस्य तदुपाधिकत्वव्यवहारोऽपि। न

हि सुखोद्रेकानुभवप्रयुक्ता हासगानादिरूपा प्रयोजनोद्देशरहिता लीला प्राणिनां स्वाभाविकी। न हि तत्र प्रयोजनमणुमात्रमपि संभावयितुं शक्यते, दुःखोद्रेके रोदनवत्सुखोद्रेके हासगानादेः प्रयोजनरहितस्य सर्वानुभवसिद्धत्वात्। अत एव हसितरुदितादिषु कारणमेव पृच्छन्ति, न प्रयोजनम्। उक्तं च माण्डूक्यश्रुतौ —'देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहा' इति। एष सृष्ट्यादिव्यापार इत्यर्थः। किं च स्वप्नसृष्टिवन्मायामयी प्रपञ्चसृष्टिरस्माभिरुपेयते! न च तत्र प्रयोजनप्रश्नो न्याय्यः, स्वप्नसृष्टौ प्रयोजनप्रश्नादर्शनादिति भावः। ननु यद्यज्ञानं जीवस्योपाधिस्तर्हि व्यर्थमन्तःकरणस्य जीवोपाधित्ववर्णनं सूत्रभाष्यादिषु, तत्राह— **अज्ञानेति। विशेषाभिव्यक्तिस्थानमिति।** अविद्याप्रतिबिम्बचैतन्यरूपस्य सुषुप्तिसाधारणस्य प्रमातृत्वकर्तृत्वभोक्तृत्वादिविशेषरूपेण याभिव्यक्तिरुपलब्धिस्तस्याः स्थानमुपाधिरित्यर्थः। एतदुक्तं भवति— कर्तृत्वादिधर्माणां केवलाज्ञानपरिणामत्वाभावेन तदुपाधिमात्रान्न जीवस्य कर्तृत्वादिधर्मरूपविशेषलाभः, किं तु कर्तृत्वादिविशेषवदन्तःकरणतादात्म्याध्यासादेव तल्लाभ इति न तदुपाधिमत्त्वनिरूपणं व्यर्थमिति। **अत इति।** अन्तःकरणस्य

तावताज्ञानोपाधिपरित्यागः, अन्तःकरणोपाधिपरिच्छिन्नस्यैव चैतन्यस्य जीवत्वे योगिनः कायव्यूहाधिष्ठानानुपपत्तेः । न च योगप्रभावाद्योगिनोऽन्तःकरणं काय-

---

विशेषाभिव्यक्तिस्थानत्वाभ्युपगमादित्यर्थः । व्यवहारोऽपीति । 'कार्योपाधिरयं जीवः' इति श्रुतौ सूत्रभाष्यादिषु चेति शेषः । 'विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते । आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥' इति विष्णुपुराणवचने जीवस्याज्ञानोपाधिकत्वव्यवहारवदित्यपेरर्थः । ननु 'कार्योपाधिरयं जीवः' इति श्रुतिबलादज्ञानोपाधिपरित्याग उचितः, कार्योपाधिकत्वविशेषणस्य कारणोपाधिकत्वव्यावर्तकत्वादित्याशङ्क्य स्मृतिविरोधान्न तस्य कारणोपाधिव्यावर्तकत्वमुपेयत इत्याशयेनाह— न तावतेति । श्रुतौ कार्योपाधिकत्वविशेषणमात्रेणेत्यर्थः । ननु श्रुतिविरोधे स्मृतेरेवान्यथानयनमुचितम् । तन्नयनप्रकारश्चेत्थम्— स्मृतावज्ञानपदं तत्कार्यान्तःकरणपरम् । जीवोपाध्यन्तःकरणस्य नानात्वेऽप्यज्ञान इत्येकवचनं जात्यभिप्रायम् । तथा चान्तःकरणावच्छिन्न आत्मा जीवस्तदनवच्छिन्न आत्मेश्वर इति जीवब्रह्मविभागप्रयोजकमन्तःकरणमित्यर्थो भविष्यतीतीमामाशङ्कां निवर्तयितुं कार्योपाधिमात्रस्य जीवत्वोपाधित्वं निराकरोति— अन्तःकरणोपाधिपरिच्छिन्नस्यैवेति । नाज्ञानोपाधिकस्येत्येवकारार्थः । अनुपपत्तेरिति । कायव्यूहाधिष्ठानं हि युगपदनेकशरीरनियन्तृत्वम् । तच्च योगिनो योगप्रभावान्निर्मितेषु सर्वशरीरेषु युगपदवस्थितस्य

व्यूहाभिव्यक्तियोग्यं वैपुल्यं प्राप्नोतीति तदवच्छिन्नस्य कायव्यूहाधिष्ठानं युज्यत इति वाच्यम् । 'प्रदीपवदावेशस्तथा हि दर्शयति' इति शास्त्रोपान्त्याधिकरणभाष्यादिषु कायव्यूहे प्रतिदेहमन्तःकरणस्य चक्षुरादिवद्भिन्नस्यैव योगप्रभावात्सृष्टेरुपवर्णनात् । प्रतिबिम्बे बि-

---

वक्तव्यम् । न चान्तःकरणावच्छिन्नचैतन्यरूपस्य योगिनस्तत्संभवति, तस्य परिच्छिन्नत्वात् । अज्ञानस्य जीवोपाधित्वे तु तत्संभवति, तस्य व्यापकत्वेन तदुपाधिकस्य योगिजीवस्य युगपत्सर्वशरीरेषु संनिधानोपपत्तेः । तथा च श्रुत्यपेक्षया स्मृतेर्दुर्बलत्वेऽपि कायव्यूहाधिष्ठानानुपपत्तिसहितस्मृतेर्बलवत्त्वात्तदनुरोधेन 'कार्योपाधिरयं जीवः' इति श्रुतौ कार्योपाधिपदं स्वरूपकथनमात्रपरम्, न कारणोपाधिव्यावर्तकविशेषणपरमिति भावः । **वैपुल्यमिति** । व्यापकत्वमित्यर्थः । **अधिष्ठानमिति** । प्रेरणमित्यर्थः । **प्रदीपवदिति** । यथैकस्य प्रदीपस्यानेकवर्त्तिष्वावेशः, तथा योगिनो योगप्रभावादनेकदेहेष्वेकदावेशः । यद्यपि प्रदीपस्य वर्त्त्यादिष्टदीपानां च भेदोऽस्ति योगिनस्तु सर्वदेहेष्वैक्यमिति दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यमस्ति, तथापि दीपत्वजात्यभेदं व्यक्तिष्वारोप्य तयोः संगतिरवगन्तव्या । तथा हि दर्शयति श्रुतिरेकस्य योगिनोऽनेकधाभावम् 'स एकधा भवति त्रिधा भवति पञ्चधा सप्तधा' इत्यादिका । न च योगिनो युगपदनेकशरीरेष्ववस्थानमन्तरेण श्रुतिसिद्धानेकधाभाव उपपद्यत इति सूत्रार्थः । **सृष्टेरु-**

पवर्णनादिति । तथा चैकस्यैवान्तःकरणस्य कायव्यूहाभिव्यक्ति-योग्यवैपुल्याभ्युपगमे भाष्यादिविरोध इति भावः । अत्र यद्यपि योगिनो निजसिद्धान्तःकरणमेव योगप्रभावाद्वैपुल्यं प्राप्य स्वावच्छिन्नचैतन्यरूपस्य योगिनः कायव्यूहाधिष्ठानभोगादिकं घटयतीत्यत्रैव भाष्यादीनां तात्पर्यं वक्तुमुचितं न तु यथाश्रुतनानान्तःकरणसर्गे, आगन्तुकानेकान्तःकरणसृष्ट्युपगमेऽसत्कार्यवादापातात्कल्पनागौरवाच्च । हिरण्यगर्भादीनां योगप्रभावादेवाण्डव्यापिसमष्ट्यन्तःकरणाभ्युपगमाच्च । न हि हिरण्यगर्भादीनां पूर्वजन्मनि यजमानावस्थायां तदीयान्तःकरणानां व्यापित्वे प्रमाणमस्ति, तथा सत्यस्मदाद्यन्तःकरणानामपि व्यापित्वापत्तेः । भाष्यादिष्वन्तःकरणसृष्टिवर्णनस्य मतान्तराभिप्रायत्वोपपत्तेश्च । 'एषैव च योगशास्त्रेषु योगिनामनेकशरीरयोगप्रक्रिया' इति भाष्य एव मतान्तरोपदर्शनात् । यद्यपि योगशास्त्रेष्वेव चैषा प्रक्रियेत्येवकारान्वयोपपत्तिस्तथापि शास्त्रोपान्त्याधिकरणयथाश्रुतभाष्याद्यभिप्रायेणेदं दूषणमिति मन्तव्यम् । वस्तुतस्त्वन्तःकरणावच्छिन्नं चैतन्यं जीवस्तदनवच्छिन्नमीश्वर इति पक्षेऽण्डान्तर्गतचैतन्यस्य सर्वात्मना तदवच्छेदादनवच्छिन्नचैतन्यरूपेश्वरस्याण्डाद्बहिरेव सत्त्वं स्यादिति वक्ष्यमाणदूषणे तात्पर्यम् । यदि चानवच्छिन्नं चैतन्यमीश्वर इत्यनेन निरुपाधिकं चैतन्यमीश्वर इति विवक्षितं तदा तस्य सर्वत्र सत्त्वेनाण्डाद्बहिरेव सत्त्वापत्तिदोषाभावेऽपि 'कारणोपाधिरीश्वरः' इति श्रुतिविरोधदोषो दुर्वारः । तस्मात्कारणोपाधिकत्वमीश्वरस्येव जीवस्याप्युपगन्तव्यं स्मृत्यनुसारादिति स्थितम् ।

म्बाद्भेदमात्रस्याध्यस्तत्वेन स्वरूपेण तस्य सत्यत्वान्न प्रतिबिम्बजीवस्य मुक्त्यन्वयासंभव इति न तदतिरेकेण मुक्तचन्वयायावच्छिन्नरूपजीवान्तरं वा प्रतिबिम्बजी-

---

यत्तु चित्रदीपे प्रतिबिम्बचैतन्यरूपजीवस्य स्वरूपतो मिथ्यात्वात्तस्य मुक्त्यन्वयायोग इति तदन्वययोग्यं कूटस्थनामकं जीवेश्वरविलक्षणं किंचिच्चैतन्यं परिकल्प्य चित्रातुर्विध्यं दर्शितं यदपि च दृग्दृश्यविवेके प्रतिबिम्बमिथ्यात्वमेवाश्रित्य मुक्त्यन्वयायावच्छिन्नचैतन्यस्य पारमार्थिकजीवत्वं कल्पितं तदुभयमप्ययुक्तम्, बिम्बप्रतिबिम्बयोर्भेदमात्रस्य कल्पिततया स्वतस्तयोर्भेदे मानाभावादित्याशयेनाह— **प्रतिबिम्बे बिम्बादिति** । स्वरूपस्य कल्पितत्वव्यवच्छेदो मात्रशब्दार्थः । **न तदतिरेकेणेति** । प्रतिबिम्बजीवातिरेकेण जीवान्तरं वा कूटस्थशब्दितं चैतन्यान्तरं वा न कल्पनीयमिति संबन्धः । एवं व्यावहारिकजीवातिरेकेण प्रातिभासिकजीवोऽपि न कल्पनीयः, प्रमाणाभावात् । न च व्यावहारिकजीवस्य स्वप्नकाल आवृतत्वेन तस्य तदा व्यवहर्तृत्वानुपपत्तिस्तत्कल्पने प्रमाणमिति वाच्यम् । जीवचैतन्यं आवरणाभावस्य साक्षिनिरूपणावसरे वक्ष्यमाणत्वेन जाग्रज्जीवस्यैव स्वप्नेऽपि व्यवहारकर्तृत्वोपपत्तेः, 'योऽहं स्वप्ने श्रीकृष्णमद्राक्षं स एवेदानीं जाग्रत्पुनः पुनस्तं स्मरामि' इति जाग्रत्स्वप्नद्रष्ट्रोरभेदप्रत्यभिज्ञानाच्च, संस्कारोद्बोधाभावादिकारणवशादेव कदाचिद्ब्राह्मणत्वाद्यप्रतीत्युपपत्तेश्च । न च

वातिरिक्तं जीवेश्वरविलक्षणं कूटस्थशब्दितं चैतन्यान्तरं वा कल्पनीयम् । 'अविनाशी वा अरेऽयमात्मा' इति श्रवणं जीवस्य तदुपाधिनिवृत्तौ प्रतिबिम्बभावापगमेऽपि

स्वप्नप्रपञ्चेन सह तद्द्रष्टुर्बाधदर्शनं प्रातिभासिकजीवकल्पने प्रमाणमिति वाच्यम् । प्रबोधकाले 'नाहं क्षत्रियः' इत्यादिरूपबाधकप्रत्ययस्यात्मन्यारोपितक्षत्रियत्वादिमात्रबाधकत्वेन स्वप्नद्रष्टुबाधकत्वाभावात्, अन्यथा पूर्वोदाहृततद्दृष्ट्रैक्यप्रत्यभिज्ञानविरोधात् । तस्मात्प्रातिभासिकजीवकल्पनमपि प्रामाणिकं न भवतीति बोध्यम् । यदपि चिच्चातुर्विध्यवादिभिरुक्तम् 'तान्येवानु विनश्यति' 'अविनाशी वा अरेऽयमात्मा' इति वाक्याभ्यां प्रकृते प्रज्ञानघनात्मनि विनाशित्वाविनाशित्वरूपविरुद्धधर्मद्वयप्रतिपादनात्तदुपपत्तये विनाशिप्रतिबिम्बव्यतिरेकेण विनाशरहितं कूटस्थचैतन्यं सिध्यतीति, तदपि मन्दम्, अविद्याप्रतिबिम्बचैतन्यरूपे जीव एव प्रतिबिम्बत्वरूपविशेषणांशनाशाभिप्रायेण विनाशवचनस्य विशेष्यचैतन्यांशाभिप्रायेण विनाशाभावप्रतिपादकवचनस्य चोपपत्तौ धर्मिभेदकल्पनस्य गौरवपराहतत्वादित्याशयेनाह— **अविनाशी वेति** । नन्वविद्याप्रतिबिम्बो जीवस्तद्बिम्ब ईश्वरो बिम्बप्रतिबिम्बानुगतं चैतन्यं शुद्धचैतन्यमिति विवरणपक्षे देहद्वयोपादानतया तदवच्छिन्नस्य पारमार्थिकजीवनामकतया कूटस्थनामकतया च चिच्चातुर्विध्यवादिभिरङ्गीकृतस्य चैतन्यस्य कुत्रान्तर्भाव उपेयते । न तावज्जीवे शुद्धचैतन्ये वान्तर्भावः संभवति, तयोरुपादान-

स्वरूपं न विनश्यतीत्येतत्परम्, न तदतिरिक्तकूटस्थनामकचैतन्यान्तरपरम् । जीवोपाधिनान्तःकरणादिनावच्छिन्नं चैतन्यं बिम्बभूत ईश्वर एव, 'यो विज्ञाने तिष्ठन्' इत्यादिश्रुत्येश्वरस्यैव जीवसंनिधानेन

त्वाभावेन देहद्वयोपादानस्य कूटस्थस्य तयोरन्तर्भावायोगात् । नापि बिम्बभूतेश्वरे तस्यान्तर्भावः संभवति, ईश्वरस्य जीवतदुपाध्यन्तःकरणादिसंनिहिततया देहादिविकारेष्ववस्थाने प्रमाणाभावात्कूटस्थनामकचैतन्यस्य च कूटस्थत्वादिभिस्तथात्वाङ्गीकारादित्यत आह— **जीवोपाधिनेति** । अविद्याप्रतिबिम्बरूपजीवस्य विशेषाभिव्यक्तिप्रयोजकोपाधिनेत्यर्थः । प्राणचक्षुरादिकमादिपदार्थः । **ईश्वर एवेति** । न शुद्धं ब्रह्म नापि प्रतिबिम्बरूपजीव इत्येवकारार्थः । चेतनाचेतनात्मकनिखिलप्रपञ्चोपादानत्वप्रतिपादकश्रुतिस्मृतिसहस्रस्य बिम्बभूतेश्वरस्य देहाद्युपादानतया देहादिविकारेष्वन्तरवस्थाने प्रमाणत्वात्कूटस्थस्य च ततो भेदे मानाभावादिति भावः । न केवलमुपादानत्वप्रतिपादकशास्त्रमेव तत्र प्रमाणम्, किं तु चेतनाचेतनात्मकसकलजगन्नियन्तृत्वप्रतिपादकमन्तर्यामिब्राह्मणमपि बिम्बभूतेश्वरस्य विकारेष्वन्तरवस्थाने प्रमाणमित्याह— **'यो विज्ञाने तिष्ठन्' इत्यादिश्रुत्येति** । 'यो विज्ञानादन्तरो यं विज्ञानं न वेद यस्य विज्ञानं शरीरं यो विज्ञानमन्तरो यमयति' इत्यादिवाक्यमादिपदेन

तदन्तर्यामिभावेन विकारान्तरवस्थानश्रवणादिति ॥

अन्ये तु— रूपानुपहितप्रतिबिम्बो न युक्तः ;

गृह्यते । अत्र विज्ञानपदं जीवपरम् । बृहदारण्यके माध्यंदिनपाठे 'य आत्मनि तिष्ठन्' इति पर्यायस्थाने काण्वपाठे 'यो विज्ञाने तिष्ठन्' इति पर्यायाम्नानदर्शनेन काण्वपाठे विज्ञानपदस्यात्मपद-समानार्थकत्वावगमात् । आत्मपदं चात्र जीवपरम्, तस्य तत्र रूढत्वात् । आत्मपदस्य जीवेश्वरसाधारणत्वेऽपि नियम्यत्वलिङ्गेन प्रकृते जीवपरत्वावश्यंभावादिति भावः । **जीवसंनिधानेनेति** । ईश्वरस्य जीवादिनियन्तृत्वं हि व्यवहितराजादेः प्रजानियन्तृत्व-वन्न संभवति । किं तु नियम्यजीवादिसंनिधानेनैव, 'य आत्मनि तिष्ठन्' इति संनिधानप्रतीतेरित्यर्थः । **अन्तर्यामिब्राह्मणवाक्य-ग्रहणं स्मृतेरप्युपलक्षणम** । तथा च भगवद्गीतास्मृतिः— 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन्सर्वभूतानि यन्त्रा-रूढानि मायया ॥' इति । भूतानि प्राणिनः । यन्त्रं शरीरम्, तदारूढत्वं तत्राहंममाभिमानवत्त्वम् । भ्रामयन्निति । कर्मानु-सारेण प्रवर्तयन्निवर्तयंश्चेत्यर्थः । ईश्वरस्य नियन्तृत्वं मायोपाधिक-मेव न वास्तवमित्याभिप्रायेण माययेत्युक्तम् । एवं चैतन्यस्य प्रति-बिम्बमुपगच्छतां मतभेदेन जीवेश्वरविभागो दर्शितः ॥

इदानीं तदनभ्युपगन्तॄणां मतेन जीवादिस्वरूपं दर्शयितुं चैत-न्यस्य प्रतिबिम्बं निराकरोति—**अन्ये त्विति । रूपानुपहितेति ।**

सुतरां नीरूपे । गगनप्रतिबिम्बोदाहरणमप्ययुक्तम्, गगनाभोगव्यापिनि सवितृकिरणमण्डले सलिलप्रतिबिम्बिते गगनप्रतिबिम्बत्वव्यवहारस्य भ्रममात्रमूल-

---

लोके रूपवत एव चन्द्रादेः प्रतिबिम्बो दृश्यते न रूपरहितस्य वाय्वादेरिति व्याप्तिदर्शनान्नीरूपचैतन्यस्य प्रतिबिम्बासंभव इत्यर्थः । इतश्च चैतन्यस्य न प्रतिबिम्बसंभव इत्याह— **सुतरां नीरूप इति** । अविद्यान्तःकरणादाविति शेषः । रूपवत एव द्रव्यस्य प्रतिबिम्ब इति नियमस्य वक्ष्यमाणरीत्या गगने व्यभिचारसत्त्वेऽपि रूपवत्येवोपाधौ प्रतिबिम्ब इति नियमस्य न क्वचिदपि व्यभिचार इति मत्वा सुतरामित्युक्तम् । ननु नीरूपगगनस्य कूपजलतडागादौ प्रतिबिम्बानुभवान्नीरूपद्रव्यस्य प्रतिबिम्बाभाव इति न नियमोऽस्तीत्याशङ्क्याह— **गगनेति** । कूपजलादौ तावदालोकप्रतिबिम्बः संप्रतिपन्नः । तस्मिन्गगनप्रतिबिम्बत्वभ्रमो लोकानामिति कल्प्यते । न तु वस्तुतस्तत्र गगनप्रतिबिम्बोऽस्ति, उक्तनियमविरोधात् । भ्रमप्रयोजकदोषमाह— **गगनाभोगव्यापिनीति** । आभोगो विस्तारः । गगनोपरिभागे व्याप्य वर्तमानस्य सवितृकिरणमण्डलादेर्जले प्रतिबिम्बदर्शनात्तदनुगतगगनस्य जले प्रतिबिम्बभ्रम इत्यर्थः । ननु यथा बहिः 'नीलं नभः' 'विशालं नभः' इत्यादिरूपेण गगनमनुभूयते, एवं कूपतडागादिजलेऽपि 'नीलं नभः' 'विशालं नभः' इत्यादिरूपोऽनुभवः सर्वसंप्रतिपन्नः । न च कूपजलादौ

प्रतीयमानं वैशाल्यादियुक्तं नभो वस्तुतोऽस्ति। अतः प्रतिबिम्ब-रूपमेव तत्र दृश्यमानं नभ इति वक्तव्यम्। ततश्च कथं गगन-प्रतिबिम्बापलापः क्रियते। न च नीरूपस्य प्रतिबिम्बासंभव इति वाच्यम्। रूपसंख्यापरिमाणादेर्नीरूपस्यापि प्रतिबिम्बदर्शनात्। न च द्रव्यत्वमपि विशेषणं विवक्षितमिति वाच्यम्। सिद्धान्ते द्रव्यगुणादिपरिभाषाया अनभ्युपगमात्, तदभ्युपगमेऽपि गगनप्रतिबिम्बानुभवानुरोधेन रूपोपहितद्रव्यस्य प्रतिबिम्बः, तदुपहितत्वं च वस्तुतः स्वगतरूपेण स्वस्मिन्नारोपितरूपेण वेति नियमकल्पनोपपत्तेश्च। तथा च बहिरारोपितनैल्यादिविशिष्टगगनस्य जलादौ प्रतिबिम्बाभ्युपगमे न किंचिद्बाधकम्। न च जलादौ संप्रतिपन्नालोकप्रतिबिम्बातिरिक्तगगनप्रतिबिम्बाभ्युपगमे गौरवमेव बाधकमिति वाच्यम्। आलोकप्रतिबिम्बे गगनप्रतिबिम्बत्व-भ्रमाभ्युपगमेऽपि तद्भ्रमविषयस्यालोकप्रतिबिम्बाधिकरणकस्य शुक्तिरूप्यादिवदनिर्वचनीयस्य गगनप्रतिबिम्बत्वस्याभ्युपगन्तव्यत्वेन गौरवस्य तुल्यत्वादनुभवानुसारिगौरवस्यादोषत्वाच्च। तस्माद्रूपवत एव द्रव्यस्य प्रतिबिम्ब इति नियमस्य गगनप्रतिबिम्बस्थलेऽभिचारो दुर्वार इति चेत्, सत्यम्। तथापि चैतन्यस्य प्रतिबिम्बो न संभवति, नीरूपान्तःकरणादेः प्रतिबिम्बोपाधित्वासंभवादित्यत्रैव तात्पर्यम्। ननु नीरूपेऽपि ध्वनौ नीरूपद्रव्यात्मकवर्णानां प्रतिबिम्बोऽस्तीति वक्तव्यम्। तथा सत्येव दर्पण-श्यामताया दर्पणगतप्रतिबिम्बद्वारेण बिम्बमुख इव ध्वनिगतानां तारत्वादीनां ध्वनिगतवर्णप्रतिबिम्बद्वारा वर्णेष्वारोपः संभवति

त्वात् । ध्वनौ वर्णप्रतिबिम्बवादोऽप्ययुक्तः, व्यञ्जकतया संनिधानमात्रेण ध्वनिधर्माणामुदात्तादिस्वराणां वर्णेष्वारोपोपपत्तौ ध्वनेर्वर्णप्रतिबिम्बग्राहित्वकल्पनाया निष्प्रमाणत्वात् । प्रतिध्वनिरपि न पूर्वशब्दप्रतिबिम्बः,

---

नान्यथा । एवं नीरूपान्तःकरणादौ नीरूपात्मनः प्रतिबिम्बसंभव इत्याशङ्क्य दृष्टान्तं विघटयति— **ध्वनाविति** । ननु पटहास्यवाद्यविशेषादिशब्दोत्पत्तिकाले पाषाणविशेषादिसंनिहिताकाशप्रदेशेषु प्रतिध्वनिः श्रूयते । स पूर्वशब्दप्रतिबिम्ब एव न मुख्यध्वनिः, तदुत्पत्तौ कारणाभावात् । तथा च यथा नीरूपाकाशप्रदेशेषु नीरूपध्वनेः प्रतिध्वनिरूपः प्रतिबिम्बस्तथा प्रकृते किं न स्यादिति, नेत्याह— **प्रतिध्वनिरपीति** । न च प्रतिध्वनेरुत्पादकाभावः शङ्कनीयः, आकाशस्यैवोपादानस्य सत्त्वात्पूर्वशब्दस्य निमित्तकारणस्य सत्त्वाच्च । न च प्रतिध्वनेः प्रतिबिम्बत्वेऽप्याकाशगुणत्वं किं न स्यादिति वाच्यम् । बिम्बप्रतिबिम्बयोर्भेदपक्षे प्रतिध्वनिरूपप्रतिबिम्बस्य प्रातिभासिकत्वेन व्यावहारिकगुणत्वानुपपत्तेः, तदभेदपक्षे बिम्बभूतपृथिव्यादिशब्दापेक्षया प्रतिध्वनिरूपप्रतिबिम्बस्य भेदाभावेन तस्याकाशगुणत्वानुपपत्तेरिति भावः । ननु वर्णरूपप्रतिशब्दस्य वर्णप्रतिबिम्बत्वमवश्यं वाच्यं न तु साक्षाद्वर्णरूपत्वम्, प्रतिवर्णाभिव्यक्तिस्थले वर्णव्यञ्जककण्ठताल्वादेरभावात्, तथा च यथा तत्र पर्वतगुहादिसंनिहितेषु नीरूपेष्वाकाशप्रदेशेषु नीरूपाणां वर्णानां प्रतिबिम्बस्तथा प्रकृते किं

पञ्चीकरणप्रक्रियया पटहपयोनिधिप्रभृतिशब्दानां क्षितिसलिलादिशब्दत्वेन प्रतिध्वनेरेवाकाशशब्दत्वेन तस्यान्यशब्दप्रतिबिम्बत्वायोगात् । वर्णरूपप्रतिशब्दोऽपि न पूर्ववर्णप्रतिबिम्बः, वर्णाभिव्यञ्जकध्वानिनिमित्तक-प्रतिध्वनेर्मूलध्वानिवदेव वर्णाभिव्यञ्जकत्वेनोपपत्तेः । तस्माद्घटाकाशवदन्तःकरणावच्छिन्नं चैतन्यं जीवस्तदनवच्छिन्नमीश्वरः । न चैवमण्डान्तर्वर्तिनश्चैतन्यस्य तत्तदन्तःकरणोपाधिभिः सर्वात्मना जीवभावेनावच्छेदात्तदवच्छेदरहितचैतन्यरूपस्येश्वरस्याण्डाद्बहिरेव सत्त्वं स्यादिति 'यो विज्ञाने तिष्ठन्' इत्यादावन्तर्यामिभावेन

न स्यादिति, नेत्याह— **वर्णरूपप्रतिशब्दोऽपीति** । प्रतिध्वनिवदित्यपिशब्दार्थः । कण्ठताल्वादिस्थलेऽपि न कण्ठादेर्वर्णव्यञ्जकत्वम्, किं तु कण्ठाद्यभिघातजन्यध्वनेः । तथा च यथा मूलध्वनिर्वर्णव्यञ्जक एवं प्रतिवर्णाभिव्यक्तिस्थल उत्पन्नः प्रतिध्वनिरेव तत्र वर्णानां व्यञ्जकः संभवतीति न प्रतिवर्णानां प्रतिबिम्बरूपत्वमभ्युपगन्तव्यमित्यर्थः । चैतन्यप्रतिबिम्बनिराकरणमुपसंहरति— **तस्मादिति** । चैतन्यप्रतिबिम्बासंभवादित्यर्थः । अन्तःकरणानवच्छिन्नचैतन्यस्येश्वरत्वेऽन्तःकरणादिषु सर्वविकारेषु परमेश्वरस्यान्तर्यामिभावेनावस्थानप्रतिपादकश्रुतिविरोधमाशङ्कते — **न चैवमिति** । **विरुध्येतेति** । तथा च श्रुतिविरोधपरिहाराय

विकारान्तरवस्थानश्रवणं विरुध्येत, प्रतिबिम्बपक्षे तु जलगतस्वाभाविकाकाशे सत्येव प्रतिबिम्बाकाशदर्शनादेकत्र द्विगुणीकृत्य श्रुतिरुपपद्यत इति वाच्यम्। यतः प्रतिबिम्बपक्षेऽप्युपाधावनन्तर्गतस्यैव चैतन्यस्य तत्र प्रतिबिम्बो वाच्यो न तु जलचन्द्रन्यायेन कृत्स्नप्रतिबिम्बः, तदन्तर्गतभागस्य तत्र प्रतिबिम्बासंभवात्; न हि मेघावच्छिन्नस्याकाशस्यालोकस्य वा जले प्रतिबिम्बव-

---

प्रतिबिम्बपक्ष एव स्वीकर्तव्य इति भावः। प्रतिबिम्बपक्षाश्रयणेऽपि श्रुतिविरोधमाशङ्क्याह—**प्रतिबिम्बपक्षे त्विति**। तुशब्दसूचितं विशेषमेव दर्शयति— **जलगतेति**। **द्विगुणीकृत्येति**। प्रतिबिम्बरूपजीवभावेन तत्तदुपाध्यन्तर्यामिभावेन चेत्यर्थः। प्रतिबिम्बपक्षेऽप्यन्तर्यामिब्राह्मणविरोधो दुष्परिहर इत्याह— **यत इति**। यत ईश्वरेऽन्तर्यामिब्राह्मणाज्ञस्याभावस्तुल्यः, अतो न च वाच्यमिति संबन्धः। **तत्रेति**। अन्तःकरणादावित्यर्थः। ननु यथा जले कृत्स्नस्य चन्द्रमण्डलस्य प्रतिबिम्बस्तथा कृत्स्नस्यैव चैतन्यस्यान्तःकरणादौ प्रतिबिम्बोऽस्तु, न तूपाध्यनन्तर्गतचैतन्यभागस्याण्डाद्बहिर्भूतस्य; तथा च बिम्बभूतेश्वरस्याण्डान्तरपि सत्त्वान्नान्तर्यामिब्राह्मणविरोधतौल्यमिति, नेत्याह— **न त्विति**। असंभवमेव दर्शयति— **न हीति**। **आलोकस्य वेति**।

जलान्तर्गतस्यापि तत्र प्रतिबिम्बो दृश्यते; न वा मुखादीनां प्रतिबिम्बस्थितिसमय इव जलान्तर्निमज्जनेऽपि प्रतिबिम्बोऽस्ति; अतो जलप्रतिबिम्बं प्रति मेघाकाशादेरिवान्तःकरणाद्युपाधिप्रतिबिम्बं प्रति तदनन्तर्गतस्यैव बिम्बत्वं स्यादिति बिम्बभूतस्य विकारान्तरवस्थाना-

---

बहिःस्थस्येति शेषः । **जलान्तर्गतस्यापीति** । आकाशादेरित्यनुषङ्गः । **तत्रेति** । जलादावित्यर्थः । उदाहरणान्तरमाह— **न वेति** । ततः किम्, तत्राह— **अत इति** । उपाध्यन्तर्गतभागस्य तत्र प्रतिबिम्बासंभवादित्यर्थः । **तदनन्तर्गतस्यैवेति** । चैतन्यस्येति शेषः । दृष्टानुरोधित्वात्कल्पनाया इति भावः । **विकारान्तरिति** । अण्डान्तर्गतचैतन्यभागस्योपाध्यन्तर्गतत्वात्तद्बहिःस्थितस्यैव चैतन्यस्य बिम्बत्वं वाच्यमिति बिम्बभूत ईश्वरोऽप्यखण्डाद्बहिरेव स्यादित्यर्थः । यदि च प्रतिबिम्बपक्ष ईश्वरस्य सर्वान्तर्यामित्वप्रतिपादकश्रुत्याद्यनुसारेण लोकदृष्टिमनादृत्य कृत्स्नचैतन्यप्रतिबिम्बमुपेत्यान्तर्यामिब्राह्मणाञ्जस्यमुपपाद्यते तदानवच्छिन्नचैतन्यमीश्वर इति पक्षेऽप्यन्तःकरणाभावावच्छिन्नचैतन्यमीश्वर इति विवक्षितम्, अन्तःकरणस्य कल्पितत्वेन चैतन्येऽन्तःकरणाद्यवच्छेदेनाप्यन्तःकरणाभावस्य वास्तवस्य सत्त्वेन तदवच्छिन्नचैतन्यरूपेश्वरस्य सर्वविकारान्तरवस्थानसंभवात्तत्प्रतिपादकब्राह्मणाञ्जस्यं तुल्यमिति समाधानं बोध्यम् । अभावस्यापीश्वरोपाधित्वमुक्तं तृप्तिदीपे— 'अन्तःकरणसाहित्यराहित्याभ्यां

विशिष्यते । उपाधिर्जीवभावस्य ब्रह्मतायाश्च नान्यथा ॥ यथा विधिरुपाधिः स्यात्प्रतिषेधस्तथा न किम । सुवर्णलोहभेदेन शृङ्खलात्वं न भिद्यते ॥ अतद्व्यावृत्तिरूपेण साक्षाद्विधिमुखेन च । वेदान्तानां प्रवृत्तिः स्याद्विधेयाचार्यभाषितम् ॥ इति । श्लोकानामयमर्थः— जीवत्वब्रह्मत्वयोरुपाधिरन्तःकरणसाहित्यराहित्याभ्यां विशिष्यते भिद्यते । तत्साहित्यं जीवत्वोपाधिस्तद्राहित्यं ब्रह्मताया उपाधिरिति जीवेश्वरोपाधिभेद इत्यर्थः । नान्यथा न प्रकारान्तरेण जीवभावाद्युपाधिरित्यर्थः । ननु भावस्यैवोपाधित्वं नाभावस्येत्याशङ्क्य विनिगमनाविरहमाह— यथेति । भाववदभावस्य व्यावर्तकोपाधित्वे विशेषो नास्तीत्यत्र दृष्टान्तमाह— सुवर्णेति । शृङ्खलात्वं नाम यथेच्छसंचारव्यावर्तकत्वम् । ननु भावरूपान्तःकरणादेर्दृष्टत्वादिरूपेण जीवोपलब्धिसाधनत्वात्तस्य जीवोपाधित्वं युक्तमित्याशङ्क्य तर्ह्यन्तःकरणनिषेधस्यापि ब्रह्मोपलब्धिसाधनत्वात्तस्य ब्रह्मोपाधित्वं युक्तमित्यभिप्रेत्य तत्तदुपाधिनिषेधस्य ब्रह्मोपलब्धिसाधनत्वं भाष्यकारैरुक्तमित्याह—अतद्व्यावृत्तीति । अत्र तच्छब्देन ब्रह्मोच्यते, तन्न भवतीत्यतदन्तःकरणादिरूपमुपाधिजातम्, तस्यातदो व्यावृत्तिर्निषेधः, तद्रूपेण तद्बोधनद्वारेणेत्यर्थः । साक्षाद्विधिमुखेन च 'बुद्धेः साक्षी' 'मनसः साक्षी' 'सर्वस्य साक्षी' 'पश्यञ्शृण्वन्मन्वानः' इत्यादिप्रकारेण च । प्रवृत्तिर्बोधकता, ब्रह्मणि तेषां प्रामाण्यमिति । तथा चोक्तरीत्या प्रतिबिम्बावच्छेदपक्षयोरुभयोरप्यन्तर्यामिब्राह्मणाङ्गस्याभावाज्जस्योस्तुल्यत्वे सति, 'सुतरां नीरूपे' इत्यादिना चैतन्य-

योगादीश्वरेऽन्तर्यामिब्राह्मणाज्ञस्याभावस्तुल्यः । एतेनावच्छिन्नस्य जीवत्वे कर्तृभोक्तृसमवयोस्तत्र तत्रान्तःकरणावच्छेद्यचैतन्यप्रदेशस्य भिन्नत्वात्कृतहानाकृताभ्यागमप्रसङ्ग इति निरस्तम्, प्रतिबिम्बपक्षेऽपि स्वानन्तर्गतस्य स्वसंनिहितस्य चैतन्यप्रदेशस्यान्तःकरणे प्रतिबिम्बितस्य वक्तव्यतया तत्र तत्रान्तःकरणस्य गमने बिम्बभेदात्तत्प्रतिबिम्बस्यापि भेदावश्यंभावेन दोषतौ-

---

प्रतिबिम्बासंभवस्य दर्शितत्वात्प्रतिबिम्बपक्षं त्यक्त्वावच्छेदपक्ष एवादरणीय इति भावः । एवमवच्छेदपक्षे दोषान्तरमपि वक्ष्यमाणदोषतौल्यादिनैव निरस्तमित्याह— एतेनेति । स्वानन्तर्गतस्येति । प्रागुक्तयुक्तिरत्रानुसंधेया । स्वसंनिहितस्येति विशेषणस्यायमभिप्रायः— यदि सर्वेष्वन्तःकरणेषु तदनन्तर्गतस्याण्डाद्बहिर्विद्यमानस्यैव चैतन्यभागस्यैकस्य प्रतिबिम्बः संभवेत्, तदा बिम्बचैतन्यप्रदेशभेदाभावात्प्रत्यन्तःकरणं बिम्बचैतन्यप्रदेशभेदेन प्रतिबिम्बभेदापादनं न संभवेत्। न च तथा संभवति, व्यवहितस्य प्रतिबिम्बायोगात्। किं तु तत्र तत्रान्तःकरणे संनिहितस्यैव चैतन्यप्रदेशस्य बिम्बत्वं वाच्यम् । ततश्चेह परत्र च प्रतिबिम्बभेदापादनं युक्तमिति । दोषतौल्यादिति । कृतहानाकृताभ्यागमप्रसङ्गदोषतौल्यादित्यर्थः । अविद्यायां चित्प्रतिबिम्ब ईश्वरोऽन्तःकरणे चित्प्रतिबिम्बो जीव इति पूर्वं प्रदर्शिते

ल्यात् । न चान्तःकरणप्रतिबिम्बो जीव इति पक्षे दोषतौल्येऽपि, अविद्याप्रतिबिम्बो जीवस्तस्य च तत्र तत्र गत्वरमन्तःकरणं जलाशयव्यापिनो महामेघमण्डल-प्रतिबिम्बस्य तदुपरि विसृत्वरः स्फीतालोक इव तत्र तत्र विशेषाभिव्यक्तिहेतुरिति पक्षे नायं दोषः, अन्तः-करणवदविद्याया गत्यभावेन प्रतिबिम्बभेदानापत्तेरिति वाच्यम्। तथैवावच्छेदपक्षेऽप्यविद्यावच्छिन्नो जीव इत्यु-

---

संक्षेपशारीरकपक्षे दोषतौल्येऽपि विवरणादिपक्षे उक्तदोषाप्रसक्ते-स्तस्योपादेयत्वं स्यादिति शङ्कते— न चेति । गत्वरं गमन-शीलम् । तदुपरीति । जलाशयोपरीत्यर्थः । विसृत्वर इति । यथा तत्र तत्र जलप्रदेशेषु विसृत्वरो गमनशीलो मेघच्छिद्रेभ्यो निःसृतः स्फीतालोकखण्डो महामेघमण्डलप्रतिबिम्बस्य जला-शयव्यापकस्य विशेषेण स्फुरणहेतुः, तथा तत्र तत्रेह परत्र च कर्तृत्वभोक्तृत्वादिविशेषाभिव्यक्तिहेतुरन्तःकरणीमति पक्ष इत्य-र्थः । कृतहानादिदोषाभावे हेतुमाह— अन्तःकरणवदिति । यदि प्रतिबिम्बवादिनान्तःकरणप्रतिबिम्बो जीव इति पक्षमुक्त-दोषतौल्येन परित्यज्याविद्याप्रतिबिम्बो जीव इति पक्षः स्वीक्रि-यते, तदावच्छेदवादिनाप्यन्तःकरणावच्छिन्नो जीव इति पक्षं कृतहानादिदोषयुक्तं त्यक्त्वोक्तदोषरहितमविद्यावच्छिन्नो जीव इति मतमुपादीयत इत्याह— तथैवेति । जीव इति । उपलक्षणं चैतत् । अविद्यायाः कल्पितत्वेन वास्तवतदभावावच्छिन्नाश्चिदा-

पगमसंभवात् , तत्राप्येकस्य जीवस्य क्वचित्प्रदेशे कर्तृत्वं प्रदेशान्तरे भोक्तृत्वमित्येवं कृतहानादिदोषापनुत्तये वस्तुतो जीवैक्यस्य शरणीकरणीयत्वेन तन्न्याया-दन्तःकरणोपाधिपक्षेऽपि वस्तुतश्चैतन्यैक्यस्य तदवच्छेदकोपाध्यैक्यस्य च तन्त्रसत्त्वाभ्युपगमेन तद्दोषनिरा-

---

त्मेश्वर इत्युपगमसंभवाच्चेत्यपि द्रष्टव्यम् । एवमविद्याप्रतिबिम्बो जीव इति पक्षे कृतहानादिदोषाभावमुपेत्य तत्साम्यमविद्यावच्छिन्नस्य जीवत्वपक्षे दर्शितम् । इदानीमन्तःकरणावच्छेदपक्षे कृतहानादिदोषाभावं समर्थयितुमविद्याप्रतिबिम्बो जीव इति पक्षेऽपि कृतहानादिदोषमाशङ्क्य परिहरति— **तत्रापीति** । अविद्याप्रतिबिम्बो जीव इति पक्षेऽपीत्यर्थः । **क्वचित्प्रदेश इति** । ब्राह्मणादिशरीरगतान्तःकरणावच्छिन्नप्रदेश इत्यर्थः । **प्रदेशान्तर इति** । देवशरीरादिगततदवच्छिन्नप्रदेश इत्यर्थः । **वस्तुत इति** । प्रदेशभेदे सत्यपीह परत्र चाविद्याप्रतिबिम्बस्वरूपजीवैक्यमात्रेण कृतहानादिदोषः परिहर्तव्यः प्रतिबिम्बवादिना गत्यन्तराभावादित्यर्थः । सोऽयं परिहारप्रकारोऽन्तःकरणावच्छेदपक्षेऽपि **समान** इत्याह— **तन्न्यायादिति** । **वस्तुत इति** । इह परत्र चान्तःकरणावच्छेद्यचैतन्यप्रदेशभेदेऽपि चैतन्यस्य वस्तुत एकत्वान्न कृतहानादिदोष इत्यर्थः । ननु वास्तवचैतन्यैक्यमात्रस्य जीवान्तरसाधारणत्वादन्यकृतकर्मणान्यस्य भोगप्रसङ्ग इत्यत आह—**तदवच्छेदकेति** । तत्पदं चैतन्यपरम् । तथा चैकान्तःकरणावच्छि-

करणसंभवाच्च । न चावच्छेदपक्षे 'यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन् । उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमा-

---

न्यचैतन्यमेको जीवोऽन्तःकरणान्तरावच्छिन्नचैतन्यमन्यो जीव इति व्यवस्थास्वीकारान्नोक्तातिप्रसङ्ग इति भावः । अस्मिन्नवच्छेदपक्षे प्रागुक्तरीत्या वास्तवान्तःकरणाभावावच्छिन्नचैतन्यमीश्वरः 'कारणोपाधिरीश्वरः' इति श्रुत्यनुरोधेनाविद्यावच्छिन्नचैतन्यं वेश्वर इति बोध्यम् । अस्य पक्षस्य श्रुतिसूत्राभ्यां विरोधं शङ्कते— **न चावच्छेदपक्ष इति** । यथैको विवस्वान्पात्रभेदेन भिन्ना अपोऽनुगच्छन्, बहुजलपात्रेषु प्रतिबिम्बितः सन्निति यावत्, बहुधा भेदरूपः क्रियते औपाधिकं नानात्वं प्रतिपद्यते, एवं देवः स्वप्रकाश आत्मा स्वत एकः सन् क्षेत्रेषूपाधिषु प्रतिबिम्बितो भेदरूपः क्रियते नानात्वं लभत इति यावत् । यथैकस्य सूर्यस्य बहुषूपाधिषु प्रतिबिम्बितत्वप्रयुक्तो भेद एवमात्मनोऽपि क्षेत्रेषु प्रतिबिम्बितत्वप्रयुक्तमेव नानात्वमिह विवक्षितमिति वक्तव्यम्, अन्यथा दृष्टान्तदार्ष्टान्तिकयोरतुल्यत्वापत्त्या तयोरसामञ्जस्यप्रसङ्गात् । तथा चावच्छेदपक्षः श्रुतिविरुद्ध इत्यर्थः । एवम् 'एक एव तु भूतात्मा भूते भूते व्यवस्थितः । एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥' 'रूपं रूपं प्रतिरूपो बभूव' 'जीवेशावाभासेन करोति' इत्यादिश्रुतयोऽपि चैतन्यस्य प्रतिबिम्बगमकत्वेन द्रष्टव्याः । भूतानां ब्रह्मादिस्तम्बपर्यन्तानामात्मा स्वरूपभूतः परः ।

त्मा ॥' 'अत एव चोपमा सूर्यकादिवत्' इति श्रुतिसूत्राभ्यां विरोधः; 'अम्बुवदग्रहणात्तु न तथात्वम्' इत्युदाहृतसूत्रानन्तरसूत्रेण यथा सूर्यस्य रूपवतः प्रतिबिम्बोदययोग्यं ततो विप्रकृष्टदेशं रूपवज्जलं गृह्यते नैवं

भूते भूते इति वीप्सया सर्वे प्रतिबिम्बोपाधयो गृह्यन्ते । तेषु प्रतिबिम्बिततया व्यवस्थितः सन्बहुधा दृश्यते, स्वतस्तु शास्त्रादेकधा दृश्यते । रूपशब्द उपाधिपरः । अत्रापि वीप्सा सर्वोपाधिसंग्रहार्था । प्रतिरूपः प्रतिबिम्बः, पुरुषप्रतिबिम्बे 'पुरुषप्रतिरूपोऽयम्' इति प्रयोगदर्शनात् । तृतीयाध्यायगतसूत्रमुदाहरति— **अत एवेति** । यतश्चिदात्मनः स्वाभाविकमेकत्वं नानात्वं चौपाधिकं श्रुतिषु विवक्षितम्, अत एव तस्यौपाधिकनानात्वे जलादिषु प्रतिबिम्बितः सूर्यादिर्दृष्टान्तत्वेन श्रुतिषूपादीयत इति सूत्रार्थः । 'रूपं रूपम्—' इति श्रुतौ प्रतिरूपशब्दो न प्रतिबिम्बवाचकः, 'वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव' इत्यादौ व्यभिचारात् । अतः सूर्यादिप्रतिबिम्बदृष्टान्तस्वारस्यादेव चैतन्यप्रतिबिम्बो वक्तव्यः । तं प्रतिबिम्बं स्वयमेव सूत्रकृदाक्षिपति— **अम्बुवदिति** । सूत्रे दृष्टान्तभागस्यार्थमाह— **यथेति** । प्रतिबिम्बोदययोग्यत्वं स्वच्छत्वम् । उपाध्यन्तर्गतस्य न तत्र प्रतिबिम्ब इत्याशयेनाह— **तत इति** । बिम्बभूतसूर्यापेक्षयेत्यर्थः । दार्ष्टान्तिकभागं व्याचष्टे— **नैवमिति** । न तथात्वं चिदात्मनः प्रतिबिम्बितसूर्यादितुल्यत्वं नास्ति । कुतः, अग्रहणात्, अन्तःकरणादेरात्मप्रतिबिम्बोदययो-

सर्वगतस्यात्मनः प्रतिबिम्बोदययोग्यं किंचिदस्ति ततो विप्रकृष्टमिति प्रतिबिम्बासंभवमुक्त्वा 'वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम्' इति तदनन्तरसूत्रेण यथा जलप्रतिबिम्बितः सूर्यो जलवृद्धौ वर्धत इव जलह्रासे ह्रसतीव जलचलने चलतीवेति तस्याध्यासिकं जलानुरोधिवृद्धिह्रासादिभाक्त्वं तथात्मनोऽन्तःकरणा-

---

ग्यत्वेनाग्रहणात्। न ह्यन्तःकरणमात्मापेक्षया विप्रकृष्टदेशवत्, सर्वगतत्वादात्मनः। नापि तदुद्भूतरूपवत्, अनङ्गीकाराच्चिदात्मनोऽपि सूर्यादिवद्बिम्बत्वयोग्यत्वेनाग्रहणाच्च, तस्य नीरूपद्रव्यत्वात्। तस्मात्प्रतिबिम्बितसूर्यचिदात्मनोर्दृष्टान्तदार्ष्टान्तिकभावानुपपत्तिरिति तुशब्दार्थः। दृष्टान्तदार्ष्टान्तिकयोः प्रतिबिम्बितत्वांशेन साम्याभावेऽपि न तद्भावविरोधोऽस्ति, विवक्षितांशेन साम्यस्य तत्रापि संभवात्। न हि तयोः सर्वसाम्यं क्वचिदपि संभवति, तथा सति दृष्टान्तदार्ष्टान्तिकभावोच्छेदप्रसङ्गादित्यभिप्रेत्य विवक्षितांशसाम्यं सूत्रकृद्दर्शयति— वृद्धिह्रासेति। तदनन्तरेत्यत्र तत्पदम् 'अम्बुवत्—' इति सूत्रपरम्। सूत्रं व्याचष्टे— यथेति। आध्यासिकमिति। भ्रान्तिसिद्धमित्यर्थः। तथेति। चिदात्मनो बुद्ध्याद्यवच्छिन्नतया बुद्ध्याद्युपाधावन्तर्भावाद्वज्रादिशरीरेऽन्तःकरणवृद्धौ चिदात्मा वर्धत इव, मशकादिशरीरेऽन्तःकरणह्रासे ह्रसतीव, तच्चलने चलतीव, तद्भेदे भिन्न

दिनावच्छेदेनोपाध्यन्तर्भावादाध्यासिकं तदनुरोधिवृद्धि-ह्रासादिभाक्त्वमित्येवं दृष्टान्तदार्ष्टान्तिकयोः सामञ्ज-स्यादविरोध इति स्वयं सूत्रकृतैवावच्छेदपक्षे तयोस्ता-त्पर्यकथनात्, 'घटसंवृतमाकाशं नीयमाने घटे यथा ।

इव च भाति । तथा च श्रुतिः— 'ध्यायतीव लेलायतीव' इति । बुद्धौ ध्यायन्त्यामात्मा ध्यायतीव तस्यां चलन्त्या-मात्मा चलतीव, न तु स्वतो ध्यायति, चलति वेत्यर्थः । एवमध्याससिद्धमन्तःकरणानुरोधिवृद्ध्यादिमत्त्वमात्मनोऽत्र विवक्षि-तं साम्यमित्यर्थः । तयोरिति । चैतन्यस्य प्रतिबिम्बितत्वगमक-श्रुतितन्मूलकसूत्रयोः पूर्वमुदाहृतयोरित्यर्थः । अवच्छेदपक्षे न केवलं श्रुतिसूत्राविरोधाभाव एव, किं तु श्रुतिसूत्रानुग्रहोऽप्यस्ती-त्याह— घटसंवृतमिति । घटसंवृतं घटावच्छिन्नमाकाशं प्रसिद्ध-मस्ति । तच्च घटे नीयमानेऽपि न नीयते । यथायं दृष्टान्तस्तद्व-ज्जीवो नभोपमो नभसा तुल्यः । एतदुक्तं भवति— जीवस्य नभोपमशब्देन घटसंवृताकाशतुल्यत्वमभिदधतावच्छिन्नचैतन्यरू-पत्वमुक्तमिति । एवं प्रवेशश्रुतिरपि चिदात्मनो बुद्ध्याद्यवच्छेद-कृतमेव द्रष्टृत्वादिधर्मलाभं दर्शयति, न प्रतिबिम्बभावकृतम् । तथा हि— 'स एष इह प्रविष्ट आ नखाग्रेभ्यः' इत्युपक्रम्य 'प्राणनेव प्राणो नाम भवति वदन्वाक्पश्यंश्चक्षुः शृण्वञ्श्रोत्रं मन्वानो मनः' इति पुरुषविधब्राह्मणे श्रूयते । अयमर्थः— स सर्ववेदान्तेषु प्रसिद्धः, एष नामरूपव्याकर्तृत्वेन संनिहितः, इह

घटो नीयते नाकाशं तद्वज्जीवो नभोपमः ॥' 'अंशो

कार्यकरणसंघाते नखाग्रमवधीकृत्य प्रविष्टः । ननु यथा देवदत्तस्य गृहे सर्पस्य वा बिले प्रवेशः प्रसिद्धो न तथात्मनः प्रवेशः कल्पयितुं शक्येत, तस्य सर्वगतत्वात् । नापि जलपात्रेषु सूर्यादेरिव प्रतिबिम्बभावलक्षणः प्रवेशः संभवति, तस्य तैत्तिरीयकादौ प्रवेशवाक्यविचारावसरे भाष्यकारैरेव निरस्तत्वात् । अतः कीदृशः प्रवेशः प्रविष्टपदेन विवक्षित इति जिज्ञासायाम्, यथा जले प्रतिबिम्बभावेन प्रविष्टस्य सूर्यादेस्तद्धर्मवत्तयोपलभ्यमानत्वमस्त्येवमात्मनः संघातेऽधिष्ठानतया प्राक्सिद्धस्यैव प्राणबुद्ध्यादिधर्मवत्तयोपलभ्यमानत्वमेव प्रकृते प्रकृष्टपदेन विवक्षितम्, न तु मुख्यः प्रवेश इति मन्वाना श्रुतिः स्वयमेव प्रविष्टपदं व्याचष्टे—प्राणन्नेत्यादिना । प्राणन्प्राणनचेष्टां प्राणोपाधिद्वारा कुर्वन् 'प्राणस्य प्राणम' इत्यादिश्रुतौ द्वितीयप्राणपदवाच्यो भवति । वदन्वाग्वृत्तिमन्तःकरणतादात्म्यापत्त्या कुर्वन् 'वाचो ह वाचम्' इत्यादिश्रुतौ द्वितीयवाक्छब्दवाच्यो भवति । रूपं पश्यन्रूपगोचरचाक्षुषवृत्तिमन्तःकरणतादात्म्यापत्त्या कुर्वन् 'चक्षुषश्चक्षुः' इत्यादिश्रुतौ द्वितीयचक्षुःशब्दवाच्यो भवति । शृण्वञ्शब्दगोचरां श्रोत्रकरणिकां वृत्तिमन्तःकरणतादात्म्यापत्त्यैव कुर्वन् 'श्रोत्रस्य श्रोत्रम्' इत्यादिश्रुतौ द्वितीयश्रोत्रशब्दवाच्यो भवति । मन्वानो मननरूपां चक्षुरादिनिरपेक्षां वृत्तिं कुर्वन् 'मनसो मनः' इत्यादिश्रुतौ द्वितीयमनःशब्दवाच्यो भवति । चक्षुरादिव्यापारग्रहणं कार्यकरणसंघातव्यापारमात्रस्योपलक्षणम्, संघातधर्मा-

नानाव्यपदेशात्—' इति श्रुतिसूत्राभ्यामवच्छेदपक्ष-

णां सर्वेषामात्मन्युपलभ्यमानत्वात्। नन्वेवमप्यवच्छेदपक्षस्यद्वितीयाध्यायगतेन 'आभास एव च' इति सूत्रेण तद्ग्राष्येण च विरोधो दुर्वारः, तयोश्चैतन्यप्रतिबिम्बस्य स्पष्टमुक्तत्वात्। सूत्रार्थस्तु—आभास एव, जीवः परमात्मनः प्रतिबिम्ब एव, न निरुपाधिकः परमात्मैव जीवः। नापि न्यायमत इव परमात्मसकाशादत्यन्तभिन्नः, तत्त्वमस्याद्यभेदश्रुतिविरोधात्। प्रतिबिम्बस्य च वस्तुतो बिम्बाभिन्नत्वेनाभासत्वपक्ष उक्तश्रुतिविरोधाभावादिति च-शब्दार्थ इति; इति चेत्, न। उदाहृतसूत्रतद्ग्राष्ययोरुक्तप्रतिबिम्बपक्षस्य 'भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्' इति सूत्रोक्तसिद्धान्तवन्मतान्तरत्वोपपत्तेः। न च तथा कल्पने किं विनिगमकमिति वाच्यम्। तृतीयाध्याये स्वयं सूत्रकृतैव न्यायपूर्वकं कृतस्य चैतन्यप्रतिबिम्बनिरासस्य नियामकत्वात्, आभाससूत्रे च जीवस्य प्रतिबिम्बत्व उपपत्त्यादेरनुपन्यासाच्च। भोक्त्रापत्तिसूत्रस्यायमर्थः—'सर्वं खल्विदं ब्रह्म' इति श्रुत्या प्रपञ्चस्य ब्रह्माभेदः प्रतिपाद्यते। 'अहं ब्रह्मास्मि' इति श्रुत्याहंशब्दार्थभूतभोक्तृवर्गस्य च ब्रह्माभेदः प्रतिपाद्यते। तथा च श्रुतिद्वयानुसारेण भोक्तृभोग्यप्रपञ्चयोरेकब्रह्माभेदस्वीकारे भोग्यप्रपञ्चस्य भोक्त्रापत्तेर्भोक्त्रभेदापत्तेः, एवं भोक्तुरपि भोग्याभेदापत्तेरेकब्रह्माभिन्नयोस्तयोः परस्परमप्यभेदावश्यंभावात्। न चेष्टापत्तिः, तथा सत्यविभागः प्रसज्येत, भोक्तृभोग्ययोर्विभागबोधकप्रत्यक्षादिवि-

स्यैव परिग्रहाच्च । तस्मात्सर्वगतस्य चैतन्यस्यान्तः-

रोधः प्रसज्येतेति चेत्, उच्यते— श्रुतिसिद्धं भोक्तृभोग्ययोरेक-ब्रह्माभिन्नत्वं तयोः प्रत्यक्षादिसिद्धं परस्परं विभक्तत्वं चेत्युभयं लोकवत्स्यादुपपद्यते। यथा लोक एकसमुद्रविकाराणां फेनबुद्बुद-तरङ्गाणामेकसमुद्राभिन्नत्वं परिणामानां परिणाम्यभेदस्यानुभव-सिद्धत्वात्, तेषामेव फेनादीनां परस्परं भिन्नत्वं चास्ति भेदस्या-नुभवसिद्धत्वात्; एवमेकब्रह्मपरिणामयोर्भोक्तृभोग्ययोरेकब्रह्माभि-न्नत्वं परस्परं भिन्नत्वं चोपपद्यत इति नाद्वैतश्रुतीनां प्रत्यक्षादिविरो-धप्रसक्तिरिति । अयं च विरोधपरिहारो न सिद्धान्तसंमतः कूटस्थनित्यस्य ब्रह्मणः परिणामित्वानभ्युपगमात्, किं तु मता-न्तराभिप्रायेणेति भाष्यादिषु घण्टाघोषः । तथा प्रकृतेऽपीति संक्षेपः । अंश इति । जीव ईश्वरस्यांशः । कुतः, नानाव्यपदेशात् 'य आत्मानमन्तरो यमयति' इत्यादिश्रु-तिषु नियम्यनियामकभावादिना जीवेश्वरयोर्नानात्वस्य भेदस्य व्यपदेशादिति सूत्रभागस्याक्षरार्थः । अत्रांशत्वं जीवचैत-न्यस्य घटाकाशवदन्तःकरणावच्छिन्नत्वरूपं विवक्षितम्; न तु मुख्यमंशत्वम्, निरवयवस्य ब्रह्मणो मुख्यांशासंभवादिति तदधि-करणभाष्ये स्फुटमिति भावः। अवच्छेदपक्षसमर्थनमुपसंहरति— तस्मादिति । प्रतिबिम्बासंभवादवच्छेदपक्षे विरोधाभावात्साधकस-त्वाच्चेत्यर्थः। अवच्छेद्यचैतन्यस्य प्रतिबिम्बपक्षेऽपि संमततयोभय-संप्रतिपन्नस्य तस्यैव जीवत्वादिकल्पनं युक्तं लाघवादित्याशयेनाह

करणादिनावच्छेदोऽवश्यंभावीत्यावश्यकत्वादवच्छिन्नो जीव इति पक्षं रोचयन्ते ॥

—अवच्छेदोऽवश्यंभावीति । अवच्छिन्न इति । अन्तःकरणावच्छिन्नो जीवः । जीवग्रहणमुपलक्षणम् । अविद्यावच्छिन्न ईश्वरः, 'कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः' इति श्रुतेः । 'जीवेशावाभासेन करोति, माया चाविद्या च स्वयमेव भवति' इति श्रुतौ चाभासपदमवच्छिन्नपरम्, प्रतिबिम्बासंभवस्योक्तत्वात् । मायापदं च प्रथमोपात्तजीवोपाधिभूतान्तःकरणपरम्, 'कार्योपाधिरयं जीवः' इति श्रुतेः । एवं मायापदोपात्तान्तःकरणस्य च मूलप्रकृत्यात्मकत्वं प्रकृतिविकारभावप्रयुक्तम् । पूर्वमनवच्छिन्नस्येश्वरत्वोक्तिस्तृप्तिदीपवचनानुसारेण, अभावावच्छिन्नस्येश्वरत्वोक्तिश्च संभवमात्रेण । न तु तात्पर्यतः, 'कारणोपाधिरीश्वरः' इति श्रुतिविरोधात् । अनवच्छिन्नस्येश्वरत्वपक्षे तस्योपाध्यभावेन सर्वज्ञानकर्तृत्वादेरसंभवाच्च । अभावस्येश्वरोपाधित्वपक्षेऽपि समानोऽयं दोषः, मायाविद्याभ्याकृतशक्त्यज्ञराकाशादिशब्दितभावरूपोपाधेरिव तस्य सर्वज्ञत्वादिप्रयोजकत्वायोगात् । अत एव वाक्यवृत्तौ भगवत्पादैरपि सर्वज्ञत्वादिप्रयोजकोपाधित्वमविद्याया दर्शितम्— 'मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः' इतीति भावः ॥

'अथ क ईश्वरः कश्च जीवः' इति प्रश्ने प्रतिवचनत्वेन

अपरे तु— न प्रतिबिम्बो नाप्यवच्छिन्नो जीवः । किं तु कौन्तेयस्यैव राधेयत्ववदविकृतस्यैव ब्रह्मणोऽविद्यया जीवभावः, व्याधकुलसंवर्धितराजकुमारदृष्टान्तेन 'ब्रह्मैव स्वाविद्यया संसरति स्वविद्यया मुच्यते' इति बृहदारण्यकभाष्ये प्रतिपादनात् । 'राजसूनोः स्मृतिप्राप्तौ व्याधभावो निवर्तते । यथैवमात्मनोऽज्ञस्य तत्त्व-

---

मतान्तरमुत्थापयति— **अपरे त्विति** । कस्तर्हि जीव इति पृच्छति— **किं त्विति** । दृष्टान्तपूर्वकं ब्रह्मैव जीव इत्युत्तरमाह— **कौन्तेयस्यैवेति** । कुन्तीकुमारस्यैव । न तु तत्प्रतिबिम्बादेरित्येवकारार्थः । राधाया अपत्यं राधेयः, तस्य भावस्तत्त्वम्, तद्वदित्यर्थः । किं त्वविकृतस्यैवेति संबन्धः । अवच्छेदप्रतिबिम्बभावरहितस्येत्यर्थः । अत्र भाष्यवार्त्तिकसंमतिं हेतुत्वेन दर्शयति— **व्याधेत्यादिना** । यथा राजकुले जातः कर्णो जन्मप्रभृति व्याधकुल एव संवर्धितस्तज्जातीयैः सहवासादिजनितभ्रान्तिलक्षणाविद्यया स्वात्मानं राधेयं मन्यते न तु स्वतः सिद्धमपि कौन्तेयत्वमनुभवति, ततश्च कौन्तेयत्वप्रयुक्ताच्छ्रेयसः सकाशात्प्रच्युतः सर्वत्र नानाविधशापावमानादिलक्षणं बहुविधदुःखं प्राप्तवान्, स च कदाचिद्भगवता विवस्वता 'हे कर्ण, कौन्तेयोऽसि त्वम्, न राधेयः' इत्युपदेशं कुर्वता स्मारितनिजरूपः सन् तया स्मृत्या व्याधत्वराधेयत्वादेरविद्याकृतस्य निवृत्तौ सत्यां

मस्यादिवाक्यतः ॥' इति वार्त्तिकोक्तेश्च । एवं च स्वाविद्यया जीवभावमापन्नस्यैव ब्रह्मणः सर्वप्रपञ्चकल्पकत्वादीश्वरोऽपि सह सर्वज्ञत्वादिधर्मैः स्वप्नोपलब्धदेवतावज्जीवकल्पित इत्याचक्षते ॥

व्याधत्वराधेयत्वकृतं नानाविधदुःखं त्यक्त्वा कौन्तेयत्वस्मृतिप्रयुक्तं श्रेयः प्राप्तवान्; तथा ब्रह्माप्यनादिसिद्धया स्वाविद्यया वृतनिजरूपं सज्जीवभावं प्राप्य स्वतःसिद्धानित्यनिरतिशयानन्दस्वरूपानुभावात्प्रच्युतं भवति ततश्च संसरति, एवं संसरद्ब्रह्म कदाचित्स्वप्नदशायामिव स्वाविद्याकल्पितेन गुरुणा शास्त्रेण चोत्पादितया स्वगोचरविद्यया जीवभावादिप्रयोजकाविद्यानिवृत्तौ मुच्यते नित्यसिद्धनिरतिशयानन्दमनुभवति स्वरूपचैतन्येनैवेति भाष्यार्थः । **अज्ञस्येति** । अज्ञानावृतनिजस्वरूपस्येत्यर्थः । **तत्त्वमस्यादीति** । गुरूपदिष्टतत्त्वमस्यादिवाक्यजन्यज्ञानेनाज्ञाननिवृत्तौ जीवभाव आत्मनो निवर्तत इत्यर्थः । एवं जीवं निरूप्येश्वरं निरूपयति— **एवं चेति** । भाष्यवार्त्तिकपर्यालोचनया प्रतिबिम्बभावादिरहितस्य पूर्णब्रह्मण एव जीवत्वे सिद्धे सतीत्यर्थः । ईश्वरोऽपि सर्वज्ञत्वादिधर्मैः सह जीवकल्पित इति संबन्धः । यथोक्तजीवस्येवेश्वरकल्पकत्वे हेतुमाह— **स्वाविद्ययेत्यादिना** । अन्यस्य कल्पकस्याभावादितितात्पर्यकमवधारणम् । जीवस्येश्वरकल्पकत्वे दृष्टान्तमाह— **स्वप्नेति** । यथा स्वप्ने स्वप्नद्रष्टा जीव एव परां देवतां सर्वज्ञत्वादिधर्मैः सहितां कल्पयति, कल्पयित्वा च तामहर्निशमु-

अथायं जीव एक उतानेकः । अत्रानुपदोक्तपक्षावलम्बनाः केचिज्जीवैक्यमाश्रित्याहुः— एको जीवः । तेन चैकमेव शरीरं सजीवमन्यानि स्वप्नदृष्टशरीराणीव निर्जीवानि । तदज्ञानकल्पितं सर्वं जगत् । तस्य स्व-

---

पास्ते तदुपासनया चाभ्युदयनिःश्रेयसलक्षणं लभते ; एवं जागरणेऽपीति दृष्टान्तादेरभिप्रायः ।।

जीवेश्वरनिरूपणप्रसङ्गेन विचारान्तरमारभते— **अथेति । अनुपदोक्तेति । 'ब्रह्मैव स्वाविद्यया संसरति स्वविद्यया मुच्यते.' इत्यादिग्रन्थोक्तेत्यर्थः । एक इति ।** ब्रह्मण एकत्वात्तत्र चावच्छेदप्रतिबिम्बभावयोरनङ्गीकाराच्चेत्यर्थः । ननु जीवैक्ये तेनैकमेव शरीरं सजीवं स्यान्न सर्वशरीराणीत्याशङ्क्याभिष्टापत्त्या परिहरति— **तेन चेति ।** ननु यथैकशरीरे हिताहितप्राप्तिपरिहारार्था स्पन्दनरूपा चेष्टा दृश्यते तथा सर्वशरीरेषु दृश्यते । तथा च कथमेकमेव शरीरं सजीवम्, तत्राह— **अन्यानीति ।** स्वप्नदशायां स्वप्नद्रष्टुः शरीरमेकमेव सजीवम् । स्वप्नद्रष्ट्रा दृष्टान्यन्यानि शरीराणि तु चेष्टाविशेषवत्तया दृश्यमानान्यपि सजीवानि न भवन्ति । तथा जागरणेऽपीति द्रष्टव्यम् । ननु स्वाप्नस्य जगतः कल्पिका तावन्निद्रान्वयव्यतिरेकसिद्धा यथा वर्तते न तथा जाग्रत्प्रपञ्चस्य कल्पकमन्वयव्यतिरेकसिद्धं किंचिदस्तीति जगत्सत्यमेव स्यात्, नेत्याह— **तदज्ञानेति ।** जीवाज्ञानेत्यर्थः । अज्ञानस्य जगत्कल्पकत्वं शास्त्र-

प्नदर्शनवद्यावदविद्यं सर्वो व्यवहारः । बद्धमुक्तव्यवस्थापि नास्ति, जीवस्यैकत्वात् । शुकमुक्त्यादिकमपि स्वाप्नपुरुषान्तरमुक्त्यादिकमिव कल्पितम् । अत्र च संभावितसकलशङ्कापङ्कप्रक्षालनं स्वप्नदृष्टान्तसलिलधारयैव कर्तव्यमिति ॥

सिद्धमिति भावः । ननु सर्वव्यवहारस्य स्वप्नव्यवहारवत्कल्पितत्वे तद्वदेव सहसा व्यवहारलोपः प्रसज्येत ; तथा च विद्यानर्थक्यमिति, नेत्याह— **तस्येति** । जीवस्येत्यर्थः । यावन्निद्राक्षयं स्वप्नव्यवहारानुवृत्तिवद्विद्यया यावदविद्यानिवृत्ति सर्वव्यवहारानुवृत्तिर्युज्यत इति न विद्यावैफल्यम्, अविद्यानिवृत्त्यर्थमपेक्षितत्वादिति भावः । **ननु** जीवैकत्वमते एको जीवो बद्धोऽन्यो जीवो मुक्त इति व्यवस्था शुकादिमुक्तिप्रतिपादकशास्त्रसिद्धा न स्यादित्याशङ्क्य, इष्टापत्तिरित्याह— **बद्धेति । शुकेति** । यथा **स्वप्नादुत्थितः** स्वप्नभ्रान्तिसिद्धां पुरुषान्तरमुक्तिं परं प्रति बोधयति, तथा जीवभ्रान्तिसिद्धां शुकादिमुक्तिं तं प्रत्येव बोधयति श्रवणादिषु प्रवृत्युपयोगितयेति भावः । ननु जीवैक्यमते विद्योपदेष्टुरन्यस्याभावाद्विद्योदयो न स्यात्, जीवेश्वरविभागाभावेन जीवस्येश्वरोपासनादिव्यवहारश्च न स्यादित्याशङ्क्याह— **अत्र चेति** । यथा स्वप्नदशायां स्वप्नदृक्कंचिद्गुरुमीश्वरं च कल्पयित्वा तावुपास्ते ताभ्यां च विद्यादिकं लभते तद्वदिति भावः ॥

अन्ये त्वस्मिन्नेकशरीरैकजीववादे मनःप्रत्ययमलभमानाः 'अधिकं तु भेदनिर्देशात्' 'लोकवत्तु लीलाकैवल्यम्' इत्यादिसूत्रैर्जीवाधिक ईश्वर एव जगतः स्रष्टा,

---

एकजीववाद एव मतान्तरमाह— **अन्ये त्विति** । **एकशरीरेति** । एकमेव शरीरं सजीवं यस्मिन्नेकजीववादे स तथोक्तः । **मनःप्रत्ययमिति** । मनसो विश्वासं प्रामाणिकत्वनिश्चयमित्यर्थः, एकमेव शरीरं सजीवं शरीरान्तराणि निर्जीवानीत्यत्र विनिगमकाभावात् । न च जीवैक्यं विनिगमकमिति वाच्यम्, एकोऽपि जीवोऽस्मिञ्शरीरे वर्तत इत्यत्र विनिगमकस्य वक्तुमशक्यत्वादिति भावः । **अधिकं त्विति** । जीवाभिन्न ईश्वरे वेदान्तानां प्रथमाध्याये निरूपितः समन्वयो न घटते, तथा सतीश्वरगतजगत्स्रष्टृत्वादेर्जीवधर्मत्वप्रसङ्गात्; तथा चानुभवविरोध इति पूर्वपक्षनिरासार्थस्तुशब्दः । अधिकं जीवादुपाधितो भिन्नं ब्रह्म जगत्स्रष्टृत्वसर्वज्ञत्वादिगुणकमभ्युपगम्यते । अतो न ब्रह्मधर्माणां जीवे प्रसक्तिः, औपाधिकभेदस्यापि धर्मव्यवस्थापकताया लोकासिद्धत्वात् । कल्पितभेदाङ्गीकारे हेतुमाह— **भेदनिर्देशादिति** । 'य आत्मनि तिष्ठन्नात्मानमन्तरो यमयति' इत्यादौ नियम्यनियामकभावादिना भेदनिर्देशादिति सूत्रार्थः । 'लोकवत्—' इति सूत्रं पूर्वमेव व्याख्यातम् । अत्रादिपदेन 'अनुपपत्तेस्तु न शारीरः' इत्यादिसूत्रं गृह्यते । मनोमयत्वादिगुणको न शारीरः, तस्मिन्सर्वकर्मत्वादीनामनुपपत्तेरेवेति सूत्रार्थः।

तस्याप्तकामत्वेन प्रयोजनाभावेऽपि केवलं लीला जगतः सृष्टिरित्यादि प्रतिपादयद्भिर्विरोधं च मन्यमानाः—हिरण्यगर्भ एको ब्रह्मप्रतिबिम्बो मुख्यो जीवः । अन्ये तु तत्प्रतिबिम्बभूताश्चित्रपटलिखितमनुष्यदेहार्पितपटाभासकल्पा जीवाभासाः संसारादिभाज इति सविशेषानेकशरीरैकजीववादमातिष्ठन्ते ॥

विरोधं चेति । मनःप्रत्ययमलभमाना विरोधं च मन्यमाना इति चशब्दार्थः । जीवातिरिक्तेश्वराभाववादेऽस्मिञ्जगत्सृष्टयादिसमर्थस्य व्यावहारिकभेदवत ईश्वरस्यास्तित्वजगत्स्रष्टृत्वसर्वात्मकत्वादिगुणप्रतिपादकैः सूत्रैर्विरोधमित्यर्थः । **ब्रह्मप्रतिबिम्ब इति** । अनेन बिम्बभूतं ब्रह्म जीवादधिकमीश्वररूपमस्मिन्मतेऽस्ति, अतो नोदाहृतसूत्रविरोध इति सूचितम् । **तदिति** । ब्रह्मप्रतिबिम्बभूतहिरण्यगर्भस्य भौतिकजगत्स्रष्टृतया कारणोपाधितया च मुख्यजीवस्य प्रतिबिम्बभूता अन्ये जीवा जीवाभासाः, तद्वत्सृष्टयादिसामर्थ्याभावादित्यर्थः । **कल्पा इति** । तुल्या इत्यर्थः । **संसारादिभाज इति** । अनेन यथा हिरण्यगर्भशरीरं मुख्यजीवेन सजीवं तथेतराण्यपि शरीराणि जीवाभासैः सजीवानीति पूर्वमताद्विशेषः सूचितः । अत्रादिपदं मुक्तिसंग्रहार्थम् । जीवाभासानां मुक्तिश्च स्वबिम्बभूतहिरण्यगर्भप्राप्तिः क्रमेण च शुद्धब्रह्मप्राप्तिरिति मन्तव्यम् । **सविशेषेति** । सविशेषाणि सजीवान्यनेकशरीराणि यस्मिन्नेकजीववादे स तथा । आतिष्ठन्ते, अङ्गीकुर्वन्तीत्यर्थः ॥

अपरे तु हिरण्यगर्भस्य प्रतिकल्पं भेदेन कस्य हिरण्यगर्भस्य मुख्यजीवत्वमित्यत्र नियामकं नास्तीति मन्यमानाः— एक एव जीवोऽविशेषेण सर्वं शरीरमधितिष्ठति । न चैवं शरीरावयवभेद इव शरीरभेदेऽपि प-

---

अत्राप्यस्वरसं वदन्नेकजीववादमेवाह— **अपरे त्विति** । **एक एवेति** । अविद्यायां ब्रह्मप्रतिबिम्बरूपो जीवस्तावदेकः, अविद्याया एकत्वात् । स एव च सर्वं शरीरं स्वभोगाद्यर्थमधितिष्ठति, न त्वविद्यायां ब्रह्मप्रतिबिम्बो हिरण्यगर्भशरीरमधितिष्ठत्यन्यानि तु शरीराणि तत्प्रतिबिम्बा जीवाभासा अधितिष्ठन्ति । कुतः, इतरजीवानां तत्प्रतिबिम्बत्वे मानाभावादित्येवकारार्थः । **अविशेषेणेति** । मुख्यामुख्यविभागं विनेत्यर्थः । जीवभेदे हि सति कश्चिन्मुख्यो जीवः कश्चिच्चामुख्यो जीवाभास इति विभागः संभवेत् । न त्वेतदस्ति, तस्यैकत्वाभ्युपगमादिति भावः । ननु देवदत्तस्य शिरःपाणिपादमधितिष्ठत एकस्य यथा 'शिरसि मे वेदना' 'पादे मे सुखम्' इत्याद्यनुसंधानं दृश्यते, एवमेकस्यैव जीवस्य सर्वशरीराधिष्ठातृत्वे 'मम देवदत्तनामकशरीरे सुखम्, यज्ञदत्तनामकशरीरे दुःखम्' इत्यादिरूपेण सर्वस्य सर्वत्रानुसंधानप्रसङ्ग इति शङ्कते— **न चैवमिति** । शरीरभेदस्याननुसंधानप्रयोजकत्वाभ्युपगमान्नोक्तातिप्रसङ्गः । न च तत्र मानाभावः शङ्कनीयः, जीवस्यातीतशरीरेषु वर्तमानशरीरे चैकत्वेऽपि जन्मान्तरीयसुखाद्यनुसंधानादर्शनेन तद्भेदस्य तत्प्रयोज-

नादर्शनेन शरीरभेदस्य तदननुसंधानप्रयोजकत्वकल्पेः । योगिनस्तु कायव्यूहसुखाद्यनुसंधानं व्यवहितार्थग्रहणवद्योगप्रभावनिबन्धनमिति न तदुदाहरणमित्यविशेषानेकशरीरैकजीववादं रोचयन्ते ॥

इतरे त्वत्रापि बन्धमुक्तिव्यवस्थाभावस्य तुल्यत्वेन

कतायाः संप्रतिपन्नत्वादिति परिहरति— **जन्मान्तरेति** । ननु योगिना देहभेदे सत्यप्यनुसंधानदर्शनाद्व्यभिचार इत्यत आह— **योगिनस्त्विति** । अस्मदादिवैलक्षण्यार्थकस्तुशब्दः । तदर्शयति— **कायेति** । न ह्यस्मदादीनां व्यवहितार्थसाक्षात्कारोऽस्ति, तत्प्रयोजकादृष्टविशेषाभावात् । तथा च शरीरभेदमात्रं न तत्प्रयोजकम्, किं त्वदृष्टविशेषासहकृतशरीरभेदोऽननुसंधानप्रयोजक इति न योग्यनुसंधानस्थले व्यभिचार इति भावः । योगपदं योगजादृष्टपरम् । **अविशेषेति** । अविशेषेणाधिष्ठितान्यनेकशरीराणि यस्मिन्नेकजीववादे स तथेत्यर्थः ॥

अनेकजीववादमुत्थापयति— **इतरे त्विति** । **अत्रापीति** । अव्यवहितमतेऽपीत्यर्थः । यद्येकजीववादे व्यवस्था न सिध्यति ततः को दोष इत्याशङ्क्य श्रुतिस्मृतिभाष्याणामनाञ्जस्यं दोष इत्याह— **तद्यो य इति** । देवानां मध्ये यो यो देवस्तद्ब्रह्म प्रत्यबुध्यत साक्षात्कृतवान्स एव तद्ब्रह्माभवन्नान्यो ब्रह्मबोधरहित इति विदुषो मुक्तत्वमविदुषो बद्धत्वं च प्रतिपादयन्त्या श्रुत्या बन्धमुक्ति-

'तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्' इत्यादिश्रुतेः 'प्रतिषेधादिति चेन्न शारीरात्' इत्यधिकरणे शुक्रमुक्तत्वप्रतिपादकभाष्यस्य चानाङ्स्यमित्यपरितुष्यन्तोऽन्तःकरणानां जीवोपाधित्वाभ्युपगमेनानेकजीव-

---

व्यवस्था दर्शिता। आदिपदेन 'अजामेकाम्—' इति श्रुतिर्बन्धमुक्तिव्यवस्थाप्रतिपादकत्वेन भाष्यकारादिभिरङ्गीकृता गृह्यते। श्रुतिग्रहणम् 'यद्गत्वा न निवर्तन्ते तद्धाम परमं मम' इत्यादिस्मृतीनामुपलक्षणम्। **प्रतिषेधादिति**। इदं पूर्वपक्षसूत्रम्। बृहदारण्यके काण्वशाखायाम् 'न तस्य प्राणा उत्क्रामन्ति' इति वाक्येन परब्रह्मतत्त्वविदः प्राणोत्क्रान्तिप्रतिषेधात्तस्य गत्युत्क्रान्ती न स्तः, उत्क्रान्तिपूर्वकत्वा द्गतेरिति चेदिति सिद्धान्तिशङ्काभागार्थः। पूर्वपक्षी तां दूषयति— **न शारीरादिति**। बृहदारण्यक एव माध्यंदिनशाखायां समानप्रकरणे ब्रह्मविदं शारीरं प्रकृत्य 'न तस्मात्प्राणा उत्क्रामन्ति' इति वाक्यं पठ्यते। अत्र तच्छब्देन प्रकृतः शारीरो गृह्यते न शरीरम्, तस्य शरीरापेक्षया प्रधानत्वात्। तथा च 'न तस्मात्—' इति वाक्येन शारीराज्जीवात्प्राणानामुत्क्रमणं निषिध्यते, न शरीरात्। अतः शरीरादुत्क्रमणं विदुषोऽप्यस्तीति तस्यापि गत्युत्क्रान्ती स्त एव। 'न तस्य प्राणाः—' इति काण्ववाक्यस्यापि, तस्य विदुषः प्राणाः शरीरान्नोत्क्रामन्ति, किं तु तेन सहैव ब्रह्मलोकं गच्छन्तीत्यर्थो बोध्यः। अनाङ्-

वादमाश्रित्य बन्धमुक्तिव्यवस्थां प्रतिपद्यन्ते ॥

तेषु केचिदेवमाहुः— यद्यपि शुद्धब्रह्माश्रयविषयक-

स्यमिति । आज्ञस्याभाव उपपन्नत्वाभाव इत्यर्थः । अन्तःकरणानामिति । न च नानाजीववादेऽपि 'ब्रह्मैव स्वाविद्यया संसरति स्वविद्यया मुच्यते' इति बृहदारण्यकभाष्यप्रतिपादनेन विरोधस्तुल्य इति वाच्यम् । तद्भाष्यप्रतिपादनस्य ब्रह्मैव स्वाविद्यया नानान्तःकरणरूपेण परिणतया नानाजीवभावं प्राप्य संसरति स्वविद्यया क्रमेण मुच्यत इत्यभिप्रायकत्वोपपत्तेः । श्रुतिस्मृत्युपोद्बलितशुकादिमुक्तिप्रतिपादकभाष्यस्य 'ब्रह्मैव स्वाविद्यया संसरति' इति भाष्यमात्रस्वारस्यमनुसृत्यान्यथानयनायोगात् । न चोदाहृतश्रुतिस्मृतिभाष्याणां ब्रह्मात्मैकत्वपरत्वेन नानाजीववादे तात्पर्याभावात्तेभ्यो जीवनानात्वं न सिध्यतीति वाच्यम् । एकजीववादेऽपि तात्पर्याभावस्य तुल्यत्वात् । न च जीवत्वोपाधिभूताया अविद्याया एकत्वाज्जीवैक्यसिद्धिरिति वाच्यम् । उदाहृतश्रुतिस्मृतिभाष्यानुरोधेनाविद्यानानात्वाभ्युपगमसंभवात्तदेकत्वश्रुत्यादीनां जात्यभिप्रायकत्वोपपत्तेः, अविद्याया एकत्वेऽपि 'कार्योपाधिरयं जीवः' इति श्रुत्यनुसारेणान्तःकरणानामेव जीवत्वोपाधित्वोपगमसंभवाच्चेति भावः ॥

नानाजीववादे मतभेदेन बन्धमुक्तिव्यवस्थामुपपादयितुमारभते— तेष्विति । नानाजीववादिषु मध्य इत्यर्थः । केचिदिति ।

मेवाज्ञानं तन्नाश एव च मोक्षः, तथापि जीवन्मुक्ता-वज्ञानलेशानुवृत्त्यभ्युपगमेनाज्ञानस्य सांशत्वात्तदेव क-

---

ननु नानाजीववादेऽपि जीवस्यान्तःकरणोपाधिकत्वपक्षे मूलाज्ञानस्यैकत्वेन शुकादितत्त्वज्ञानेनैव तस्य निवृत्तत्वादिदानीं संसारानुपलब्धिप्रसङ्ग इत्याशयेन शङ्कते— **यद्यपीति**। **शुद्धब्रह्माश्रयेति**। जीवेश्वरयोर्विशिष्टरूपयोरज्ञानाश्रयत्वं न संभवति, तयोः कल्पितत्वात्। तथा च शुद्धस्यैवावृतत्वरूपं विषयत्वम्; न त्वीश्वरस्यापि, तस्य जीवान्तरवदौपाधिकभेदादेवानुपलब्धिसिद्धौ जीवान्प्रतीश्वरस्याज्ञानावृतत्वरूपविषयत्वकल्पनस्य व्यर्थत्वादिति भावः। **एकमेवेति**। 'अजामेकाम्' 'मायां तु प्रकृतिं विद्यात्' 'विभेदजनकेऽज्ञाने' इति श्रुतिस्मृतिष्वेकवचनश्रवणेन लाघवेन च तस्यैकत्वावगमादिति भावः। **तन्नाश एव चेति**। 'भूयश्चान्ते विश्वमायानिवृत्तिः' 'अज्ञाने नाशमात्यन्तिकं गते' इत्यादिश्रुतिस्मृतिषु सर्वानर्थमूलाज्ञाननिवृत्तेर्मोक्षत्वावगमादिति भावः। एकस्य तत्त्वज्ञानेन कृत्स्नाज्ञाननाशो नाङ्गीक्रियते, येन व्यवस्था न स्यात्। किं तु तस्य तस्य ज्ञानेन तत्तदन्तःकरणादिपरिणामिनो मूलाज्ञानांशस्यैव नाश उपेयते। न च तस्य सांशत्वे मानाभाव इति वाच्यम्। जीवन्मुक्तावावरणशक्तिमदंशस्य नाशेऽपि विक्षेपशक्तिमदज्ञानांशस्य ज्ञानादनिवृत्तस्य यावद्विदेहकैवल्यमनुवृत्त्यभ्युपगमेन तस्य सांशत्वावगमात्। तथा चाज्ञानस्यानिर्वचनीयस्यानिर्वचनीयानामेव भागरूपांशानामनन्तानां संभ-

चिदुपाधौ ब्रह्मावगमोत्पत्तावंशेन निवर्तत उपाध्यन्तरेषु यथापूर्वमंशान्तरैरनुवर्तत इति ॥

अन्ये तु— यथा न्यायैकदेशिमते भूतले घटात्य-

वास्तानादाय बन्धमुक्तिव्यवस्था सूपपादेति परिहरति— **तथापीत्यादिना ॥**

अज्ञानसत्त्वं बन्धस्तन्नाशो मोक्ष इति मतमुक्तम् । इदानीं चैतन्यस्याज्ञानसंबन्धो बन्धस्तदसंबन्धो मोक्षो न तु तच्चिवृत्तिः, असंबन्धमात्रेणैव बन्धनिवृत्तिसिद्धेर्ज्ञानादज्ञाननिवृत्तिप्रतिपादकशास्त्रस्यापि तदसंबन्ध एव तात्पर्योपपत्तेः ; अन्यथा मूलाज्ञानस्य विरोधिज्ञानोदये सति तूलपिण्डस्य विरोध्यग्निसंसर्ग इवावशेषासंभवेन बन्धमुक्तिव्यवस्थाशास्त्रस्य जीवन्मुक्तिशास्त्रस्य च निरालम्बनत्वप्रसङ्गादिति मन्यमानानां मतमाह— **अन्ये त्विति ।** 'भूतले घटो न' इत्यनुभवसिद्धो घटाभावस्त्रैकालिकत्वाभ्युपगमाद्घटानयनानन्तरं तदधिकरणे भूतले वर्तत एव । तथा च घटवत्यपि भूतले 'घटो नास्ति' इति प्रतीतिः प्रमा स्यादिति दोषप्रसक्तौ तत्परिहाराय नैयायिकाः कल्पयन्ति—घटाधिकरणे तदत्यन्ताभावस्य संबन्धाभावेन तत्र तत्प्रतीतेर्भ्रान्तित्वोपपत्तिः । न च घटसंयोगोत्पत्तेः पूर्वं भूतले संबन्धवत्तस्य घटसंयोगकाले कथमवृत्तिरूपः संबन्धाभाव इति वाच्यम् । प्रतीत्यनुसारेण भूतलादौ घटात्यन्ताभाववृत्तौ घटसंयोगस्य प्रागभावप्रध्वंसाभावयोरन्यतराभावो नियामक

न्ताभावस्य वृत्तौ घटसंयोगाभावो नियामक इत्यनेकेषु-प्रदेशेषु तद्वत्सु संसृज्य वर्तमानो घटात्यन्ताभावः क-चित्प्रदेशे घटसंयोगोत्पत्त्या तदभावनिवृत्तौ न संसृ-ज्यते, एवमज्ञानस्य चैतन्ये वृत्तौ मनो नियामकमिति तदुपाधिना चैतन्यप्रदेशेषु संसृज्य वर्तमानमज्ञानं क्वचि-द्ब्रह्मदर्शनोत्पत्त्या 'भिद्यते हृदयग्रन्थिः—' इति श्रुत्युक्त-रीत्या मनसो निवृत्तौ न संसृज्यते; अन्यत्र यथा-पूर्वमवतिष्ठत इत्यज्ञानसंसर्गासंसर्गावेव बन्धमोक्षावि-त्याहुः ॥

इति कल्पनेन घटसंयोगाधिकरणभूतले घटाभावस्यासंबन्धोपप-त्तेरिति । तदेतन्मतं दृष्टान्तीकरोति— यथा न्यायैकदेशिमत इति । तद्वत्स्विति । घटसंयोगाभाववत्स्वित्यर्थः । तदुपाधि-नेति । मन एवोपाधिस्तेनेत्यर्थः । क्वचिदिति । चैतन्यप्रदेश इ-त्यर्थः । ब्रह्मदर्शनोत्पत्त्या मनसो निवृत्ताविति संबन्धः । ब्रह्मदर्शनं मनसो निवर्तकमित्यत्र मानमाह— भिद्यत इति । हृदयग्रन्थि-रित्यत्र हृदयपदमन्तःकरणपरम् । तच्चान्तःकरणं चिदात्मन्यध्यस्त-तया तत्तादात्म्यापन्नं सद्ग्रन्थिरिव ग्रन्थिः । स च ब्रह्मदर्शने जाते ब्रह्मण्येव विलीयत इति श्रुत्यर्थः । अन्यत्रेति । चैतन्यप्रदेशा-न्तरेष्वित्यर्थः ॥

अपरे तु— नाज्ञानं शुद्धचैतन्याश्रयम्, किं तु जीवाश्रयं ब्रह्मविषयम् । तच्चान्तःकरणप्रतिबिम्बरूपेषु सर्वेषु जीवेषु व्यक्तिषु जातिवत्प्रत्येकं पर्यवसिततया वर्त-

---

नाज्ञानमिति । शुद्धचैतन्यस्य वेदान्तशास्त्रप्रतिपाद्यस्य **नाज्ञानाश्रयत्वम्**, तस्य 'वेदान्तवेद्यं वस्तु न जानामि' इत्यज्ञानविषयत्वेनैवानुभवादिति भावः । **जीवाश्रयमिति** । 'न जानामि' इत्यज्ञानाश्रयत्वेन जीवस्यैवानुभवात् । न चाज्ञानस्य स्वकार्यान्तःकरणविशिष्टचैतन्यरूपजीवाश्रितत्वमनुपपन्नमिति वाच्यम् । अन्तःकरणे यत्प्रतिबिम्बभूतं चैतन्यं तस्यैव जीवत्वाभ्युपगमेन विशिष्टस्य जीवत्वानुपगमात् । न चान्तःकरणस्य सादितया तद्गतप्रतिबिम्बस्यापि सादित्वात्कथं तस्यानाद्यज्ञानाश्रयत्वमिति वाच्यम् । अन्तःकरणस्य स्वापादौ लयश्रवणेन जाग्रदादौ जन्मश्रवणेन च सादित्वावगमेऽपि तस्य स्थूलसूक्ष्मरूपेणानादितायाः 'पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात्' इति सूत्रे व्यवस्थापितत्वात् । यथा पुंस्त्वस्त्रीत्वादेः शुक्रशोणितस्तनादिरूपस्य बाल्यादावनभिव्यक्तस्य यौवने प्रादुर्भावस्तथास्यान्तःकरणस्य स्वापादावनभिव्यक्ततया सत एव स्थूलावस्थाप्राप्तिरूपाया अभिव्यक्तेर्युक्तत्वात्, असतः शशशृङ्गादेरुत्पत्त्यदर्शनादिति सूत्रार्थः । अविद्याया अनादिचैतन्यप्रतिबिम्बाश्रितत्वस्य मायाविद्याभेदवादनिरूपणावसरे समर्थितत्वादिति भावः । **प्रत्येकमिति** । द्वित्वबहुत्वादिवदज्ञानस्य

मानमुत्पन्नविद्यं कंचिज्जहाति नष्टां व्यक्तिमिव जातिः, स एव मोक्षः अन्यं यथापूर्वमाश्रयतीति व्यवस्थेत्याहुः ॥

सर्वजीवव्यक्तिषु व्यासज्ज्यवृत्तित्वे सर्वेषां प्रत्येकम् 'अहमज्ञः' इति प्रत्यक्षं न स्यात्। व्यासज्ज्यवृत्तिधर्मप्रत्यक्षस्य यावदाश्रयप्रत्यक्षसापेक्षत्वेनैकैकस्य जीवस्य सर्वजीवप्रत्यक्षाभावादित्यर्थः। वस्तुतस्त्वज्ञानस्य व्यासज्ज्यवृत्तित्वेऽपि तत्प्रत्यक्षस्य नियसाक्षिरूपतया यावदाश्रयप्रत्यक्षानपेक्षणादुक्तनियमस्य जन्यप्रत्यक्षविषयत्वादिति मन्तव्यम्। कंचिदिति। उत्पन्नया विद्यया मनसो निवृत्तौ तन्निरूपितप्रतिबिम्बभावस्यापि निवृत्ततया तद्विशिष्टचैतन्यरूपव्यक्तिनाशादिति भावः। तथा च श्रुतिः— 'जहात्येनां भुक्तभोगामजोऽन्यः' इति। एनामजाशब्दितामविद्याम। जीवेन भुक्ता भोगा यस्याः सा भुक्तभोगा। भुज्यन्त इति व्युत्पत्त्या भोगशब्दितानां विषयाणामविद्यापरिणामत्वादिति भावः। अजो जन्मरहितः। अन्य उत्पन्नविद्यो जीव इति श्रुत्यर्थः। स एवेति। त्याग एवेत्यर्थः। अन्यमिति। अज्ञमिति भावः। तथा च श्रुतिः— 'अजो ह्येको जुषमाणोऽनुशेते' इति। एकः पुनरजो विवेकरहितः कार्यकरणसंघातरूपेण परिणतामविद्यां जुषमाणः सेवमानस्तत्राहंममाभिमानवान्सन्ननुशेते तामनुसृत्य शेते वर्तते न जहातीति यावत्। अत्राज्ञानं कंचिज्जहात्यन्यमाश्रित्यैव तिष्ठतीत्युक्त्याप्यज्ञानसंबन्धासंबन्धावेव बन्धमोक्षावित्युक्तं भवति, तदुक्तेरर्थान्तरासंभवात् ॥

इतरे तु प्रतिजीवमविद्याभेदमभ्युपगम्यैव तदनुवृत्ति-निवृत्तिभ्यां बन्धमुक्तिव्यवस्थां समर्थयन्ते ॥

अस्मिन्पक्षे कस्याविद्यया प्रपञ्चः कृतोऽस्त्विति चेत्– विनिगमकाभावात्सर्वाविद्याकृतोऽनेकतन्त्वारब्ध-

---

अज्ञानसंबन्धतदभावौ बन्धमोक्षाविति मतद्वयमपि तस्य ज्ञाननाश्यत्वप्रतिपादकश्रुतिस्मृतिभाष्यादिस्वारस्यविरुद्धं मत्वा तदविरुद्धं मतमाह—**इतरे त्विति** । **अभ्युपगम्यैवेति** । अविद्याभेदानुपगमे तत्सत्त्वतन्नाशरूपयोर्बन्धमोक्षयोरुपपादयितुमशक्यत्वात् । न च तस्या एकत्वेऽप्यंशवत्त्वकल्पनया तन्नाशरूपो मोक्षः प्रागुपपादित इति वाच्यम् । विरोधिविद्योदये तदवस्थानायोगस्याप्युक्तत्वात् । न च जीवन्मुक्तौ तल्लेशानुवृत्त्यभ्युपगमविरोध इति वाच्यम् । अविद्यानाशेऽपि तत्संस्कारस्य यावत्प्रारब्धक्षयमनुवर्तमानस्याविद्यालेशत्वेन विवक्षिततायाः सदृष्टान्तं वक्ष्यमाणत्वादिति भावः ॥

एवं नानाजीववादे बन्धमोक्षव्यवस्थां बहुप्रकारामुपपाद्य तदुपपादनोपयोगितया प्रसक्तमविद्यानानात्वमुपजीव्याक्षेपमवतारयति—**अस्मिन्पक्ष इति** । अविद्यानानात्वपक्ष इत्यर्थः । **कस्येति** । किमेकस्य जीवस्याविद्यया प्रपञ्चारम्भ उत सर्वेषामविद्याभिः । नाद्यः, विनिगमनाविरहात् । न द्वितीयः, एकाविद्यानाशे सर्वप्रपञ्चनाशापत्त्या मुक्तेतरजीवानां प्रपञ्चानुपलब्धिप्रसङ्गादित्याक्षेपाभिप्रायः । द्वितीयपक्षं परिगृह्य तत्रोक्तानुपपत्तिं परिहरति—**विनिगमका-**

पटवत्। एकस्य मुक्तौ तदविद्यानाशे एकतन्तुनाशे पट
स्येव तत्साधारणप्रपञ्चस्य नाशः। तदैव विद्यमानत
न्त्वन्तरैः पटान्तरस्येवेतराविद्याभिः सकलेतरसाधारण
प्रपञ्चान्तरस्योत्पादनमित्येके ॥

तत्तदज्ञानकृतप्रातिभासिकरजतवन्न्यायमते तत्तदी
क्षाबुद्धिजन्यद्वित्ववच्च तत्तदविद्याकृतो वियदादिप्रपञ्च

भावादित्यादिना। सर्वाविद्याकृत इति। सर्वेषां जीवानां सर्व
विद्यापरिणाम इत्यर्थः। यद्वा सर्वाविद्याविषयकृतब्रह्मविवर्त
प्रपञ्च इत्यर्थः। प्रथमव्याख्याने दृष्टान्तमाह— अनेकतन्त्वार
ब्धेति। सकलेतरेति। सकलाः समस्ता मुक्तजीवापेक्षया य इत
तेषां साधारणप्रपञ्चान्तरस्येत्यर्थः ॥

प्रपञ्चस्य सर्वाविद्याकार्यत्वेऽपि तद्भेदात्प्रपञ्चस्यापि प्रतिपुरु
भेद एवेति मतं सदृष्टान्तमाह— तत्तदिति। ननु यत्रैकदा बहून
शुक्तौ रजतभ्रमो भवति तत्र प्रतिपुरुषमज्ञानभेदेन तत्कृतरजतभे
दोऽत्र दृष्टान्तत्वेन वक्तव्यः। स च न संभवति, तत्रापि ता
त्पुरुषाणामज्ञानैरेकस्यैव रजतस्योत्पत्तिसंभवादिति चेत्, न। तः
दैवयोगादेकस्य पुरुषस्य प्रथमं शुक्तित्वविशेषदर्शने सति 'ने
रजतम्' इति बाधकप्रत्यक्षेण सोपादानस्य रजतस्य नाशोर्ज
तदितरेषां रजतभ्रमानुवृत्त्या रजतभेदस्यावश्यिकतया दृष्टान्तसि

प्रतिपुरुषं भिन्नः । शुक्तिरजते 'त्वया यदृष्टं रजतं तदेव मयापि' इतिवदैक्यभ्रममात्रमित्यन्ये ॥

जीवाश्रिताविद्यानिवहाद्भिन्ना मायैवेश्वराश्रिता प्रप-

द्वेरिति भावः । न्यायमत इति । सिद्धान्ते त्वेकत्ववद्द्वित्वादिकमपि यावद्द्रव्यभाव्येव । न तु तत्तदपेक्षाबुद्धिजन्यम्, अनन्तद्वित्वादेस्तदुत्पत्त्यादीनां च कल्पने गौरवात् । अपेक्षाबुद्धेस्तद्व्यञ्जकत्वाभ्युपगमान्न सदा तत्प्रत्यक्षापत्तिरिति स्वीकारादिति भावः । ननु तर्हि यथा तत्तद्रजतं तस्य तस्यैव प्रत्यक्षं नान्यस्य, तथा तत्तदविद्याकल्पितः प्रपञ्चोऽपि तस्य तस्यैव प्रत्यक्षः स्यान्नान्यस्य । तथा च यः प्रपञ्चस्त्वयानुभूयते स एव मयाप्यनुभूयत इति प्रत्यभिज्ञानप्रत्यक्षं न स्यादिति शङ्कां दृष्टान्तेन परिहरति— शुक्तिरजत इति । उपलक्षणमेतत् । 'यौ द्वौ रामकृष्णौ त्वया दृष्टौ तावेव मयापि दृष्टौ' इति प्रत्यभिज्ञानं न्यायमते द्वित्वभेदेऽपि दृश्यते, तद्वदिति बोध्यम् ॥

वियदादिप्रपञ्चो न जीवविद्यापरिणामः, किं तु जीवाश्रिताविद्यासंघाताद्भिन्ना माया सर्वजीवान्प्रति साधारणी वियदादिप्रपञ्चपरिणाम्युपादानमुपेयते । अतो वियदादिप्रपञ्चस्यैकत्वात्तदेकत्वप्रतीतिर्न भ्रममात्रमिति मतं दर्शयति— जीवाश्रितेति । मायाया अविद्याभ्यो भिन्नत्वे ईश्वराश्रितत्वे च प्रमाणादिकं प्रागेव दर्शितमिति नात्र तदुच्यते । अविद्यानां प्रपञ्चोपादानत्वाभावे वैयर्थ्यमाश-

ञ्चकारणम् । जीवानामविद्यास्त्वावरणमात्रे प्रातिभासिक-शुक्तिरजतादिविक्षेपेऽपि वोपयुज्यन्त इत्यपरे ॥

ङ्क्याह— **जीवानामिति** । उक्तशङ्कानिवृत्त्यर्थस्तुशब्दः । यत्किंचित्कार्यं प्रत्यप्युपादानत्वाभावो मात्रशब्दार्थः । न च 'नाहं प्रकाशः सर्वस्य योगमायासमावृतः' इति भगवद्वचने, अहं परमात्मा सर्वस्य प्राणिजातस्य प्रकाशः पूर्णानन्दादिरूपेण स्फुरद्रूपो न भवामि, मम सर्वज्ञत्वसर्वेश्वरत्वसर्वात्मकत्वादिधर्मजातं घटयन्त्या मायया वृतत्वादित्यर्थक ईश्वराश्रितमायाया एव ब्रह्मावारकत्वप्रतिपादनात्तद्विरोध इति वाच्यम् । 'ब्रह्म तत्त्वतो न जानामि' इत्यावारकस्य जीवाश्रितत्वानुभवानुसारेण जीवाश्रिताविद्याया एव तदावारकत्वे वक्तव्ये सति भगवद्वचनगतमायापदस्य जीवचैतन्ये संसारघटकाविद्यालक्षकत्वोपपत्तेरिति भावः । अविद्याया आवरण इव प्रातिभासिकविक्षेपेऽपि परिणाम्युपादानत्वस्वीकारान्न वैयर्थ्यशङ्कावकाश इत्याशयेनाह— **प्रातिभासिकेति** । ननु जीवाश्रिताविद्यानां जीवचैतन्याध्यस्तप्रातिभासिकस्वप्नप्रपञ्चोपादानतया तत्रोपयोगसंभवेऽपि शुक्तिरजताद्युपादानत्वं न संभवति, शुक्त्याद्यवच्छिन्नचैतन्ये रजताद्यधिष्ठाने तासामभावादिति चेत्, सत्यम् । आदिपदसंगृहीतः स्वप्न एवात्र विवक्षित इत्यदोषः । यद्वा वाचस्पतिमत इव शुक्तिरजतादेरपि जीवाविद्याविषयीकृतशुक्त्याद्यवच्छिन्नचैतन्यविवर्तत्वमभिप्रेत्य जीवाविद्यानां प्रातिभासिकरजतादावुपयोगकथ-

अवसितमुपादानत्वं तत्प्रसक्तानुप्रसक्तं च ॥

अथ कीदृशं कर्तृत्वम् । केचिदाहुः— 'तदैक्षत'

नोपपत्तेर्न दोषः ॥

पूर्वमुक्तेऽभिन्ननिमित्तोपादानत्वरूपे ब्रह्मलक्षण उपादानत्वं विवर्ताधिष्ठानत्वरूपमिति साधितम् । तत्प्रसङ्गाज्जीवेश्वरनिरूपणं प्राप्तम् । तदनु जीवैकत्वनानात्वबन्धमोक्षप्रपञ्चैकत्वनानात्वनिरूपणं प्रसक्तम् । तदेतत्सर्वं निरूपितमिति निरूपयिष्यमाणार्थप्रतिपत्त्युपयोगितयोपसंहरति— **अवसितमिति** । समाप्तमित्यर्थः । **उपादानत्वमिति** । तन्निरूपणमित्यर्थः ॥

लक्षणान्तर्गतं कर्तृत्वं निरूपयितुमाक्षिपति— **अथेति** । उदासीनस्य ब्रह्मणः कर्तृत्वधर्मासंभवादित्यर्थः । स्वतस्तदसंभवेऽप्यौपाधिकं तत्संभवतीति परिहरति— **केचिदाहुरित्यादिना** । यद्वा जगदुपादानस्य ब्रह्मणो न तत्कर्तृत्वं संभवति, घटाद्युपादानस्य मृदादेस्तत्कर्तृत्वादर्शनादित्याक्षिपति— **अथेति** । घटेश्वरसंयोगादावुपादानस्यैवेश्वरस्य कर्तृत्वदर्शनाद्ब्रह्मण एव कर्तृत्वप्रतिपादकश्रुतिबलाच्च तस्य तत्संभवतीति परिहरति— **केचिदाहुरित्यादिना** । अथ वा ब्रह्मणः कर्तृत्वं कीदृशमिह लक्षणे विवक्षितम् । किं ज्ञानचिकीर्षाकृतिमत्त्वरूपं किं वा कार्यानुकूलज्ञानवत्त्वरूपं कार्यानुकूलसृष्टव्यालोचनात्मकज्ञानवत्त्वरूपं वा । नाद्यः, ब्रह्मणस्तादृशकर्तृत्वे माना-

'सोऽकामयत' 'तदात्मानं स्वयमकुरुत' इति श्रवणान्न्यायमत इव कार्यानुकूलज्ञानचिकीर्षाकृतिमत्त्वरूपं तदिति ॥

अन्ये तु—चिकीर्षाकृतिकर्तृत्वनिर्वाहाय चिकीर्षाकृत्यन्तरापेक्षायामनवस्थाप्रसङ्गात् कार्यानुकूलज्ञानवत्त्वमेव

भावात्। न द्वितीयतृतीयौ, कार्यानुकूलज्ञानस्य कार्यत्वे तत्कर्तृत्वनिर्वाहाय ज्ञानान्तरापेक्षायामनवस्थाप्रसङ्गात्तस्याकार्यत्वे च नित्यज्ञानस्वरूपस्य ब्रह्मणस्तादृशज्ञानवत्त्वरूपकर्तृत्वायोगादिति भावः। तत्र प्रथमपक्षं सप्रमाणं दर्शयति— **केचिदाहुरिति**। श्रुतिषु तच्छब्दा ब्रह्मपराः। स्वयमित्यस्यान्यानधिष्ठितमित्यर्थः। आत्मानं जगदात्मनाकुरुत कृतवदित्यर्थः। एताभिः श्रुतिभिः सृष्ट्यनुकूला ज्ञानेच्छाकृतयः प्रतिपाद्यन्त इति भावः। न च ज्ञानादीनामपि कार्यत्वात्तत्कर्तृत्वाय ज्ञानाद्यन्तरापेक्षायामनवस्था स्यादिति वाच्यम्। ज्ञानादित्रितयातिरिक्तकार्य उक्तरूपकर्तृत्वस्य विवक्षितत्वान्नानवस्थाप्रसङ्गः। ज्ञानादित्रयं प्रति त्वन्यदेव कर्तृत्वं भविष्यतीत्यभिप्रायः ॥

प्रथमपक्षं दूषयन्द्वितीयपक्षं साधयति— **अन्ये त्विति**। **अनवस्थाप्रसङ्गादिति**। कर्तृत्वलक्षणाननुगमपरिहाराय कार्यमात्रं प्रति ज्ञानादित्रितयवत्त्वरूपे कर्तृत्वे वक्तव्ये सत्यनवस्थाप्रसङ्गो भवत्येवेति भावः। **ज्ञानवत्त्वमेवेति**। इच्छाकृत्योरेवका-

ब्रह्मणः कर्तृत्वम् । न च ज्ञानेऽप्येष प्रसङ्गः, तस्य ब्रह्मस्वरूपत्वेनाकार्यत्वात् । एवं च विवरणे जीवस्य सुखा-

---

रेण व्यवच्छेदः क्रियते, तयोः कर्तृत्वलक्षणप्रवेशे च गौरवादिति भावः । न चैवमुदाहृतश्रुत्योरिच्छाकृतिप्रतिपादनं व्यर्थं स्यादिति वाच्यम् । ताभ्यां श्रुतिभ्यां तयोः सृष्टिहेतुत्वलाभेऽपि कर्तृत्वनिर्वाहकतया तयोः प्रतिपादनमित्यत्र मानाभावादिति भावः । **अकार्यत्वादिति** । नित्यज्ञानस्वरूपस्य ब्रह्मणस्तादृशज्ञानवत्त्वमौपाधिकभेदमादाय द्रष्टव्यम् । न चैवमपि सृष्टिकारणज्ञानस्य 'तदैक्षत' इति श्रुत्या कादाचित्कत्वप्रतिपादनाविरोध इति वाच्यम् । ब्रह्मस्वरूपतया नित्यस्यापि ज्ञानस्य प्राण्यदृष्टपरिपाकलक्षणो यः कादाचित्कः सहायस्तद्विशिष्टतया कादाचित्कत्वमभिप्रेत्य तच्छ्रुत्युपपत्तेरिति भावः । कार्यानुकूलज्ञानवत्त्वमात्रं कर्तृत्वमित्यत्र गमकमाह— **एवं चेति** । इच्छाकृत्योः कर्तृत्वलक्षणाननुप्रवेशे विवक्षिते सतीत्यर्थः । **जीवस्येति** । **तस्य सुखदुःखाद्युत्पत्त्यनुकूलज्ञानं साक्षिरूपं यथा विद्यते तथा** तदनुकूलेच्छादिकं नास्ति, अननुभवादनभ्युपगमाच्च । **न चेदमनुपपन्नम्**, सुखेच्छया तत्साधनानुष्ठानद्वारा सुखोत्पत्तेरनुभवसिद्धत्वादिति वाच्यम् । सुखाद्युपादानान्तःकरणगोचरचिकीर्षाकृत्योरभावस्यात्र विवक्षितत्वात् । तथा च कार्यानुकूलज्ञानवत्त्वमात्रं कर्तृत्वमित्यङ्गीकारे सत्येव विवरणोक्तिः संगच्छते नान्यथेत्यर्थः । 'निःश्वसितमस्य वेदा यो वीक्षितमेतस्य पञ्च भूतानि ।

दिकर्तृत्वोक्तिः, 'वीक्षणमात्रसाध्यत्वाद्दियदादि वीक्षितं हिरण्यगर्भद्वारा वीक्षणाधिकप्रयत्नसाध्यत्वाद्भौतिकं स्मितम्' इति कल्पतरूक्तिश्च संगच्छत इति वदन्ति ॥

स्मितमेतस्य चराचरस्य च सृतिर्महाप्रलयः ॥' इति वाचस्पतिश्लोके महाभूतानां ब्रह्मवीक्षितत्वमुक्तम्, तथा भौतिकस्य चराचरप्रपञ्चस्य ब्रह्मस्मितत्वमुक्तम् । तदुभयतात्पर्यकथनपरे कल्पतरुग्रन्थे ब्रह्मवीक्षणमात्रसाध्यत्वं महाभूतेषु तद्वीक्षितत्वनिर्देशस्यालम्बनं दर्शितम् । तच्च ब्रह्मणो महाभूतसृष्ट्यनुकूलज्ञानवत्तदनुकूलचिकीर्षाकृत्योरप्युपगमे न संगच्छते, वीक्षणातिरिक्तचिकीर्षादिव्यावर्तकमात्रपदविरोधात् । लोके हि मन्दहासरूपं स्मितं ज्ञानाधिकप्रयत्नसाध्यं प्रसिद्धम् । तथा च परब्रह्मणो भौतिकसृष्टिं प्रति यथा वीक्षणमपेक्षितं तथा हिरण्यगर्भोत्पत्तिलक्षणव्यापारोऽप्यधिकोऽपेक्षितः, चराचरसृष्टौ परब्रह्मण इव हिरण्यगर्भस्यापि कर्तृतायाः श्रुतिस्मृतिसिद्धत्वात् । तथा च परब्रह्मणो भौतिकसृष्ट्यनुकूलं यद्वीक्षणं तदधिकव्यापारापेक्षित्वं चराचरस्य ब्रह्मस्मितत्वनिर्देशालम्बनं दर्शितम् । तदपि महाभूतसृष्टावेव वीक्षणाधिकप्रयत्नापेक्षायां न संभवति । हिरण्यगर्भद्वारेत्यस्य वाक्यस्य हिरण्यगर्भोत्पत्तिमपेक्ष्येत्यर्थः । न तु हिरण्यगर्भः साक्षात्कर्ता ब्रह्म च प्रयोजककर्त्रिति यथाश्रुतार्थो ग्राह्यः, द्वितीयाध्यायान्तिमाधिकरणे परमेश्वरस्य भौतिकसृष्टावपि साक्षात्कर्तृतायाः साधितत्वादिति भावः । वाचस्पतिश्लोकश्च ब्रह्म-

अपरे तु— कार्यानुकूलस्रष्टव्यालोचनरूपज्ञानवत्त्वं कर्तृत्वम्; न कार्यानुकूलज्ञानवत्त्वमात्रम्, शुक्तिरजतस्वाप्नभ्रमादिष्वध्यासानुकूलाधिष्ठानज्ञानवत्त्वेन जीवस्य कर्तृत्वप्रसङ्गात् । न चेष्टापत्तिः 'अथ रथान्रथयोगान्पथः सृजते स हि कर्ता' इत्यादिश्रुत्यैव जीवस्य स्वप्नप्रपञ्चकर्तृत्वोक्तेरिति वाच्यम् । भाष्यकारैः 'लाङ्गलं गवादीनुद्वहतीतिवत्कर्तृत्वोपचारमात्रं रथादिप्रति-

---

स्तुतिपरः । ब्रह्म ह्यतिप्रशस्तम् । तथा हि— यस्य ब्रह्मणः पुरुषनिःश्वासवत्प्रयत्नं विनैव वेदाः सर्वे कार्यभूताः, यस्य च वीक्षणादेव महाभूतानि भवन्ति, यस्य च हिरण्यगर्भेण सह चराचरात्मकं विश्वं मन्दहासमात्रम्, यस्य च महाप्रलयोऽपि सुषुप्तिप्रायः, तत्माशस्त्ये को विस्मय इति भावः ॥

द्वितीयपक्षेऽपि दोषं वदंस्तृतीयपक्षं समर्थयते— **अपरे त्विति** । **स्रष्टव्यालोचनेति** । मयेदं स्रष्टव्यमित्याकारकमित्यर्थः । **अध्यासेति** । अध्यासस्याध्यस्यमानरजतादेरनुकूलं यदधिष्ठानज्ञानं तद्वत्त्वेनेत्यर्थः । **न चेष्टापत्तिरिति** । न चेत्यस्य वाच्यमित्यनेन संबन्धः । अथेत्यस्य स्वप्नकाल इत्यर्थः । जीवस्य रथादिस्रष्टृत्वे हेतुमाह— **स हि कर्तेति** । हि यस्मात्कारणात्स्वाप्नरथादिहेतुकर्मकर्ता जीवस्तस्मादित्यर्थः । **भाष्यकारैरिति** । 'लाङ्गलं गवादीनुद्वहति' इति प्रयोगे लाङ्गलस्य गवादिस्थितिकर्तृत्वरूपं गवा-

भाननिमित्तत्वेन' इति व्याख्यातत्वादित्याहुः। अनेनैव निखिलप्रपञ्चरचनाकर्तृभावेनार्थसिद्धं सर्वज्ञत्वं ब्रह्मणः 'शास्त्रयोनित्वात्' इत्यधिकरणे वेदकर्तृत्वेनापि समर्थितम् ॥

द्युद्वोढृत्वं मुख्यं नास्ति, किं तु लाङ्गले सति कृषिद्वारा गवादिस्थितिहेतुपलालादितृणलाभोऽस्तीति कृत्वोपचारादुच्यते 'गवादीनुद्वहति' इति; तद्वत्स्वाप्नरथादिपदार्थोपलब्धिहेतुधर्मादिकर्तृत्वेन रथादिप्रतिभाननिमित्तत्वरूपेण हेतुना तस्य कर्तृत्वमुपचर्यते 'स हि कर्ता' इति श्रुतौ– इति भाष्यकारैः कर्तृत्वस्यौपचारिककर्तृत्वरूपतयोक्तत्वादित्यर्थः। एतेन विवरणे सुखादिकर्तृत्वोक्तिरप्युपचारमात्रपरा व्याख्याता। 'मयेदं सुखदुःखादि द्रष्टव्यम्' इत्यालोचनरूपज्ञानाभावेऽपि सुखादिदर्शनेन मुख्यकर्तृत्वासंभवात् 'वीक्षणमात्रसाध्यत्वात्' इति कल्पतरौ द्रष्टव्यालोचनरूपं वीक्षणं विवक्षितमिति न तद्विरोध इति द्रष्टव्यम्। जन्मादिसूत्रेण निखिलजगत्कर्तृत्वे सति तदुपादानत्वे ब्रह्मणो लक्षणत्वेन प्रतिपादिते सति तस्य सर्वज्ञत्वमर्थात्सिध्यति, निखिलजगत्सृष्टिस्थितिसंहारकर्तृत्वस्य सर्वज्ञत्वं विनासंभवादित्याह— अनेनैवेति। सर्वज्ञत्वसिद्धौ हेत्वन्तरमाह— शास्त्रयोनित्वादिति। अस्य सूत्रस्यार्थमाह— वेदकर्तृत्वेनापीति। ननु यथा वेदकर्तृत्वं भाष्यादिषूक्तप्रकारेण सर्वज्ञत्वं साधयति तथा जन्मादिसूत्रोपात्तं सर्वकर्तृत्वमपि तत्साधयति। तथा च पूर्वसूत्रेऽर्थसिद्धमिह तु

अथ कथं ब्रह्मणः सर्वज्ञत्वं संगच्छते, जीववदन्तः-करणाभावेन ज्ञातृत्वस्यैवासंभवात् ॥

अत्र सर्ववस्तुविषयकसकलप्राणिधीवासनोपरक्ताज्ञा-

साध्यत इत्युक्तौ को हेतुरिति, उच्यते— पूर्वसूत्रं लक्षणपरं न तु सर्वज्ञत्वसाधनपरम्; इदं तु तत्साधनपरमिति तात्पर्यसत्त्वासत्त्वाभ्यां तथा व्यवहारः । ततश्च ब्रह्म सर्वज्ञं शास्त्रकर्तृत्वादिति सूत्रयोजना । ननु ब्रह्मणः सर्वज्ञत्वम् 'यः सर्वज्ञः सर्ववित्' 'गुणी सर्ववित्' इत्यादिश्रुत्या कण्ठत एव प्रतिपाद्यते । तत्कात्र साधनापेक्षेति चेत्, सत्यम् । श्रुत्युक्ते सर्वज्ञत्वे प्रतिपत्तिदार्ढ्यायोपपत्तिसमर्पणात् ॥

एवं श्रुत्युपपत्तिसिद्धं सर्वज्ञत्वं निरूपयितुमाक्षेपमवतारयति— अथेति । जीवस्य हि स्वोपाध्यन्तःकरणवृत्तिज्ञानाश्रयत्वरूपं ज्ञातृत्वं प्रमाणसिद्धम् । ब्रह्मणश्चान्तःकरणाभावाज्ज्ञातृत्वं न संभवति । न च ब्रह्मणोऽप्यन्तःकरणमस्तीति वाच्यम् । 'कार्योपाधिरयं जीवः' इति श्रुत्या तस्य जीवोपाधित्वेन नियमितत्वात् । ज्ञातृत्वं च सर्वज्ञत्वव्यापकम्, ज्ञातृत्वविशेषरूपत्वात्सर्वज्ञत्वस्य । तथा च ब्रह्मणो ज्ञातृत्वस्य व्यापकस्य निवृत्त्या व्याप्यसर्वज्ञत्वनिवृत्तिरित्यर्थः । ज्ञातृत्वाभावे सर्वज्ञत्वं दूरापास्तमित्येवकारार्थः ॥

अन्तःकरणानां जीवोपाधित्वेऽपि तद्वासनानामीश्वरोपाधित्वात्संभवति कथंचित्तस्य सर्वज्ञत्वमिति परिहरति— **अत्र सर्वव-**

नोपाधिक ईश्वरः । अतस्तस्य सर्वविषयवासनासाक्षितया सर्वज्ञत्वमिति भारतीतीर्थादिपक्षः प्रागेव दर्शितः ॥

प्रकटार्थकारास्त्वाहुः— यथा जीवस्य स्वोपाध्यन्तःकरणपरिणामाश्चैतन्यप्रतिबिम्बग्राहिण इति तद्योगाज्ज्ञातृत्वम्, एवं ब्रह्मणः स्वोपाधिमायापरिणामाश्चित्प्रतिबिम्बग्राहिणः सन्तीति तत्प्रतिबिम्बितैः स्फुरणैः कालत्रयवर्तिनोऽपि प्रपञ्चस्यापरोक्ष्येणाकलनात्सर्वज्ञत्वमिति ॥

स्त्विति । अत्रेत्यस्यास्मिन्नाक्षेप इत्यर्थः । **सर्वविषयवासनासाक्षितयेति** । स्वोपाधिभूतवासनाविषयसर्वत्वस्वभासकतयेत्यर्थः ॥

अस्मिन्समाधाने प्रागुक्तमस्वरसं मनसि निधाय समाधानान्तरमाह— **प्रकटार्थकारास्त्विति** । यथान्तःकरणं ज्ञातृत्वोपाधिस्तथा मायापि ज्ञातृत्वोपाधिर्भवत्येव । तथा च ब्रह्मणि मायोपाधिके सर्वज्ञत्वव्यापकस्य ज्ञातृत्वस्य निवृत्त्यभावान्न सर्वज्ञत्वनिवृत्तिशङ्केत्यर्थः । **स्वोपाधिमायेति** । 'मायिनम्' इति श्रुतेः 'मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः' इति वाक्यवृत्तिवचनाच्च मायाया ईश्वरोपाधित्वं सिद्धमिति भावः । सर्वज्ञत्वसर्वनियन्तृत्वसर्वात्मकत्वानि लक्षणान्यसाधारणधर्मा यस्य स सर्वज्ञत्वादिलक्षण इत्यर्थः । **आकलनादिति** । विषयीकरणादित्यर्थः ॥

तत्त्वशुद्धिकारास्तु— उक्तरीत्या ब्रह्मणो विद्यमाननिखिलप्रपञ्चसाक्षात्कारसंभवः, तज्जनितसंस्कारवत्तया च स्मरणोपपत्तेरतीतसकलवस्त्ववभाससिद्धिः, सृष्टेः प्राङ्मायायाः सृज्यमानाखिलपदार्थस्फुरणरूपेण जीवादृष्टानुरोधेन विवर्तमानत्वात्तत्साक्षितया तदुपाधिकस्य ब्रह्मणोऽपि तत्साधकत्वसिद्धेरनागतवस्तुविज्ञानोपपत्तिरिति सर्वज्ञत्वं समर्थयन्ते ॥

तत्त्वशुद्धिकारास्त्विति । प्रकटार्थकाराणां मतेऽतीतानागतप्रपञ्चरूपविषयेऽपीश्वरीयं मायावृत्तिप्रतिबिम्बरूपं ज्ञानमपरोक्षम् । तत्त्वशुद्धिकाराणां मतेऽतीतादिविषये जीवानामिवेश्वरज्ञानमपि परोक्षमेवेति विशेषार्थकस्तुशब्दः । **विद्यमानेति** । लोके प्रत्यक्षज्ञानस्य वर्तमानवस्तुमात्रविषयकत्वस्वाभाव्यदर्शनेन तस्य क्लृप्तस्वभावानतिलङ्घने कारणाभावात्सर्वज्ञत्वप्रतिपादकशास्त्रस्येश्वरीयज्ञानगतपरोक्षत्वापरोक्षत्वयोरुदासीनत्वादिति भावः । **तज्जनितेति** । विद्यमानवस्तुसाक्षात्कारजनितेत्यर्थः । अनागतवस्तुज्ञानमुपपादयति—**सृष्टेः प्रागिति** । स्फुरणपदं वृत्तिपरम । विवर्तमानत्वं परिणममानत्वम । **तदुपाधिकस्येति** । मायोपाधिकस्येत्यर्थः । कथं तदुपाधिकत्वम, अत आह— **तत्साक्षितयेति** । तस्यां मायायां प्रतिबिम्बिततयेत्यर्थः । सृष्टेः पूर्वकाले मायायास्तथा परिणामे कारणमाह— **जीवादृष्टेति** । **तत्साधकत्वसिद्धेरिति** ।

कौमुदीकृतस्तु वदन्ति— स्वरूपज्ञानेनैव ब्रह्मणः स्वसंसृष्टसर्वावभासकत्वात्सर्वज्ञत्वम्, अतीतानागतयोरप्यविद्याचित्राभित्तौ विमृष्टानुन्मीलितचित्रवत्संस्कारा-

---

मायावृत्तिकर्तृत्वसिद्धेरित्यर्थः। अनागतेति। अनागतवस्तुविषयकस्य ज्ञानस्य वृत्तिप्रतिबिम्बरूपस्य ब्रह्मण्युपपत्तिरित्यर्थः॥

जीववद्ब्रह्मणोऽपि चैतन्यप्रतिबिम्बोपेतैर्वृत्तिज्ञानैः सर्वज्ञत्वं निरूपितं मतद्वयेन। इदानीं स्वरूपज्ञानेनैव तन्निरूपयति—**कौमुदीकृतस्त्विति**। नन्वतीतानागतप्रपञ्चयोः प्रलयकाले सृष्टिपूर्वकाले च सत्त्वे मानाभावात्तदा ब्रह्मणः सर्वज्ञत्वं न सिध्यति, असतोस्तयोश्चैतन्यसंसृष्टत्वासंभवादिति, नेत्याह— **अतीतानागतयोरपी**ति। अतीतप्रपञ्चस्य प्रलयकाले संस्कारात्मना सत्त्वस्य देवताधिकरणे सूत्रभाष्यकारादिभिः साधितत्वात्तथानागतस्यापि सृष्टिपूर्वकाले संस्कारात्मनैव सत्त्वस्यारम्भणाधिकरणादिषु साधितत्वादतीतादिवस्तुसंसृष्टब्रह्मचैतन्यस्य तदापि सर्वज्ञत्वसिद्धिरिति भावः। चित्रस्यानुन्मीलितत्वमनभिव्यक्तत्वम्। तत्र हेतुर्विमृष्टत्वम्। अविद्यैव चित्राभित्तिरिति रूपकमत्र द्रष्टव्यम्। अत्रेदं चिन्त्यम्—स्थूलप्रपञ्चस्थितिकाले संस्कारात्मकसूक्ष्मप्रपञ्चो नास्ति। प्रलयकालादौ च स्थूलः प्रपञ्चो नास्ति। तथा च ब्रह्मचैतन्यस्य सदा सर्वप्रपञ्चसंसृष्टत्वाभावात्सदा तस्यासंकुचितसर्वज्ञत्वं न संभवतीति। स्वरूपज्ञानेनैवेत्यत्रत्यस्यावधारणस्य व्यव-

त्मना सत्त्वेन तत्संसर्गस्याप्युपपत्तेः । न तु वृत्तिज्ञानैस्तस्य सर्वज्ञत्वम्; 'तमेव भान्तमनुभाति सर्वम्' इति सावधारणश्रुतिविरोधात्, सृष्टेः प्राक् 'एकमेवाद्वितीयम्' इत्यवधारणानुरोधेन महाभूतानामिव वृत्तिज्ञानानामपि प्रलयस्य वक्तव्यतया ब्रह्मणस्तदा सर्वज्ञत्वाभावापत्त्या प्राथमिकमायाविवर्तरूप ईक्षणे तत्पूर्वके

च्छेद्यमाह— न तु वृत्तिज्ञानैरिति । श्रुतिगतस्यावधारणस्य स्वप्रकाशात्मातिरिक्तानवभास्यमादित्यादिजगदित्यर्थः । अत्रेदं चिन्त्यम्— ब्रह्मचैतन्यस्य जगदवभासनार्थे मायावृत्त्यपेक्षायां यदि श्रौतमवधारणं विरुध्यते तदा जीवचैतन्यस्य घटाद्यवभासनार्थमन्तःकरणवृत्त्यपेक्षायामपि तद्विरुध्यत एव । यदि चान्तःकरणवृत्तीनां जडत्वात्तदपेक्षायामपि सर्वं जडवस्तु चैतन्यमात्रावभास्यमिति सावधारणश्रुत्यर्थस्य न बाधः, तदा मायावृत्त्यपेक्षायामपि तुल्यं समाधानमिति । प्रलयकाले सर्वज्ञत्वाभावे को दोषः, तत्राह— प्राथमिकेति । तदा सर्वज्ञत्वाभावे सति सर्गादौ 'तदैक्षत' इति श्रुत्युक्तं भूतसृष्ट्यनुकूलमीक्षणं प्रति कर्तृत्वासंभवेनेक्षणपूर्वकभूतादिसर्गे प्रत्यपि ब्रह्मणः कर्तृत्वाभावप्रसङ्गादित्यर्थः । अत्रापीदं चिन्त्यम्—एवमपि सृष्टिपूर्वकाले ब्रह्मचैतन्यव्यतिरिक्तस्य मायातत्संबन्धादेः सत्त्वादद्वितीयत्वावधारणं मुख्यं न संभवति । यदि च मायादेरनादित्वप्रतिपादकश्रुत्यादिबलाद्याकृतकार्यात्मकद्वितीयाभावावधारणपरं तद्वचनमित्युच्येत, तदा सर्वदा सर्वविषय-

महाभूतादौ च स्रष्टृत्वाभावप्रसङ्गाच्च । एवं सति ब्रह्मणः सर्वविषयकज्ञानात्मकत्वमेव स्यान्न तु सर्वज्ञानकर्तृत्वरूपं सर्वज्ञत्वमिति चेत्, सत्यम् । सर्वविषयकज्ञानात्मकमेव ब्रह्म, न तु तस्य ज्ञानकर्तृत्वरूपं ज्ञातृत्वम-

---

कज्ञानकर्तृत्वरूपसर्वज्ञत्वप्रतिपादकश्रुत्यादिबलात्सर्वज्ञत्वघटकमाया-वृत्तिसंततिव्यतिरिक्तकार्याभावावधारणपरमद्वितीयत्ववचनमित्यपि कल्पनं तुल्यम् । मायावृत्तिभिः सर्वज्ञत्वसमर्थनमेव भाष्यसंमतम् । तथा चेक्षत्यधिकरणभाष्यम्— 'अपि चाविद्यादिमतः संसारिणः शरीराद्यपेक्षा ज्ञानोत्पत्तिः स्यात्, न ज्ञानप्रतिबन्धकारणरहितस्येश्वरस्य' इति । सृष्टेः पूर्वकाले ब्रह्मणः स्रष्टव्यालोचनरूपमीक्षणं न संभवति, वृत्तिज्ञानरूपेक्षणस्य शरीरादिकारकसाध्यतया लोकसिद्धत्वेन ब्रह्मणस्तदा शरीराभावादिति सांख्यशङ्कानिरासार्थमिदं भाष्यम् । जीवस्यैव वृत्तिज्ञानोत्पत्तिः शरीरादिसाध्या । ईश्वरस्य तु मायावृत्तिरूपज्ञानोत्पत्तिः शरीराद्यनपेक्षा । तथा च सृष्टेः पूर्वं प्रलयकालेऽपि तस्य मायावृत्तिरूपमीक्षणं सदा सर्वज्ञत्वं च संभवतीति समाधानभाष्याभिप्रायः । इदं भाष्यमित्थमेव व्याख्यातृभिर्निर्णीतम् । भाष्ये ज्ञानप्रतिबन्धकारणमविद्यादीति मन्तव्यम् । ततश्च मायावृत्तिभिः सर्वज्ञत्वसमर्थनपक्षदूषणमसंगतमिति मन्तव्यम् । शङ्कते— **एवं सतीति** । **स्वरूपज्ञानेनैव सर्वज्ञत्वसमर्थने सतीत्यर्थः । न त्विति** । स्वरूपज्ञानस्य नित्यत्वादिति भावः । **न तु तस्य ज्ञानकर्तृत्वरूपमिति ।**

स्ति। अत एव 'वाक्यान्वयात्' इत्यधिकरणेऽपि ज्ञातृत्वं जीवलिङ्गमित्युक्तं भाष्यकारैः। 'यः सर्वज्ञः सर्ववित्' इत्यादि श्रुतिरपि तस्य ज्ञानरूपत्वाभिप्रायेणैव योजनीयेति॥

ब्रह्मण इति शेषः। अत्र यद्यपि ज्ञातृत्वं सामान्यरूपं सर्वज्ञानकर्तृत्वं तु विशेषरूपमिति न तयोरभेदः संभवति, तथापि ब्रह्मणो ज्ञातृत्वं नास्तीत्यत्रैव तात्पर्यं न तु तयोरभेदोक्तावपीत्यविरोधः। अत एवेति। ब्रह्मणो ज्ञातृत्वाभावादेवेत्यर्थः। इत्युक्तमिति। बृहदारण्यके मैत्रेयीब्राह्मणे पठ्यते— 'आत्मनस्तु कामाय सर्वं प्रिय भवत्यात्मा वा अरे द्रष्टव्यः' इत्यादि। अत्र किं जीवो द्रष्टव्यत्वेनोपदिश्यत उत प्रत्यगभिन्नः परमात्मा निष्प्रपञ्चस्वभाव इति संशयः। तत्र पूर्वपक्षः— पूर्ववाक्ये भोक्तुर्जीवस्य प्रकृतत्वादुपसंहारेऽपि 'विज्ञातारमरे केन विजानीयात्' इति विज्ञातृत्वस्य जीवधर्मस्य कीर्तनाच्च जीव एवात्र द्रष्टव्य उपदिश्यत इति। सिद्धान्तस्तु— प्रत्यगभिन्नः परमात्मैव द्रष्टव्यतयोपदिश्यते। कुतः, वाक्यान्वयात्। तथा हि— अत्रात्मवेदनेन सर्वं विदितं भवतीति प्रतिपाद्यते। तच्च सर्वाधिष्ठानब्रह्मपरिग्रहे घटते, न जीवपरिग्रहे। तथा 'इदं सर्वमात्मा' इत्यादिवाक्यान्यपि सर्वात्मके ब्रह्मण्येव तात्पर्येण प्रतिपादकतयान्वितानि लक्ष्यन्ते। 'आत्मनस्तु कामाय सर्वं प्रियं भवति' इति पूर्ववाक्ये जीवपरामर्शस्तु लोकसिद्धं भोक्तारमनूद्य तस्य शुद्धब्रह्मरूपेण द्रष्टव्यत्वोप-

यद्यपि ब्रह्म स्वरूपचैतन्येनैव स्वसंसृष्टसर्वावभासकम्, तथापि तस्य स्वरूपेणाकार्यत्वेऽपि दृश्यावच्छेदरूपेण ब्रह्मकार्यत्वात् 'यः सर्वज्ञः सर्ववित्' इत्यादिज्ञानकर्तृत्वश्रुतेरपि न कश्चिद्विरोध इत्याचार्यवाचस्पतिमिश्राः ॥

देशार्थः । 'विज्ञातारम्' इति वाक्यं तु जीवस्य विज्ञातृत्वरूपधर्मपरं न भवति, तस्य वाक्यस्य मुक्तजीवपरत्वान्मुक्तजीवे च निरुपाधिके तस्यासंभवात् । किं तु भूतपूर्वगत्या विज्ञातृत्वानुवादमात्रम्, स्वातन्त्र्येण न कस्यचिदर्थस्य साधकम् । तस्मान्मैत्रेयीब्राह्मणं प्रत्यगभिन्ने निर्विशेषे द्रष्टव्ये समन्वितमिति सिद्धमिति । अत्र ज्ञातृत्वं ब्रह्मसाधारणं चेज्जीवलिङ्गतया भाष्यकारैर्नोपन्यस्येत । उपन्यस्तं च । तस्माज्ज्ञातृत्वं ब्रह्मणो नास्तीति गम्यत इति भावः । ईश्वरस्य सर्वविषयकज्ञानकर्तृत्वानभ्युपगमे श्रुतिविरोधमाशङ्क्याह— यः सर्वज्ञ इति । प्रकृत्यर्थभूतज्ञानस्य नित्यत्वादिति भावः ॥

ननु नित्यचैतन्यमात्रस्य सर्वत्र लक्ष्यतया ज्ञाधातुवाच्यत्वायोगाद्विशिष्टचैतन्यस्य प्रकृत्यर्थत्वं वाच्यम् । तथा च विशिष्टस्य कार्यत्वसंभवात्प्रत्ययश्रुत्यर्थकर्तृत्वस्य न विरोधः । ब्रह्मणः सर्वज्ञानकर्तृत्वप्रतिपादकश्रुतिविरोधेन ज्ञातृत्वस्य जीवलिङ्गत्वोक्तेरभ्युच्चयमात्रत्वोपपत्तेस्तदधिकरणसिद्धान्ताभिमतनिर्विशेषब्रह्मव्यावृत्त-

नन्वीश्वरवज्जीवोऽपि वृत्तिमनपेक्ष्य स्वरूपचैतन्येनैव किमिति विषयान्नावभासयति ॥

अत्रोक्तं विवरणे— ब्रह्मचैतन्यं सर्वोपादानतया सर्वतादात्म्यापन्नं सत् स्वसंसृष्टं सर्वमवभासयति ; न जीवचैतन्यम्, तस्याविद्योपाधिकतया सर्वगतत्वेऽप्यनुपा-

---

त्वमात्रेण विज्ञातृत्वस्य पूर्वपक्षलिङ्गत्वोपन्यासोपपत्तेश्च भाष्यकारैरेव मुख्यस्य सर्वविषयकज्ञानकर्तृत्वस्येच्छत्याधिकरणे प्रतिपादितत्वाच्च प्रत्ययश्रुतेः स्वार्थपरत्वसंभवे तत्यागायोगाच्चेत्यस्वरसादाह— **यद्यपीत्यादिना** । चैतन्येनैवेति । न मायावृत्तिभिरित्येवकारार्थः । तर्हि प्रत्ययार्थबाधः, नेत्याह— **तथापीति** । तस्य स्वरूपचैतन्यस्येत्यर्थः । **दृश्यावच्छिन्नेति** ; न चानादिमायादिरूपदृश्यावच्छिन्नचैतन्यस्य कथमुक्तप्रकारेणापि कार्यत्वं सिध्येदिति वाच्यम् । मायादेरपि तत्तत्कार्यतादात्म्यापत्त्या कार्यत्वसिद्धौ मायाद्यवच्छिन्नस्यापि कार्यत्वस्य सुसंपादत्वादिति भावः ॥

आक्षिपति— **नन्विति** । **नावभासयतीति** । न चात्रेष्टापत्तिर्वक्तुं शक्यते, तथा सत्यविद्याप्रतिबिम्बचैतन्यरूपजीवस्य व्यापकतया स्वसंसृष्टसकलजगदवभासकत्वापत्त्या सर्वज्ञत्वप्रसङ्गात्स्वरूपचैतन्यस्य कारकानपेक्षतया **चक्षुरादिवैयर्थ्यप्रसङ्गाच्चेति** भावः ॥

अत्रोक्तमिति । अस्मिन्नाक्षेपे समाधानमुक्तमित्यर्थः । **न**

दानत्वेनासङ्गित्वात् । यथा सर्वगतं गोत्वसामान्यं स्वभावादश्वादिव्यक्तिसङ्गित्वाभावेऽपि सास्नादिमद्व्यक्तौ संसृज्यते, एवं विषयान्तरासङ्गेऽपि जीवः स्वभावादन्तःकरणे संसृज्यते । तथा च यदान्तःकरणस्य परिणामो वृत्तिरूपो नयनादिद्वारेण निर्गत्य विषयपर्यन्तं चक्षूरश्मिरिव झटिति दीर्घप्रभाकारेण परिणम्य विषयं व्याप्नोति तदा तमुपारुह्य तं विषयं गोचरयति । केव-

---

जीवचैतन्यमिति । यथा जगद्ब्रह्मसंसृष्टं तथा जीवसंसृष्टं न भवति । अतो न तस्य सर्वज्ञत्वप्रसक्तिरित्यर्थः । ननु जीवस्य यथा घटादिविषयैः संबन्धाभावस्तथान्तःकरणादिनापि संबन्धाभावस्तुल्यः, उपादानत्वाभावादेव । तथा चान्तःकरणादेर्वृत्तिं विनैव जीवचैतन्यरूपसाक्षिभास्यत्वं न स्यादित्याशङ्क्य, उपादानत्वाभावेऽपि जीवचैतन्यस्यान्तःकरणादिना तादात्म्यसंबन्धे दृष्टान्तमाह— यथा सर्वगतमिति । **संसृज्यत इति** । अतो नान्तःकरणादेः साक्षिभास्यत्वविरोध इति भावः । चक्षुरादिवैयर्थ्यप्रसङ्गं परिहरति— **तथा चेत्यादिना** । तथा चेत्यस्य जीवस्य स्वतो विषयसंबन्धाभावे सतीत्यर्थः । अन्तःकरणपरिणामस्य सहसा विषयव्याप्तौ दृष्टान्तश्चक्षूरश्मिरिवेति । **तमिति** । परिणाममित्यर्थः । **गोचरयतीति** । जीवचैतन्यमिति शेषः । विषयदेशे सतोऽपि जीवचैतन्यस्य स्वतो विषयावभासकत्वं नास्ति; तस्यैव तु वृत्त्यारूढस्य तदस्तीत्यत्र

लाग्न्यदाह्यस्यापि तृणादेरयःपिण्डसमारूढाग्निदाह्यत्ववत्केवलजीवचैतन्याप्रकाश्यस्यापि घटादेरन्तःकरणवृत्त्युपारूढतत्प्रकाश्यत्वं युक्तम् । यद्वान्तःकरणोपाधिकत्वेन जीवः परिच्छिन्नः । अतः संसर्गाभावान्न घटादिकमवभासयति । वृत्तिद्वारा तत्तत्संसृष्टविषयावच्छिन्नब्रह्म-

---

दृष्टान्तमाह— केवलाग्नीति । तत्प्रकाश्यत्वमित्यत्र तत्पदं जीवचैतन्यपरम् । ननु जीवचैतन्यस्य विषयदेशे सतोऽपि विषयैः संसर्गाभावान्न तत्प्रकाशकत्वं वृत्त्या तयोः संसर्गलाभे च तत्प्रकाशकत्वमिति किमिति परिदृश्यते, जीवचैतन्यस्य सर्वगतत्वेन सत्यपि विषयसंसर्गे बिम्बभूतब्रह्मचैतन्यवत्तस्यावृतत्वादेव न विषयप्रकाशकत्वमिति प्रतिपादनेनापि जीवस्य सर्वज्ञत्वप्रसङ्गादेः परिहारसंभवादिति चेत्, न । 'ब्रह्म न जानामि' इत्यनुभवबलात्तस्याऽवृतत्वेऽपि 'मां न जानामि' इत्यनुभवाभावेन जीवचैतन्यस्यावृतत्वासंभवादिति भावः । जीवचैतन्यस्यान्तःकरणोपाधिकतया परिच्छिन्नत्वपक्षे सर्वज्ञत्वापत्तिशङ्कैव नास्ति, तस्य विषयैः सह स्वतः संबन्धाभावेन वृत्तिं विना तत्प्रकाशकत्वासंभवादिति परिहारान्तरमाह—यद्वेति । अत इति । परिच्छिन्नत्वादित्यर्थः । तत्संसृष्टेति । वृत्तिद्वारा वृत्तिमदन्तःकरणसंसृष्टं यद्विषयावच्छिन्नब्रह्मचैतन्यं तस्यान्तःकरणोपाधिकजीवचैतन्येन सहाभेदाभिव्यक्तौ सत्यां स जीवस्तं विषयं प्रकाशयतीत्यर्थः । अविद्याप्रतिबिम्बो जीव इति प्रथमपक्षमेवाश्रित्य जीवस्योपादानत्वाभावेऽपि घटादि-

चैतन्याभेदाभिव्यक्तौ तु तं विषयं प्रकाशयति। अथ वा जीवः सर्वगतोऽप्यविद्यावृतत्वात्स्वयमप्यप्रकाशमानतया विषयाननवभासयन्विषयविशेषे वृत्युपरागादावावरणतिरोधानेन तत्रैवाभिव्यक्तस्तमेव विषयं प्रकाशयति। एवं

विषयैः सह संसर्गमभ्युपेत्य परिहारमाह— **अथ वेति** । **सर्वगतोऽपीति** । उपलक्षणं चैतत् । विषयसंसृष्टेऽपीत्यपि द्रष्टव्यम्, इतरथा विषयसंसर्गाभावादेव जीवस्य विषयप्रकाशकत्वाभावोपपत्तौ तस्यावृतत्वकल्पनावैयर्थ्यप्रसङ्गादिति बोध्यम् । न च 'मां न जानामि' इत्यनुभवाभावात्कथं तस्यावृतत्वं सिध्येदिति वाच्यम् । अन्तःकरणोपहितजीवचैतन्यस्यैव 'माम्' इत्यनुभवविषयतया व्यापकजीवचैतन्येऽन्तःकरणावच्छेदेन तदभावेऽपि विषयदेशे तस्यावृतत्वकल्पने बाधकाभावात् 'सर्वगतत्वेन रूपेण मां न जानामि' इत्यनुभवसत्त्वाच्चेति भावः । **स्वयमपीति** । विषयास्तावज्जडत्वात्स्वतो न प्रकाशन्ते, जीवस्तु स्वप्रकाशतया प्रकाशमानोऽप्यावृतत्वादप्रकाशमान इति वक्तुमपिशब्दः । यद्वा अपिशब्दोऽवधारणार्थः । तथा चावृतत्वात्स्वयमेवाप्रकाशमानतयेत्यर्थः । **वृत्युपरागादाविति** । विषयविशेषे वृत्युपरागे सति विषयदेशस्थजीवचैतन्यस्यापि वृत्युपरागो भवति । तेन च जीवचैतन्यगतस्यावरणस्य तिरोधानं भवति । तथा च जीवचैतन्ये यो वृत्युपरागः स आदिपदार्थः । **तत्रैवेति** । विषयविशेष एवेत्यर्थः । **तमेवेति** । नान्यं विषयम्, अतो न

च चिदुपरागार्थत्वेन वा विषयचैतन्याभेदाभिव्यक्त्यर्थत्वेन वावरणाभिभवार्थत्वेन वा वृत्तिनिर्गमनमपेक्ष्य तत्संसृष्टविषयमात्रावभासकत्वाज्जीवस्य किंचिज्ज्ञत्वमप्युपपद्यत इति ॥

अत्र प्रथमपक्षे सर्वगतस्य जीवस्य वृत्त्यधीनः को विषयोपरागः; वृत्त्यापि हि पूर्वसिद्धयोर्निष्क्रिययो-

---

सर्वज्ञत्वप्रसङ्ग इति भावः । इममेव भावं प्रकटयति— एवं चेति । जीवचैतन्यस्य वृत्तिं विना विषयानवभासकत्वे सिद्धे सतीत्यर्थः । तत्संसृष्टेति । वृत्तिसंसृष्टेत्यर्थः । किंचिज्ज्ञत्वमपीति । अनुभवसिद्धं किंचिज्ज्ञत्वमनुभवसिद्धः सर्वज्ञत्वाभावः । तत्सिद्धं चक्षुरादयनुविधानं चेत्यपिशब्दार्थः ॥

आक्षिपति— अत्रेति । उक्तपक्षेषु मध्य इत्यर्थः । क इति । स्वरूपलक्षणो वा तादात्म्यलक्षणो वा संयोगलक्षणो वेति किंशब्दार्थः । तत्र न तावदाद्यो वृत्त्यधीनः, जीवचैतन्यस्य सर्वगतत्वेन विषयदेशसंनिहितजीवचैतन्यविषययोः स्वरूपात्मकसंबन्धस्य वृत्तिं विनापि सिद्धत्वादित्याशयेन सर्वगतस्येत्युक्तम् । द्वितीयतृतीयौ क्रमेण दूषयति— वृत्त्यापीति । लोके ययोः पदार्थयोस्तादात्म्यमनुभूयते तत्तयोरादित आरभ्यैवानुभूयते, न तु मध्य आगन्तुकमित्याशयेनाह— पूर्वसिद्धयोरिति । संयोगस्यान्यतरकर्मजत्वमुभयकर्मजत्वं वा वक्तव्यम्; तदुभयं प्रकृते न संभवतीत्याह—

विषयजीवचैतन्ययोस्तादात्म्यस्य संयोगस्य वा न संभवत्याधानम् । अत्र केचिदाहुर्विषयविषयिभावसंबन्ध एवेति ॥

अन्ये तु— विषयविषयिभावमात्रे नियामिका वृत्ति-

निष्क्रिययोरिति । न च सुवर्णादौ द्विविधकर्माभावेऽपि तेजःपार्थिवभागयोः संयोगो दृष्ट इति वाच्यम् । तथा विषयजीवचैतन्ययोरादित आरभ्य संयोगाभ्युपगमे तस्य वृत्त्यधीनत्वप्रतिपादनविरोधादिति भावः । वृत्त्याप्याधानं न संभवतीति संबन्धः । जीवचैतन्यस्यानुपादानतया निरवयवतया च विषयजीवचैतन्ययोस्तादात्म्यसंयोगौ स्वतो न स्त एव; वृत्त्यापि तयोराधानं न संभवतीत्यपिशब्दार्थः । आधानमुत्पादनमिति बोध्यम् । विषयदेशे संनिहितस्य जीवचैतन्यस्य वृत्त्युत्पत्तेः पूर्वं विषयविषयिभावलक्षणः संबन्धो मा भूत् । तदुत्पत्त्यनन्तरं स जायते, तस्यातिरिक्तस्यानिर्वचनीयस्य संभवादित्याशयेनाह— **अत्र केचिदाहुरिति** । न तु स्वरूपसंबन्धस्य वा तादात्म्यस्य वा संयोगस्य वा वृत्त्यधीनत्वमुपेयते येनोक्तदोषः स्यादित्येवकारार्थः ॥

परोक्षस्थलेऽनुमित्यादिवृत्त्युपहितजीवचैतन्यस्यानुमेयादिविषयैः सह विषयविषयिभावलक्षणसंबन्धस्य वृत्तिनिर्गमनं विनापि सिद्धान्ते स्वीकाराद्वृत्तिनिर्गमनमुपगच्छतां विवरणकाराणामयं संबन्धो नाभिप्रेत इत्याह— **विषयविषयिभावमात्र इति** । परोक्षस्थल-

श्चेदनिर्गतायाः अप्यैन्द्रियिकवृत्तेस्तन्नियामकत्वं नातिप्रसङ्गावहमिति तन्निर्गमाभ्युपगमवैयर्थ्यापत्तेः स नाभिसंहितः । किं तु विषयसंनिहितजीवचैतन्यतादात्म्यापन्नायाः वृत्तेर्विषयसंयोगे तस्यापि तद्वारकः परम्परासंबन्धो लभ्यत इति स एव चिदुपरागोऽभिसंहित इत्याहुः ॥

साधारणविषयविषयिभाव एवेत्यर्थः । **तन्नियामकत्वमिति** । विषयविषयिभावसंबन्धस्तच्छब्दार्थः । वृत्तिनिर्गमनाभावेऽपि यद्विषया वृत्तिर्जीवस्य स एव तस्य प्रकाश्यो नान्य इति नियमसिद्धेर्विषयान्तरप्रकाशकत्वापत्तिरूपातिप्रसङ्गो नास्तीत्यर्थः । संयोगादेरपि निरस्तत्वात् कः संबन्धस्तदभिमत इति पृच्छति—**किं त्विति** । अभिमतं संबन्धमाह—**विषयसंनिहितेति** । विषयव्याप्तियोत्पन्नां वृत्तिं प्रति विषयसंनिहितजीवचैतन्यस्याधिष्ठानतया वृत्तेस्तत्तादात्म्यं बोध्यम् । **तस्यापीति** । विषयसंनिहितजीवचैतन्यस्यापि विषयावभासकत्वेनाभिमतस्य विषयेण सह वृत्तिविषयसंयोगद्वारकः परम्परासंबन्धो विषयसंयुक्तवृत्तितादात्म्यलक्षणो लभ्यत इत्यर्थः । उक्तसंबन्धस्य वृत्तिनिर्गमनं विनासंभवात्तन्निर्गमनं विवरणाचार्यैरुक्तमिति भावः ॥

सुखादेरान्तरपदार्थस्यापरोक्षत्वे तःप्रकाशकजीवचैतन्येन सह तस्य साक्षात्संबन्धः प्रयोजकत्वेन कल्पतः । एवं बाह्यघटादीना-

अपरे तु— साक्षादपरोक्षचैतन्यसंसर्गेणैव सुखादेरापरोक्ष्यदर्शनादपरोक्षविषये साक्षात्संबन्ध एष्टव्यः । तस्माद्वृत्तेर्विषयसंयोगे वृत्तिरूपावच्छेदकलाभात्तदवच्छेदेन तदुपादानस्य जीवस्यापि संयोगजसंयोगः संभवति,

---

मापरोक्ष्येऽपि साक्षात्संबन्ध एषितव्यः; अन्यथा विषयापरोक्ष्ये क्वचित्साक्षात्संबन्धः क्वचित्परम्परासंबन्धः प्रयोजक इति वैरूप्यापत्तेः, संभवति साक्षात्संबन्धे परम्परासंबन्धकल्पनायोगाच्च । तस्मान्नायमप्याचार्याभिमतः संबन्ध इत्याह— **अपरे त्विति** । **तस्मादिति** । परम्परासंबन्धस्यानभिमतत्वादित्यर्थः । **वृत्तेरिति** । वृत्तेर्विषयेण संयोगे सति वृत्युपादानजीवचैतन्यस्यापि विषयेण सह संयोगजसंयोगः संभवति । एतदुक्तं भवति— जीवचैतन्यस्य वृत्तिः कार्यम्, अकार्यं विषयः । वृत्तेर्जीवचैतन्यमुपादानकारणम् । तस्या वृत्तेर्विषयो नोपादानकारणम् । तथा च वृत्तिविषययोर्जीवचैतन्यं प्रति कार्याकार्ययोः संयोगाज्जीवचैतन्यविषययोर्वृत्तिं प्रति कारणाकारणयोः संयोगोऽत्र संयोगजसंयोगो विवक्षित इति । ननु कार्यं प्रति कारणभूतहस्तस्य तं प्रत्येवाकारणभूततरुणा संयोगाद्धस्तकार्यकायस्य हस्ताकार्यतरुणा सह संयोग उपेयते, हस्ततरुसंयोगदशायाम् 'तरौ हस्तावच्छेदेन तरुः कायसंयुक्तः' इत्यनुभवसिद्धत्वादित्याशङ्क्य प्रकृतेऽपि घटादौ विषये वृत्तिसंयोगदशायाम् 'घटे वृत्त्यवच्छेदेन घटः स्फुरति'

कारणाकारणसंयोगात्कार्याकार्यसंयोगवत् कार्याकार्यसंयोगात्कारणाकारणसंयोगस्यापि युक्तितौल्येनाभ्युपगन्तुं युक्तत्वादित्याहुः ॥

एकदेशिनस्तु— अन्तःकरणोपहितस्य विषयावभासकचैतन्यस्य विषयतादात्म्यापन्नब्रह्मचैतन्याभेदाभि-

---

इति जीवचैतन्यसंसृष्टत्वानुभवादित्याशयेनाह— कारणाकारणेति । युक्तितौल्येनेति । उभयत्र कल्पकानुभवरूपाया युक्तेस्तुल्यत्वेनेत्यर्थः ॥

ननु विषयदेशे संनिहितस्यापि जीवचैतन्यस्य वृत्त्युपादानत्वं विवरणाचार्याणामभिमतं न भवति, जीवस्यान्तःकरणाद्युपादानत्वाभावेऽपि सास्नादिमद्व्यक्तौ गोत्वसामान्यस्येव स्वभावादेव जीवस्यान्तःकरणादौ संबन्ध इत्यस्यार्थस्य 'एवं विषयान्तरासङ्गेऽपि जीवः स्वभावादन्तःकरणे संसृज्यते' इत्यत्र प्राग्विवरणमतत्वेन प्रतिपादितत्वात् । ततश्च जीवचैतन्यस्य वृत्तिं प्रत्युपादानकारणत्वाभावे सत्युक्तसंबन्धो न सिध्यतीति संयोगजसंयोगोऽपि नाचार्यसंमत इत्यस्वरसादाह— एकदेशिनस्त्विति । घटादिविषयावभासकजीवचैतन्यस्य घटादिना विषयेण सह तादात्म्यसंबन्धसंपादनमेव चिदुपरागत्वेनाभिमतमित्यर्थः । ननु वृत्त्यापि पूर्वसिद्धयोर्विषयचैतन्ययोस्तादात्म्यस्य न संभवत्याधानमिति प्रागुक्तत्वात्कथं तत्संपादनम्, अत आह — विषयतादात्म्यापन्नेति ।

व्यक्तिद्वारा विषयतादात्म्यसंपादनमेव चिदुपरागोऽभिसंहितः, सर्वगततया सर्वविषयसंनिहितस्यापि जीवस्य तेन रूपेण विषयावभासकत्वे तस्य साधारणतया पुरुषविशेषापरोक्षव्यवस्थित्ययोगेन तस्यान्तःकरणोपहितत्वरूपेणैव विषयावभासकत्वात् । एवं च विषयापरोक्ष्य

बिम्बभूतब्रह्मचैतन्यस्य घटादिविषयोपादानतया ब्रह्मविषययोस्तादात्म्यं प्रागेव सिद्धम् । तथा च विषयतादात्म्यापन्नब्रह्मचैतन्येन सह विषयावभासकजीवचैतन्यस्य वृत्तिकृताभेदाभिव्यक्तौ सत्यां जीवचैतन्यस्य विषयतादात्म्यं वृत्त्यधीनतया लभ्यते । अभेदाभिव्यक्तिप्रकारश्च वक्ष्यते । अतो न तादात्म्यसंपादनानुपपत्तिरिति भावः । विषयावभासकजीवचैतन्यस्यान्तःकरणोपहितस्येति यद्विशेषणं तस्य प्रयोजनमाह— **सर्वगततयेति । तेनेति** । सर्वगतत्वेनेत्यर्थः । **तस्येति** । जीवस्येत्यर्थः । **साधारणतयेति** । सर्वपुरुषसाधारणतयेत्यर्थः । पुरुषपदं प्रमातृपरम् । अविद्याप्रतिबिम्बो जीव इति पक्षे जीवभेदाभावात् । **अयोगेन तस्येति** । जीवस्येत्यर्थः । तथा च सर्वगतमपि जीवचैतन्यं यस्य पुरुषस्यान्तःकरणोपहितं सद्यमर्थमवभासयति सोऽर्थस्तस्यैवापरोक्षो नान्यस्येति व्यवस्थितिसिद्ध्येऽन्तःकरणोपहितत्वविशेषणं वाच्यमित्यर्थः । एकदेशिमते लाभमाह— **एवं चेति** । विषयावभासकजीवचैतन्यस्य वृत्त्या विषयतादात्म्यसंपादनोपगमे सतीत्यर्थः ।

आध्यासिकसंबन्धो नियामक इति सिद्धान्तोऽपि संगच्छते । न चैवं द्वितीयपक्षसांकर्यम्, जीवस्य सर्वगतत्वे प्रथमः पक्षः परिच्छिन्नत्वे द्वितीय इत्येव तयोर्भेदादित्याहुः ॥

आध्यासिकेति । अध्याससिद्धतादात्म्यसंबन्ध इत्यर्थः । **न चैवमिति** । संबन्धार्था वृत्तिरिति प्रथमपक्षेऽपि वृत्त्याभेदाभिव्यक्त्युपगम इत्यर्थः । सांकर्यं परिहरति— **जीवस्येति** । जीवस्य सर्वगतत्वमते संबन्धार्था वृत्तिरिति प्रथमः पक्षः, जीवस्यान्तःकरणोपाधिकतया परिच्छिन्नत्वमतेऽभेदाभिव्यक्त्यर्था वृत्तिरिति द्वितीयः पक्ष इत्यर्थः । अयं भावः— प्रथमद्वितीयपक्षयोरुभयोर्वृत्तिकृताभेदाभिव्यक्तिसाम्येऽपि प्रथमपक्षे वृत्तिरभेदाभिव्यक्तिद्वारा विषयावभासकजीवचैतन्यस्य विषयेण सह तादात्म्यसंबन्धसंपादनार्था; द्वितीयपक्षे तु वृत्तिर्विषयावभासकजीवचैतन्यस्य विषयावच्छिन्नजीवचैतन्येनाभेदाभिव्यक्त्यर्थेवेति न तयोः सांकर्यमिति । यद्वा प्रथमपक्षे जीवस्य व्यापकतया विषयदेशे सदा संनिहितस्यैव विषयावभासकजीवचैतन्यस्य विषयतादात्म्यापन्नब्रह्मचैतन्याभेदाभिव्यक्त्यर्था वृत्तिः; द्वितीयपक्षे तु जीवस्य परिच्छिन्नतया वृत्तिस्तस्य विषयसंनिधिं संपाद्य विषयाधिष्ठानब्रह्मचैतन्याभेदाभिव्यक्तिमपि संपादयतीति तयोः पक्षयोरसांकर्यम् । अयं परिहारो मूले सर्वगतत्वपरिच्छिन्नत्वपदाभ्यां सूचितः । पूर्वपरिहार-

स्तु प्रथमपक्षद्वितीयपक्षपदाभ्यां सूचितः । संबन्धार्था वृत्तिरिति प्रथमपक्षे संबन्धस्योद्देश्यत्वावगमात्, अभेदाभिव्यक्त्यर्था वृत्तिरिति द्वितीयपक्षेऽभेदाभिव्यक्तेरेवोद्देश्यत्वावगमादिति । अत्र मते विवक्षितविवेकेन वृत्तेरभेदाभिव्यक्तिरेव प्रयोजनं प्रथमाद्वितीयपक्षयोः पर्यवस्यतीति तयोः सांकर्यं दुर्वारमित्याभिप्रेत्यादावेवैकदेशिन इत्युक्तमिति मन्तव्यम् । वस्तुतस्तु संबन्धार्था वृत्तिरिति वदतामाचार्याणामयमभिप्रायः— विषयावभासकत्वेनाभिमतस्य जीवचैतन्यस्य विषयेण घटादिना सह व्यङ्ग्यव्यञ्जकतालक्षणः संबन्धस्तत्तद्विषयसंसृष्टवृत्त्यधीनोऽत्र विवक्षितः । तथा हि— अन्तःकरणं स्वच्छद्रव्यत्वात्स्वत एव चैतन्याभिव्यञ्जनसमर्थम् । घटादिकं तु तथा न भवति, अस्वच्छद्रव्यत्वात् । घटादिविषयव्याप्तया तु वृत्त्या तत्र विद्यमानमस्वाच्छ्यमभिभूय चैतन्याभिव्यञ्जनयोग्यताधीयते । तदुक्तं विवरणाचार्यैरेव— 'अन्तःकरणं हि स्वस्मिन्निव स्वसंसर्गिण्यपि घटादौ चैतन्यभिव्यक्तियोग्यतामापादयति' इति । दृष्टं चास्वच्छस्यापि स्वच्छद्रव्यसंसर्गात्प्रतिबिम्बग्राहित्वयोग्यत्वम्, यथा कुड्यादेर्जलसंयोगकाले प्रतिबिम्बग्राहित्वम् । घटादेः स्वसंनिहितजीवचैतन्यव्यञ्जकत्वं च तत्प्रतिबिम्बग्राहित्वम् । चैतन्यस्यापि व्यङ्ग्यत्वं तत्र प्रतिबिम्बितत्वमेव । एवंविधव्यङ्ग्यव्यञ्जकतालक्षणसंबन्धार्थमेव वृत्तेर्निर्गमनमुक्तं विवरणे । तथा च वृत्त्या बहिर्निर्गतया विषयचैतन्ययोर्यथोक्तसंबन्धे संपादिते सति घटादौ प्रतिबिम्बितं तत्रत्यजीवचैतन्यं तमवभासयतीति ॥

अथ द्वितीयपक्षे केयमभेदाभिव्यक्तिः । केचिदाहुः— कुल्याद्वारा तडागकेदारसलिलयोरिव विषयान्तःकरणावच्छिन्नचैतन्ययोर्वृत्तिद्वारैकीभावोऽभेदाभिव्यक्तिः ।

द्वितीयपक्षमाक्षिपति— **अथेति । केयमिति ।** अभेदाभिव्यक्त्यर्था वृत्तिरिति द्वितीयपक्षो हि जीवस्य परिच्छिन्नत्वमत इत्युक्तम् । अस्मिन्मतेऽन्तःकरणोपाधिकस्य जीवस्य विषयावच्छिन्नबिम्बभूतब्रह्मचैतन्यस्य च वृत्त्याभेदाभिव्यक्तिर्न संभवति, अखण्डाकारवृत्तेरिव घटादिगोचरवृत्तेरुपाधिनिवर्तकत्वाभावेन भेदकोपाध्योरन्तःकरणविषययोः सतोर्जीवब्रह्माभेदाभिव्यक्तेरयोगादित्यर्थः । व्यावर्तकोपाध्योः सत्त्वेऽपि तयोरेकदेशस्थत्वसंपत्तौ तद्बलादभेदाभिव्यक्तिः संभवति, लोके तथा दर्शनादिति परिहरति— **केचिदाहुरिति ।** केदारः सस्यनिष्पत्तिस्थानम् । तथा च तडागस्थसलिलस्य कुल्याद्वारा केदारस्थसलिलस्य चाभेदाभिव्यक्तिर्यथा लोके प्रसिद्धा, तथान्तःकरणावच्छिन्नचैतन्यरूपजीवस्य विषयावच्छिन्नब्रह्मचैतन्यस्य च वृत्तिद्वाराभेदाभिव्यक्तिर्भवति, वृत्तेर्विषयदेशस्थत्वे सति वृत्तिवृत्तिमतोरभेदेन जीवोपाध्यन्तःकरणस्यापि विषयदेशस्थत्वसिद्धेरित्यर्थः । ननु जीवचैतन्यस्य विषयावभासकत्वं न संभवति, तस्य विषयं प्रत्युपादानत्वाभावेन तादात्म्यसंबन्धाभावात् । न च ब्रह्मचैतन्यमेव विषयावभासकमस्तु, तस्योपादानतया साक्षादेव तादात्म्यसंबन्धलाभादिति वाच्यम् । तथा सति 'आलोकेन घटः प्रकाशितः'

एवं च यद्यपि विषयावच्छिन्नं ब्रह्मचैतन्यमेव विषयप्रकाशकम्, तथापि तस्य वृत्तिद्वारैकीभावेन जीवत्वं संपन्नमिति जीवस्य विषयप्रकाशोपपत्तिरिति ॥

अन्ये त्वाहुः— बिम्बस्थानीयस्य विषयावच्छिन्नस्य ब्रह्मणः प्रतिबिम्बभूतेन जीवेनैकीभावो नाभेदाभिव्यक्तिः, व्यावर्तकोपाधौ दर्पण इव जाग्रति तयोरेकीभावा-

---

इतिवत् 'मया घटोऽवगतः' इति जीवचैतन्यस्यैव घटप्रकाशकत्वावगमविरोधादिति मत्वा पुनः शङ्कते — **एवं चेति** । अभेदाभिव्यक्तौ संभावितायामित्यर्थः । अभेदाभिव्यक्तिप्रयोजनं वक्तुं **यद्यपीति** । **विषयप्रकाशकमिति** । इति वक्तव्यं तादात्म्यसंबन्धलाभादिति शेषः । न जीवचैतन्यमित्येवकारार्थः । तथा च 'मयायमवगतो घटः' इत्यनुभवविरोध इति भावः । परिहरति— **तथापीति** । **तस्येति** । तादात्म्यसंबन्धेन विषयावभासकब्रह्मचैतन्यस्य वृत्तिद्वारान्तःकरणोपहितत्वप्राप्तौ जीवैनैकीभावाज्जीवत्वं संपन्नमिति ब्रह्मचैतन्यस्य यद्विषयावभासकत्वं तज्जीवस्यैवेति प्राप्त्या नानुभवविरोध इत्यर्थः ॥

दर्पण इवेति । दर्पणे प्रतिबिम्बदशायां बिम्बप्रतिबिम्बयोरभेदाभिव्यक्तिर्नास्ति, तयोस्तदा भेदानुभवात्, तथा प्रकृतेऽपि विषयादिरूपभेदकोपाधौ सति सा न संभवतीत्यर्थः । ननु

योगाद्वृत्तिकृताभेदाभिव्यक्त्या विषयावच्छिन्नस्य ब्रह्मणो जीवत्वप्राप्तौ ब्रह्मणस्तदा तद्विषयसंसर्गाभावेन तद्द्रष्टृ-

---

तत्त्वसाक्षात्कारेणाशेषोपाधिनिवृत्तौ यादृश्यभेदाभिव्यक्तिस्तादृश्यत्र न विवक्षिता । किं तु क्षीरनीरयोरेकपात्रस्थयोरिव वृत्तिद्वारान्तःकरणविषययोरेकदेशस्थत्वप्राप्तौ तन्मात्रप्रयुक्ता तदवच्छिन्नचैतन्ययोरौपचारिक्यभेदाभिव्यक्तिर्विवक्षिता । अस्यां चाभेदाभिव्यक्तौ न व्यावर्तकोपाधिसत्त्वप्रयुक्तो विरोधोऽस्ति, दर्पणे मुखप्रतिबिम्बदशायामपि 'मम मुखमेव दर्पणे भाति' इति बिम्बप्रतिबिम्बयोरभेदाभिव्यक्तिदर्शनात् । अस्मिन्मतेऽपीत्थमेव निर्वाहः कर्तव्यः । न ह्यन्तःकरणतद्वृत्तिप्रतिबिम्बयोरभेदाभिव्यक्तिर्मुख्या संभवति, वृत्तिवृत्तिमतोः कार्यकारणभावापन्नयोरैक्यायोगेन तत्प्रतिबिम्बयोरैक्यायोगात्, ऐक्ये वा 'एवं च' इत्यादिना प्रमात्रादीनामस्मिन्मते सांकर्याभावोपपादनविरोधादित्यस्वरसादाह— **वृत्तिकृताभेदाभिव्यक्त्येति** । **तदा तद्विषयेति** । विषयावच्छिन्नब्रह्मणो जीवत्वप्राप्तौ तस्येश्वरत्वनिवृत्तिरवश्यं वाच्या, एकचैतन्य एकावच्छेदेन जीवत्वेश्वरत्वयोरसंभवात् । तथा च तदा जीवत्वदशायां **ब्रह्मणस्तद्विषयसंसर्गाभावेन तद्द्रष्टृत्वं** न संभवतीत्यर्थः । तस्येत्यनन्तरं तदेत्यनुषङ्गः । ननु विषयाधिष्ठानचैतन्यस्य वृत्तिसंसर्गदशायामन्तःकरणोपहितत्वप्रयुक्तजीवत्ववदविद्योपहितत्वप्रयुक्तमीश्वरत्वमप्यविरुद्धम् । तथा च बिम्बभूतेश्वरस्य तदापि सर्वज्ञत्वमक्षतम् । अन्यथान्तःकरणाद्यधिष्ठानचैतन्यस्य तदुपाधिकत्वप्रयु-

त्वासंभवे सति तस्य सर्वज्ञत्वाभावापत्तेश्च । किं तु विषयावच्छिन्नं ब्रह्मचैतन्यं विषयसंसृष्टाया वृत्तेरग्रभागे विषयप्रकाशकं प्रतिबिम्बमर्पयतीति तस्य प्रतिबिम्बस्य जीवेनैकीभावः । एवं चान्तःकरणतद्वृत्तिविषयावच्छिन्नचैतन्यानां प्रमातृप्रमाणप्रमेयभावेनासंकरोऽप्युपपद्यते ।

क्तजीवत्वे सदा स्थिते सति बिम्बभूतब्रह्मणः सदान्तःकरणादिसंसर्गाभावेन तद्दृष्टत्वासंभवे सति सदा सर्वज्ञत्वाभावप्रसङ्गदोष इहापि मते तुल्य इत्यस्वरसं मनसि निधाय कीदृशी तर्हि त्वदभिमताभेदाभिव्यक्तिरिति पृच्छति— **किं त्विति** । तामाह— **विषयावच्छिन्नमिति** । **अग्रभाग इति** । वृत्तिर्हि हृदयस्थान्तःकरणमारभ्य विषयपर्यन्तमविच्छिन्ना कौस्तुभमण्यादिप्रभावदीर्घीभावमापन्ना तिष्ठति । तस्या वृत्तेर्विषयसंसृष्टो भागोऽग्रभाग इत्युच्यते । तत्र यो ब्रह्मणः प्रतिबिम्बस्तस्य विषयप्रकाशकस्य जीवेनैकीभाव इहाभेदाभिव्यक्तिर्विवक्षिता, वृत्तिवृत्तिमतोस्तादात्म्यरूपाभेदसत्त्वेन तत्प्रतिबिम्बयोरभेदाभिव्यक्तिसंभवादित्यर्थः । **एवं चेति** । वृत्तिप्रतिबिम्बस्यान्तःकरणप्रतिबिम्बाद्स्तुतो भिन्नस्यैव सतस्तदभेदेनाभिव्यक्तस्य विषयावभासकत्वे स्वीकृते सतीत्यर्थः । **असंकरोऽपीति** । वृत्तिवृत्तिमतोस्तादात्म्यात्तत्प्रतिबिम्बयोरभेदाभिव्यक्तिवदसंकरोऽप्युपपद्यत इत्यपिशब्दार्थः । मुखं दर्पणोपाधिनेवान्तःकरणोपाधिनावच्छिन्नं तत्प्रतिबिम्बचैतन्यं प्र-

न च वृत्त्युपहितचैतन्यस्य विषयप्रमात्वे तस्य विषयाधिष्ठानचैतन्यस्येव विषयेणाध्यासिकसंबन्धाभावाद्विषयापरोक्ष्य आध्यासिकसंबन्धस्तन्त्रं न स्यादिति वाच्यम् । विषयाधिष्ठानचैतन्यस्यैव विषयेणावच्छिन्नस्य वृत्तौ प्रतिबिम्बिततया तदभेदेन तत्संबन्धस्यैव तत्संबन्धत्वादिति ॥

माता, वृत्तिप्रतिबिम्बचैतन्यं तयैवावच्छिन्नं प्रमा, विषयावच्छिन्नं ब्रह्मचैतन्यं प्रमेयमिति तेषामसांकर्यमुपपद्यते, व्यावर्तकोपाधिसद्भावादित्यर्थः । अस्मिन्मतेऽसांकर्यमुपपद्यत इत्युक्त्या पूर्वमेत विषयावच्छिन्नब्रह्मचैतन्यस्य जीवत्वप्राप्तिस्वीकारात्प्रमातृप्रमेयचैतन्ययोरसांकर्यं नोपपद्यत इति सूचितम् । वस्तुतस्तु पूर्वमतेऽपि न सांकर्यम्, जीवब्रह्मभेदकोपाधिसद्भावस्य तत्प्रयुक्ततया सर्वज्ञत्वादिव्यवस्थायाश्च प्राग्दर्शितत्वादिति मन्तव्यम् । शङ्कते— न चेति । तस्येति । तस्य विषयेणाध्यासिकसंबन्धाभावादिति संबन्धः, प्रमारूपस्य वृत्तिप्रतिबिम्बस्य विषयोपादानत्वाभावेन तयोस्तादात्म्यासंभवात् । तथा च विषयापरोक्ष्य आध्यासिकतादात्म्यसंबन्धो नियामक इति सिद्धान्तविरोध इति शङ्काभिप्रायः, बिम्बप्रतिबिम्बयोरभेदाभ्युपगमात् । बिम्बचैतन्यस्य विषयेण सह यस्तादात्म्यसंबन्धः स एव प्रमारूपप्रतिबिम्बस्यापीति नापसिद्धान्त इति परिहरति— विषयाधिष्ठानेति । तदभेदेनेति । प्रतिबिम्बचैतन्यस्य बिम्बाभेदेनेत्यर्थः ॥

अपरे त्वाहुः— बिम्बभूतविषयाधिष्ठानचैतन्यमेव साक्षादाध्यासिकसंबन्धलाभाद्विषयप्रकाशकमिति तस्यैव बिम्बत्वविशिष्टरूपेण भेदसद्भावेऽपि तदुपलक्षितचैतन्यात्मनैकीभावोऽभेदाभिव्यक्तिः । न चैवं सति जीवब्रह्मसांकर्यं न वा ब्रह्मणः सर्वज्ञत्वविरोधः, बिम्बात्मना तस्य यथापूर्वमवस्थानादिति ॥

अथ तृतीयपक्षे को नामावरणाभिभवः । अज्ञान-

बिम्बप्रतिबिम्बयोरभेदे सत्यपि कल्पितभेदसत्त्वाद्बिम्बसंबन्धस्य प्रतिबिम्बसंबन्धत्वं नास्तीत्यस्वरसं साक्षात्पदेन सूचयन्नभेदाभिव्यक्तिं प्रकारान्तरेणाह— **अपरे त्वाहुरिति** । **भेदसद्भावेऽपीति** । प्रतिबिम्बत्वविशिष्टचैतन्यरूपजीवेन सहेति शेषः । **तदिति** । बिम्बत्वप्रतिबिम्बत्वाभ्यामुपलक्षितं शुद्धचैतन्यम्, तदात्मनेत्यर्थः । **न चैवं सतीति** । उपलक्षितचैतन्यात्मनाभेदाभिव्यक्त्यङ्गीकारे पूर्वोक्तं दोषद्वयं नास्तीत्यर्थः । अत्रेदं चिन्त्यम्— उपलक्षितचैतन्यात्मनैकीभावो न वास्तवाभेदः, तस्य वृत्त्यनपेक्षत्वात् । नापि व्यावहारिकाभेदः, बिम्बप्रतिबिम्बभेदस्य व्यावहारिकत्वेन तत्समसत्ताकाभेदासंभवात् । नापि प्रातिभासिकाभेदः, उपाध्योरेकदेशस्थत्वमात्रेण बिम्बप्रतिबिम्बचैतन्ययोः प्रातिभासिकाभेदसंभवेन तदर्थं चैतन्यमात्रोपलक्षणवैयर्थ्यादिति ॥

तृतीयं पक्षमाक्षिपति— **अथेति** । **निवर्तेतेति** । अज्ञान-

नाशश्चेद्घटज्ञानेनैवाज्ञानमूलः प्रपञ्चो निवर्तेतेति चेत्, अत्र केचिदाहुः—चैतन्यमात्रावारकस्याज्ञानस्य विषयावच्छिन्नप्रदेशे खद्योतादिप्रकाशेन महान्धकारस्येव ज्ञानेनैकदेशेन नाशो वा कटवत्संवेष्टनं वा भीतभटवदपसरणं वाभिभव इति ॥

अन्ये तु— अज्ञानस्यैकदेशेन नाश उपादानाभावात्पुनस्तत्र कंदलनायोगेन सकृदवगते समयान्तरेऽप्यावरणाभावप्रसङ्गान्निष्क्रियस्यापसरणसंवेष्टनयोरसंभवाच्च न यथोक्तरूपोऽभिभवः संभवति । अतश्चैतन्य-

---

स्यैकत्वादिति भावः । न तु निवर्तते । अतो नाज्ञाननाश आवरणाभिभवः । न चान्यः प्रकारः संभवति, अनुपलम्भादिति भावः । अज्ञानैक्यमेवावलम्ब्य परिहरति— **अत्र केचिदाहुरिति** । **चैतन्यमात्रेति** । मात्रपदं साक्षिव्यतिरिक्तकृत्स्नचैतन्यपरम् । साक्षिण्यावरणाभावस्य वक्ष्यमाणत्वादिति भावः । **एकदेशेन नाशो वेति** । तथा च तन्मूलप्रपञ्चस्य न निवृत्त्यापत्तिरिति भावः । प्रकारान्तरानुपलम्भोऽसिद्ध इत्याशयेनाह— **कटवदित्यादिना** ॥

निरुक्तमावरणाभिभवं दूषयंस्तं प्रकारान्तरेण निर्वक्ति— **अन्ये त्वित्यादिना** । **पुनस्तत्रेति** । विषयावच्छिन्नचैतन्य आवर-

मात्रावारकस्याप्यज्ञानस्य तत्तदाकारवृत्तिसंसृष्टावस्थाविषयावच्छिन्नचैतन्यानावारकत्वस्वाभाव्यमेवाभिभवः । न च विषयावगुण्ठनपटवद्विषयचैतन्यमाश्रित्य स्थितस्याज्ञानस्य कथं तदनावारकत्वं युज्यत इति शङ्क्यम् । 'अहमज्ञः' इति प्रतीत्याहमनुभवे प्रकाशमानं चैतन्यमाश्रयत एव तस्य तदनावारकत्वसंप्रतिपत्तेरित्याहुः ॥

अपरे तु— 'घटं न जानामि' इति घटज्ञानविरोधित्वेन 'घटज्ञाने सति घटाज्ञानं निवृत्तम्' इति

णोत्पत्त्ययोगेनेत्यर्थः । तत्तदिति । तत्तद्विषयाकारवृत्तिसंसृष्टावस्थं यद्विषयावच्छिन्नचैतन्यं तदनावारकत्वेत्यर्थः । ननु यथा घटं व्याप्य वर्तमानः पटस्तमावृणोत्येव, एवं विषयावच्छिन्नब्रह्मचैतन्यं व्याप्य वर्तमानमज्ञानमपि चैतन्यमावृणोत्येवेति तदनावारकत्वकल्पनमयुक्तमिति शङ्कते— न चेति । अज्ञाने पटवैलक्षण्यस्यानुभवसिद्धत्वान्नैतच्चोद्यमवतरतीत्याह— अहमिति । तस्येति । अज्ञानस्येत्यर्थः । जीवचैतन्याश्रितमप्यज्ञानं न तदावृणोति, तस्यावृतत्वे सर्वव्यवहारलोपप्रसङ्गादिति दहराधिकरणभाष्ये साधितत्वात्साक्षिचैतन्यस्यानावृततायाः वक्ष्यमाणत्वाच्चेति भावः ॥

प्रपञ्चोपादानमूलाज्ञानापेक्षयान्यदेव विषयावच्छिन्नचैतन्यावारकमज्ञानमिति घटादिज्ञानेन तन्निवृत्तावपि न प्रपञ्चनिवृत्तिप्रसङ्गः, तेन प्रपञ्चमूलाज्ञानानिवृत्तेरिति मतं दर्शयति— अपरे त्विति ।

तन्निवर्त्यत्वेन चानुभूयमानं न मूलाज्ञानम्, शुद्ध-चैतन्यविषयस्य तज्ज्ञाननिवर्त्यस्य च तस्य तथात्वायोगात् । किं तु घटावच्छिन्नचैतन्यविषयं मूलाज्ञानस्यावस्थाभेदरूपमज्ञानान्तरमिति तन्नाश एवाभिभवः । न चैवमेकेन ज्ञानेन तन्नाशे तत्समानविषयाणां ज्ञानान्तराणामावरणानभिभावकत्वापत्तिः, यावन्ति ज्ञानानि तावन्ति तन्निवर्त्यान्यज्ञानानीत्यभ्युपगमादित्याहुः ॥

अज्ञानभेदे मानमाह— घटमिति । विरोधित्वेनेति । 'न जानामि' इत्यज्ञानानुभवाभिलापकशब्दे नञो विरोध्यर्थकत्वादभिलप्यानुभवोऽपि ज्ञानविरोधिविषयक एव । न च 'न जानामि' इत्यनुभवो ज्ञानप्रागभावविषयक एव, न तु भावरूपाज्ञानविषयक इति वाच्यम् । प्रागभावस्यैवासंप्रतिपत्तेरिति भावः । तथात्वायोगादिति । घटावच्छिन्नचैतन्यविषयकत्वतज्ज्ञाननिवर्त्यत्वयोरयोगादित्यर्थः । किं त्वज्ञानान्तरमिति संबन्धः । अवस्थाभेदरूपमिति । अस्य विशेषणस्य प्रयोजनं वक्ष्यते । न चैवमेकेनेत्यादिग्रन्थः स्पष्टार्थः ॥

नन्ववस्थाज्ञानानि किमनादीनि किं वादिमन्ति । नाद्यः, मानाभावात् । न द्वितीयः, अज्ञानमनादीति सिद्धान्तविरोधा-

इमानि चावस्थारूपाण्यज्ञानानि मूलाज्ञानवदज्ञानत्वादनादीनीति केचित् ॥

व्यावहारिकौ जगज्जीवावावृत्य स्वाप्नौ जगज्जीवौ विक्षिपन्ती निद्रा तावदावरणविक्षेपशक्तियोगादज्ञाना-

---

दिति चेत्; अत्र केचिदाद्यं पक्षं साधयन्तीत्याह— **इमानि चेति** । अवस्थाज्ञानान्यनादीन्यज्ञानत्वान्मूलाज्ञानवत् । न च दृष्टान्तासिद्धिः, देवताधिकरणे मूलाज्ञानानादित्वस्य श्रुतिन्यायाभ्यां साधितत्वादिति भावः । न चाज्ञानगतानादित्वे मूलाज्ञानत्वं प्रयोजकं न त्वज्ञानत्वमात्रमिति वाच्यम् । लाघवेन तन्मात्रस्यैव प्रयोजकत्वादिति भावः ॥

अवस्थाज्ञानान्यादिमन्तीति द्वितीयपक्षमन्ये साधयन्तीत्याह— **व्यावहारिकाविति्यादिना** । न च सिद्धान्तविरोधः, अज्ञानानादित्वाभ्युपगमस्य मूलाज्ञानविषयत्वादिति भावः । 'विमतान्यवस्थाज्ञानान्यादिमन्त्यवस्थाज्ञानत्वान्निद्रावत्सुषुप्तिवच्च' इत्यनुमानमभिप्रेत्य दृष्टान्तद्वये साधनसाध्ययोर्वैकल्यं प्रथमं परिहरति— **व्यावहारिकाविति** । हेताववस्थापदं मूलाज्ञाने व्यभिचारवारणार्थम् । **आवृत्येति** । जाग्रत्कालीनौ जगज्जीवौ यादृशौ प्रसिद्धौ न तादृशावेव स्वप्नकाल उपलभ्येते । अतस्तयोर्यथावदनुपलम्भादावरणं वक्तव्यमिति भावः । **विक्षिपन्तीति** । सृजन्तीत्यर्थः । **अज्ञानावस्थाभेदरूपेति** । अज्ञानस्य ह्यावरणविक्षेपशक्तिमत्त्वं

वस्थाभेदरूपा । तथा सुषुप्त्यवस्थाप्यन्तःकरणादौ विलीने 'सुखमहमस्वाप्सम्, न किंचिदवेदिषम्' इति परामर्शदर्शनान्मूलाज्ञानवत्सुषुप्तिकालेऽनुभूयमानाज्ञाना-

---

लक्षणम् । तस्य स्वप्नकारणीभूतनिद्रायां सत्त्वादज्ञानत्वं तावत्सिद्धम् । निद्राया वक्ष्यमाणरीत्या सादित्वेन साक्षान्मूलाज्ञानत्वायोगात्तदवस्थाविशेषरूपत्वं सिद्धमिति प्रथमदृष्टान्ते न साधनवैकल्यमिति भावः । सुषुप्तिकाले मूलाज्ञानवदनुभूयमाना सुषुप्त्यवस्थापि तथाज्ञानावस्थाभेदरूपैवेति संबन्धः । ननु सुषुप्तिकाले मूलाज्ञानसुषुप्त्योरनुभवोऽसिद्धः, तदा 'अहमज्ञः' 'अहं स्वपिमि' इत्यनुभवादर्शनादिति, नेत्याह— सुखमहमिति । परामर्शः स्मरणम् । तथा चोत्थितस्य दृश्यमानपरामर्शान्यथानुपपत्त्या तदा सुषुप्तिमूलाज्ञानयोरनुभवः साक्षिरूपः कल्प्यते । अहमुल्लेखे ह्यात्मन्यन्तःकरणसंसर्गः प्रयोजकः । तत्काले तस्य लीनत्वान्नाहमुल्लेख इत्याशयेनाह— **अन्तःकरणादौ विलीन इति** । चक्षुरादिकमादिपदार्थः । सुषुप्तिस्वरूपसाधनार्थः परामर्शकल्प्यसुषुप्त्यनुभवोपन्यासः । सुषुप्तिकाले मूलाज्ञानाभावे सुषुप्तेस्तदवस्थारूपत्वं न सिध्येत् । अतस्तदनुभवोपन्यासस्तदा मूलाज्ञानसत्त्वसाधनार्थः । सुषुप्तेस्तदवस्थारूपत्वं परिशेषादवगन्तव्यम्, सुषुप्तिकाले मूलाज्ञानातिरिक्तानामन्तःकरणादीनां विलीनत्वेन तस्यास्तदवस्थारूपत्वासंभवादिति सूचनार्थं चान्तःकरणादिविलयोपन्यासः । तथा च सुषुप्तिदृष्टान्तेऽपि

वस्थाभेदरूपैव। तयोश्च जाग्रद्भोगप्रदकर्मोपरमे सत्येवो-द्भवात्सादित्वमिति तद्वदन्यदप्यज्ञानमवस्थारूपं सादी-त्यन्ये ॥

नन्वनादित्वपक्षे घटे प्रथममुत्पन्नेनैव ज्ञानेन सर्वत-दज्ञाननाशो भवेत्, विनिगमनाविरहात्तदवच्छिन्नचैत-न्यावारकसर्वाज्ञानानाशे विषयप्रकाशायोगाच्च । अतः

न साधनवैकल्यमिति भावः। दृष्टान्तद्वयेऽपि साध्यवैकल्यं परिहर-ति—तयोश्चेति। निद्रासुषुप्त्योरित्यर्थः। अन्यदपीति। घटा-दिविषयावच्छिन्नचैतन्यावारकमज्ञानमपीत्यर्थः ॥

अवस्थाज्ञानानां सादित्वपक्षे प्रथममुत्पन्नेन घटज्ञानेन तदुत्पत्तेः पूर्वं घटावारकत्वेन स्थितस्याज्ञानस्य नाशे सति पश्चादुत्पन्नमव-स्थाज्ञानं पुनस्तमावृणोतीति व्यवस्था सिध्यति। तेषामनादित्व-पक्षे तु सा न सिध्येदिति शङ्कते— नन्विति। प्राथमिकघट-ज्ञानेन तदज्ञानानां सर्वेषां नाशोऽस्ति न वा। द्वितीयकल्पं दूष-यति— घट इति। प्राथमिकज्ञानेनैकमेवाज्ञानं नश्यति नेतरा-णीत्यत्र विनिगमकाभावात्सर्वाज्ञाननाशो वक्तव्यः। तथा च द्वितीयकल्पानुपपत्तिरित्यर्थः। द्वितीयकल्प एव विनिगमकाभाव-बदोषान्तरमाह— तदवच्छिन्नेति। एकावरणनाशेऽप्यावरणान्त-राणां सत्त्वात्तद्विषयप्रकाशानुपपत्तिरित्यर्थः। एवं प्रथमपक्षं परिशे-षयित्वा तं दूषयति— अत इति। प्रथमज्ञानेन सर्वाज्ञानना-

पाश्चात्यज्ञानानामावरणानभिभावकत्वं तदवस्थमेवेति चेत्; अत्र केचिदाहुः—यथा ज्ञानप्रागभावानामनेकेषां सत्त्वेऽप्येकज्ञानोदये एक एव प्रागभावो निवर्तते, संशयादिजननशक्ततया तदावरणरूपेषु प्रागभावान्तरेषु सत्स्वपि विषयावभासः; तथैकज्ञानोदये एकमेवाज्ञानं निवर्तते, आवारकेष्वज्ञानान्तरेषु सत्स्वपि विषयावभास इति ॥

शादित्यर्थः। तदवस्थमेवेति। पाश्चात्यज्ञानानामावरणाभिभावकत्वासङ्गये हि यावन्ति ज्ञानानि तावन्ति तन्निवर्त्यान्यज्ञानानीत्यभ्युपगम्यते। तदभ्युपगमेऽपि प्रथमज्ञानेनैव सर्वाज्ञाननाशे स दोषस्तदवस्थ एवेत्यर्थः। यथा न्यायमते यावन्ति घटाज्ञानानि तावन्तो घटज्ञानप्रागभावाः सन्ति। तत्र प्रथमेन ज्ञानेनैक एव ज्ञानप्रागभावो निवर्तते। अन्ये यथापूर्वं सन्त्येव। तेषां सत्त्वेऽपि विषयप्रकाशश्चोपेयते तैः। एवमत्रापि योजनीयमिति परिहरति— अत्र केचिदाहुरिति। ननु दृष्टान्तो विषमः, ज्ञानप्रागभावस्यानावारकत्वात्, भावरूपाज्ञानस्य च विषयावारकत्वात्; आवरणसत्त्वे च न विषयप्रकाशोपपत्तिरिति, नेत्याह— संशयादीति। विपर्यय आदिपदार्थः। सिद्धान्ते भावरूपाज्ञानस्यावारकत्वं ह्यज्ञातत्वाभिमते वस्तुनि संशयादिजननसमर्थत्वम्। तच्च परमते ज्ञानप्रागभावरूपाज्ञानस्यापि समानम्। ततो न दृष्टान्तवैषम्यमिति भावः। एकमेवेति। फलबलादिति भावः॥

अन्ये त्वावृतस्यापरोक्षज्ञानं विरुद्धम्, एकज्ञानोदये च प्रागभावान्तरसत्त्वेऽपि यावद्विशेषदर्शनाभावकूटरूपमावरणं विशेषदर्शनान्नास्तीति मन्यमाना वदन्ति— यदा यदज्ञानमावृणोति तदा तज्ज्ञानेन तस्यैव नाशः। सर्वं च सर्वदा नावृणोति, वैयर्थ्यात्। किं त्वावारकाज्ञाने वृत्त्या नाशिते तद्वृत्त्युपरमेऽज्ञानान्तरमावृणोति।

'नन्वनादित्वपक्षे' इत्यादिग्रन्थेन कृत आक्षेपे प्रकारान्तरेण समाधानमाह— **अन्ये** त्विति। अस्य वदन्तीत्यनेन संबन्धः। पूर्वपरिहारेऽन्येषामभिप्रेतमस्वरसं स्वयं दर्शयति— **आवृतस्ये**ति। आवृतस्य पर्वतीयदहनादेः सिद्धान्ते परोक्षज्ञानाङ्गीकारादपरोक्षज्ञानमित्युक्तम्। **यावदिति**। स्थाण्वादौ संशयादिविरोधिदर्शनप्रागभावमात्रं न संशयादिजननसमर्थम्, 'स्थाणुरयम्' इति निश्चयदशायामपि तत्समानविषयकनिश्चयान्तरप्रागभावसत्त्वेन तदा पुरुषत्वस्मृतिमतः पुनरपि संशयप्रसङ्गात्। किं तु संशयादिसमानविषयकनिश्चयानां यावन्तोऽभावास्तावतां समुदायः संशयादिजननसमर्थतया परमते विषयावरणत्वेन वाच्यः। एकनिश्चयकाले च यावद्विशेषदर्शनाभावकूटरूपस्य परमत आवरणत्वेन संमतस्य विशेषादर्शनस्याभावान्न पुनः संशयादिप्रसङ्गः। न वा प्रथमघटादिज्ञानकाले परमते विषयप्रकाशानुपपत्तिः, आवरणत्वाभिमतप्रागभावकूटाभावात्। तस्मादावृतस्यापि विषयस्य प्रथमज्ञानसमये प्रकाशः संभवतीत्यत्र नायं दृष्टान्तः संभवतीत्यर्थः।

न चैवं सति ब्रह्मावगमोत्पत्तिकालेऽनावारकत्वेन स्थितानामज्ञानानां ततोऽप्यनिवृत्तिप्रसङ्गः; तेषां साक्षात्तद्विरोधित्वाभावेऽपि तन्निवर्त्यमूलाज्ञानपरतन्त्रतयाज्ञानसंबन्धादिवत्तन्निवृत्त्यैव निवृत्त्युपपत्तेः । एतदर्थमेव तेषां तदवस्थाभेदरूपतया तत्पारतन्त्र्यमिष्यत इति ॥

न चैवमिति । सर्वदा सर्वेषामवस्थाज्ञानानामावारकत्वाभावे सतीत्यर्थः । ततोऽपीति । ब्रह्मावगमादपीत्यर्थः । निवृत्त्यभावप्रसङ्गे हेतुरनावारकत्वेन स्थितिः । यदि ब्रह्मावगमोत्पत्तिकाले मूलाज्ञानवदवस्थाज्ञानान्यपि ब्रह्मचैतन्यं विषयप्रदेशेष्वावृत्य तिष्ठेयुस्तदा ब्रह्मावगमेन तत्समानविषयकमूलाज्ञानस्येव चैतन्यावारकत्वेन स्थितानामवस्थाज्ञानानामपि निवृत्तिः स्यात्, समानविषयकत्वाविशेषात् । तेषां तदनावारकत्वेन स्थितौ तु निवृत्तिर्न संभवति, तत्समानविषयकत्वाभावादित्यर्थः । ततश्च विदेहकैवल्येऽपि तेषामनुवृत्तिप्रसंग इति भावः । एवं सत्यनिवृत्तिप्रसङ्ग इति न चेति संबन्धः । तत्र हेतुमाह— तेषामिति । अत्र द्वितीयतृतीयतच्छब्दौ ब्रह्मावगमपरौ । तुरीयतच्छब्दो मूलाज्ञानपरः । यथाज्ञाननिवृत्तौ चैतन्याज्ञानयोः संबन्धो निवर्तते तस्य संबन्ध्यज्ञानपरतन्त्रत्वात्तद्वदित्यर्थः । नन्ववस्थाज्ञानानां मूलाज्ञानपरतन्त्रत्वमसिद्धमित्याशङ्क्याह— एतदर्थमेवेति । यथा संसारस्याज्ञाननिवृत्त्या निवृत्तिसिद्धये तन्मूलकतया संसारस्य तत्पारतन्त्र्यं कल्प्यते तद्वत्प्रकृतेऽपीति भावः । यदुक्तमवस्थाभेदरूपमिति विशे-

अपरे तु 'अज्ञानस्य सविषयस्वभावत्वादुत्सर्गतः सर्वं सर्वदावृणोत्येव । न च विषयोत्पत्तेः प्रागावरणीयाभावेनावारकत्वं न युज्यत इति वाच्यम् । तदापि सूक्ष्मरूपेण तत्सत्त्वात् ' इति मन्यमानाः कल्पयन्ति— यथा बहुजनसमाकुले प्रदेशे कस्याचिच्छिरसि निपतन्नशनिरितरानप्यपसारयति, यथा वा संनिपातहरमौषध-

---

षणस्य प्रयोजनं वक्ष्यत इति, तदत्र दर्शितमिति मन्तव्यम् ॥

'नन्वनादित्वपक्षे' इत्यादिना कृत आक्षेप एव समाधानं प्रकारान्तरेण दर्शयति—**अपरे त्विति** । अपरे तु कल्पयन्तीति संबन्धः । तेषामाशयं दर्शयति— **अज्ञानस्येति** । ननु सर्वमज्ञानं स्वस्थितिकाले सर्वदा विषयमावृणोतीति नियमो नास्ति; एकज्ञानकाल एकस्याज्ञानस्य नाशः, इतरेषां तदा सत्त्वेऽप्यावरणशक्तिप्रतिबन्धरूपतिरस्कारस्य वक्ष्यमाणत्वेनैकज्ञानकाले तेषामावारकत्वाभावादित्यत आह— **उत्सर्गत इति** । ननु सर्वं सर्वदावृणोतीत्युक्ते घटादिविषयोत्पत्तेः पूर्वकालेऽपि घटाद्यवच्छिन्नचैतन्यावारकत्वमवस्थाज्ञानानां प्रतीयते । तदनुपपन्नम्, तदानीमवच्छेदकविषयाभावेन तदवच्छिन्नचैतन्यस्यावस्थाज्ञानैरावरणीयस्याभावादिति शङ्कामपनुदति— **न चेत्यादिना** । **तदापीति** । कार्यमात्रस्योत्पत्तेः पूर्वकाले नाशोत्तरकाले चानभिव्यक्तरूपेणावस्थानस्य श्रुतिस्मृतिन्यायैस्तत्र तत्र पूर्वाचार्यैः साधितत्वादिति

मेकं दोषं निवर्तयद्दोषान्तरमपि दूरीकरोति; एवमेकमज्ञानं नाशयज्ज्ञानमज्ञानान्तराण्यपि तिरस्करोति। तिरस्कारश्च यावज्ज्ञानस्थितिः तावदावरणशक्तिप्रतिबन्ध इति ॥

नन्वेवं सति धारावाहिकस्थले द्वितीयादिवृत्तीनामावरणानभिभावकत्वेन वैफल्यं स्यात्, प्रथमज्ञानेनैव निवर्तनतिरस्काराभ्यामावरणमात्रस्याभिभवादिति; अत्राहुः— वृत्तितिरस्कृतमज्ञानं तदुपरमे पुनरावृणोति,

---

भावः। एवमिति। ज्ञानं कर्तृ। यावज्ज्ञानस्थितिरिति। 'सर्वं सर्वदावृणोति' इत्युत्सर्गस्य ज्ञानस्थितिरपवादहेतुरिति भावः ॥

'ज्ञानमात्रमज्ञाननिवर्तकम्' इति नियममाक्षिपति— **नन्वेवं सतीति**। एकेन ज्ञानेनैकाज्ञानस्य नाशः, इतरेषां तिरस्कार इत्युपगमे सतीत्यर्थः। **वैफल्यं स्यादिति**। अज्ञाननाशादिप्रयोजनवत्त्वं न स्यादित्यर्थः। तत्प्रयोजनस्य प्रथमज्ञानेनैव सिद्धत्वादित्याह— **प्रथमेति**। प्रथमज्ञानसिद्धस्याप्यावरणतिरस्कारस्य द्वितीयादिज्ञानसाध्यत्वं साध्यलक्षणविशेषानुरोधेन संभवति। अतो न द्वितीयादिज्ञानवैफल्यम्, अज्ञाननाशरूपप्रयोजनाभावेऽपि तत्तिरस्कारलक्षणफलस्य सत्त्वादिति परिहरति— **अत्राहुरिति**। प्रथमं धारारहितबुद्धिस्थले सिद्धमर्थं सदृष्टान्तं दर्शयति—**वृत्तितिरस्कृतमिति**। 'घटोऽयम्' इति प्रत्यक्षज्ञानं ह्येकमज्ञानं नाशय-

प्रदीपतिरस्कृतं तम इव प्रदीपोपरमे । वृत्त्युपरमसमये वृत्त्यन्तरोदये तु तिरस्कृतमज्ञानं तथैवावतिष्ठते, प्रदीपोपरमसमये प्रदीपान्तरोदये तम इव । तथा च 'यस्मिन्सत्यग्रिमक्षणे यस्य सत्त्वं यद्व्यतिरेके चासत्त्वम्, तत्तज्जन्यम्' इति प्रागभावपरिपालनसाधारणलक्षणा-

---

दितरदज्ञानं सर्वं तिरस्करोति । तच्च तिरस्कृतमज्ञानं घटज्ञानोपरमसमये पुनस्तमावृणोति । यदि बुभुत्सादिवशात्प्रथममुत्पन्नघटज्ञाननाशक्षणे घटप्रत्यक्षान्तरमुदेति, तदा तिरस्कृतमज्ञानं तथैवावतिष्ठत इत्यर्थः । 'यस्मिन्सत्यग्रिमक्षणे यस्य सत्त्वं यस्मिन्नसति यस्यासत्त्वम्, तत्तज्जन्यम्' इति साध्यलक्षणम् । इदं च साध्यनादिसाधारणम् । तथा हि — यस्मिन्दण्डादौ सत्युत्तरक्षणे घटादिकार्यसत्त्वं दण्डादावसति च घटादिकार्यासत्त्वम्, ततो घटादिकार्यं दण्डादिजन्यम्; तथा प्रायश्चित्ते सत्युत्तरक्षणे दुःखप्रागभावस्य सत्त्वं प्रायश्चित्ते चासति दुःखस्यैवोदयाद्दुःखप्रागभावस्यासत्त्वमिति रीत्यानादेरपि दुःखप्रागभावस्य प्रायश्चित्तपरिपाल्यतया प्रायश्चित्तसाध्यत्वमुपेयते । एवं प्रकृतेऽपि साध्यत्वं दर्शयति— **तथा चेति** । द्वितीयवृत्त्युदये सति प्रथमज्ञानसिद्धस्यावरणतिरस्कारस्योत्तरक्षणे सत्त्वं प्रथमज्ञाननाशक्षणे द्वितीयवृत्युदयव्यतिरेके चोक्ततिरस्कारस्यासत्त्वमिति प्रथमज्ञानकाल एव सिद्धस्यापि तस्य द्वितीयवृत्तिजन्यतया तत्फलत्वम् । एवं तृती-

नुरोधेनानावरणस्य द्वितीयादिवृत्तिकार्यत्वस्यापि लाभान्न तद्वैफल्यमिति ॥

न्यायचन्द्रिकाकृतस्त्वाहुः— केनचिज्ज्ञानेन कस्यचिदज्ञानस्य नाश एव । न त्वावारकाणामप्यज्ञानान्तराणां तिरस्कारः । तथा च धारावाहिकद्वितीयादिवृत्तीनामप्येकैकाज्ञाननाशकत्वेन साफल्यम् । न चैवं ज्ञानोदयेऽप्यावरणान्तरसंभवाद्विषयानवभासप्रसङ्गः । अवस्थारूपाण्यज्ञानानि हि तत्तत्कालोपलक्षितस्वरूपावा-

---

यादिवृत्तीनामप्यावरणतिरस्कारफलकत्वं योजनीयमित्यर्थः । अनावरणस्येति । आवरणतिरस्कारस्येत्यर्थः ॥

ज्ञानमात्रभज्ञाननिवर्तकं न भवति, धारादितीयादिज्ञाने व्यभिचारादित्यत्र प्रकारान्तरेण परिहारं ब्रूते— न्यायचन्द्रिकाकृतस्त्विति । न त्विति । न चाज्ञानान्तराणां तिरस्काराभाव एकज्ञानकालेऽपि तैरतिरस्कृतैर्विषयस्यावृतत्वाद्विषयानवभासप्रसङ्ग इति वाच्यम् । प्रथमज्ञानोदयसमय एकमेवाज्ञानं विषयावारकम् । इतरेषां तु तदा विषयावारकत्वमेव नोपेयते । अतो न तत्तिरस्करणापेक्षेति भावः । ततः किम्, तत्राह— तथा चेति । आशयमविदुषः शङ्कामनूद्य निराकरोति— न चैवमित्यादिना । एवंशब्दस्य प्रथमज्ञानेनावारकाज्ञानान्तराणामतिरस्करणे सतीत्यर्थः । तत्तत्कालेति । अवस्थाज्ञानानां सर्वेषां मूलाज्ञानस्यैव

रकाणि । ज्ञानानि च यावत्स्वकालोपलक्षितविषयावा-रकाज्ञाननाशकानि । तथा च किंचिज्ज्ञानोदये तत्का-लीनविषयावारकाज्ञानस्य नाशाद्विद्यमानानामज्ञानान्त-राणामन्यकालीनविषयावारकत्वाच्च न तत्कालीनविष-

---

सर्वदा विषयचैतन्यावारकत्वं नास्ति, वैयर्थ्यात् । किं तु किंचि-दज्ञानं कंचित्कालं विषयचैतन्यमावृणोति, किंचिच्च कालान्तरे तदावृणोतीत्यनेन प्रकारेण कालविशेषेरुपलक्षितविषयचैतन्यावा-रकत्वं ज्ञानानामपि स्वस्वोदयकाले स्वस्वविषयावारकत्वेन प्रसक्ता-ज्ञाननिवर्तकत्वमित्यर्थः । एवमाशयमुद्घाट्येदानीं विषयानवभास-प्रसङ्गं परिहरति— तथा चेति । एकज्ञानकालेऽज्ञानान्तराणाम-नावारकत्वे सिद्धे सतीत्यर्थः । तत्कालीनेति । किंचिज्ज्ञानोदय-कालीनविषयस्यावारकत्वेन प्रसक्ताज्ञानस्येत्यर्थः । न तदिति । किंचिज्ज्ञानकालीनेत्यर्थः । ननु तैस्तैः कालविशेषैर्विशिष्टस्यैव विषयस्य तत्तदज्ञानावरणीयत्वमित्येवं कालविशेषाणां विशेषणत-यावरणीयकोटावनुप्रवेशं विहाय तेषां किमित्युपलक्षणत्वं स्वीक्रि-यत इत्याशङ्क्य, तथा सति धारास्थले विषयावारकत्वेन प्रसक्ता-ज्ञाननिवर्तकद्वितीयादिवृत्तीनामपि तत्तत्कालविशेषविशिष्टविषय-कत्वं वाच्यम्, समानविषयकत्वं विना तान्निवर्तकत्वानुपपत्तेः, तच्च न संभवति क्षणभेदानामप्रत्यक्षत्वात्, अतस्तेषामुपलक्षणत्वमा-श्रितमिति समाधानमभिप्रेत्य समयविशेषस्योपलक्षणत्वे दृष्टान्त-

यावभासे काचिदनुपपत्तिः । कारीरीफले वृष्टावासन्नसमयस्येवाज्ञानविषये घटादौ तत्तत्कालस्योपलक्षणतया विषयकोटावननुप्रवेशेन सूक्ष्मतत्तत्कालभेदाविषयैर्धारावाहिकद्वितीयादिज्ञानैरज्ञानानां निवृत्तावपि न काचिदनुपपत्तिरिति ॥

केचित्तु— प्रथमज्ञाननिवर्त्यमेवाज्ञानं स्वरूपावारकम् । द्वितीयादिज्ञाननिवर्त्यानि तु देशकालादिविशेषणान्तरविशिष्टविषयाणि । अत एव सत्तानिश्चयरूपेऽज्ञाननिवर्तके चैत्रदर्शने सकृज्जाते 'चैत्रं न जानामि'

माह— कारीरीफले वृष्टाविति । कारीरीनामकेष्टिफलभूता वृष्टिरिष्टिसमाप्त्युत्तरक्षण एव वक्तव्या, न तु कालान्तरे, तदानीं शुष्यतः सस्यस्य संजीवने कालान्तरीयवृष्टेरनुपयोगात् । तथा चासन्नसमयस्य वृष्टिविशेषणतया फलकोटिप्रवेशो नोपेयते, इष्टया विनापि समयविशेषसंभवात् । किं तु समयान्तरव्यावर्तकतयोपलक्षणत्वमेवाश्रितमित्यर्थः ॥

धारावहनस्थले द्वितीयादिवृत्तीनामावरणाभिभावकत्वं न स्यादित्याक्षेप एव परिहारं त्रेधा दर्शयति— केचित्त्विति । प्रथमं वस्तुगतिमाह— प्रथमज्ञानेति । उक्तव्यवस्थायां प्रमाणत्वेनानुभवं दर्शयति— अत एवेति । उक्तविभागाभ्युपगमादेवेत्यर्थः ।

इति स्वरूपावरणं नानुभूयते । किं तु 'इदानीं स कुत्रेति न जानामि' इत्यादिरूपेण विशिष्टावरणमेव । विस्मरणशालिनः क्वचित्सकृद्दृष्टेऽपि 'न जानामि' इति स्वरूपावरणं दृश्यते चेत्, तत्र तथास्तु । अन्यत्र सकृद्दृष्टे विशिष्टविषयाण्येवाज्ञानानि ज्ञानानि च । न चैवं

ननूक्तविभागो न सिध्यति, क्वचित्सकृद्दृष्टेऽपि वस्तुनि पूर्ववत्स्वरूपावरणानुभवादित्याशङ्क्याह— विस्मरणशालिन इति । तत्र तथास्त्विति । पुनः स्वरूपावरणानुभवस्थले द्वितीयादिज्ञाननिवर्त्यमप्यज्ञानं स्वरूपावारकमस्त्वित्यर्थः । तथा चोक्तविभाग औत्सर्गिक इति भावः । अन्यत्रेति । विस्मरणाभावस्थल इत्यर्थः । नन्वज्ञानानां विशिष्टविषयकत्वे तेषामनिवृत्तिप्रसङ्गः, सकृद्दृष्टे वस्तुनि द्वितीयादिज्ञानानामपि प्रथमज्ञानवत्स्वरूपमात्रविषयकत्वेन तत्समानविषयकत्वरहितानां तन्निवर्तकत्वानुपपत्तेरिति ; नेत्याह— ज्ञानानि चेति । सकृद्दृष्टे विषये ज्ञानान्यपि 'चैत्र इदानीमत्रास्ते' इत्याद्याकाराणि सन्ति विशिष्टविषयाण्येवेति स्वीकारान्नोक्तदोष इति भावः । ननु ज्ञानानां विशिष्टविषयकत्वं धाराद्वितीयादिवृत्तिषु व्यभिचारपरिहारार्थं हि कल्प्यते । तथा च तत्र ज्ञानानां किं घटिकार्धघटिकाद्यात्मकस्थूलकालविशिष्टघटादिविषयकत्वं विवक्षितम, किं वा क्षणात्मकसूक्ष्मकालविशिष्टघटादिविषयकत्वं विवक्षितमिति विकल्पं मनसि निधायोभयथापि धारास्थले द्वितीयादिवृत्तिषु व्यभिचारतादवस्थ्यमिति शङ्कते—न चैवं सतीति ।

सति धारावाहिकद्वितीयादिज्ञानानामज्ञाननिवर्तकत्वं न स्यात्, स्थूलकालविशिष्टाज्ञानस्य प्रथमज्ञानेनैव निवृत्तेः पूर्वापरज्ञानव्यावृत्तसूक्ष्मकालविशिष्टाज्ञानस्य तदविषयैर्द्वितीयादिज्ञानैर्निवृत्त्ययोगादिति वाच्यम् । धारावाहिकस्थले प्रथमोत्पन्नाया एव वृत्तेस्तावत्कालावस्थायित्वसंभवेन वृत्तिभेदानभ्युपगमात्, तदभ्युपगमेऽपि तावद्-

---

द्वितीयादिज्ञानानां तान्निवर्त्याज्ञानानां चोत्सर्गतो विशिष्टविषयकत्वे सतीत्यर्थः । **प्रथमज्ञानेनैवेति** । स्थूलकालविशिष्टविषयकेणेति शेषः । **पूर्वापरेति** । धारास्थले हि ज्ञानानि क्षणस्थितिकानि । ततश्च पूर्वापरज्ञानकालेभ्यो व्यावृत्ता ये सूक्ष्मकालाः क्षणात्मकाः, तैर्विशिष्टस्य विषयस्यावारकं यदज्ञानं तस्येत्यर्थः । **तदविषयैरिति** । सूक्ष्मकालविशिष्टाविषयकैरित्यर्थः । यत्रैकस्मिन्नेव श्रीमूर्त्यादौ दीर्घकालं नैरन्तर्येण स्फुरणमस्ति तत्र श्रीमूर्त्यादिगोचरवृत्तिरेकैव, तद्भेदे मानाभावात्, सिद्धान्ते वृत्तेः क्षणस्थितिकत्वानभ्युपगमात् । तथा च न तत्र व्यभिचारशङ्केत्याह— **धारावाहिकस्थल इति** । ननु तत्र वृत्तेरेकत्वे धारावहनत्वप्रसिद्धिविरोधः, एकस्यां तदसंभवात्, ध्यानसमाध्योरप्युक्तरीत्यैकवृत्तिरूपत्वापत्तौ तयोः प्रत्ययसंततिरूपत्वप्रतिपादकभाव्यादिविरोधप्रसङ्गाच्चेत्याशङ्क्य धाराया अनेकवृत्तिरूपत्वमङ्गीकृत्य व्यभिचारं परिहरति— **तदभ्युपगमेऽपीति** । **संभवेनेति** । धा-

त्कालावस्थायिपञ्चषवृत्तिरूपत्वसंभवेन परस्परव्यावृत्त-स्थूलकालादिविशेषणभेदविषयत्वोपपत्तेः, प्रतिक्षणोद्य-दनेकवृत्तिसंतानरूपत्वाभ्युपगमेऽपि द्वितीयादिवृत्तीना-मधिगतार्थमात्रविषयतया प्रामाण्याभावेनावरणानिवर्त-कत्वेऽप्यहानेश्च । न हि विषयाबाधमात्रं प्रामाण्यम्,

---

राया इति शेषः । उपपत्तेरिति । द्वितीयादिवृत्तीनामज्ञाननिवर्तकत्वदोषो नास्तीति शेषः । धारावाहिकवृत्तीनां न्यायमत इव क्षणस्थितिकत्वमुपेत्यापि व्यभिचारं परिहरति— प्रतिक्षणोद्यदिति । प्रतिक्षणमुद्यन्त्योऽनेकाश्च या वृत्तयस्तत्संतानेत्यर्थः । अभ्युपगमेऽपीति । धारायाः इति शेषः । अहानेश्चेति । 'ज्ञानमज्ञाननिवर्तकम्' इति नियमभङ्गरूपाया हानेरभावादित्यर्थः । हान्यभावे हेतुमाह— प्रामाण्याभावेनेति । तत्र हेतुमाह— अधिगतार्थमात्रेति । अनधिगतार्थविषयकत्वाभावो मात्रपदार्थः । तथा च द्वितीयादिवृत्तीनां प्रमात्वं नास्ति, स्मृतिवदधिगतार्थमात्रविषयकत्वादित्यर्थः । नन्वनधिगताबाधितार्थानुभवत्वं प्रमात्वं न संभवति, अबाधितानुभवपदव्यावर्त्ययोर्भ्रमस्मृत्योरिवानधिगतपदव्यावर्त्याभावात् । तथा चाबाधितार्थानुभवत्वमात्रं प्रमात्वम् । तच्च द्वितीयादिवृत्तिष्वक्षतमिति तत्र नियमभङ्गरूपा हानिः स्यादेवेति, नेत्याह— न ह्रीति । प्रामाण्यमित्यनन्तरं तथा सतीति शेषः । नैयायिकः शङ्कते— न चेष्टापत्तिरिति । इष्टापत्तिरिति

प्रागधिगतानधिगतयोः पर्वततद्वृत्तिपावकयोरनुमितिविषययोरबाधस्याविशेषेणोभयत्राप्यनुमितेः प्रामाण्यप्रसङ्गात् । न चेष्टापत्तिः; 'वह्नावनुमितिः प्रमाणम्' इतिवत् 'पर्वतेऽप्यनुमितिः प्रमाणम्' इति व्यवहारादर्शनात्, विवरणे साक्षिसिद्धस्याज्ञानस्याभावव्यावृत्तिप्रत्या-

---

न चेति संबन्धः । व्यवहारादर्शनादिति । तथा च प्रामाण्याप्रामाण्यव्यवस्थाया व्यवहारानुसारित्वादनुमितेः पर्वतांशे प्रमात्वाभावेनालक्ष्यत्वे सिद्धे पर्वतांशानुमितौ प्रमालक्षणस्यातिव्याप्तिपरिहारायानधिगतत्वविशेषणं तल्लक्षणे देयमेव । ततश्च धारावाहिकीयादिज्ञानानां न प्रामाण्यमिति भावः । अज्ञातत्वस्य प्रमालक्षणे प्रवेशोऽस्तीत्यत्र हेत्वन्तरमाह— विवरण इति । विवरणेऽज्ञानस्य प्रमाणावेद्यत्वोक्तेश्चेति संबन्धः । अत्रानुमानपदमनुमितिपरं प्रमाणपदमपि प्रमितिपरम्, प्रमालक्षणस्य प्रकृतत्वादिति बोध्यम् । नन्वज्ञानस्यानुमितिशाब्दार्थापत्तिरूपवृत्तिविषयत्वे कथं तस्य प्रमाणावेद्यत्वम्, अत आह— साक्षिसिद्धस्येति । 'अशोऽहम्' इत्यनुभवरूपेण साक्षिणा अज्ञानस्वरूपस्य ज्ञातत्वादज्ञानानुमित्यादेरज्ञानस्वरूपे विषयेऽज्ञातत्वघटितप्रमात्वं नास्तीति मत्वा प्रमाणावेद्यत्वं तस्योक्तम् । न च साक्षिण एव प्रमाणत्वात्कथं सामान्यतः प्रमाणावेद्यत्वमुक्तमिति वाच्यम् । साक्ष्यतिरिक्तप्रमाणावेद्यत्वस्यैव विवक्षितत्वात्, साक्षिणो नित्यत्वेन प्रमाणाजन्यतया पराभिमतेश्वरज्ञानवत्साक्षिणः प्रमाप्रमाबहिर्भूतत्वेन

यनार्थानुमानादिविषयत्वेऽपि प्रमाणावेद्यत्वोक्तेश्च । तस्माद्द्वितीयादिवृत्तीनां प्रामाण्याभावादुपासनादिवृत्ती-

---

प्रमाणत्वाभावाद्वा तदवेद्यत्ववचनमिति भावः । ननु साक्षिप्रत्यक्षसिद्धं वेदज्ञानं किमर्थं तर्हि तत्रानुमानाद्युपन्यस्यते, तत्राह— **अभावव्यावृत्तीति** । अज्ञानस्य पराभिमताज्ञानादभावरूपाद्या व्यावृत्तिस्तत्प्रत्यायनमर्थः । प्रयोजनं येषामनुमानादीनां तानि तथेत्यर्थः । एतदुक्तं भवति— 'अहमज्ञः' इत्यनुभवसिद्धमज्ञानं भावरूपमिति सिद्धान्तिनः । तज्ज्ञानप्रागभावरूपमिति वैशेषिकादयः । ततश्चानुमानादिभिरज्ञानस्याभावप्रतियोगिकभेदः साध्यत इति न तेषां वैयर्थ्यम् । न च तस्य भावरूपत्वसाधने वा किं लभ्यत इति वाच्यम् । 'मायां तु प्रकृतिं विद्यात्' इत्यादिशास्त्रसिद्धस्य प्रपञ्चपरिणाम्युपादानत्वस्य सिद्धेस्तत्साधनफलत्वात् । **तस्मादिति** । अनधिगतत्वघटितप्रमालक्षणाभावादित्यर्थः । **उपासनादिवृत्तीनामिति** । उपासनारूपवृत्तिर्न ज्ञानम्, क्लृप्ततत्कारणाजन्यत्वान्मनसो ज्ञानकारणत्वस्य निरस्तत्वान्निरसिष्यमाणत्वाच्च । किं तु गमनादिवत्क्रियारूपा, पुरुषकृतिसाध्यत्वात् । अतः सा नोपास्यस्वरूपाज्ञाननिवर्तिका । एवमिच्छाद्वेषादिवृत्तयोऽपि न स्वविषयाज्ञाननिवर्तिकाः, ज्ञानरूपत्वाभावात् । द्वितीयादिवृत्तीनां तु स्मृतिवज्ज्ञानरूपत्वेऽपि नाज्ञाननिवर्तकत्वमुपेयते, प्रमात्वाभावादित्यर्थः । ननु कथं न हानिः, तासां प्रमात्वाभावेऽपि ज्ञानत्वाभ्युपगमेन 'ज्ञानमात्रमज्ञाननि-

नामिवाज्ञाननिवर्तकत्वेऽपि न हानिः, प्रमाणवृत्तीनामेव तन्निवर्तकत्वाभ्युपगमात् ॥

ननु नायमपि नियमः, परोक्षवृत्तेरनिर्गमेनाज्ञाननिवर्तकत्वादिति चेत्; अत्र केचिदाहुः— द्विविधं विषयावारकमज्ञानम् । एकं विषयाश्रितं रज्ज्वादिसंभिन्नविक्षेपोपादानभूतं कार्यकल्प्यम्, अन्यत्पुरुषाश्रितम्

वर्तकम्' इति नियमस्य व्यभिचाररूपहानेरावश्यिकत्वादित्याशङ्क्याह— प्रमाणवृत्तीनामेवेति । न त्वधिगतार्थमात्रगोचरवृत्तीनामपीत्येवकारार्थः । तथा च 'ज्ञानमात्रमज्ञाननिवर्तकम्' इति नियमो नाङ्गीक्रियते येनोक्तदोषः स्यादिति भावः । अभ्युपगमादित्यनन्तरमित्याहुरिति शेषः, 'केचित्तु' इत्युपक्रमात् ॥

'प्रमामात्रमज्ञाननिवर्तकम्' इति नियमस्यापि व्यभिचारं शङ्कते— नन्विति । परोक्षज्ञानस्यापि तन्निवर्तकत्वसत्त्वान्न व्यभिचार इति वक्तुमज्ञानस्य द्वैविध्यमाह— द्विविधमित्यादिना । रज्ज्वादीति । रज्ज्वादेर्यो विक्षेपः सर्पादिरूपो विवर्तस्तदुपादानभूतमित्यर्थः । कार्यकल्प्यमिति । विक्षेपाख्यकार्यानुपपत्तिकल्प्यम्, न त्वनुभवसिद्धमित्यर्थः । ननु रज्ज्वादिगताज्ञानस्य 'रज्जुं न जानामि' इत्यनुभवसिद्धत्वात्कथं तस्य कार्यैककल्प्यत्वमित्याशङ्क्य अनुभवस्य विषयगताज्ञानं न विषय इत्याह— अन्यदिति ।

'इदमहं न जानामि' इत्यनुभूयमानम्; पुरुषाश्रितस्य विषयसंभिन्नविक्षेपोपादानत्वासंभवेन विषयाश्रितस्य 'इदमहं न जानामि' इति साक्षिरूपप्रकाशसंसर्गायोगेन च द्विविधस्याप्यावश्यकत्वात्। एवं च परोक्षस्थले वृत्तेर्निर्गमनाभावाद्दूरस्थवृक्षे आप्तवाक्यात्परिमाणविशेषावगमेऽपि तद्विपरीतपरिमाणविक्षेपविशेषदर्शनाच्च वि-

---

विषयावारकमज्ञानं द्विविधम्, एकं विषयाश्रितमन्यत्पुरुषाश्रितमिति संबन्धः। तथा च विषयाश्रितं सप्रमाणं प्रदर्श्य पुरुषाश्रितं सप्रमाणं दर्शयतीति वा अन्यदित्यस्यावतरणं बोध्यम्। नन्वेकेनैवाज्ञानेन सर्पादिविक्षेपस्य 'न जानामि' इत्यनुभवस्य च सिद्धेः किमज्ञानद्वैविध्येन; अत आह— **पुरुषाश्रितस्येति**। विषयो रज्ज्वादिरधिष्ठानम्, तत्संभिन्नो विषयतादात्म्यापन्नो यो विक्षेपस्तदुपादानत्वासंभवेनेत्यर्थः। 'न जानामि' इत्याकारको यः साक्षिरूपः प्रकाशस्तत्संसर्गायोगेनेत्यर्थः। इदानीं व्यभिचारं परिहरति— **एवं चेति**। अज्ञानद्वैविध्ये सतीत्यर्थः। एवं च परोक्षस्थले विषयगताज्ञाननिवृत्तावपि पुरुषगताज्ञाननिवृत्तिरस्त्येवेति संबन्धः। तथा च न व्यभिचार इति भावः। परोक्षज्ञानस्य विषयगताज्ञाननिवर्तकत्वाभावे हेतुद्वयमाह— **वृत्तेरित्यादिना**। **निर्गमनाभावादिति**। विषयचैतन्यसंसृष्टाया एव वृत्तेर्विषयचैतन्यगताज्ञाननिवर्तकत्वस्य वक्ष्यमाणतया निर्गमनाभावे वृ-

षयगताज्ञाननिवृत्तावपि पुरुषगताज्ञाननिवृत्तिरस्त्येव, 'शास्त्रार्थं न जानामि' इत्यनुभूताज्ञानस्य तदुपदेशा-

---

त्तेर्विषयचैतन्यसंसर्गो न सिध्यतीति भावः। **तद्विपरीतेति**। 'दूरे दृश्यमानो वृक्षः संनिहितवृक्ष इव महान्' इत्याप्तवाक्यजन्यपरोक्षज्ञानविषयभूतादूरस्थवृक्षगतात्तस्मात्परिमाणविशेषाद्विपरीतो यः परिमाणरूपविक्षेपविशेषस्तस्य दर्शनादित्यर्थः। यदि परोक्षज्ञानं विषयगताज्ञाननिवर्तकं स्यात्, तदाप्तवाक्यजन्यावगमेन परिमाणविशेषाज्ञानानिवृत्त्यापत्त्या विपरीतपरिमाणात्मकविक्षेपोत्पत्तिर्न स्यात्, उपादानाभावादिति भावः। परोक्षज्ञानेन पुरुषगताज्ञाननिवृत्तौ हेतुमाह— **शास्त्रार्थमिति**। 'शास्त्रार्थं न जानामि' इत्यनेन प्रकारेण यच्छास्त्रार्थाज्ञानमनुभूतं तस्य शास्त्रार्थोपदेशानन्तरम् 'शास्त्रार्थाज्ञानमिदानीं निवृत्तम्' इति निवृत्तिरनुभूयते। तत्र शास्त्रार्थो द्विविधः— धर्मरूपो ब्रह्मरूपश्च। धर्मरूपे शास्त्रार्थ उपदेशजन्यज्ञानं परोक्षमेव। न तु कदाचिदप्यपरोक्षम्, तस्य साक्षात्कारायोग्यत्वात्। तथा च तत्र विषयगताज्ञाननिवृत्तिप्रसक्तिरेव नास्तीति पुरुषगताज्ञानमेव निवर्तत इति वक्तव्यम्, इतरथा तन्निवृत्त्यनुभवविरोधात्। ब्रह्मरूपे च शास्त्रार्थ उपदेशजन्यं ज्ञानं परोक्षम्। तावन्मात्रान्न विषयावारकं मूलाज्ञानं विषयगतं निवर्तते, मननादिविधिवैयर्थ्यप्रसङ्गात्। अतः पुरुषगताज्ञानमेव निवर्तत इति वक्तव्यम्, अन्यथा तत्रापि तन्निवृत्त्यनुभवविरोधादेवेति भावः। परो-

नन्तरं निवृत्त्यनुभवात् । अत एव 'अनुमेयादौ सुषुप्तिव्यावृत्तिः' इति विवरणस्य तद्विषयाज्ञाननिवृत्तिरर्थ इत्युक्तं तत्त्वदीपन इति ॥

अन्ये तु— नयनपटलवत्पुरुषाश्रितमेवाज्ञानं विषयावारकम् । न तदतिरेकेण विषयगताज्ञाने प्रमाणमस्ति । न च पुरुषाश्रितस्य विषयगतविक्षेपपरिणामित्वं

क्षज्ञानस्याज्ञाननिवर्तकत्वे विवरणादिसंमतिमाह— **अत एवेति** । उक्तानुभवबलादेवेत्यर्थः । तद्विषयेत्यत्र तत्पदमनुमेयादिपरम् । सुषुप्तिपदमज्ञानपरं व्यावृत्तिपदं निवृत्तिपरमिति व्याख्यातं तत्त्वदीपने । तथा चानुमेयादौ विषयगताज्ञाननिवृत्त्यभावस्य वक्ष्यमाणतया तत्र पुरुषगताज्ञाननिवृत्तिरनुमित्यादिपरोक्षज्ञानेन जायत इत्ययमर्थस्तत्र विवक्षित इति प्रतीयत इत्यर्थः ॥

अज्ञानद्वैविध्याभावेऽपि 'प्रमामात्रमज्ञाननिवर्तकम्' इति नियमस्य न व्यभिचार इति मतं दर्शयति— **अन्ये त्विति** । पुरुषगताज्ञानापेक्षयान्यद्विषयगतमज्ञानं किं विषयावरणार्थमुपेयते, किं वा शुक्तिरजतादिविक्षेपोत्पत्त्यर्थम् । नाद्य इत्याह— **नयनपटलवदिति** । नयनगतकाचादिवदित्यर्थः । न द्वितीय इत्याह— **न तदतिरेकेणेति** । विषयगताज्ञानाभावेऽपि वक्ष्यमाणविधया विक्षेपोत्पत्तिसंभवादिति भावः । प्रमाणाभावोऽसिद्ध इति

न संभवति, तत्संभवे वा दूरस्थवृक्षपरिमाणे परोक्षज्ञानादज्ञाननिवृत्तौ विपरीतपरिमाणविक्षेपो न संभवतीति वाच्यम् । वाचस्पतिमते सर्वस्य प्रपञ्चस्य जीवाश्रिताज्ञानविषयीकृतब्रह्मविवर्तत्वेन तद्वच्छुक्तिरजतादेः पुरुषाश्रिताज्ञानविषयीकृतब्रह्मविवर्तत्वोपपत्तेः, परोक्षवृत्त्यैकावस्थानिवृत्तावप्यवस्थान्तरेण विपरीतपरिमाणविक्षेपोपपत्तेश्चेत्याहुः ॥

शङ्कते— **न चेति । न संभवतीति ।** पुरुषगताज्ञानस्य शुक्त्याद्यवच्छिन्नचैतन्ये सत्त्वाभावादिति भावः । पुरुषगतस्यैवाज्ञानस्य विषयगतविक्षेपोपादानत्वे दोषमाह—**तत्संभवे वेति ।** पुरुषगताज्ञानस्य विषयगतविक्षेपपरिणामित्वं तच्छब्दार्थः । **न संभवतीति ।** विषयगताज्ञानस्यानभ्युपगमात्पुरुषगताज्ञानस्य चाप्तोपदेशजन्यपरोक्षज्ञानेन निवृत्तत्वाच्चेति भावः । आद्यदोषं परिहरति— **वाचस्पतिमत इति ।** शुक्तिरजतादिविक्षेपस्याज्ञानपरिणामत्वपक्षेऽज्ञानस्य विषयचैतन्यगतत्वं वक्तव्यम् । तस्याज्ञानपरिणामत्वानङ्गीकारपक्षे तु तस्य विषयचैतन्यगतत्वं नापेक्षितमिति भावः । दार्ष्टान्तिके ब्रह्मपदं शुक्त्याद्यवच्छिन्नचैतन्यरूपब्रह्मपरम् । न तु पूर्णब्रह्मपरम, अवच्छिन्नचैतन्यस्यैव शुक्तिरजताद्यधिष्ठानत्वोपगमादिति भावः । विपरीतपरिमाणरूपो विक्षेपो न संभवतीति द्वितीयदोषं परिहरति— **परोक्षवृत्त्येति ।** परोक्ष-

अपरे तु— शुक्तिरजतादिपरिणामोपपत्त्याज्ञस्याद्वि-

ज्ञानादज्ञाननिवृत्तिर्यथानुभूयते तथोदाहृतस्थले सत्यपि परोक्ष-ज्ञाने विपरीतपरिमाणोत्पत्तिरनुभूयते। तथा चानुभवद्वयानुरोधेन पुरुषाश्रितस्यैवाज्ञानस्य विषयावारकस्यैकदेशः परोक्षज्ञानेन निवर्तत एकदेशान्तरमनुवर्तत इति कल्प्यते। न त्वज्ञानद्वैविध्यमभ्युपगम्यते, गौरवादिति भावः। अवस्थान्तरेणेत्यनन्तरं पुरुषाश्रिताज्ञानस्यैवेति शेषः। वस्तुतस्तु परोक्षज्ञानस्याज्ञाननिवर्तकत्वमतेऽपि प्रतिबन्धरहितमेव परोक्षज्ञानमज्ञाननिवर्तकम्। प्रकृते च भ्रमानुरोधेन दूरत्वादिदोषप्रतिबद्धत्वादाप्तवाक्यजन्यमपि ज्ञानं पुरुषगताज्ञाननिवर्तकं न भवति। अतो न विपरीतपरिमाणोत्पत्त्यनुपपत्तिशङ्कावकाशः। न च तथा सति आप्तोपदेशानन्तरम् 'दूरस्थवृक्षगतपरिमाणविशेषं न जानामि' इत्यनुभवापत्तिरिति वाच्यम्। सत्तानिश्चयरूपपरोक्षज्ञानस्य सत्यप्यज्ञाने तदनुभवप्रतिबन्धकत्वोपपत्तेः। न च 'प्रमामात्रमज्ञाननिवर्तकम्' इति नियमस्य प्रतिबद्धपरोक्षप्रमायां व्यभिचार इति वाच्यम्। अप्रतिबद्धत्वस्य प्रमाविशेषणत्वोपपत्तेरिति बोध्यम्॥

एवम् 'अप्रतिबद्धप्रमामात्रमज्ञाननिवर्तकम्' इति नियममनुसृत्य तदव्यभिचाराय परोक्षज्ञानस्याज्ञाननिवर्तकत्वमुपपादितम्। इदानीं तथा नियमो नास्ति, किं त्वप्रतिबद्धापरोक्षज्ञानमेवाज्ञाननिवर्तकम्, अतो न परोक्षज्ञाने व्यभिचारशङ्केति मतमवतारयति— **अपरे त्विति**। लोके घटादेर्मृदादिपरिणामत्वस्य

षयावगुण्ठनपटवद्विषयगतमेवाज्ञानं तदावारकम् । न च तथा सति अज्ञानस्यान्तःकरणोपहितसाक्ष्यसंसर्गेण ततः प्रकाशानुपपत्तिः परोक्षवृत्तिनिवर्त्यत्वासंभवश्च दोष इति वाच्यम् । अवस्थारूपाज्ञानस्य साक्ष्यसंसर्गेऽपि तत्सं-

---

प्रसिद्धत्वात्तद्वच्छुक्तिरजतादेरपि परिणामत्वं सिध्यति । तत्परिणामि चान्वयव्यतिरेकाभ्यां परिशेषसहकृताभ्यामज्ञानमेव सिध्यति । शुक्त्यादेः प्रातिभासिकरजतादिपरिणामित्वासंभवादज्ञानस्य च विषयचैतन्यगतस्य यथा रजतादिविक्षेपपरिणामित्वमाज्ञस्येनोपपद्यते, न तथा पुरुषाश्रितस्योपपद्यते । अतस्तदुपपत्त्याज्ञस्यानुरोधेन विषयगतमेवावस्थारूपमज्ञानमास्थेयम् । न तु पुरुषगतमप्यवस्थारूपमज्ञानान्तरम्, वैयर्थ्यान्मानाभावाच्चेति भावः । यद्यपि पुरुषाश्रितस्याप्यज्ञानस्य पुरुषमपरित्यज्यैव दीर्घप्रभान्यायेन वृत्तिद्वारा बहिर्निर्गत्य विषयचैतन्यमाश्रितस्य रजतादिपरिणामित्वमुपपद्यते; तथापि सोपपत्तिर्नाञ्जसी, मूलाज्ञानवदवस्थाज्ञानस्यापि निष्क्रियत्वेन प्रभान्यायानवतारादित्यभिप्रेत्य परिणामोपपत्त्याज्ञस्यादित्युक्तम् । **तथा सतीति** । विषयावारकाज्ञानस्य विषयगतत्वे सतीत्यर्थः । तत इति पञ्चमी । साक्षिण इत्यर्थः । **असंभवश्चेति** । परोक्षवृत्तेर्विषयदेशे निर्गमनाभावादिति भावः । आद्यदोषं परिहरति— **अवस्थारूपाज्ञानस्येति** । 'शुक्तिं न जानामि' इत्याद्यनुभवस्य नावस्थाज्ञानं विषयगतं विषयः । किं तु

सृष्टमूलाज्ञानस्यैव 'शुक्तिमहं न जानामि' इति प्रकाशोपपत्तेः शुक्त्यादेरपि मूलाज्ञानविषयचैतन्याभिन्नतया तद्विषयत्वानुभवाविरोधात्, विवरणादिषु मूलाज्ञानसाधनप्रसङ्ग एव 'इदमहं न जानामि' इति

मूलाज्ञानम्, तस्यैव साक्षिसंसृष्टत्वादित्यर्थः। ननु मूलाज्ञानस्य ब्रह्मविषयकत्वात्कथं तस्य शुक्तिविषयकत्वानुभवः संभवति। अवस्थाज्ञानस्य वा कथं शुक्तिविषयकत्वानुभवः संभवति, तस्यापि शुक्त्यवच्छिन्नचैतन्यमात्रविषयकत्वात्। शुक्तेरवस्थाज्ञानविषयचैतन्यतादात्म्याच्छुक्तिविषयकत्वानुभवो न विरुध्यत इति चेत्, तुल्यमुत्तरमित्यभिप्रेत्याह— शुक्त्यादेरपीति। अभिन्नतयेति। जडमात्रस्य मूलाज्ञानविषयचैतन्येऽध्यस्ततया शुक्त्यादेरपि तत्तादात्म्यरूपं तदभिन्नत्वमस्तीति भावः। 'शुक्तिं न जानामि' इत्यनुभवस्य मूलाज्ञानविषयकत्वे विवरणादिसंमतिमाह— विवरणादिष्विति। ननु मूलाज्ञानसाधनप्रकरणे 'अहमज्ञः' इत्याकारो योऽनुभवः प्रदर्शितः स एव मूलाज्ञानसाधकः। 'इदमहं न जानामि' इत्यनुभवस्त्ववस्थाज्ञानविषयक एव। न च प्रकरणविरोधः शङ्कनीयः; शुक्तिरजतादिलक्षणपरिणामोपपत्तयेऽवस्थाज्ञानस्यापि साधनीयत्वेन मूलाज्ञानसाधनप्रकरणेऽपि प्रसङ्गात्तत्साधनोपपत्तेः, यथा 'इदं न जानामि' इत्यनुभवस्तत्तद्विषयावच्छिन्नचैतन्याज्ञानगोचर एवम् 'अहमज्ञस्तत्त्वं न जानामि' इत्यनुभवो मूलाज्ञानगोचर इति दृष्टान्तविधया मूलाज्ञानसाधनप्रस्तावे

प्रत्यक्षप्रमाणोपदर्शनाच्च । 'अहमज्ञः' इति सामान्यतोऽज्ञानानुभव एव मूलाज्ञानविषयः, 'शुक्तिमहं न जानामि' इत्यादिविषयविशेषालिङ्गिताज्ञानानुभवस्त्ववस्थाज्ञानविषय इति विशेषाभ्युपगमेऽप्यवस्थावस्थावतोरभेदेन मूलाज्ञानस्य साक्षिसंसर्गाद्वा साक्षिविषयचैतन्ययोर्वास्तवैक्याद्वा विषयगतस्याप्यवस्थाज्ञानस्य सा-

---

ऽपि विषयविशेषालिङ्गिताज्ञानानुभवप्रदर्शनोपपत्तेश्च । तस्मात् 'इदं न जानामि' 'शुक्तिं न जानामि' इत्याद्यनुभवानां मूलाज्ञानविषयकत्वे प्रमाणाभावादवस्थाज्ञानविषयकत्वस्यैव तत्साधनार्थतया वक्तव्यत्वाच्च विषयगतत्वे सिद्धे साक्षिसंसर्गाभावान्न तदनुभवः संभवतीत्याशयवतीं शङ्कामनुवदति— **अहमज्ञ इतीति** । विषयगताज्ञानस्य साक्षिणा सह साक्षात्संबन्धाभावेऽपि परम्परासंबन्धसंभवान्न तदनुभवानुपपत्तिरिति परिहरति— **अवस्थावस्थावतोरिति** । **अभेदेनेति** । तादात्म्यमभेदः । तथा च साक्षिसंसृष्टमूलाज्ञानावस्थात्वाद्विषयगताज्ञानस्य मूलाज्ञानद्वारा साक्षिसंसर्ग इत्यर्थः । **साक्षीति** । साक्षिचैतन्यस्यावस्थाज्ञानाश्रयविषयचैतन्यस्य च वस्तुत एकत्वाद्वस्तुतः साक्ष्यभिन्नचैतन्याश्रितत्वं साक्षिणा सह विषयगताज्ञानस्य संसर्ग इत्यर्थः । यदुक्तं परोक्षवृत्तिनिवर्त्यत्वं विषयगताज्ञानस्य न संभवति, परोक्षवृत्तेर्निर्गमनाभावात् ; तथा च 'प्रमामात्रमज्ञाननिवर्तकम्' इति नियमो

क्षिविषयत्वोपपत्तेः; परोक्षज्ञानस्याज्ञाननिवर्तकत्वेऽपि
ततस्तन्निवृत्त्यनुभवस्य सत्तानिश्चयरूपपरोक्षवृत्तिरूपप्रति
बन्धकसत्त्वप्रयुक्तानुभवनिबन्धन भ्रान्तित्वोपपत्तेरपरो
क्षज्ञानस्यैवाज्ञाननिवर्तकत्वनियमाभ्युपगमादित्याहुः ॥

ननु नायमपि नियमः, अविद्याहंकारसुखदुःखादित
द्धर्मप्रत्यक्षस्याज्ञाननिवर्तकत्वानभ्युपगमादिति चेत्, न

न संभवति, परोक्षवृत्तौ व्यभिचारादिति तन्न। परोक्षज्ञानस्य
ज्ञाननिवर्तकत्वानुपगमेन तथा नियमानभ्युपगमात्। त
नियमे ह्यभ्युपगते परोक्षवृत्तौ व्यभिचारो दोषो भवेत्
ननु तर्हि 'शास्त्रार्थं न जानामि' इत्यनुभूताज्ञानस्य त
दुपदेशानन्तरं तन्निवृत्त्यनुभवविरोध इति, नेत्याह — परोक्ष
ज्ञानस्येति। तत इति। परोक्षज्ञानादित्यर्थः। भ्रान्तित्वो
पपत्तेरिति। न चात्र बाधकाभावाद्भ्रान्तित्वकल्पनमयुक्तमिति व
च्यम। विषयगताज्ञानापेक्षया पुरुषगतानन्तावस्थाज्ञानान्तरकल
नागौरवस्य बाधकस्य सत्त्वादिति भावः। कथं तर्हि प्रमाणवृत्त
नां तन्निवर्तकत्वाभ्युपगमस्तत्राह— अपरोक्षज्ञानस्यैवेति।
तु परोक्षज्ञानसाधारणप्रमाणज्ञानमात्रस्य। अतो न परोक्षज्ञा
व्यभिचार इत्येवकाराभिप्रायः॥

तद्धर्मेति। तच्छब्दोऽहंकारपरः। अनभ्युपगमादिति। अ

अविद्यादिप्रत्यक्षस्य साक्षिरूपत्वेन वृत्तिरूपापरोक्षज्ञानस्यावरणनिवर्तकत्वनियमानपायात् ॥

अथ कोऽयं साक्षीति जीवातिरेकेण व्यवह्रियते । अत्रोक्तं कूटस्थदीपे— देहद्वयाधिष्ठानभूतं कूटस्थचैतन्यं स्वावच्छेदकस्य देहद्वयस्य साक्षादीक्षणान्निर्विकारत्वाच्च

विद्याहंकारादीनां स्वसत्ताकाले भाननियमेन तेषामावरणानङ्गीकारादित्यर्थः । नियमस्य संकोचं वदन्परिहरति— **नेति** ॥

सुखादिधर्मिणोऽहंकारस्य साक्षिप्रत्यक्षविषयत्वोक्त्याहमर्थजीवापेक्षया भिन्नस्तत्साक्षी निर्दिष्टः, सुखादिधर्मिणोऽहंकारस्यैव लोके जीवत्वप्रसिद्धेः । तथा च योऽयं जीवभिन्नः साक्षी व्यवह्रियते स नास्ति, मानाभावादित्याक्षिपति— **अथेति** । यः साक्षी जीवातिरेकेण व्यवह्रियते, अयं क इति संबन्धः । किंशब्द आक्षेपार्थः मानाभावोऽसिद्ध इत्याशयेनाह— **अत्रोक्तमिति** । **साक्षादीक्षणादिति** अपरोक्षतया द्रष्टृत्वादित्यर्थः । **निर्विकारत्वाच्चेति** । ननु द्रष्टृत्वं दृष्टिक्रियाकर्तृत्वम्, निर्विकारत्वं च कर्तृत्वादिविकारराहित्यम् । तथा च तयोः परस्परविरोध इति चेत्, न दृष्टिस्वरूप एव कूटस्थे तत्कर्तृत्वस्य 'साक्षाद्द्रष्टरि संज्ञायाम्' इति सूत्रानुसारेण साक्षिशब्दात्प्रतीतस्य सवितरि प्रकाशात्मके 'प्रकाशते' इति प्रकाशकर्तृत्ववदुपचारमात्रत्वात्सा-

साक्षीत्युच्यते। लोकेऽपि ह्यौदासीन्यबोधाभ्यामेव साक्षित्वं प्रसिद्धम्। यद्यपि जीवस्य वृत्तयः सन्ति देहद्वयभासि

त्वात्पदाद्दृष्टयर्थं इनिप्रत्ययो भवति साक्षिपदस्य संज्ञात्व इति सूत्रार्थः। ननु साक्षिपदात्साक्षिलक्षणं बोद्धृत्वमात्रं प्रतीयते, न तु निर्विकारत्वरूपमौदासीन्यमपि। तत्कथं साक्षिलक्षणे निर्विकारत्वमपि प्रक्षिप्यते, तत्राह— लोकेऽपि हीति। अपिशब्दव्याख्यानमवधारणम्। तच्चौदासीन्यबोद्धृत्वयोः प्रत्येकं लक्षणत्वशङ्काव्यवच्छेदार्थम्। हिशब्दव्याख्यानं प्रसिद्धपदम्। लोके हि द्वयोर्विवदमानयोः सतोस्ताभ्यामन्यस्तयोर्विवादस्यापरोक्षतया बोद्धा उदासीनश्च यो भवति स साक्षीत्युच्यते। अत उदासीनत्वविशेषणमावश्यिकम्। औदासीन्यमात्रमुक्ताविवादस्थले स्तम्भादेरप्यस्तीति तद्वारणाय बोद्धृत्वविशेषणमिति मन्तव्यम्। स्थूलसूक्ष्मात्मकदेहद्वयावच्छिन्नं स्वावच्छेदकदेहद्वयावभासक चैतन्यं साक्षीति यदुक्तं न तत्संभवति, तथाभूतचैतन्ये मानाभावात्। न च तदभावे देहद्वयावभासासिद्धिरिति वाच्यम्। प्रकाशात्मकान्तःकरणवृत्तिभिरेव तत्सिद्धरिति मत्वा शङ्कते— यद्यपीति। जीवपदमहंकारात्मकान्तःकरणपरम्, नित्यचैतन्यस्यानङ्गीकारपक्षे जडाहंकारातिरिक्तजीवाभावाद्वृत्तीनामन्तःकरणपरिणामतायाः 'कामः संकल्पः' इत्यादिश्रुतिसिद्धत्वाच्चेति बोध्यम्। वृत्तीनां दीपादिवत्प्रकाशात्मकत्वेऽपि तासां जडत्वादेहद्वयावभासकत्वं न संभवति। स्वप्रकाशनित्यचैतन्याभ्युपगमे तु तत्प्रतिबिम्बयुक्तानां तासां देहद्वयानु-

काः, तथापि सर्वतः प्रसृतेन स्वावच्छिन्नेन कूटस्थचैतन्येनेषत्सदा भास्यमानमेव देहद्वयं जीवचैतन्यरूपप्रतिबिम्बगर्भादन्तःकरणाद्विच्छिद्य विच्छिद्योद्गच्छद्भिर्वृत्तिज्ञानैः स्फुटमवभास्यते । अन्तरालकालेषु तु सह वृत्त्य-

---

भवरूपत्वं संभवति अतस्तादृशचैतन्यमुपेयमित्यभिप्रायेणाह— तथापीति । किं च वृत्तीनामन्तरालदशासु देहद्वयस्यास्पष्टं भानम्, देहद्वयगोचरवृत्तीनां सद्भावकाले तु 'अहं कर्ता' 'स्थूलोऽहम्' इत्यादिरूपेण स्पष्टं भानमित्यनुभवसिद्धम् । तत्रास्पष्टभानोपपत्तये वृत्तिज्ञानातिरिक्तं नित्यसाक्षिचैतन्यमुपेयमित्याशयेनाह—सर्वतः प्रसृतेनेति । व्याप्तेनेत्यर्थः । देहद्वयं कूटस्थचैतन्येनेषत्सदा भास्यमानमेव वृत्तिज्ञानैः स्फुटमवभास्यत इति संबन्धः । जीवचैतन्यरूपो यः प्रतिबिम्बः, तद्गर्भात्तद्युक्तादित्यर्थः । अनेनान्तःकरणप्रतिबिम्बो जीवः, बिम्बचैतन्यरूपः कूटस्थः साक्षीति जीवसाक्षिणोर्भेदो दर्शितः । यथाग्नितप्तादयःपिण्डादुद्गच्छन्तो विष्फुलिङ्गाः साग्नय एवोद्गच्छन्ति, एवं चैतन्यप्रतिबिम्बोपेतादन्तःकरणादुत्पद्यमाना वृत्तयोऽपि तत्प्रतिबिम्बगर्भा एवोत्पद्यन्ते । अतस्तासां देहाद्यनुभवरूपत्वं संभवतीति सूचयितुमन्तःकरणस्य प्रतिबिम्बगर्भत्वमुक्तम् । जाग्रदवस्थायां देहद्वयस्य साक्षिचैतन्यमात्रादस्पष्टतया भानावसरं दर्शयितुं विच्छिद्य विच्छिद्येत्युक्तम् । तमेवावसरं स्पष्टमाह— अन्तराल-

भावैः कूटस्थचैतन्येनैवावभास्यते । अत एवाहंकारादीनां सर्वदा प्रकाशसंसर्गात्संशयाद्यगोचरत्वमन्यज्ञान-

---

कालेऽपीति । तु शब्दस्य व्याख्यानमेवकारः । दहेद्वयं वृत्त्यभावैः सहावभास्यत इति संबन्धः । वृत्त्यभावैरित्यस्य वृत्तीनां ध्वंसैरित्यर्थः । उपलक्षणं चैतत् । वृत्तीनामुत्पत्तिभिर्वृत्तिभेदैश्च सहेत्यर्थः । अयं भावः— नित्यचैतन्यानभ्युपगमे वृत्युत्पत्तिविनाशतद्भेदादेरपरोक्षतया भानं न स्यात्, स्वोत्पत्तिविनाशयोः स्वग्राह्यत्वासंभवाद्वृत्तिगोचरापरोक्षवृत्तीनां निरसिष्यमाणतया तयोर्वृत्त्यन्तरग्राह्यत्वासंभवाच्च । तस्माद्वृत्तिनाशादिसाक्षितयापि नित्यचैतन्यमुपेयमिति । अत्रैवोपपत्त्यन्तरं दर्शयति— अत एवेति । नित्यचैतन्यरूपसाक्षिसद्भावादेवेत्यर्थः । अहंकारप्राणशरीरादीनां योग्यतदर्मसुखदुःखादीनां च सदाहंकारादिसत्ताकाले संशयादिनिवृत्तिलक्षणफलभाक्त्वं तावदनुभवसिद्धम् । न हि कदाचिदपि 'अहमासं न वा' 'अहं वर्ते न वा' 'अहं प्राणिमि न वा' 'अहं ब्राह्मणो न वा' इत्यादिप्रकारेणाहंकारादिसत्तासंशयः कस्यचिदप्यस्ति । तच्च तेषां सदा प्रकाशसंसर्गं विना न संभवति, घटादीनां प्रकाशसंसर्गदशायामेव संशयाद्यगोचरत्वदर्शनात् । सदा प्रकाशसंसर्गित्वमहंकारादीनां जन्यज्ञानपक्षे न संभवति, तेषामुत्पत्तिविनाशवत्त्वात्क्रमिकत्वात्प्रायेण बाह्यविषयगोचरत्वाच्च । तस्मादहंकारादीनां सदा संशयाद्यगोचरत्वनिर्वाहाय तेषां सदा साक्षिचैतन्यरूपप्रकाशससर्गो वाच्य

धाराकालीनाहंकारस्य 'एतावन्तं कालमिदमहं पश्यन्नेवासम्' इत्यनुसंधानं च । न च कूटस्थप्रकाशिते कथं जीवस्य व्यवहारस्मृत्यादिकमिति शङ्क्यम् । अन्योन्याध्यासेन जीवैकत्वापत्त्या कूटस्थस्य जीवान्तर-

---

इति भावः । साक्षिसद्भाव उपपत्त्यन्तरमाह— **अन्यज्ञानेति** । अहंकारग्रहणं धारान्तर्गतवृत्तीनामप्युपलक्षणम् । नित्यानुभवरूपसाक्ष्यनङ्गीकारे दिव्यमङ्गलश्रीकृष्णमूर्तिगोचरवृत्तिसंततिकालीनाहमर्थस्य तत्कालीनवृत्तीनां च तत्काले जन्यानुभवासंभवेन संस्कारासंभवादुत्तरत्रानुसंधानं न स्यात् । न हि धाराकालेऽहंकारगोचरो वा प्रत्येकं वृत्तिगोचरो वा जन्यानुभवः संभवति ; धाराविच्छेदप्रसङ्गात् , वृत्तिसंततेरिच्छाघटितसामग्रीकत्वेन तद्विच्छेदासंभवाच्च । तस्मादन्यज्ञानधाराकालीनाहमर्थादिसाक्षितया नित्यानुभवो वाच्य इति भावः । **अनुसंधानं चेति** । संगच्छत इति शेषः । ननु साक्षिचैतन्येनानुभूताहमर्थतद्वृत्तीनां कथम् 'अहं पश्यन्नेवासम्' इति स्मरणं जीवस्य संभवति, अहमर्थभूतप्रतिबिम्बजीवापेक्षया बिम्बभूतस्य कूटस्थचैतन्यात्मकसाक्षिणो भिन्नत्वादन्यानुभूतेऽर्थेऽन्यस्य स्मरणायोगादिति शङ्कते— **न च कूटस्थेति** । स्वेन स्वतादात्म्यापन्नेन वानुभूतेऽर्थे स्वस्य स्मरणं भवतीत्यङ्गीकाराच्चातिप्रसङ्गः । न हि देवदत्तयज्ञदत्तजीवयोः परस्परं तादात्म्यमस्ति, येन देवदत्तानुभूतेऽर्थे यज्ञदत्तस्य स्मरणप्रसङ्ग इति दोषो भवेदित्याशयेन परिहरति— **अन्यो-**

ङ्गत्वात् । न च जीवचैतन्यमेव साक्षी भवतु, किं कूट-स्थेनेति वाच्यम् । लौकिकवैदिकव्यवहारकर्तुस्तस्योदा-सीनद्रष्टृत्वासंभवेन 'साक्षी चेता केवलो निर्गुणश्च'

न्याध्यासेनेति । तादात्म्याध्यासेनेत्यर्थः । जीवस्य कूटस्थे क-ल्पितत्वस्य प्रागेव निरूपितत्वादिति भावः । न चैवमपि सर्व-देहेषु साक्षिण एकत्वादेवदत्तसाक्षिणानुभूतदेवदत्ताहंकारादिषु यज्ञ-दत्तादेरप्यनुसंधानप्रसङ्गः, यज्ञदत्तादेरपि देवदत्तसाक्षिण्येवाध्य-स्ततया तदेकत्वापत्तेः सत्त्वादिति वाच्यम् । देहद्वयरूपावच्छेदक-भेदेन तत्तज्जीवतादात्म्यापन्नसाक्षिणो भेदाभ्युपगमात् । एवमव-च्छेदकभेदेन साक्षिभेदं ज्ञापयितुमेव स्वावच्छेदकस्येति विशे-षणं पूर्वमेव दत्तमिति बोध्यम् । नन्वस्तु जीवकूटस्थनामकं चै-तन्यद्वयम् ; तथापि जीव एव साक्षी किं न स्यादिति शङ्कते— न चेति । किं कूटस्थेनेति । किं कूटस्थस्य साक्षित्वेनेत्यर्थः । न तु कूटस्थस्यैवाक्षेपः, तस्य साधितत्वात् उदासीनस्यैव लोके साक्षित्वस्य प्रसिद्धत्वात्तदनुरोधेन श्रुत्यनुरोधेन च कूटस्थस्यैव साक्षित्वं न जीवस्येति परिहरति— लौकिकेति । साक्षिणो लक्षणमाह श्रुतिः— चेता केवल इति । चेता बोद्धा । केवलो-ऽकर्ता, उदासीन इति यावत् । 'ज्ञानादिगुणक आत्मा' इति वैशेषिकादिमतं श्रुतिः स्वयमेव निराकरोति— निर्गुणश्चेति । 'मध्यमपरिमाणः सक्रिय आत्मा' इति दिगम्बरमतनिरासार्थश्च-कारः । निष्क्रियश्चेत्यर्थः । साक्षिणो जीवाद्भिन्नत्वे श्रुतिमप्याह—

इति श्रुत्युक्तसाक्षित्वायोगात्, 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्योऽभिचाकशीति' इति कर्मफलभोक्तृजीवादुदासीनप्रकाशरूपस्य साक्षिणः पृथगाम्नानाच्चेति ॥

नाटकदीपेऽपि नृत्तशालास्थदीपदृष्टान्तेन साक्षी जीवाद्विविच्य दर्शितः— यथा हि 'नृत्तशालास्थितो दीपः प्रभुं सभ्यांश्च नर्तकीम् । दीपयेदविशेषेण तदभा-

---

तयोरन्य इति । जीवकूटस्थयोर्मध्ये कूटस्थादन्यो जीवः पिप्पलं कर्मफलं स्वादु यथा भवति तथा, अत्ति भुङ्क्ते । शरीरस्याश्वत्थवृक्षत्वेन निरूपितत्वात्कर्मफलस्य पिप्पलत्वेन रूपणमिति द्रष्टव्यम् । स्वादिति विशेषणं पुण्यफलाभिप्रायम् । जीवादन्यः कूटस्थः, अनश्नन्नशनं कर्मफलभोगमकुर्वन्नभिचाकशीति, अभ्याभिमुख्येन चाकशीति बुद्ध्यादिसाक्षितया प्रकाशत इति यावत् । अत्रानश्नन्नित्यनेन भोक्तृत्वे निषिद्धे सति कर्तृत्वमपि निषिद्धं भवति । तथा चानश्नन्नभिचाकशीति पदाभ्यामुदासीनत्वे सति बोद्धृत्वरूपं साक्षित्वं प्रदर्शितमित्यर्थः ॥

कूटस्थदीपे निरूपितः साक्ष्यन्यत्रापि दृष्टान्तविशेषपूर्वकं सुषुप्तिसाधारणो निरूपित इत्याह— **नाटकदीपेऽपीति** । दृष्टान्तप्रतिपादकं तत्रत्यश्लोकं पठति— **नृत्तशालास्थित इति** । प्रभुं नृत्ताभिमानिनम् । सभ्यांस्तत्परिसरवर्तिनः । **अविशेषेणेति** । दीपो हि वृद्धिं प्राप्य प्रभुं प्रकाशयति, मध्यमावस्थां प्राप्य

वेऽपि दीप्यते,' तथा चिदाभासविशिष्टाहंकाररूपं जीवं विषयभोगसाकल्यवैकल्याभिमानप्रयुक्तहर्षविषादवत्त्वा-न्नृत्ताभिमानिप्रभुतुल्यं तत्परिसरवर्तित्वेऽपि तद्राहित्या-त्सभ्यपुरुषतुल्यान्विषयान्नानाविधविकारवत्त्वान्नर्तकीतु-

---

सभ्यान्, ततो निकृष्टावस्थां प्राप्य नर्तकीमिति प्रकाश्यतार-तम्यानुसारेण बृद्ध्यादिविकारं प्राप्य न दीपयेत्किं त्वेकरूपेणैव स्थितः सन्प्रकाशयेदित्यर्थः। इदं च विशेषणं दार्ष्टान्तिके निर्वि-कारस्य कूटस्थस्य साक्षित्वज्ञापनार्थमिति मन्तव्यम्। **तदभा-वेऽपीति**। प्रभुसभ्याद्यभावेऽपीत्यर्थः। 'अहंकारः प्रभुः सभ्या विषया नर्तकी मतिः। तालादिचारीण्यङ्गानि दीपः साक्ष्यवभा-सकः' इति दार्ष्टान्तिकसंग्राहकं श्लोकं मनसि निधायाह— **तथेति**। जीवस्य नृत्ताभिमानिप्रभुतुल्यत्वकल्पनाप्रयोजकं सा-म्यमाह— **विषयेति**। नृत्तसाकल्यवैकल्यप्रयुक्तहर्षादिमत्त्वं प्रभो-रभिमानपदेन सूचितम्। यथा सभ्याः प्रभुपरिसरवर्तिनस्तथा रूपादयो विषया जीवपरिसरवर्तिनः। तथा च विषयाणां सभ्य-साम्यात्सभ्यत्वकल्पनं युक्तमित्याशयेनाह— **तत्परिसरवर्तित्वे-ऽपीति**। तत्पदं जीवपरम्। ननु जीवपरिसरवर्तिनामपि विष-याणां जीववत्प्रभुतुल्यत्वमेव कुतो न कल्प्यत इत्याशङ्क्य तत्प्र-योजकाभावादित्याशयेनाह— **तद्राहित्यादिति**। प्रभुतुल्यत्वक-ल्पकहर्षविषादादेरभावादित्यर्थः। यद्वा विषयाणां सभ्यपुरुषसा-म्यमाह— **तद्राहित्यादिति**। बुद्धेर्नर्तकीसाम्यमाह— **नानावि-**

ख्यां धियं च दीपयन्सुषुप्त्यादावहंकाराद्यभावेऽपि दीप्यमानश्चिदाभासविशिष्टाहंकाररूपजीवभ्रमाधिष्ठानकूटस्थचैतन्यात्मा साक्षीति ॥

एवं जीवाद्विवेचितोऽयं साक्षी न ब्रह्मकोटिरपि, किं

धेति । यथा तालादिधारिणः पुरुषा नर्तकीमनुवर्तन्ते, एवमिन्द्रियाण्यपि धियमनुवर्तन्त इत्यनेन साम्येनेन्द्रियाणां तालादिधारिपुरुषसाम्यं श्लोकोपात्तं धियं चेत्यत्र चशब्दार्थः । जीवादीनामवभासकः साक्षी दीपतुल्य इति चरमपादार्थः । तं संगृह्णाति— **दीपयन्नित्यादिना** । प्रकाशयन्नित्यर्थः । दीपयन्नित्यतः प्राग्जाग्रदादाविति शेषः । नाटकदीपे निरूपितः साक्षी कूटस्थदीपोक्तः कूटस्थ एव नान्य इत्याशयेनाह— **चिदाभासविशिष्टेति** । कूटस्थदीपे हि जीवभ्रमाधिष्ठानभूतकूटस्थचैतन्यं जीवादेरवभासकमित्युक्तम् । नाटकदीपे च चिदाभासविशिष्टाहंकारं जीवं कल्पयित्वा तदवभासकं चैतन्यं साक्षीत्युक्तम् । ततश्च तत्रोक्तकूटस्थ एवात्र साक्षीत्यवगम्यते, अन्तःकरणप्रतिबिम्बरूपजीवाधिष्ठानत्वतदवभासकत्वादिनिर्देशसाम्यात् । तथा च 'नाटकदीपेऽपि नृत्तशालास्थदीपदृष्टान्तेन साक्षी जीवाद्विविच्य दर्शितः' इति पूर्वग्रन्थे कूटस्थदीपे यः साक्षी जीवाद्भेदेन दर्शितः स एव नाटकदीपेऽपि ततो भेदेन दर्शित इति विवक्षितार्थः सिद्ध इति भावः ॥

साक्षी यथा जीवकोटिर्न भवति, जीवस्योदासीनत्वाभावात् ;

त्वस्पृष्टजीवेश्वरविभागं चैतन्यमित्युक्तं कूटस्थदीपे ॥

तत्त्वप्रदीपिकायामपि मायाशबलिते सगुणे परमेश्वरे 'केवलो निर्गुणः' इति विशेषणानुपपत्तेः सर्वप्रत्यग्भूतं विशुद्धं ब्रह्म जीवाभेदेन साक्षीति प्रतिपद्यत इत्युदितम् ॥

तथेश्वरकोटिरपि न भवति जगत्सृष्टिनियमनादिव्यापारकर्तुस्तस्योदासीनत्वाभावादीश्वरस्य परोक्षतया जीवं प्रति बुद्ध्यादिसाक्षितया नित्यापरोक्षसाक्षिरूपत्वासंभवाच्चेत्याशयेनाह— **एवं जीवादिति** । ब्रह्मपदमीश्वरपरम्, न तूदासीनचैतन्यपरम् । कस्तर्हि साक्षीति पृच्छति— **किं त्विति** । उत्तरम्— **अस्पृष्टेति** । **उक्तमिति** । 'इति शैवपुराणेषु कूटस्थः प्रविवेचितः । जीवेशत्वादिरहितः केवलः स्वप्रभः शिवः ॥' इति श्लोकेनेति शेषः । जगद्रूपत्वमादिपदार्थः । केवल उदासीनस्वभावः । शिवः शुद्धः परमात्मेत्यर्थः ॥

ईश्वरत्वादिधर्मरहितश्चिदात्मैवान्यत्रापि साक्षित्वेनोक्त इति संवादार्थमाह— **तत्त्वप्रदीपिकायामपीति** । सर्वेषां जीवानामन्तःकरणगतचित्प्रतिबिम्बात्मकानां प्रत्यग्भूतमधिष्ठानतयान्तरं स्वरूपं विशुद्धं जीवत्वेश्वरत्वजगद्रूपत्वरहितं ब्रह्म जीवाभेदेन तत्तज्जीवाधिष्ठानत्वादेव तत्तज्जीवतादात्म्यापत्त्या प्रतिशरीरं प्राप्तभेदं

कौथुमां तु— 'एको देवः सर्वभूतेषु गूढः सर्व-

सत्साक्षीति प्रतिपद्यते। इतिशब्दः प्रकारवाची सन्साक्षित्वमाह। तथा च साक्षित्वं प्रतिपद्यत इति ॥

परमेश्वरस्यैव कश्चिद्रूपभेदः साक्षी नाम। कुतः, देवत्वादिश्रुतेः। न त्वीश्वराविलक्षणः साक्षी, देवत्वादिश्रुतिविरोधादित्येवकारार्थः। देवत्वादीत्यादिपदेन सर्वभूतान्तरत्वादिधर्मा गृह्यन्ते। एतदुक्तं भवति— देवत्वादयो धर्माः श्रुतिस्मृत्यादिषु परमेश्वरधर्मत्वेन प्रसिद्धा इति नान्यस्य साक्षित्वम्, देवत्वादिश्रवणविरोधात्। यद्यपि देवत्वं हिरण्यगर्भेन्द्रादिजीवसाधारणम्, तथापीतरधर्माणामीश्वरासाधारणत्वाद्देवत्वमपीश्वरगतमेव ग्राह्यमिति। परमेश्वरस्य शिवविष्ण्वात्मना प्राप्तं भेदं निराचष्टे— **एक इति**। बिम्बभूतस्य परमेश्वरस्य मूर्तिभेदेन शिवविष्णुसंज्ञा, न त्वीश्वरभेदोऽस्तीत्यर्थः। तथा च श्रुत्यन्तरम्— 'शाश्वतं शिवमच्युतम्' इति अच्युतशब्दस्य विष्णौ रूढत्वात्। 'आवयोरन्तरं नास्ति शब्दैरर्थैर्जगत्पते' इत्यादिस्मृत्तयोऽप्यत्र शतशो द्रष्टव्याः। श्रुतौ सर्वभूतेष्वित्यनन्तरं वर्तत इति शेषः। तथा च स्मृतिः— 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति' इति। तर्हि किमिति स सर्वेषां नोपलभ्यते, तत्राह— **गूढ इति**। तथा च स्मृतिः— 'नाहं प्रकाशः सर्वस्य योगमायासमावृतः' इति। श्रीकृष्णोऽहंशब्दार्थः। प्रकाशः प्रकाशमान इत्यर्थः। परमात्मनो भूतेष्ववस्थानाभ्युपगमेऽधिकरणभेदात्तस्यापि भिन्नत्वशङ्का स्यात्। तां वार-

व्यापी सर्वभूतान्तरात्मा । कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च' इति देवत्वादिश्रुतेः परमेश्वरस्यैव रूपभेदः कश्चिज्जीवप्रवृत्तिनिवृत्त्योरनुमन्ता स्वयमुदासीनः साक्षी नाम । स च कारणत्वादिधर्मा-

---

यति— **व्यापीति** । व्यापित्वे नभोवद्वस्तुतो जीवभिन्नत्वं वारयति— **सर्वभूतान्तरात्मेति** । सर्वभूतानां ब्रह्मादिस्तम्बपर्यन्तसंघातानामन्तरवस्थित आत्मा, सर्वजीवस्वरूप इति यावत् । परमेश्वरस्य कर्मकर्तृजीवाभिन्नत्वे तस्यापि तत्कर्तृत्वं स्यादिति, नेत्याह— **कर्माध्यक्ष इति** । जीवकर्तृकर्मणां साक्षी, न स्वयं तत्कर्तेत्यर्थः । जीवपरमात्मनोरौपाधिकभेदेन धर्मव्यवस्था संभवतीति भावः । सर्वभूतेष्वित्यादिना परमात्मापेक्षया भेदेन भूतानां निर्देशात्तस्य सद्वितीयत्वमाशङ्क्याह— **सर्वभूताधिवास इति** । **अध्युपरि वसन्त्यस्मिन्भूतानीत्यधिवासोऽधिष्ठानम्** । सर्वेषां भूतानामधिवासः सर्वभूताधिवासः । न चाधिष्ठानातिरेकेणारोपितानां पृथक्सत्त्वमस्तीति नाद्वितीयत्वविरोध इति भावः । **न केवलं जीवगतकर्मणामेव साक्षी, किं तु जीवानामपीत्याशयेनाह— साक्षीति** । अवशिष्टा श्रुतिः प्रागेव व्याख्याता । **अनुमन्ता नैरन्तर्येण बोद्धा । स्वयमिति** । जीवे व्यापारवत्यपि स्वयं तद्रहितः । **रूपविशेषे साक्षिलक्षणमुक्त्वा साक्षिपदं तत्र वर्तयति— साक्षी नामेति** । नामपदं श्रुतिप्रसिद्ध्योतकम् । ननु साक्षी जीवस्यापरोक्षः, तस्याज्ञानान्तःकरणाद्यनुभवरूपत्वाङ्गीकारात् । ईश्वरस्तु

नास्पदत्वादपरोक्षो जीवगतमज्ञानाद्यवभासयंश्च जीवस्यान्तरङ्गः । सुषुप्त्यादौ च कार्यकरणोपरमे जीवगता-

---

नित्यं परोक्षः, कारणत्वसर्वज्ञत्वसर्वनियन्तृत्वादेर्जीवं प्रत्ययोग्यत्वेन तद्विशिष्टविम्बचैतन्यरूपेश्वरस्यायोग्यत्वादिति चेत्, न तस्य रूपविशेषत्वाङ्गीकारेणापरोक्षत्वोपपत्तेरित्याशयेनाह— स च चेति । न चेश्वरस्यैतादृशरूपभेदे मानाभावः शङ्कनीयः । 'एको देवः' इति मन्त्रस्य 'अनश्नन्नन्योऽभिचाकशीति' इति मन्त्रभागस्य चोदासीने परमेश्वररूपभेदे मानत्वात्कारणत्वादिधर्मास्पदे चेश्वरे सृष्टिवाक्यानां सर्वेषामेव मानत्वादिति भावः । स च जीवस्यापरोक्षोऽन्तरङ्गश्चेति संबन्धः । उभयत्र हेतुमाह— **जीवगतमज्ञानाद्यवभासयन्निति** । अन्तःकरणतद्धर्मसुखदुःखादिसंग्रहार्थमादिपदम् । साक्षिचैतन्यमज्ञानाद्यवभासनद्वारा 'अहमज्ञः' 'अहं सुखी, दुःखी' इत्यादिव्यवहारनिर्वाहकं भवति । अतः साक्षी जीवस्यान्तरङ्गः, लोके राजादिव्यवहारनिर्वाहकपुरुषे राजान्तरङ्गत्वस्य प्रसिद्धत्वादिति भावः । ननु सुषुप्त्यादौ साक्ष्यस्यान्तःकरणतद्वृत्त्यादेरुपरतत्वात्तदा चिदात्मनः साक्षित्वं न स्यात् । तथा 'तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिवः' इत्यादौ सुषुप्त्यादावपि तस्य साक्षित्वव्यवहारविरोध इत्यत आह— **सुषुप्त्यादौ चेति** । तेभ्य इति भोक्त्रादिभ्य इत्यर्थः । तदापि मूलाज्ञानस्य साक्ष्यस्य सत्त्वान्न विरोध

ज्ञानमात्रव्यञ्जकः प्राज्ञशब्दितः। 'तद्यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरमेवमेवायं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरम्' इति 'प्राज्ञेनात्मनान्वारूढ उत्सर्जन्याति' इति च

इति भावः। परमेश्वरस्यैव रूपविशेषात्मके साक्षिणि सुषुप्त्युत्क्रान्तिविषयकवाक्यद्वयमपि प्रमाणमित्याशयेनाह— **प्राज्ञशब्दित** इति। सुषुप्तिविषयकवाक्य उत्क्रान्तिविषयकवाक्ये च प्राज्ञशब्देन यथोक्तसाक्षिण एव प्रतिपादितत्वादिति भावः। ननु 'सुषुप्त्युत्क्रान्त्योर्भेदेन' इत्यधिकरणे सुषुप्त्यादिविषयकश्रुतिगतप्राज्ञशब्दस्य सर्वेश्वरत्वभूताधिपतित्वादिविशिष्टपरमात्मप्रतिपादकतया उक्तत्वात्कथं प्राज्ञशब्दस्योदासीनेश्वरपरत्वम्, अत आह— **तद्यथेति**। दृष्टान्तवाक्ये बाह्यं रथ्यादिवृत्तान्तम्, आन्तरं गृहकृत्यम्, पुरुषो जीवः, प्राज्ञः परमात्मा, तेन संपरिष्वक्तः सुषुप्तावुपाधिलयादेकीभावं प्राप्तः, बाह्यं जाग्रत्प्रपञ्चम्, आन्तरं स्वप्नप्रपञ्चम्, किंचन किंचिदपि। उत्क्रान्तिवाक्यमुदाहरति— **प्राज्ञेनात्मनान्वारूढ इति**। अन्वारूढोऽधिष्ठितः, उत्सर्जन्वेदनावशाच्छब्दं कुर्वन्, याति शरीराद्बहिर्निर्गच्छति, उत्क्रामतीत्यर्थः। अवस्थयोरिति सप्तमी। प्रतिपादित इत्यनन्तरं प्राज्ञ इति शेषः। तथा च वाक्याभ्यां जीवभेदेन प्रतिपादितः प्राज्ञः परमेश्वर इति निर्णयोऽपि साक्षिपरा

श्रुतिवाक्याभ्यां सुषुप्त्युत्क्रान्त्यवस्थयोर्जीवाद्भेदेन प्रतिपादितः परमेश्वर इति सुषुप्त्युत्क्रान्त्यधिकरणे निर्णयोऽपि साक्षिपर इत्युपवर्णितम् ॥

तत्त्वशुद्धावपि यथा 'इदं रजतम्' इति भ्रमस्थले

इत्युपवर्णितं कौमुद्यामिति संबन्धः। बृहदारण्यकषष्ठाध्यायो जीवानुवादमात्ररूपो न तदतिरिक्तेश्वरपर इति पूर्वपक्षे प्राप्ते, सिद्धान्तः—'तद्यथा प्रियया' इत्यादिवाक्ययोः सुषुप्त्यवस्थायामुत्क्रान्त्यवस्थायां च पुरुषशब्दितजीवापेक्षया भेदेन परमेश्वरस्य तृतीयान्तप्राज्ञशब्देन व्यपदेशान्न षष्ठाध्यायो जीवानुवादमात्ररूपः, किं तु तदतिरिक्तेश्वरप्रतिपादनपरः। तत्प्रतिपादनं च लोकसिद्धजीवानुवादेन तस्येश्वराभेदप्रतिपादनार्थम्। तथा च वाक्यशेषो दृश्यते—'स वा एष महानज आत्मा योऽयं विज्ञानमयः' इति। यो विज्ञानमयो जीवः स एष महानात्मा पूर्णः परमात्मेत्यर्थ इति तदधिकरणनिर्णयः। नन्वस्य निर्णयस्योदासीनेश्वररूपसाक्षिपरत्वमनुपपन्नम्, 'स वा एष महानज आत्मा' इत्येतदनन्तरम् 'एष सर्वेश्वर एष भूताधिपतिः' इत्यादिना तस्य सर्वेश्वरत्वादिगुणजातप्रतिपादनादिति चेत्, न। ज्ञेयब्रह्मप्रकरणगतसर्वेश्वरत्वादिवचनस्य स्तुतिमात्रपरत्वादिति भावः॥

कौमुदीकारमतस्य संवादार्थं मतान्तरमुपन्यस्यति—**तत्त्वशुद्धावपीति**। 'इदं रजतम्' इति भ्रमस्थले रजताभेदेन प्रति-

वस्तुतः शुक्तिकोट्यन्तर्गतोऽपीदमंशः प्रतिभासतो रजतकोटिस्तथा ब्रह्मकोटिरेव साक्षी प्रतिभासतो जीवकोटिरिति जीवस्य सुखादिव्यवहारे तस्योपयोग इत्युक्त्यायमेव पक्षः समर्थितः ॥

केचित्— अविद्योपाधिको जीव एव साक्षाद्द्रष्टृ-

भासमानोऽपीदमंशो रजतान्तर्भूतो न भवति, रजतवत्तस्य बाधाभावात्। नापि शुक्तावेवान्तर्भवति, तस्य शुक्त्यंशवदज्ञातत्वप्रसङ्गात्। अतो यथेदमंशस्य वस्तुतः शुक्तिरूपत्वं प्रतिभासतो रजताभिन्नत्वम्, एवं साक्षिणोऽपि वस्तुगत्येश्वररूपभेदत्वं कल्पिततत्तज्जीवाधिष्ठानरूपस्य साक्षिणः सुखानुभवितुः 'अहं सुखमनुभवामि' इत्यादिप्रतिभासतस्तत्तज्जीवाभिन्नत्वम्। अतो जीवस्य सुखादिव्यवहारे तस्य सुखाद्यनुभवितुर्जीवैकत्वमापन्नस्योपयोग इत्यर्थः। **अयमेवेति**। साक्षिणो वस्तुतोऽपि जीवान्तर्भावे तस्य ब्रह्मकोटित्वोक्तिविरोधात्तस्येश्वररूपभेदत्वं तत्त्वशुद्धिकाराभिमतमिति गम्यत इति भावः॥

जीवसाक्षिणोर्भेदपक्षानुपन्यस्य तयोरभेदपक्षावुपन्यस्यति— **केचिदित्यादिना**। जीव एव साक्षीति संबन्धः। न त्वीश्वरस्य रूपभेदः साक्षी, तत्र मानाभावादित्येवकाराभिप्रायः। जीवस्य साक्षित्वाभ्युपगमे हेतुमाह — **साक्षाद्द्रष्टृत्वादिति**। तस्यौदासीन्यं सूचयति— **अविद्योपाधिक इति**। एतदेव प्रपञ्चयितुमिदमेव

त्वात्साक्षी । लोकेऽपि ह्यकर्तृत्वे सति द्रष्टृत्वं साक्षित्वं प्रसिद्धम् । तच्चासङ्गोदासीनप्रकाशरूपे जीव एव साक्षात्संभवति, जीवस्यान्तःकरणतादात्म्यापन्ना कर्तृत्वाद्यारोपभाक्त्वेऽपि स्वयमुदासीनत्वात् । 'एको देवः' इति मन्त्रस्तु ब्रह्मणो जीवभावाभिप्रायेण साक्षित्वप्रति-

---

साक्षिलक्षणं नान्यदिति पूर्वोक्तं स्मारयति— **लोकेऽपि हीति** । पूर्वं संग्रहेणोक्तं जीवस्यैव साक्षित्वं प्रपञ्चयति— **तच्चेदि** । **साक्षादिति** । अविद्याप्रतिबिम्बरूपजीवस्य स्वतः संभवतीत्यर्थः । अनेन क्लृप्तस्य जीवस्यैव साक्षित्वसंभवे तदतिरिक्तः साक्षी न कल्पनीयः, गौरवादिति सूचितम् । ननु लौकिकवैदिकव्यवहारकर्तुरौदासीन्यमसिद्धमित्युक्तमित्याशङ्क्य बुद्धितादात्म्यप्रयुक्तमेव कर्तृत्वादिकम्, स्वतस्तूदासीनत्वमित्युपगमात्तस्य साक्षित्वं संभवतीत्याह— **जीवस्यान्तःकरणेति** । नन्वीश्वरस्य साक्षित्वानुपगमे मन्त्रविरोध इत्यत आह— **एको देव इति मन्त्रस्त्विति** । साक्षी तावज्जीवस्यापरोक्ष इत्युक्तम् । ईश्वरस्य तूदासीनस्याप्यपरोक्षत्वं न संभवति, बिम्बरूपस्येश्वरस्य जीवादौपाधिकभेदसत्त्वेन जीवं प्रति जीवान्तरचैतन्यस्येवापरोक्षत्वायोगात् । अतो जीवभावापन्नब्रह्माभिप्रायो मन्त्रगतसाक्षिप्रतिपादकभाग इति भावः । ऐश्वररूपभेदस्यापरोक्षत्वानुपपत्तिरूपहेतुर्मन्त्रस्त्विति तुशब्देनोक्त इति ध्येयम । ननु गुहाधिकरणे यथा 'गुहां प्रविष्टौ' इति मन्त्रो जीवेश्वरपरस्तथा 'द्वा सुपर्णा' इति

पादकः । 'द्वा सुपर्णा' इति मन्त्रो गुहाधिकरणन्या-

मन्त्रोऽपि जीवेश्वरोभयपर इत्युक्तं भाष्ये । तथा च 'द्वा सुपर्णा' इति मन्त्रे 'तयोरन्यः पिप्पलं स्वाद्वत्ति' इति वाक्यं जीवविषयम्, 'अनश्नन्योऽभिचाकशीति' इति वाक्यं परमेश्वराविषयमिति पर्यवस्यति । ततश्च जीवस्य साक्षित्वमिति पक्ष ईश्वरस्य साक्षित्वप्रतिपादकेन 'अनश्नन्' इति मन्त्रभागेण विरोध इत्याशङ्क्याह— **'द्वा सुपर्णा' इति मन्त्र इति** । यद्वा मन्त्रो जीवपरोभयपरस्तदापि न विरोधः कश्चित्, 'एको देवः' इति मन्त्रवत् 'द्वा सुपर्णा' इति मन्त्रस्यापि जीवभावापन्नपरमात्मपरत्वाभ्युपगमादित्यर्थः । ननु गुहाधिकरणभाष्ये पैङ्गिरहस्यब्राह्मणमुदाहृतम । तच्चेदं ब्राह्मणम् 'तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्त्वमनश्नन्योऽभिचाकशीतीत्यनश्नन्योऽभिपश्यति ज्ञस्तावेतौ सत्त्वक्षेत्रज्ञौ' इत्यनेन ब्राह्मणेनादनवाक्यमन्तःकरणविषयमनशनवाक्यं क्षेत्रज्ञविषयमिति व्याख्यातम । न च ब्राह्मणेनैव सत्त्वक्षेत्रज्ञपरत्वेन मन्त्रे व्याख्यायमाने कथं भाष्यकारैरस्य मन्त्रस्य जीवेश्वरपरत्वमुक्तमिति वाच्यम । तदुक्तेः कुत्वाचिन्तामात्रत्वेन विरोधाभावात् । तथा चान्तःकरणप्रतिबिम्बरूपो जीवो यदि पैङ्गिब्राह्मणाभिमतः क्षेत्रज्ञः स्यात्तदा तस्यैव 'अनश्नन्' इति वाक्योक्तं साक्षित्वं स्यात्, नाविद्याप्रतिबिम्बस्य । तथा चाविद्याप्रतिबिम्बरूपस्य ब्रह्मस्वरूपस्य जीवस्य साक्षित्वपक्षः पैङ्गिब्राह्मणनिर्णीतार्थकद्वासुपर्णेतिमन्त्रभागविरुद्धः प्रसज्येतेत्याशङ्क्याह— **गुहाधिकरणभाष्योदा-**

येन जीवेश्वरोभयपरो गुहाधिकरणभाष्योदाहृतपैङ्गिरहस्यब्राह्मणव्याख्यातेन प्रकारेण जीवान्तःकरणोभयपरो वेति न कश्चिद्विरोध इत्याहुः ॥

अन्ये तु— सत्यं जीव एव साक्षी । न तु सर्वगतेनाविद्योपहितेन रूपेण, पुरुषान्तरान्तःकरणादीनामपि पुरुषान्तरं प्रति स्वान्तःकरणभासकसाक्षिसंसर्गाविशे-

---

दृतेति । न कश्चिद्विरोध इति । पैङ्गिब्राह्मणाभिप्रेतः क्षेत्रज्ञो नान्तःकरणगतचैतन्यप्रतिबिम्बरूपो जीवः, तस्य कर्तृभोक्तृस्वभावत्वेन 'अनश्नन्' इति वाक्योक्तसाक्षित्वासंभवात् । किंत्वसङ्गोदासीनप्रकाशरूपोऽविद्याप्रतिबिम्बरूपजीव एव ब्राह्मणाभिप्रेतः क्षेत्रज्ञः । तस्यानशनवाक्योक्तसाक्षित्वसंभवस्योपपादितत्वात् । अतोऽविद्याप्रतीबिम्बरूपजीवस्य साक्षित्वपक्षे न पैङ्गिरहस्यब्राह्मणानुरोधिमन्त्रविरोध इत्यर्थः ॥

अविद्यायां चैतन्यप्रतिबिम्बरूपजीवस्यैव साक्षित्वमुपेत्य तत्र कंचिद्विशेषं वक्तुं मतान्तरमवतारयति— **अन्ये त्विति** । न त्वविद्यायां चिद्बिम्बभूतेश्वरः साक्षी, तस्यापरोक्षत्वानुपपत्तेरित्येवकाराभिप्रायः । **रूपेणेति** । साक्षीत्यनुषङ्गः । सर्वशरीरसाधारणाविद्योपाधिकस्य साधारणरूपेण साक्षित्वाभावे हेतुमाह— **पुरुषान्तरेति** । यज्ञदत्तान्तःकरणतद्वृत्तीनामित्यर्थः । **पुरुषान्तरं प्रतीति** । देवदत्तं प्रतीत्यर्थः । **स्वेति** । स्वस्य देवदत्तस्यान्तःकर-

षेण प्रत्यक्षत्वापत्तेः। न चान्तःकरणभेदेन प्रमातृभेदात्तदनापत्तिः, साक्षिभास्येऽन्तःकरणादौ सर्वत्र साक्ष्यभेदे सति प्रमातृभेदस्याप्रयोजकत्वात्। तस्मादन्तःकरणोपधानेन जीवः साक्षी। तथा च प्रतिपुरुषं साक्षिभेदात्पुरुषान्तरान्तःकरणादेः पुरुषान्तरसाक्ष्यसंसर्गाद्

णभासको यः साक्षी तेन साक्षिणा सह देवदत्तान्तःकरणस्येव यज्ञदत्तान्तःकरणादीनामपि संसर्गाविशेषादेवदत्तस्य यथा स्वान्तःकरणं प्रत्यक्षं तथा यज्ञदत्तान्तःकरणतद्वृत्तयोऽपि देवदत्तस्य प्रत्यक्षाः स्युरित्यर्थः। अत्र पुरुषान्तरं प्रति पुरुषान्तरान्तःकरणादीनामपि पत्यक्षत्वापत्तेरिति संबन्धः। तत्र हेतुः स्वान्तःकरणेत्यादिरिति विभागः। सर्वशरीरेषु साक्षिण एकत्वेऽपि प्रतिशरीरं प्रमातृभेदान्नोक्तदोष इत्याशङ्कते— **न चेति**। देवदत्तं प्रति तदन्तःकरणादेः प्रत्यक्षत्वे हि देवदत्तसाक्षिसंसर्गः प्रयोजकः। तथा च यज्ञदत्तान्तःकरणादीनामपि देवदत्तं प्रत्यपरोक्षत्वप्रयोजकस्य देवदत्तसाक्षिसंसर्गस्याविशेषेण तं प्रत्यपरोक्षत्वापादनात्मको दोषः प्रत्यक्षत्वप्रयोजकप्रमातृभेदेनेति दूषयति— **साक्षिभास्य इति**। **साक्ष्यभेद इति**। साक्षिण एकत्वे सतीत्यर्थः। **अप्रयोजकत्वादिति**। देवदत्तं प्रति तदीयान्तःकरणादिकमेव प्रत्यक्षं नान्यदीयान्तःकरणादिकमिति व्यवस्थायामिति शेषः। **तस्मादिति**। अविद्योपाधिकजीवस्य साधारणरूपेण साक्षित्वासंभवादित्यर्थः। **तथा चेति**। साक्षिभेदप्रयोजकोपाधि-

तदयोग्यत्वाद्वा अप्रकाश उपपद्यते । सुषुप्तावपि सूक्ष्म-रूपेणान्तःकरणसद्भावात्तदुपहितः साक्षी तदाप्यस्त्येव । न चान्तःकरणोपहितस्य प्रमातृत्वेन न तस्य साक्षि-त्वम्, सुषुप्तौ प्रमातृभावेऽपि साक्षित्वेन तयोर्भेद-

---

भेदविवक्षायां सत्यामित्यर्थः । **तदयोग्यत्वाद्वेति** । पुरुषान्तरं प्रत्य-योग्यत्वकल्पनाद्वा प्रत्यक्षत्वाभाव उपपद्यत इत्यर्थः । नन्वविद्या-प्रतिबिम्बरूपजीवस्याविद्योपाधिकत्वेनैव रूपेण साक्षित्वे सति तस्य सुषुप्तिसाधारण्यं संभवति । प्रतिशरीरं साक्षिभेदसिद्ध्यर्थं तस्यान्तःकरणोपहितत्वेनैव रूपेण साक्षित्वे तु सुषुप्तिसाधारण्यं तस्य न संभवति, सुषुप्तावन्तःकरणलयश्रवणादित्याशङ्क्याह— **सुषुप्तावपीति** । शङ्कते— **न चान्तःकरणोपहितस्येति** । अविद्याप्रतिबिम्बरूपजीवस्येति शेषः । **न तस्येति** । अन्तःकरणो-पहितजीवस्य साक्षित्वं न संभवति, तस्य प्रमातृत्वात्, अन्यथा प्रमातुरेव साक्षित्वापत्त्या साक्षिप्रमात्रोर्भेदो न स्यादिति भावः । इष्टापत्तिमाशङ्क्याह— **सुषुप्ताविति** । **अभावेऽपीति** । 'अथा-स्मिन्प्राण एवैकधा भवति' इति श्रुतौ सुषुप्तिकाले प्राणशब्दिते परमात्मन्येकीभावरूपलक्षणस्य प्रमातृलयस्य श्रवणादिति भावः । **सा-क्षित्वेनेति** । सुषुप्तिकाले साक्षिणः सत्त्वमवश्यं वाच्यम् । तत्काले तत्सत्त्वस्य 'त्रिषु धामसु' इत्यादिबहुश्रुतिसिद्धत्वात् । धामत्ववत्स्थात्वित्यर्थः । तत्काले साक्षिणानुभूतानामज्ञानसुखसुषु-प्तीनामुत्थितस्य 'न किंचिदवेदिषं सुखमस्वाप्सम्' इति स्मरणदर्श-

श्चावश्यं वक्तव्य इति वाच्यम् । विशेषणोपाध्योर्भेदस्य सिद्धान्तसंमतत्वेन 'अन्तःकरणविशिष्टः प्रमाता, तदुपहितः साक्षी' इति भेदोपपत्तेरित्याहुः ॥

नाच्च । न च 'अहमस्वाप्सम्' इति स्वापादिवदहमर्थस्य प्रमातुरपि सुषुप्तिकालीनत्वेन स्मरणदर्शनात्तस्यापि तदा सत्त्वं वाच्यमेवेति वाच्यम् । सुषुप्तौ प्रमातृलयप्रतिपादकबहुश्रुतिविरोधेन 'अहमस्वाप्सम्' इत्यादिस्मरणस्याहमर्थांशेऽनुभवरूपत्वकल्पनान्न प्रमातुस्तदा सत्त्वमावश्यकम् । तथा च सुषुप्तिकाले सदसतोः साक्षिप्रमात्रोरभेदायोगात्प्रमातुः सकाशात्साक्षी भिन्न एव वाच्य इत्यर्थः । प्रमातृसाक्षिणोरभेदपक्षे प्रमातुरुदासीनत्वाभावेन साक्षित्वासंभवरूपदोषसंग्रहार्थश्चकार इति बोध्यम् । न च वाच्यमित्यत्र हेतुमाह— **अन्तःकरणविशिष्ट इति** । अन्तःकरणस्याविद्योपाधिके जीवे विशेषणत्वेन प्रमातृत्वप्रयोजकत्वमुपाधित्वेन साक्षित्वप्रयोजकत्वम् । तथा च विशिष्टोपहितयोः प्रमातृसाक्षिणोर्भेदः, विशिष्टस्य प्रमातुः कर्तृभोक्तृस्वभावत्वेऽप्युपहितस्योदासीनत्वात्साक्षित्वं च संभवतीत्यर्थः । ननु विशेषणत्वस्य चोपाधित्वस्य च भेदे सत्येकस्यान्तःकरणस्य विशेषणत्वादिरूपेण भेदं कल्पयित्वा तद्विशिष्टस्य प्रमातृत्वं तदुपहितस्य साक्षित्वमिति व्यवस्था सिध्यति । तयोर्भेद एव कथमित्यत आह— **विशेषणोपाध्योरिति** । कार्यान्वयित्वे सति

व्यावर्तकत्वं विशेषणत्वम् । यथा 'नीलोत्पलमानय' इत्यादौ नैल्यस्य, तस्य रक्तोत्पलादिव्यावर्तकत्वादुत्पलद्वारानयनरूपकार्यान्वयित्वाच्च । लक्षणे कार्यपदं विधेयपरम् । तथा च 'यत्काकवत्तद्देवदत्तगृहम्' इत्यादौ विधेयस्य देवदत्तगृहत्वस्य कार्यस्योपलक्षणे काके नास्त्यन्वयः, गृहान्तरव्यावर्तकत्वं त्वस्तीति तत्रातिव्याप्तिवारणाय सत्यन्तम् । कार्यान्वयिनि विशेष्य उत्पलादावतिव्याप्तिवारणाय विशेष्यदलम् । कार्यानन्वयित्वे सति व्यावर्तकत्वे सति कार्यान्वयकाले विद्यमानत्वमुपाधित्वम् । यथा 'लोहितस्फटिकमानय' इत्यादौ स्फटिकसंनिहितस्य जपाकुसुमस्योपाधित्वम्, तस्यानयनलक्षणकार्यान्वयाभावात्स्फटिकान्तरव्यावर्तकत्वादानयनान्वयकाले विद्यमानत्वाच्च । तत्र प्रथमसत्यन्तं विशेषणे नैल्यादावतिव्याप्तिवारणाय । न च विशेषणत्वेनाभिमतनैल्यादिकमप्यत्र लक्ष्यमेवेति वाच्यम्, जपाकुसुमादावुपाधित्वव्यवहारवन्नैल्यादौ तथा व्यवहाराभावाज्जपाकुसुमादौ स्फटिकादिविशेषणत्वव्यवहाराभावाच्च । तथा च विशेषणोपाध्योर्भेदावश्यंभावे सति विशेषणत्वाभिमतनैल्यादेरलक्ष्यत्वात्तत्रातिव्याप्तिवारणं युक्तमेव । 'काकवद्गृहं प्रविश' इत्यत्र प्रवेशरूपकार्यान्वयकाले यदि दैवयोगादुपलक्षणभूतकाकस्यान्यत्र गमनं काकान्तरस्य तद्गृह आगमनं तदा तत्रागतकाकस्य पूर्वं स्थितकाकवद्व्यावर्तकत्वं नास्ति । तथा च तत्रागतकाके प्रवेशानन्वयिनि विद्यमान उपाधित्वरहितेऽतिव्याप्तिवारणाय द्वितीयसत्यन्तम् । उक्तस्थल एवोपलक्षणीभूतकाकेऽतिव्याप्तिवारणाय विशेष्यद-

ननूक्तरूपस्य साक्षिपश्चैतन्यमात्रावारकेणाज्ञानेनाव-

लम्। न च यत्रोपलक्षणीभूतकाकस्यैव कार्यकालेऽपि दैवाद्विद्यमानत्वं तत्रोपलक्षणकाके कृत्स्नं लक्षणमस्तीत्यतिव्याप्तिरिति वाच्यम्। कार्यकाले नियमेन विद्यमानत्वस्य विवक्षितत्वात्। नन्वेवमपि 'लोहितस्फटिकमानय' इत्यत्र क्वचिद्वाक्यश्रवणकाले सत एव जपाकुसुमस्य स्फटिकानयनकाले दैवादविद्यमानत्वसंभवाज्जपाकुसुमस्यापि कार्यकाले विद्यमानत्वनियमो नास्तीति चेत्, तर्हीदं लक्षणं श्रोत्रत्वोपाधिकर्णशष्कुल्यामन्तःकरणादौ च विवक्षितमस्तु। जपाकुसुमस्य वान्यस्य वा तत्तुल्यस्य स्वनिष्ठधर्मासञ्जकत्वरूपं प्रसिद्धमेवोपाधित्वमस्तु। न चाननुगमः, स्वनिष्ठेत्यादिलक्षणोपाधित्वस्य प्रसिद्धोपाधौ कर्णवलये बिम्बप्रतिबिम्बभेदपक्षे दर्पणादौ स्वोपहितबिम्बमुखे स्वधर्मानासञ्जके च बाधितत्वेन तत्संग्राहकलक्षणान्तरकरणस्यावश्यिकतया तस्यादोषत्वात्। अनुगतलक्षणसंभवे हि तस्य दोषत्वं प्रसिद्धम्। तथा च प्रकृतेऽन्तःकरणस्योभयविधोपाधित्वसंभवात् 'कार्यानन्वयित्वे सति' इत्यादिलक्षणानुरोधेनान्तःकरणोपहितो जीवः साक्षीत्युपगमे साक्षित्वं जीवचैतन्यमात्रनिष्ठं पर्यवस्यति। जीवचैतन्यमात्रं तूदासीनमेवेति नोपहितस्य साक्षित्वानुपपत्तिः, न वा प्रमातृसाक्षिणोः सांकर्यमिति संक्षेपः॥

अविद्याहंकारादीनां पूर्वोक्तं साक्षिभास्यत्वमाक्षिपति— ननिवति चैतन्यमात्रेति। कृत्स्नचैतन्यावारकेणेत्यर्थः। कथ-

रणमवर्जनीयमिति कथमावृतेनाविद्याहंकारादिभानमिति चेत् । राहुवदविद्या स्वावृतप्रकाशप्रकाश्येति केचित् ॥

मिति । न च साक्षिगोचरापरोक्षवृत्त्या तदावरणनिवृत्तौ निवृत्तावरणेन साक्षिणाविद्यादिभानं संभवतीति वाच्यम् । तेषां केवलसाक्षिभास्यत्वसिद्धान्ताविरोधप्रसङ्गात्, मनसः करणत्वस्य निरसिष्यमाणतया साक्षिचैतन्यगोचरापरोक्षवृत्त्यसंभवाच्च, अहंकारादीनां स्वसत्ताकाले तत्सत्ताप्रकारकसंशयाद्यभावेन सदा तेषां संशयादिनिवृत्तिप्रयोजकतया सदा प्रकाशसंसर्गे वक्तव्ये सति कादाचित्कवृत्त्या तेषां सदा भानासंभवाच्च, सदा साक्षिगोचरवृत्तिसंतत्युपगमे युगपद्वृत्तिद्वयानभ्युपगमेन बाह्यघटादिप्रतीत्युच्छेदप्रसङ्गाच्च । तस्मात्साक्षिमात्रभास्यत्वमविद्याहंकारादीनां वक्तव्यम् । तच्च न संभवति, तस्यावृतत्वात् । न च साक्षिचैतन्यं विहायान्यदेव चैतन्यमावृतमिति वाच्यम् । अज्ञानस्य चैतन्यमात्रावारकत्वात्, अन्यथा साक्षिचैतन्यादन्यचैतन्येऽप्यावरणाभावप्रसङ्गादित्याक्षेपाभिप्रायः । आवृतस्यापि साक्षिणोऽविद्यादिप्रकाशकत्वं दृष्टान्तेन दर्शयन्परिहरति— **राहुवदिति** ॥

राहुणा सर्वात्मनावृतस्य चन्द्रमण्डलादेः स्वावारकराहुमात्रप्रकाशकत्वेऽपि तदतिरिक्तप्रकाशकत्वादर्शनादन्याप्यावृतस्य साक्षिणः कथंचिदविद्यामात्रावभासकत्वं स्यान्नाहंकारादिभासकत्व-

वस्तुतोऽविद्यान्तःकरणतद्धर्मादिभासकं साक्षिचैतन्यं विहायैवाज्ञानं चैतन्यमावृणोतीत्यनुभवानुरोधेन कल्पनान्न कश्चिद्दोषः। अत एव सर्वदा तेषामनावृतप्रकाशसंसर्गादज्ञानविपरीतज्ञानसंशयागोचरत्वम्। साक्षिचैतन्यस्यानावृतत्वे तत्स्वरूपभूतस्यानन्दस्यापि प्रकाशापत्तिरिति चेत्, न। इष्टापत्तेः, आनन्दरूपप्रका-

---

मित्यस्वरसादाह— **वस्तुत इति**। **अनुभवानुरोधेनेति**। अहंकारादिषूक्तरीत्या कादाचित्कज्ञानासंभवेऽपि सदा प्रकाशसंसर्गफलस्य संशयनिवृत्त्यादेः सत्त्वानुरोधेनेत्यर्थः। अनुभवफलमेवोपदर्शयति— **अत एवेति**। अज्ञानस्य साक्षिचैतन्यं विहायैवावारकत्वस्वभावकल्पनादेवेत्यर्थः। **अगोचरत्वमिति**। नन्वविद्याया भावरूपत्वादावहंकारस्यानात्मत्वादौ सुखदुःखादिवृत्तीनामनात्मधर्मत्वादावज्ञानविपरीतज्ञानसंशयानां सत्त्वेन तेषां सदा संशयाद्यगोचरत्वमसिद्धमिति चेत्, न। अविद्यादिसत्त्वकाले कदाचिदप्यविद्यादिसत्त्वप्रकारकाज्ञानाद्यभावस्य विवक्षितत्वात्। तथा च तद्गतविशेषगोचराज्ञानविपरीतज्ञानादेरभ्युपगमेऽपि न दोष इति भावः। शङ्कते— **साक्षिचैतन्यस्येति**। नन्विष्टापत्तेरिति वक्तुं न शक्यते, संसारदशायां स्वरूपानन्दप्रकाशप्रयुक्तकार्यादर्शनादित्यत आह— **आनन्दरूपेति**। लोके हि तस्य

श्रुत्युक्तस्यात्मनि निरुपाधिकप्रेम्णो दर्शनात् 'भासत एव परमप्रेमास्पदत्वलक्षणं सुखम्' इति विवरणाच्च ॥

तस्यानुभूयमान आनन्दे प्रीतिरनुभवसिद्धा । तथा च प्रीतेः प्रकाशमानानन्दविषयकत्वे सिद्धे प्राणिमात्रस्य स्वात्मनि दुःखदशायामपि प्रीतिदर्शनादात्मगोचरप्रीतेरपि प्रकाशमानात्मानन्दविषयकत्वं सिध्यति । पुत्रादिगोचरप्रीतिस्तावदौपाधिकी । उपाधिश्चात्मसुखाभिव्यक्तिसाधनत्वम्, उपाधिव्यतिरेकदशायां तेषु प्रीतेरदर्शनात् । आत्मनि प्रीतिर्निरुपाधिका, पुत्रादिष्विवात्मनि प्रीतेरन्यार्थत्वाभावात् । तथा च श्रुतिः—'आत्मनस्तु कामाय सर्वं प्रियं भवति' इति, तथा 'तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयो ऽन्यस्मात्सर्वस्मादन्तरतरम्' इति । अन्तरतरमित्यनेन सर्वान्तरमुच्यते । तथा च यत्सर्वान्तरमात्मचैतन्यं तदेतदपरोक्षं प्रीतिविषयत्वेन संभावितात्पुत्रादेः सर्वस्मादतिशयेन प्रियमिति द्वितीयश्रुत्यर्थः । तथा चात्मानन्दो यदि न प्रकाशेत तदा आत्मनि श्रुत्यनुभवसिद्धा निरुपाधिकप्रीतिर्न स्यात्, प्रीतेः प्रकाशमानानन्दविषयकत्वनियमात् । अतः साक्ष्यानन्दप्रकाशापादने इष्टापत्त्यभिधानं युक्तमेव । उक्तार्थे वृद्धसंमतिमप्याह— **भासत एवेति** । परमप्रेमविषयत्वं परमप्रेमास्पदत्वम्, तल्लक्षणं यस्य सुखस्य तत्तथा सुखं भासत एव, परमप्रेमास्पदत्वात् । अन्यथा तन्न स्यादित्येवकाराभिप्रायः । तच्च सुखं साक्षिचैतन्याभिन्नमिति स्वरूपानन्दप्रकाशे संमतिर्भवत्येव ॥

स्यादेतत् । इदानीमप्यानन्दप्रकाशे मुक्तिसंसारयोरविशेषप्रसङ्गः । ननु कल्पितभेदस्य साक्ष्यानन्दस्य प्रकाशेऽप्यनवच्छिन्नस्य ब्रह्मानन्दस्यावृतस्य संसारदशा-

---

संसारदशायां स्वरूपानन्दस्फुरणाभ्युपगमे बाधकमाशङ्कते— स्यादेतदित्यादिना तस्मात्साक्ष्यानन्दस्यानावृतत्वकल्पनमयुक्तमित्यन्तेन । सिद्धान्ती विशेषं शङ्कते— नन्विति । अविद्यायामानन्दप्रतिबिम्बः साक्ष्यानन्दः । तस्य बिम्बभूतानन्दाद्भेदः कल्पितः । तथा च संसारदशायामनावृतसाक्ष्यभिन्नप्रतिबिम्बानन्दप्रकाशेऽपि बिम्बभूतब्रह्मानन्दो न प्रकाशते । तथा प्रकाशमानोऽपि साक्ष्यानन्दः प्रतिशरीरं भिन्न एव प्रकाशते, न त्वनवच्छिन्न इति विशेषोऽस्तीत्यर्थः । बिम्बभूतब्रह्मानन्दाप्रकाशे हेतुः—आवृतस्येति । अत्र यद्यपि मूलाज्ञानं शुद्धचिन्मात्राश्रयं तद्विषयकं च न तु बिम्बभूतेश्वरविषयकं तस्यानावृतत्वेऽपि जीवापेक्षया कल्पितभेदवत्त्वात्तस्य जीवं प्रत्यप्रकाशमानत्वं संभवति, तथा मुक्तौ बिम्बभूतब्रह्मानन्दस्फुरणमप्यसिद्धं मूलाज्ञाननिवृत्तौ तत्प्रयुक्तप्रतिबिम्बभावस्येव बिम्बभावस्यापि निवृत्यवश्यंभावात् ; तथापि पूर्वपक्षिमुखपिधानमात्रे सिद्धान्तिनस्तात्पर्यमिति बोध्यम् । किमनवच्छिन्नानन्दस्फुरणं मोक्षे विशेषः, आनन्दस्फुरणमात्रं वा ; उभयथापि विशेषो वक्तुं न शक्यत इत्याह पूर्ववादी— नेति । अवच्छेदो हि भेदः । स चात्मनि कल्पितः । तथा चावच्छेदा-

यामप्रकाशेन विशेषोऽस्तीति चेत्, न । आनन्देऽनवच्छिन्नांशस्यापुरुषार्थत्वादानन्दापरोक्षमात्रस्य चेदानीमपि सत्त्वात् । नन्ववच्छिन्नः साक्ष्यानन्दः सातिशयः, सुषुप्तिसाधारणादनतिस्पष्टात्ततो वैषयिकानन्देष्वतिशयानुभवात्; अनवच्छिन्नो ब्रह्मानन्दस्तु निरतिशयः,

---

भावो यद्यानन्दादतिरिक्तस्तदा दोषमाह— **अनवच्छिन्नांशस्येति** । यद्यानन्द एव कल्पिताभावस्याधिष्ठानात्मकत्वात्तदा तस्य द्वितीयप्रकार एवान्तर्भाव इति मत्वा तं प्रकारं दूषयति— **आनन्दापरोक्षमात्रस्य चेति** । तथा च न मुक्तिसंसारयोर्विशेष इति भावः । सिद्धान्ती प्रकारान्तरेण विशेषमाशङ्कते— **नन्ववच्छिन्न इति** । प्रतिशरीरमवच्छिन्नत्वेन प्रकाशमानः साक्ष्यानन्दः सातिशय उत्कर्षापकर्षरूपातिशयवानित्यर्थः । साक्ष्यानन्दस्यातिशयवत्त्वे हेतुमाह— **सुषुप्तिसाधारणादिति** । स्पष्टतोत्कर्षः । अतिस्पष्टतात्युत्कर्षः । सुषुप्तिकाले प्रकाशमानोऽपि साक्ष्यानन्दः स्पष्ट एव, इतरथा तस्य 'सुखमहमस्वाप्सम्' इति परामर्शनीयत्वाभावप्रसङ्गात् । लोके हि य आनन्दः स्पष्टमनुभूतः स एव पुनः परामर्शयोग्योऽनुभूतानन्दमात्रमिति प्रसिद्धम् । तथा च ततः साक्ष्यानन्दात्सुषुप्तावतिस्पष्टतारहितात्स्रक्चन्दनादिविषयप्रयुक्तानन्देषूत्कर्षविशेषानुभवादित्यर्थः । **अनवच्छिन्न इति** । कल्पितावच्छेदाभावात्मा ब्रह्मानन्दो मुक्तिकाले

आनन्दवल्ल्यां मानुषानन्दाद्युत्तरोत्तरशतगुणोत्कर्षापवर्णनस्य ब्रह्मानन्देन समापनादिति चेत्, न। सिद्धान्ते साक्ष्यानन्दविषयानन्दब्रह्मानन्दानां वस्तुत ए-

---

प्रकाशमानोऽतिशयसामान्यरहित एवेत्यक्षरार्थः। मुक्तौ ब्रह्मानन्द एकरूपेण पूर्णतया च प्रकाशते। इदानीं तादृशब्रह्मानन्दप्रकाशो नास्ति। किं तूत्कर्षापकर्षोपेतानन्दप्रकाश एवास्ति। अतः स्वरूपानन्दस्फुरणेऽपि तत्तदुत्कृष्टानन्दाभिलाषरूपपिशाचग्रस्ततया कस्यापि निर्वृतिर्नास्तीति संसारमोक्षयोर्विशेष इति भावः। अविद्याप्रतिबिम्बरूपसाक्ष्यानन्दस्य लोके विषयानन्दत्वेन गृहीतस्य सातिशयत्वे ब्रह्मानन्दस्यैकरूपत्वे च श्रुतिं प्रमाणयति— **आनन्दवल्ल्यामिति**। मानुषानन्दः सर्वः सार्वभौमानन्दः। स च शतगुणितः सन्मनुष्यगन्धर्वानन्दो भवति। सोऽपि शतगुणितः सन्देवगन्धर्वानन्दो भवति। एवमेव पित्रानन्दादिषु 'स एको ब्रह्मण आनन्दः' इत्युक्ताहिरण्यगर्भानन्दान्तेषूत्कर्षापकर्षयोरुपवर्णनं योजनीयम्। **समापनादिति**। 'स यश्चायं पुरुषे। यश्चासावादित्ये। स एकः' इति वाक्येनेति शेषः। पुरुषो मनुष्यः। आद्यचकारस्तिर्यगादिसंग्रहार्थः। आदित्यपदं मण्डलाभिमानिदेवतापरम्। द्वितीयचकारस्तदितरसकलदेवतासंग्रहार्थः। तथा च देवमनुष्यतिर्यक्षु सर्वत्र विद्यमानो ब्रह्मानन्द एक एकरूप एव, न तु साक्ष्यानन्दवत्सातिशय इति श्रुत्यर्थः। साक्ष्यानन्दविषयान-

कत्वेनोत्कर्षापकर्षासंभवात्। मानुषानन्दादीनामुत्तरोत्तरमुत्कर्षं श्रुतिर्वदतीति चेत्, को वा ब्रूते श्रुतिर्न वदतीति, किं त्वद्वैतवादे तदुपपादनमशक्यमित्युच्यते। नन्वेकस्यैव सौरालोकस्य करतलस्फटिकदर्पणाद्यभिव्यङ्ग्यविशेषो-

---

न्दब्रह्मानन्दानां सति भेद उक्तरीत्या मुक्तिसंसारयोर्विशेषो वक्तुं शक्यते। स एव तवासिद्ध इति पूर्ववादी दूषयति— **नेति**। **असंभवादिति**। उत्कर्षापकर्षयोर्जातिविशेषरूपयोरेकस्यां व्यक्तावसंभवादित्यर्थः। नन्वानन्दव्यक्तिर्वस्तुगत्यैकत्वेऽपि कल्पितभेदवत्यां तस्यामुत्कर्षादिः संभवतीत्यभिसंधिमान्सिद्धान्ती **शङ्कते**— **मानुषानन्दादीनामिति**। अनुभवानुसारिश्रुतिसिद्धानन्दोत्कर्षादेरपलापकरणमयुक्तं पूर्ववादिन इत्यर्थः। अभिसंधिमविद्वानिव पूर्ववादी दूषयति— **को वेति**। का तर्ह्यनुपपत्तिरिति सिद्धान्ती शङ्कते— **किं त्विति**। तामाह— **अद्वैतवाद इति**। आनन्दैकत्वमत इत्यर्थः। **अशक्यमिति** औपाधिकभेदेनापि तदुपपादनमशक्यम्, अनुरूपदृष्टान्ताभावादिति पूर्ववादिनोऽप्यभिसंधिः। एकस्यामप्यानन्दव्यक्तावौपाधिकभेदेन श्रुत्यनुभवसिद्धानन्दोत्कर्षादेरुपपादनं कर्तुं शक्यमिति स्वाभिसंधिमुद्घाटयन्सिद्धान्ती शङ्कते— **नन्वेकस्यैवेति**। आलोकस्य करतलादिसंबन्धरहितस्य याभिव्यक्तिः, तदपेक्षया करतल ईषदधिकाभिव्यक्तिः, तदपेक्षया स्फटिकेऽधिकाभिव्यक्तिः, तदपेक्षयाप्यधिका

पधानेनाभिव्यक्तितारतम्यदर्शनात् एकत्वेऽप्यानन्दस्याभिव्यञ्जकसुखवृत्तिभेदोपधानेनाभिव्यक्तितारतम्यरूपमुत्कर्षापकर्षवत्त्वं युक्तमिति चेत्, न। दृष्टान्तासंप्रतिपत्तेः। सर्वतः प्रसृमरस्य सौरालोकस्य गगने विना करतलादिसंबन्धमस्पष्टं प्रकाशमानस्य निम्नतले प्रसृमरस्य जलस्येव करतलसंबन्धेन गतिप्रतिहतौ बहुली-

---

दर्पणादावभिव्यक्तिरनुभवसिद्धा। तद्वत्प्रकृतेऽपि स्वरूपानन्दव्यञ्जकवृत्तितारतम्येन तत्तद्वृत्युपहितसाक्ष्यानन्द उत्कर्षादिकमुपपद्यत इत्यर्थः। यद्यालोक एक एकरूपश्च स्वतो भवेत्तदा तथाविधस्वरूपानन्दस्य दृष्टान्तो भवेत्। न त्वालोकस्यैकव्यक्तित्वमस्ति, तस्य नानाकिरणसमूहरूपत्वात्। नाप्येकरूपत्वं तस्यास्ति, तत्र तत्र सौरकिरणानामल्पत्वबाहुल्यरूपनानारूपत्वावगमादिति पूर्ववादी स्वाभिसंधिमुद्घाटयन्दूषयति— **नेति**। **असंप्रतिपत्तेरिति**। ममासंमतत्वादित्यर्थः। **प्रसृमरस्येति**। गमनशीलस्येत्यर्थः। **गतिप्रतिहताविति**। सूर्यकिरणानां गतिप्रतिबन्धे सतीत्यर्थः। अत एव यत्र भूभागे करतलादिकृतप्रतिबन्धवशात्सूर्यकिरणा न प्रसरन्ति तत्र तमोरूपा च्छाया दृश्यते। आलोकस्य गतिप्रतिहत्या बहुलीभावे दृष्टान्तमाह— **निम्नतल इति**। यथा निम्नतले प्रसृमरस्य जलस्य करतलसंबन्धेन गतिप्रति-

भावादधिकप्रकाशो भास्वरदर्पणादिसंबन्धेन गतिप्रतिहतौ बहुलीभावाच्चदीयदीप्तिसंवलनाच्च ततोऽप्यधिकप्रकाश इति तत्राभिव्यञ्जकोपाधिकाभिव्यक्तितारतम्यानुपगमात् दृष्टान्तसंप्रतिपत्तौ वा गगनप्रसृतसौरालोकवदनवच्छिन्नानन्दस्यास्पष्टता करतलाद्यवच्छिन्नसौरालोकवत्सुखवृत्त्यवच्छिन्नानन्दस्याधिकाभिव्यक्तिरिति मुक्तितः संसारस्यैवाभ्यर्हितत्वापत्तेश्च । एतेन संसादर-

---

हतौ जलस्य बहुलीभावस्तथेत्यर्थः । अधिकेति । करतलादिसंबन्धरहितगगने य आलोकस्यास्फुटं प्रकाशस्तदपेक्षयाधिकेत्यर्थः । तदीयदीप्तिसंवलनादिति । दर्पणादेर्या दीप्तिः प्रभा तया मिश्रणादित्यर्थः । ततोऽपीति । करतलगतप्रकाशादपीत्यर्थः । तत्रेति । एकरूपस्यालोकस्योपाधितारतम्यकृताभिव्यक्तितारतम्यासंप्रतिपत्तेर्न तस्य दृष्टान्तत्वं संभवतीत्यर्थः । उक्तदृष्टान्ताङ्गीकारे सिद्धान्तिनो बाधकमप्याह— दृष्टान्तसंप्रतिपत्तौ चेति । मुक्तित इति । तथा च सिद्धान्ते मुक्तिमुद्दिश्य तत्साधनेषु कस्यापि प्रवृत्तिर्न स्यादिति भावः । मुक्तिसंसारयोरविशेषप्रसङ्गचोद्ये समाधानप्रकारविशेषोऽपि वक्ष्यमाणहेतुना निरस्त इत्याह पूर्ववादी— एतेनेति । अनात्मनि देहादावात्मज्ञानं वस्तुत आत्मसंबन्धशून्ये देहादावात्मीयत्वज्ञानं च मिथ्याज्ञानम् ।

शायां प्रकाशमानोऽप्यानन्दो मिथ्याज्ञानतत्संस्कारविक्षिप्ततया तीव्रवायुविक्षिप्तप्रदीपप्रभावन्न स्पष्टं प्रकाशते मुक्तौ तदभावाद्यथावदवभासत इत्यपि निरस्तम्, निर्विशेषस्वरूपानन्दे प्रकाशमाने तत्र विक्षेपदोषादप्रकाशमानस्य मुक्त्यन्वयिनोऽतिशयस्यासंभवात्। तस्मात्साक्ष्यानन्दस्यानावृतत्वकल्पनमयुक्तम्॥

तच्च जाग्रदादिकाले स्वरूपानन्दस्य प्रकाशमानस्यापि विक्षेपकमस्पष्टतापादकम्, मिथ्याज्ञानजन्यसंस्कारश्च सुषुप्तौ प्रकाशमानस्याप्यानन्दस्य विक्षेपकः पुरुषार्थस्य त्वविघटकः। भोगप्रदकर्मविशेषणोद्बोधितमिथ्याज्ञानसंस्कारवशादेव हि सर्वो जन्तुः सौषुप्तमानन्दानुभवं परित्यजति। ततश्च सौषुप्तानन्दप्रकाशस्याध्रुवस्य मुमुक्ष्वभिलषितत्वाभावादपुरुषार्थत्वमिति भावः। दृष्टान्ते प्रभायाः सावयवत्वात्तीव्रवायुना केषांचिदवयवानां नाशरूपाद्वा प्रभारूपगतभास्वरत्वस्य तेन प्रतिबन्धरूपाद्वा विक्षेपात्प्रकाशमानायामपि दीपप्रभायामस्पष्टकप्राशतोपपद्यते। अवयवगुणादिविशेषरहितस्य ब्रह्मानन्दस्य तु न तथा विशेष उपपद्यत इत्याह— **निर्विशेषेति**। प्रकाशमान इति सतिसप्तमी। **तत्रेत्यधिकरणसप्तमी**। **मुक्त्यन्वयिन इति**। मुक्तिदशायां प्रकाशमानस्येत्यर्थः। **अतिशयस्येति**। दृष्टान्त इवावयवरूपस्य जातिविशेषरूपस्य वेत्यर्थः। **तस्मादिति**। मुक्तिसंसारयोरविशेषप्रसङ्गादित्यर्थः॥

अत्राहुरद्वैतविद्याचार्याः — यथात्युत्कृष्टस्यैकस्यैव धवलरूपस्य मालिन्यतारतम्ययुक्तेष्वनेकेषु दर्पणेषु प्रतिबिम्बे सत्युपाधिमालिन्यतारतम्यात्तत्र तत्र प्रतिबिम्बे धावल्यापकर्षस्तारतम्येनाध्यस्यते, एवं वस्तुतो निरतिशयस्यैकस्यैव स्वरूपानन्दस्यान्तःकरणप्रतिबिम्बित-

---

स्यादेतदित्यादिना प्राप्तं पूर्वपक्षं निराकरोति — अत्राहुरित्यादिना। एकस्यैकरूपस्य स्वरूपानन्दस्याभिव्यक्तितारतम्येऽनुरूपं दृष्टान्तं वदन्स्वरूपानन्दे श्रुत्यनुभवसिद्धं तारतम्यशब्दोक्तमुत्कर्षापकर्षवत्त्वमुपपादयति— यथेति । अत्युत्कृष्टस्येति । धवलरूपाणां मध्ये सर्वोत्तमस्येत्यर्थः । एकस्येति । अनेन वक्ष्यमाणावुत्कर्षापकर्षौ तत्र स्वतो न स्त इति सूचितम् । तत्र तत्र प्रतिबिम्ब इत्येतानि पदानि समानाधिकरणानि । धावल्यापकर्ष इति । ईषन्मलिनदर्पणप्रतिबिम्बेऽपकर्षोऽध्यस्यते । मध्यमविधमलिनदर्पणप्रतिबिम्बे च तदपेक्षयाधिकोऽपकर्षोऽध्यस्यते । अत्यन्तमलिनदर्पणप्रतिबिम्बेऽत्यन्तनिकर्षोऽध्यस्यते । ततश्च तादृशदर्पणेषु प्रतिबिम्बितं धवलरूपं तारतम्येनाभिव्यज्यते वस्तुत एकरूपमपि स्वरूपेण प्रकाशमानमपीत्यर्थः । अन्तःकरणेति । सुषुप्तावप्यन्तःकरणं सूक्ष्मरूपेण तिष्ठतीति साक्ष्यानन्दस्य सुषुप्तिसाधारण्यं बोध्यम् । मतान्तरेषु त्वविद्यायां प्रतिबिम्बिततया साक्ष्या-

तया साक्ष्यानन्दभावे प्राक्तनसुकृतसंपत्त्यधीनविषयविशेषसंपर्कप्रयुक्तसत्त्वोत्कर्षापकर्षरूपशुद्धितारतम्ययुक्तसुखरूपान्तःकरणवृत्तिप्रतिबिम्बिततया विषयानन्दभावे च

नन्दभावो द्रष्टव्यः । **आनन्दभाव** इति । प्राप्ते सतीति शेषः । संपत्तिः परिपाकः, फलजननौन्मुख्यमिति यावत् । प्राक्तनसुकृतसंपत्त्यधीनो यो विषयविशेषसंपर्कः, तत्प्रयुक्तौ यौ सत्त्वस्योत्कर्षापकर्षौ, तद्रूपं यच्छुद्धितारतम्यम्, तद्युक्तासु सुखरूपास्वन्तःकरणवृत्तिषु प्रतिबिम्बिततया विषयानन्दभावे च प्राप्ते सतीत्यर्थः । वृत्तीनां स्वरूपसुखव्यञ्जकतया सुखरूपत्वमुक्तम् । एतदुक्तं भवति— पूर्वजन्मसु संपादितपुण्यकर्मपरिपाकवशादन्तःकरणस्य स्रक्चन्दनादिरूपविषयविशेषगोचरवृत्तिद्वारा विषयविशेषैः सह संबन्धे सति तद्गतसत्त्वगुणस्योत्कृष्टविषयसंबन्धादुत्कर्षो भवति, निकृष्टविषयसंबन्धान्निकर्षो भवति । ततश्चान्तःकरणगतसत्त्वांशपरिणामरूपा वृत्तयः स्वरूपानन्दगोचरा जायन्ते । जायमाना अप्युत्कर्षापकर्षोपेता एव जायन्ते । तास्वानन्दप्रतिबिम्बो विषयानन्द इत्युच्यत इति । ननु स्वरूपानन्दगोचरसत्त्ववृत्तिगतापकर्षवशात्प्रतिबिम्बरूपे विषयानन्देऽपकर्षाध्यासो वक्तव्यः, मलिनद्रव्यकृतदर्पणोपाधिनिष्ठापकर्षवशात्तत्प्रतिबिम्बेऽपकर्षाध्यासदर्शनात् । तथा च स्वरूपानन्दगोचरासु वृत्तिषु सत्त्वगुणपरिणामभूतास्वपकर्षप्रयोजकं मलिनद्रव्यं

तमोगुणरूपोपाधिमालिन्यतारतम्यदोषादपकर्षः तारतम्येनाध्यस्यत इति संसारदशायां प्रकाशमानेऽप्यानन्दे अध्यस्तापकर्षतारतम्येन सातिशयत्वादवृप्तिः । विद्यो-

---

किंचिदवश्यं वक्तव्यम्, साक्षाद्दर्पणसंयुक्तस्यैव मलिनद्रव्यस्य दर्पणेऽपकर्षाधायकत्वदर्शनादित्यत आह— **तमोगुणरूपेति** । अन्तःकरणस्य सत्त्वरजस्तमोगुणात्मकत्वात्तद्वृत्तिष्वपि तमोगुणरूपोपाधिरनुवर्तते । तत्कृतो यो मालिन्यतारतम्यदोषोऽपकर्षतारतम्यात्मको वृत्तिगतदोष इति यावत्, तस्माद्दोषादपकर्षः सत्त्ववृत्तिप्रतिबिम्बरूपे विषयानन्देऽध्यस्यत इत्यर्थः । पूर्वं विषयसंपर्कः सुखरूपवृत्तिकारणत्वेन निर्दिष्टः । तत्र विषयविशेषेति विशेषपदं विषयगतोत्कर्षतारतम्यपरम् । तत्तारतम्यं च सुखरूपवृत्तिगतोत्कर्षतारतम्यप्रयोजकत्वेन निर्दिष्टम् । इह तु सुखरूपवृत्तिष्वेवापकर्षप्रयोजकतयापकर्षतारतम्यप्रयोजकतया च तारतम्योपेतं तमोगुणात्मकं मलिनद्रव्यं निर्दिष्टमिति विभागो बोध्यः । ततः किं तत्राह— **इति संसारदशायामिति** । प्रकाशमानेऽप्यानन्दे यदध्यस्तमपकर्षतारतम्यं तेन सातिशयत्वाद्विषयानन्दस्येत्यर्थः । तथा च निकृष्टमानन्दमनुभवत उत्कृष्टानन्दतृष्णाभिभूतस्य तत्संपादनाय प्रयतमानस्य तत्साधनत्वभ्रान्त्या कदाचिद्दुःखसाधनेष्वपि प्रवर्तमानस्य देवमनुष्यातिर्यगादियोन्यापत्तिलक्षणो भव-

दये निखिलापकर्षाध्यासनिवृत्तेरारोपितसातिशयत्वापाद्यात्कृतकृत्यतेति विशेषोपपत्तेर्निरुपाधिकप्रेमगोचरतया प्रकाशमानः साक्ष्यानन्दोऽनावृत एवेति ॥

त्यनर्थ इति नास्ति निर्वृतिरित्यर्थः। **निवृत्तेरिति**। मूलाज्ञाननिवृत्तौ तत्कार्योपाधिनिवृत्त्या तत्कृतापकर्षाद्यध्यासनिवृत्तेरित्यर्थः। **कृतकृत्यतेति**। कृत्यं कर्तव्यजातं कृतं येन स कृतकृत्यः, तस्य भावस्तत्ता। पुरुषस्य हि विद्योदयात्पूर्वं दुःखनिवृत्तये सुखावाप्तये च बहु कर्तव्यजातमासीत्। विद्योदये तु दुःखमात्रस्य निवृत्तत्वादत्युत्कृष्टधवलरूपस्य निर्मलदर्पण इव निरतिशयत्वरूपानन्दभानाच्च तन्निवृत्तये तत्प्राप्तये वा न किंचित्कर्तव्यमस्तीति कृतकृत्यतेति भावः। तदाह भगवाञ्श्रीकृष्णः— 'एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत' इति। एतत् निरतिशयानन्दरूपं ब्रह्मापरोक्षतया बुद्ध्वा बुद्धिमान्भवति पण्डितो भवति, कृतकृत्यश्च भवति हे भारत अर्जुन, यतस्तत्त्वज्ञानं विना पाण्डित्यादिकं न लभ्यते तस्मात्तदेव संपादय, अन्यत्सर्वं परित्यजेति भावः। **विशेषोपपत्तेरिति**। मुक्तिसंसारयोरिति शेषः। ननु ब्रह्मानन्दवत्साक्ष्यानन्दोऽप्यावृतोऽस्तु। तथा च मुक्तिसंसारयोर्विशेषः सुवच इति, नेत्याह— **निरुपाधिकेति**। एवंभूतः प्रेमास्वरूपानन्दावरणसत्त्वे न संभवति, लोके प्रकाशमानसुख एव प्रीतेरनुभवसिद्धत्वादिति भावः॥

अन्ये तु— प्रकाशमानोऽप्यानन्दः 'मयि नास्ति, न प्रकाशते' इत्यावरणानुभवादावृत एव, एकस्मिन्नपि साक्षिण्यविद्याकल्पितरूपभेदसंभवेन चैतन्यरूपे-

---

साक्षिचैतन्यस्यानावृतत्वे तदभिन्नस्यानन्दस्याप्यनावृतत्वापत्त्या मुक्तिसंसारयोरविशेषप्रसङ्ग इति पूर्वपक्षे प्राप्ते, स्वरूपानन्दस्यानावृतत्वेऽपि तयोर्विशेषः संभवतीति सिद्धान्तो दर्शितः । इदानीं तस्यावृतत्वमुपेत्यैव विशेषं मुक्तिसंसारयोर्वदन् सिद्धान्तं दर्शयति— **अन्ये त्विति** । 'वेदान्तप्रतिपाद्यस्वरूपानन्दो मे नास्ति, न प्रकाशते' इति व्यवहारदर्शनात्तद्धेतुभूतमावरणं तावदस्त्येव संसारदशायाम् । मुक्तौ तु तदावरणनाशात्स्वरूपानन्दस्फुरणमस्तीति न तयोरविशेषप्रसङ्ग इत्यर्थः । अत्र प्रकाशमानोऽप्यानन्द आवृत एवेति संबन्धः । न त्वनावृतः, तस्यानावृतत्वे उक्तव्यवहारविरोधप्रसङ्गादित्येवकाराभिप्रायः । नन्वेवमात्मनि सदा निरुपाधिकप्रेमा न स्यात्, अनावृतस्वरूपानन्दस्फुरणस्याभावाद्वृत्तिकृतानन्दस्फुरणस्य च कादाचित्कत्वादिति चेत्, न । फलबलेनावृतस्यापि स्वरूपानन्दप्रकाशस्य निरुपाधिकप्रेमहेतुत्वकल्पनात् 'भासत एव परमप्रेमास्पदत्वलक्षणं सुखम्' इति विवरणस्याप्यत्रैव तात्पर्योपपत्तेश्च । अनेनैवाभिप्रायेण प्रकाशमानोऽपीत्युक्तम्, अन्यथा प्रकाशमानत्वविशेषणस्यावृतत्वकल्पने उपयोगाभावेन वैयर्थ्यप्रसङ्गादिति बोध्यम् । साक्षिचैतन्याभिन्नस्य साक्ष्यानन्दस्यावृतत्वे साक्षिचैतन्यमप्यावृतं स्यात्, एकत्रावृतत्वानावृतत्वयोर्युगपद्विरोधादित्यत आह— **एकस्मिन्न-**

णानावरणस्यानन्दरूपेणावरणस्य चाविरोधात्स्वरूप-
प्रकाशस्यावरणानिवर्तकतया प्रकाशमानेऽप्यावरणस्या-

पीति । यथा वस्तुत एकस्मिन्नेव चैतन्ये जीवेश्वरत्वाख्यौ रूपभेदौ कल्प्येते 'नाहमीश्वरः किं तु संसारी' इति व्यवहारबलात्, तथा 'अहं सुखीत्यादिज्ञानमानन्दो न भवति' इत्यादिरूपेणाहंकाराद्यवभासकज्ञानस्यानन्दाद्वैदव्यवहार-दर्शनात्तदनुरोधेन चित्त्वानन्दत्वाख्यौ रूपभेदावनादिसिद्धौ कल्प्येते। यथा चैकस्मिन्नेव चैतन्ये जीवत्वावच्छेदेनाज्ञत्वादिकमीश्वरत्वावच्छेदेन तदभावश्च कल्प्यते, तथैवानन्दत्वावच्छेदेनावृतत्वं चित्त्वावच्छेदेनाहंकाराद्यवभासकचैतन्ये तदभावश्च कल्प्यते फलबलादिति न विरोधः। जीवत्वादेरिव चित्त्वादिरूपभेदस्याप्यविद्याकल्पितत्वाभ्युपगमान्नाद्वैतविरोधश्चेत्यर्थः। नन्वेकस्मिन्साक्षिणि रूपभेदेनावृतत्वतदभावयोर्विरोधाभावेऽप्यानन्दः प्रकाशमानोऽप्यावृत इति विरुद्धम्, प्रकाशस्यावरणविरोधित्वादिति, नेत्याह—स्वरूपप्रकाशस्येति। आगन्तुकवृत्तिरूपप्रकाशस्यावरणविरोधित्वकल्पनान्न स्वरूपप्रकाशस्तद्विरोधी, तस्यावरणसाधकत्वादित्यर्थः। नन्वेवं प्रकाशमानोऽप्यानन्द आवृत इति ग्रन्थे प्रकाशमानत्वविशेषणं स्वरूपप्रकाशस्यावरणाविरोधित्वज्ञापनार्थमिति तत्प्रयोजनसंभवात्तद्विशेषणमात्मनि निरुपाधिकप्रेमसंभवज्ञापनप्रयोजनकमिति यदुक्तं तन्न संभवतीति चेत्तर्हि विनिगमकाभावेन तद्विशेषणस्योभयप्रयोजनकत्वमस्तु, स्वरूपप्रकाशे आवरणाविरो-

विरोधाच्च 'त्वदुक्तमर्थं न जानामि' इति प्रकाशमान एवावरणदर्शनाच्च । न च तत्रानावृतसामान्याकारावच्छेदेन विशेषावरणमेवानुभूयत इति वाच्यम् । अन्यावरणस्यान्यावच्छेदेन भानेऽतिप्रसङ्गात् । न च

धित्वस्येवानन्दावरणपक्षे आनन्दरूपे आत्मनि निरुपाधिकप्रेमसंभवस्याप्यवश्यं ज्ञापनीयत्वात् । स्वरूपप्रकाशस्यावरणाविरोधित्वे हेत्वन्तरमाह— **त्वदुक्तमिति** । एवकारानन्तरमाप्तोक्तार्थ इति शेषः । 'श्रीकृष्ण एव वेदान्तवेद्यः परमात्मा, दुर्विज्ञेयोऽयमकृतात्मभिः' इत्याप्तोपदेशानन्तरं मन्दस्य वाक्यार्थबोधो न भवति; स च मन्दः 'त्वदुक्तमर्थं न जानामि' इत्यज्ञानमनुभवतीति प्रसिद्धं लोके । तत्र 'त्वद्वाक्यस्यास्ति कश्चिदर्थ इति जानामि आप्तवाक्यत्वात्, विशेषं तु न जानामि' इति व्यवहारदर्शनादवगतो यस्त्वद्वाक्यार्थत्वलक्षणः सामान्याकारः स एव विशेषावारकाज्ञानस्य विशेषणतया प्रकाशते । तथा च 'त्वदुक्तमर्थं न जानामि' इत्यनुभवेऽज्ञानविशेषणतया प्रकाशमानस्य सामान्याकारस्यावरणविषयत्वाभावात्, आवरणविषयस्य विशेषस्य प्रकाशमानत्वाभावात्प्रकाशमानस्यावृतत्वे नायमनुभवः प्रमाणमिति शङ्कते— **न च तत्रेति** । अन्यावारकाज्ञानस्यान्यावच्छेदेन प्रकाशाभ्युपगमे 'चैत्रं न जानामि' इत्यनुभूयमानाज्ञानस्य विष्णुमित्रविषयकत्वप्रसङ्ग इति दूषयति—**अन्यावरणस्येति** । ननु त्वद्वाक्या-

सामान्यविशेषभावो नियामक इति नातिप्रसङ्ग इति वाच्यम् । व्याप्यव्यापकभावातिरिक्तसामान्यविशेषभावाभावेन 'वह्निं न जानामि' इति धूमावारका-

---

र्थत्वलक्षण आकारस्तावत्सामान्यरूपः, आप्तोपदिष्टे श्रीकृष्ण इव त्वदुपदिष्टेषु श्रीकृष्णप्रतिपत्युपायेष्वपि त्वद्वाक्यार्थत्वस्य सत्त्वात् । वेदान्तवेद्यत्वादिलक्षणाकारस्तु विशेषरूपः, तस्य श्रीकृष्णस्वरूपमात्रवृत्तित्वात् । तथा च विशेषावारकाज्ञानं सामान्याकारावच्छेदेन प्रकाशत इत्युपगमे नातिप्रसङ्गः, चैत्रत्वविष्णुमित्रत्वयोः सामान्यविशेषभावाभावादिति शङ्कते— **न च सामान्येति** । किं सामान्यविशेषभावः श्रीकृष्णमूर्तित्वविष्णुमूर्तित्वयोरिव व्याप्यव्यापकभावस्तदतिरिक्तो वा । न द्वितीयः, तस्यानिरूपणादित्याशयेनाह— **व्याप्येति** । आद्ये दोषमाह— **वह्निमिति** । तस्मादज्ञानानुभवेऽज्ञानविशेषणतया यद्वस्तु प्रकाशते तदेवावरणविषय इति वक्तव्यम् । न च 'त्वदुक्तार्थं न जानामि' इति ज्ञानस्य त्वदुक्तार्थप्रकारकत्वे सत्यज्ञानविशेष्यकत्वेन त्वदुक्तार्थो विशेषरूप एवेत्युपगमे तज्ज्ञानस्य विशेषणज्ञानरूपकारणस्याभावात्तद्विशिष्टाज्ञानानुभवो न स्यादिति वाच्यम् । अज्ञानानुभवस्य नित्यसाक्षिरूपत्वोपगमेन तत्र विशेषणज्ञानानपेक्षणात् । न च प्रकाशमानत्वमावृतत्वं च विरुद्धं प्रकाशस्यावरणविरोधित्वादिति वाच्यम् । अस्य विरोधस्य प्रागेव परिहृतत्वादित्याशयेनोप-

ज्ञानानुभवप्रसङ्गात् । तस्माद्यदवच्छिन्नमज्ञानं प्रकाशते तदेवावृतामिति प्रकाशमानेऽप्यज्ञानं युज्यते । अज्ञानं च यथा साक्ष्यंशं विहाय चैतन्यमावृणोत्येवमानन्दमपि तत्तत्सुखरूपवृत्तिकबलीकृतं विहायैवावृणोति । स एष वैषयिकानन्दस्यावरणाभिभवः । स चावरणाभिभवः प्रत्यूषसमये बाह्यावरणाभिभववत्कारणविशेषप्रयुक्तवृत्ति-

---

संहरति— तस्मादिति । अन्यावारकाज्ञानस्यान्यावच्छिन्नतया भानासंभवादित्यर्थः । यदवच्छिन्नमिति । येन वस्तुना विशेषितमित्यर्थः । नन्वानन्दस्यावृतत्वे विषयसंपर्कदशायां विषयानन्दप्रकाशो न स्यादित्यत आह—अज्ञानं चेति । ननु वृत्तेरावरणाभिभावकत्वोपगमादज्ञानस्य सुखवृत्तिविषयीकृतानन्दानावारकत्वमिति कथमुच्यते, तत्राह — स एष इति । सुखवृत्तिविषयत्वप्रयुक्तानावारकत्वस्वभाव एव वृत्तिकृतावरणाभिभव इत्यर्थः । ननु सुखरूपवृत्तेरेकरूपत्वात्तत्कृतावरणाभिभवोऽप्येकरूप एव स्यात् । तथा च विषयसंबन्धदशायामानन्दोऽप्येकरूपतयैव प्रकाशेत न तूत्कृष्टापकृष्टरूपेणेति, नेत्याह— स चेति । यथा प्रत्यूषसमये आलोकतारतम्येन बाह्यतमसस्तारतम्ययुक्ताभिभवो भवति, ततश्च तत्तमसावृतानां पदार्थानां तारतम्ययुक्तं प्रकाशनं भवति ; एवं विषयविशेषरूपकारणविशेषप्रयुक्तो यो वृत्तिषु विशेषः उत्कर्षतारतम्यरूपस्तद्दशात्तर-

विशेषवशात्तरतमभावेन भवति । अतः स्वरूपानन्द-विषयानन्दयोर्विषयानन्दानां च परस्परभेदसिद्धिरिति वदन्ति ॥

सर्वथापि साक्षिचैतन्यस्यानावृतत्वादावरणाभिभवार्थं वृत्तिमनपेक्ष्यैव तेनाहंकारादिप्रकाशनमिति तुल्यमेव ॥

तमभावयुक्त एवावरणाभिभवो भवति । ततश्चानन्दोऽपि तरतमभावयुक्त एव प्रकाशत इत्यर्थः । एवमप्यानन्दस्यैकत्वाभ्युपगमात्तद्भेदप्रथा कथं सिध्यति, तत्राह— **अत इति** । वस्तुत एकस्मिन्नप्यानन्दे उपाधिप्रयुक्तभेदाभ्युपगमादित्यर्थः । तथा च विद्ययावरणस्य निवृत्तौ सत्यां प्रकाशमान आनन्दः स्वरूपानन्दः, तदनिवृत्तिदशायां वृत्तिसंबन्धात्प्रकाशमान आनन्दो विषयानन्द इति स्वरूपानन्दविषयानन्दयोर्भेदो ज्ञातव्यः । तथा वृत्तिभेदेनानन्दभेदाभ्युपगमाद्विषयानन्दानां परस्परं भेदप्रसिद्धिश्चावकल्पत इत्यर्थः ॥

अहंकारादीनां केवलसाक्षिभास्यत्वं परमप्रकृतं सिद्धमित्याशयेनाह— **सर्वथापीति** । स्वरूपानन्दस्यानावृतत्वपक्षे तस्यावृतत्वपक्षे चेत्यर्थः । **तेनेति** । साक्षिचैतन्येनेत्यर्थः ॥

ननु सिद्धान्ते संस्कारस्यानुभवनाशरूपत्वोपगमेन संस्कारार्थं

नन्वेवं कथमहंकारादीनामनुसंधानम्, ज्ञानसूक्ष्मावस्थारूपस्य संस्कारस्य ज्ञाने सत्ययोगेन नित्येन साक्षिणा तदाधानासंभवात् ॥

अत्र केचिदाहुः— स्वसंसृष्टेन साक्षिणा सदा भास्यमानोऽहंकारः तत्तद्घटादिविषयवृत्त्याकारपरिणत -

---

साक्षिचैतन्यस्याहंकारादिगोचरवृत्त्यपेक्षास्त्येवेति शङ्कते— **नन्वेवमिति** । अहंकारादिसाक्षिणो वृत्त्यनपेक्षत्वे सतीत्यर्थः । अनुसंधानं स्मृतिः । **तदाधानेति** । संस्कारोत्पादनेत्यर्थः । तदाधानासंभवे हेतुमाह— **ज्ञानसूक्ष्मावस्थारूपस्येत्यादिना** । ननु यदि साक्षिचैतन्यस्थितिदशायां तत्सूक्ष्मावस्थारूपसंस्कारोत्पत्त्ययोगस्तर्हि तन्नाशदशायां तदुत्पत्तिरस्तु, नेत्याह— **नित्येनेति** । तथा चाहंकाराद्यवच्छिन्नसाक्षिचैतन्यस्यानावृतत्वेन तदभिभवार्थं वृत्त्यनपेक्षणेऽपि संस्कारार्थं तदपेक्षासत्त्वात्केवलसाक्षिभास्यत्वमहंकारादीनामिति सिद्धान्तव्याकोप इति भावः ॥

अहंकारादिगोचरवृत्तिं विनैव संस्कारोपपत्तेर्न सिद्धान्तविरोध इति समाधत्ते— **अत्र केचिदाहुरिति** । स्वपदद्वयमहंकारपरम् । स्वसंसृष्टेनेत्यादिना भास्यत इत्यन्तेन ग्रन्थेनाहंकारस्य यथाहंकारावच्छिन्नसाक्षिभास्यत्वं तथा घटपटादिगोचरवृत्त्यवच्छिन्नसाक्षिभास्यत्वमप्यस्तीति दर्शितं भवति । ततः किम्,

स्वावच्छिन्नेनापि साक्षिणा भास्यत इति तस्यानित्यत्वात्संभवति संस्काराधानं घटादौ विषय इव । न हि 'स्वाकारवृत्त्यवच्छिन्नसाक्षिणैव स्वगोचरसंस्काराधानम्' इति नियमोऽस्ति; तथा सति वृत्तिगोचरसंस्कारासंभवेन वृत्तेरस्मरणप्रसङ्गात्, अनवस्थापत्त्या

तत्राह— **तस्येति** । घटादिगोचरवृत्त्यवच्छिन्नसाक्षिचैतन्यस्यानित्यत्वात्तेन यथा घटादौ विषये संस्काराधानं संभवति तथा तेनैव वृत्त्यवच्छिन्नसाक्षिचैतन्येनाहंकारादावपि संस्काराधानं संभवतीति नाहंकारादिगोचरवृत्त्यपेक्षेति भावः । नन्वहंकारव्यतिरिक्तेषु घटादिषु सर्वत्र स्वाकारवृत्त्यवच्छिन्नचैतन्यनैव घटादिगोचरसंस्काराधानदर्शनात्स्वगोचरवृत्त्यैव स्वगोचरसंस्काराधानमिति नियमोऽवसीयते । तथा चाहंकारमात्र एव कथमन्यगोचरवृत्त्या तदाधानमित्याशङ्क्याह— **न हीति** । तथा नियमे मानाभावादप्रयोजकत्वाच्चेति भावः । नियमाभ्युपगमे बाधकमाह— **तथा सतीति** । ननु ज्ञानरूपाया वृत्तेः संस्कारादिलाभाय वृत्तिगोचरवृत्त्यन्तरमप्यस्तु, नेत्याह— **अनवस्थापत्त्येति** । घटादिगोचरवृत्तिस्मरणसिद्ध्यर्थं तद्गोचरवृत्त्यन्तरोपगमे द्वितीयवृत्तिस्मरणाय तृतीयापि तद्गोचरा वृत्तिर्वक्तव्या स्यात् । एवं तत्तद्वृत्तिगोचरवृत्त्यन्तराभ्युपगमापत्त्या वृत्त्यनवस्था प्रसज्येत । न च द्वितीयतृतीयादिवृत्तीनां मध्ये कासांचिदज्ञातानामेव

वृत्तिगोचरवृत्त्यन्तरस्यानुव्यवसायनिरासेन निरस्तत्वात्। किं तु 'यद्वृत्त्यवच्छिन्ने चैतन्ये यत्प्रकाशते

नाशाभ्युपगमसंभवान्नानवस्थाप्रसक्तिरिति वाच्यम्। उत्पन्नाया वृत्तेरवश्यज्ञातव्यत्वात्। अन्यथा सत्यामेव घटाद्याकारवृत्तौ कदाचित् 'मयेदं ज्ञायते न वा' इति, घटादिवृत्तिनाशानन्तरम् 'मयेदं ज्ञातं न वा' इति वा संशयप्रसङ्गात्। तस्माद्वृत्तेरवश्यज्ञातव्यत्वं वृत्तेर्वृत्त्यैव वेद्यत्वपक्षे प्रापयेदेवानवस्थाम्। अनेनैव न्यायेन निबन्धनेष्वनुव्यवसायो निरस्तः। ततश्च स्वगोचरवृत्त्यैव स्वगोचरसंस्काराधाननियमो नास्ति, वृत्तिष्वसंभवादित्यर्थः। नन्वन्यगोचरवृत्त्यान्यगोचरसंस्काराधानोपगमे घटगोचरवृत्त्या पटादावपि तदाधानप्रसङ्ग इति शङ्कते— किं त्विति। अतिप्रसङ्गपरिहाराय प्रयोजकमाह— यद्वृत्तीति। 'यद्वस्तुगोचरवृत्त्यवच्छिन्ने चैतन्ये यावन्तः पदार्थाः प्रकाशन्ते तद्वस्तुगोचरवृत्त्या तावत्सु पदार्थेषु संस्काराधानम्' इति नियमः। घटगोचरवृत्त्यवच्छिन्नचैतन्ये च पटादेरप्रकाशनान्नातिप्रसङ्गः। न तु 'स्वगोचरवृत्त्यैव स्वगोचरसंस्काराधानम्' इति नियम इत्येवकारार्थः। ननु घटादिवृत्त्यवच्छिन्नचैतन्ये घटादिप्रकाशनं निर्विवादम्। तत्र चैतन्येऽहंकारस्यापि प्रकाशनं घटादिविषयवृत्त्याकारपरिणतत्वावच्छिन्नेनापि साक्षिणा भास्यत इति पूर्वग्रन्थे दर्शितम्। तथा च घटादिवृत्त्याहंकारेऽपि संस्काराधानमस्तु। तथापि घटादिज्ञानरूपाया वृत्तेः स्वावच्छिन्न-

तद्वृत्त्या तद्गोचरसंस्काराधानम्' इत्येव नियमः । एवं च ज्ञानसुखादयोऽन्तःकरणवृत्तयस्तत्तदादयःपिण्डाद्बहिश्चरन्तो विस्फुलिङ्गाः स्वस्वावच्छिन्नेन वह्निनेव स्वस्वावच्छिन्नेनानित्येन साक्षिणा भास्यन्त इति युक्तं तेष्वपि संस्काराधानम् । यस्तु 'घटैकाकारधीस्था

चैतन्ये प्रकाशनस्यासिद्धत्वात्तस्याः स्वगोचरसंस्कारजनकत्वं न स्यात् । तथा सुखदुःखेच्छाद्वेषादीनामहंकारधर्माणां घटादिवृत्त्यवच्छिन्नचैतन्ये प्रकाशनप्रसक्त्यभावात्तया तेषु संस्काराधानं न स्यात् । न च सुखादिरूपवृत्तिषु घटादिवृत्त्या संस्कारानाधानेऽपि सुखदुःखादिगोचरान्तःकरणवृत्तिभिरेव तासु तदाधानमस्तु, ज्ञानरूपासु घटादिवृत्तिषु तदाधानार्थं वृत्त्यन्तरोपगम इवानवस्थाप्रसक्त्यभावादिति वाच्यम् । सुखदुःखादिगोचरा वृत्तिरभ्युपगम्यमाना किं ज्ञानरूपा, किं वेच्छादिवृत्तिवत्क्रियादिरूपा । नाद्यः, तदुत्पादककारणाभावान्मनःकरणताया निरसिष्यमाणत्वात् । न द्वितीयः, तस्या अपि वृत्तेः संस्काराधानाय तद्गोचरवृत्त्यन्तरोपगमे सैवानवस्था प्राप्नोतीति । तस्माज्ज्ञानरूपासु घटादिवृत्तिषु ज्ञानभिन्नासु सुखदुःखादिरूपवृत्तिषु च कथं संस्काराधानमित्याशङ्क्याह— एवं चेति । उक्तनियमे सतीत्यर्थः । अन्तःकरणे या या वृत्तय उत्पद्यन्ते ज्ञानरूपास्तद्भिन्ना वा, ताः सर्वा अपि स्वस्वावच्छिन्ननित्यचैतन्यभास्या

चिद्घटमेवावभासयेत् । घटस्य ज्ञातता ब्रह्मचैतन्येनाव-
भास्यते ॥' इति कूटस्थदीपोक्तो विषयविशेषणस्य
ज्ञानस्य विषयावच्छिन्नब्रह्मचैतन्यभास्यत्वपक्षः, यश्च
तत्त्वप्रदीपिकोक्तो ज्ञानेच्छादीनामनवच्छिन्नशुद्धचैत-

एव । तथा च चैतन्यस्य नित्यत्वेऽपि तद्भास्यतया तद्वच्छेदक-
तया चोत्पद्यमानानामहंकारधर्माणामनित्यतया तद्धर्मविशिष्टस्य
तत्तद्भवभासकस्य चैतन्यस्य नाशरूपस्तद्धर्मगोचरः संस्कारः
संभवतीति न ज्ञानसुखादिषु संस्कारानुपपत्तिरिति भावः ।
दृष्टान्ते स्वपदं विष्फुलिङ्गपरम् । घटस्यैकस्याकार इवाकारो
यस्याः सा घटैकाकारा, सा चासौ धीश्च, तस्यां स्थिता
चिच्चिदाभासः, घटाकारवृत्तिप्रतिबिम्बरूपं घटज्ञानमिति यावत् ।
घटमेव, न घटस्य ज्ञाततामपीत्येवकारार्थः । ज्ञातता नाम
ज्ञानविषयत्वम्, विषयतासंबन्धेन विषयनिष्ठं ज्ञानमित्यर्थः ।
तच्च ज्ञानं विषयस्य विशेषणम्, ज्ञातो घट इत्यनुभवादिति
भावः । नन्वनयोः पक्षयोर्ज्ञानेच्छादिभासकचैतन्यस्य नित्यत्वा-
त्कथं ज्ञानेच्छादिषु संस्कारः । न च पूर्वोक्तरीत्या ज्ञानेच्छादि-
वृत्तीनां स्वस्वावच्छिन्नसाक्षिचैतन्यप्रकाश्यत्वमादायानयोरपि पक्ष-
योः संस्काराधानमिति वाच्यम् । घटादिगोचरवृत्तिप्रतिबिम्बरूप-
ज्ञानस्य ज्ञाततापदितस्य तद्वृत्त्यनवच्छिन्नविषयाधिष्ठानब्रह्म-
चैतन्यभास्यत्वोक्तिविरोधात्, तथा द्वितीयपक्षे ज्ञानेच्छादि-

न्यरूपनित्यसाक्षिभास्यत्वपक्षः, तयोरपि चैतन्यस्य स्वसंसृष्टापरोक्षरूपत्वाद्वृत्तिसंसर्गोऽवश्यं वाच्य इति तत्संसृष्टानित्यरूपसद्भावान्न तेषु संस्काराधाने काचिदनुपपत्तिरिति ॥

वृत्तीनामनवच्छिन्नसाक्षिभास्यत्वोक्तिविरोधप्रसङ्गात् । अतः कथं तयोः पक्षयोस्तदाधानम्, अत आह— **तयोरपीति** । विषयावच्छिन्नब्रह्मचैतन्यस्य ज्ञाततावभासकत्वमते तद्ब्रह्मचैतन्यं ज्ञाततायाः अपरोक्षज्ञानरूपमेवोपेयते, 'ज्ञातोऽयं घटः' इति ज्ञाततायाः अपरोक्षत्वानुभवात् । अनवच्छिन्नशुद्धचैतन्यमपीच्छाज्ञानादीनामपरोक्षज्ञानरूपमेवोपेयते, इच्छादिवृत्तीनामप्यपरोक्षत्वानुभवात् । तथा चापरोक्षज्ञानरूपद्विविधचैतन्यस्य स्वविषयभूतैर्ज्ञानेच्छादिभिः संसर्गोऽवश्यंभावी, अपरोक्षज्ञानस्य स्वतादात्म्यापन्नविषयानुभवरूपत्वनियमात् । ततश्च स्वविषयभूतज्ञानेच्छादिनाशसमये ज्ञानादिविशिष्टरूपेण द्विविधचैतन्यस्यापि नाशलक्षणसंस्कारोपपत्तिरित्यर्थः । तयोरपीति सप्तमी । **चैतन्यस्येति** । द्विविधस्येति शेषः । तत्पदं ज्ञानेच्छादिरूपवृत्तिपरम् ॥

यदि च स्वगोचरवृत्त्यैव स्वसंस्काराधानमवश्यं वाच्यं तदापि नानुपपत्तिः, अविद्यावृत्तिभिरहंकारतद्धर्मगोचराभिरहंकारादिषु संस्काराधानसंभवात् । न च वृत्तिगोचरवृत्त्युपगमे प्रागुक्ता-

अन्ये तु सुषुप्तावविद्याद्यनुसंधानसिद्धये कल्पितामविद्यावृत्तिमहमाकारामङ्गीकृत्याहमर्थे संस्कारमुपपाद-

---

नवस्थाप्रसक्तिरिति वाच्यम् । अविद्यावृत्तीनामनुभवायोग्यत्वेन तासु ज्ञानाय संस्काराय वा ज्ञानेच्छाद्यनुभवकालेऽविद्यावृत्त्यन्तरानभ्युपगमात् । न चाविद्यावृत्तीनामक्लृप्तसंस्कारजनकत्वकल्पने गौरवमिति वाच्यम् । सुषुप्तौ तासां तज्जनकत्वस्य क्लृप्तत्वादित्याशयेन मतान्तरमाह— **अन्ये त्विति** । उत्थितस्याविद्याद्यनुसंधानसिद्धये सुषुप्तौ कल्पितामविद्यादिगोचरामविद्यावृत्तिमिवाहमाकारामविद्यावृत्तिमङ्गीकृत्येति वाक्यं योजनीयम् । यथाश्रुते सुषुप्तौ यदविद्याद्यनुसंधानं तत्सिद्धय इति भ्रान्तिः स्यात्, संनिधानात् । तथा सुषुप्तौ कल्पितायां एवाविद्यावृत्तेरहमाकारत्वमङ्गीकृतमिति भ्रान्तिः स्यादिति बोध्यम् । अविद्यादीत्यादिपदं सुखसुषुप्त्योः संग्रहार्थम् । 'सुखमहमस्वाप्सम्, न किंचिदवेदिषम्' इति सुषुप्तिकालीनानां सुखसुषुप्त्यविद्यानामुत्थानानन्तरमनुसंधानदर्शनात्तत्कालीनाविद्याद्यनुभवस्य नित्यसाक्षिरूपतया तस्याविद्यावृत्तिरूपावच्छेदकाकल्पने संस्कारासंभवेनोक्तानुसंधानाभावप्रसङ्गात् । नन्वज्ञानाहंकारादिगोचराविद्यावृत्त्युपगमे तेषां केवलसाक्षिवेद्यत्वसिद्धान्तव्याकोप इति चेत्, न; अविद्यावृत्तीनां क्लृप्तज्ञानकारणजन्यत्वाभावेन ज्ञानात्मकवृत्तित्वाभावाज्ज्ञानात्मकवृत्त्यनुपहितसाक्षिण एव केवलसाक्षिशब्दार्थत्वाङ्गीकारादिति भावः । अहमर्थग्रहणं तद्धर्माणामप्युपलक्षणम्,

यन्ति । न चास्मिन्पक्षे 'एतावन्तं कालमिदमहं पश्यन्नेवासम्' इत्यन्यज्ञानधाराकालीनाहमर्थानुसंधानानुपपत्तिः, अवच्छेदकभेदेन सुखदुःखयौगपद्यवद्वृत्तिद्वययौगपद्यस्याप्यविरोधेनान्यज्ञानधाराकालेऽप्यहमाकाराविद्यावृत्तिसंतानसंभवात् ॥

तुल्यन्यायतया बाधकाभावेन च तद्धर्मेष्वपि अविद्यावृत्तिभिः संस्कारस्योपपादितत्वादिति ध्येयम् । नन्वस्मिन्पक्षेऽन्यज्ञानधाराकालीनाहमर्थादिष्वहमर्थादिगोचराविद्यावृत्त्यसंभवेन संस्काराधानं न स्यात्, धाराकालेऽविद्यावृत्त्यङ्गीकारे युगपद्वृत्तिद्वयप्रसङ्गादिति शङ्कामनूद्य दृष्टान्तेन परिहरति— **न चास्मिन्पक्ष इति ।** अविद्यावृत्तिभिः संस्काराधानपक्ष इत्यर्थः । **अवच्छेदकभेदेनेति ।** 'शिरसि मे वेदना' 'पादे मे सुखम्' इत्यनुभवदर्शनादिति भावः । **वृत्तिद्वयेति ।** अन्यज्ञानधाराकालेऽप्यन्यवस्तुगोचरान्तःकरणवृत्तेरहमर्थगोचराविद्यावृत्तेश्च युगपत्प्रमातर्यवच्छेदकभेदेन संभवो न विरुध्यत इत्यर्थः । नन्वन्यज्ञानधाराकाले एकैवाविद्यावृत्तिरिति वक्तुं शक्यते, तदा तन्नानात्वे मानाभावाल्लाघवाच्चेति चेत्, सत्यम् । तथाप्यन्तःकरणवृत्तिसंततिरूपत्वाद्धारायास्तत्कालीनाविद्यावृत्तेरपि संततिरूपत्वं संभवतीति संभावनामात्रेण तथोक्तम् । अत एवाह—**संतानसंभवादिति ।**

अहमर्थांशेऽन्तःकरणवृत्त्यैव संस्काराधानं संभवतीति न तदंशे-

अपरे तु— अहमाकारा वृत्तिरन्तःकरणवृत्तिरेव । किं तूपासनादिवृत्तिवन्न ज्ञानम्, क्लृप्ततत्करणाजन्यत्वात् । न हि तत्र चक्षुरादिकं करणं संभवति । न वा लिङ्गादिकम्, लिङ्गादिप्रतिसंधानशून्यस्याप्यहंकारानुसंधानदर्शनात् । नापि मनः करणम्, तस्योपादानभूतस्य क्वचिदपि करणत्वाक्लृप्तेः । तर्ह्यहमर्थप्रत्यभिज्ञापि ज्ञानं न स्यादिति चेत्, न । तस्या

ऽप्यविद्यावृत्तिः कल्पनीया, अन्तःकरणवृत्तिसंभवे तत्कल्पनायोगात् । न चान्यज्ञानधाराकालेऽहमर्थगोचरान्तःकरणवृत्तिर्न संभवति, सुखदुःखयौगपद्यवज्ज्ञानद्वययौगपद्यायोगादिति वाच्यम् । संस्कारार्थाहंवृत्तेर्ज्ञानरूपत्वानुपगमादिति मतमाह— अपरे त्विति । तर्हि सा वृत्तिर्घटादिवृत्तिवज्ज्ञानरूपापि स्यात् । तथा च ज्ञानात्मकवृत्त्युपहितसाक्षिवेद्यत्वापत्त्याहमर्थस्य केवलसाक्षिभास्यत्वसिद्धान्तहानिरित्याशयेन शङ्कते— किं त्विति । परिहरति— उपासनादीति । इच्छादिसंग्रहार्थमादिपदम् । अनुसंधानमनुभवः । क्वचिदपीति । वृत्तिज्ञानं प्रत्युपादानभूतस्यान्तःकरणस्याहमाकारवृत्तेः सकाशादन्यत्र क्वचिदपि वृत्तौ तस्य करणत्वाक्लृप्तेरित्यर्थः । तर्हीति । 'योऽहं स्वप्ने साक्षाद्भगवन्तं श्रीकृष्णमन्वभूवं सोऽहमिदानीं तं स्मरामि' इति प्रत्यभिज्ञाहमर्थांशे ज्ञानं न स्यात्, ज्ञानकरणाजन्यत्वादित्यर्थः । इष्टापत्त्या परि-

अहमंशे ज्ञानत्वाभावेऽपि तत्तांशे स्मृतिकरणत्वेन कल्पसंस्कारजन्यतया ज्ञानत्वादंशभेदेन ज्ञाने परोक्षत्वापरोक्षत्ववत्प्रमात्वाप्रमात्ववच्च ज्ञानत्वाज्ञानत्वयोरप्यविरोधादित्याहुः ॥

इतरे तु— अहमाकारापि वृत्तिर्ज्ञानमेव, 'मामहं

हरति— **नेति** । तर्हि प्रत्यभिज्ञानं तत्तांशेऽपि ज्ञानं न स्यात्, एकस्यां प्रत्यभिज्ञायां ज्ञानत्वतदभावयोर्विरोधेनायोगादित्यत आह— **तस्या इति** । प्रत्यभिज्ञाया इत्यर्थः । **जंशभेदेनेति** । विषयैकदेशोऽत्रांशः । स च प्रागेव दर्शितः— अहमंश इति तत्तांश इति च । **परोक्षत्वेति** । 'पर्वतो वह्निमान्' इत्यनुमितेः सिद्धान्ते वह्न्यंशे परोक्षत्वं, संनिकृष्टपर्वतांशे त्वपरोक्षत्वमुपेयते । मतद्वयसंमतं दृष्टान्तमाह— **प्रमात्वेति** ॥

पूर्वोपदर्शितप्रत्यभिज्ञाया अहमर्थांशेऽपि ज्ञानत्वमुपेयम् । अन्यथा हि प्रत्यभिज्ञाप्रामाण्येनान्तःकरणोपहितचैतन्यरूपस्य जीवस्याहमर्थस्य स्थायित्वसाधनं सूत्रभाष्ययोर्दृश्यमानं विरुध्येत । तथा च सूत्रम्— 'अनुस्मृतेश्च' इति । अनुस्मृतिः प्रत्यभिज्ञा । तथा च तत्सूत्रस्थं भाष्यम्— 'य एवाहं पूर्वेद्युरद्राक्षं स एवाहमद्य स्मरामि' इति । तथा च प्रत्यभिज्ञाया अहमंशे ज्ञानत्वाभावाभिधानमयुक्तमिति मन्यमानानां मतमाह— **इतरे त्विति** । **अनुभवादिति** । अहमर्थगोचरवृत्तौ ज्ञानत्वानुभवादित्यर्थः ।

जानामि' इत्यनुभवात् । न च करणासंभवः, अनुभवानुसारेण मनस एवान्तरिन्द्रियत्वस्येव करणत्वस्यापि कल्पनादित्याहुः । एवं सति बाह्यगोचरापरोक्षवृत्तीनामेवावरणाभिभावकत्वनियमः पर्यवसितः ॥

मनस इति । अत एव वियत्पादे भाष्यम्— 'बुद्धेः करणत्वाभ्युपगमात्' इति । अत एव चाहंकारधर्माणां ज्ञानसुखादीनां केवलसाक्षिभास्यत्वेऽप्यहमर्थरूपस्य मनः प्रत्यसाधारणविषयस्य सत्त्वात्तस्येन्द्रियत्वं प्राणपादे चक्षुरादीनामिव भाष्यकारैरेव व्यवस्थापितमिति मन्तव्यम् । केवलसाक्षिभास्यत्वसिद्धान्तोऽप्यत एवाहमर्थव्यतिरिक्ताज्ञानसुखादिमात्रविषय इत्यपि मन्तव्यम् । ननु मनस इन्द्रियत्वपक्षे रूपादौ चक्षुरादेरिव तस्याहमर्थे प्रमाणत्वं वाच्यम् । तच्च न संभवति, अहमर्थस्यानावृतसाक्षिचैतन्येऽध्यस्तस्याज्ञातत्वाभावेन मनसोऽज्ञातज्ञापकत्वाभावादिति चेत्, न । 'तद्वति तत्प्रकारकानुभवत्वमबाधितानुभवत्वं वा प्रमात्वम्' इति मतानुरोधेनाहमाकारज्ञानस्य प्रमात्वोपपत्तौ तत्करणस्य मनसोऽपि चक्षुरादीनामिव प्रमाणत्वसंभवादिति भावः । ननु तर्ह्यपरोक्षवृत्तीनामावरणाभिभावकत्वनियमस्याहमाकारापरोक्षवृत्तौ व्यभिचार इत्याशङ्क्य नियमस्य संकोचं दर्शयति— एवं सतीति । अहमाकारापरोक्षवृत्त्युपगमे सतीत्यर्थः । न त्वान्तराहमाकारवृत्तीनामपि, अहमर्थस्यानावृतत्वेन तासामावरणाभिभावकत्वा-

ननु नायमपि नियमः, शुक्तिरजतस्थले इदमाकारवृत्तेरज्ञानानभिभावकत्वादन्यथोपादानाभावेन रजतोत्पत्त्ययोगादिति चेत् ॥

अत्राहुः— इदमाकारवृत्त्येदमंशाज्ञाननिवृत्तावपि शुक्तित्वादिविशेषांशाज्ञाननिवृत्तेस्तदेव रजतोपादानम्,

---

संभवादित्येवकाराभिप्रायः ॥

उक्तनियममप्याक्षिपति— **नन्विति** । 'इदं रजतम्' इति भ्रमस्थले प्रथममिदमाकारापरोक्षवृत्तिरुदेति । पश्चात् 'इदं रजतम्' इति भ्रमो भवति । तत्रेदमाकारायाः प्रथमोत्पन्नवृत्तेरज्ञाननिवर्तकत्वं किं नास्ति, उतास्ति । आद्ये नियमस्य व्यभिचारमाह— **नायमपीति** । यथा 'अपरोक्षवृत्तिमात्रमज्ञाननिवर्तकम्' इति नियमो नास्ति, अहमाकारवृत्तौ व्यभिचारात्; तथा 'बाह्यगोचरापरोक्षवृत्तिमात्रमज्ञाननिवर्तकम्' इति नियमोऽपि नास्ति, इदमाकारवृत्तौ व्यभिचारादित्यर्थः । द्वितीये बाधकमाह— **अन्यथेति** । इदमाकारवृत्तेरज्ञानाभिभावकत्व इत्यर्थः । इदमाकारवृत्तिनिवर्त्याज्ञानमन्यद्रजतोपादानभूताज्ञानमन्यत् । तथा च न व्यभिचारो न वा रजतोत्पत्त्ययोग इति परिहरति— **अत्राहुरिति** । शुक्तित्वादिविशेषांशावारकाज्ञानमेव रजतोपादानमित्यत्र मानमाह — **शुक्तित्वाद्यज्ञान इति** । नीलपृष्ठत्वादिकमादिपदार्थः । रजतमेवाध्यस्यत इत्यध्यासस्तस्येत्यर्थः । प्रथमतत्पदं विशेषांश-

शुक्तित्वाद्यज्ञाने रजताध्यासस्य तज्ज्ञाने च तदभावस्यानुभूयमानत्वात्, अध्यासभाष्यटीकाविवरणेऽनुभूयमानान्वयव्यतिरेकस्यैवाज्ञानस्य रजताद्यध्यासोपादानत्वोक्तेः। अत एव शुक्त्यंशोऽधिष्ठानमिदमंश आधारः; सविलासाज्ञानविषयोऽधिष्ठानम्, अतद्रूपोऽपि तद्रूपेणा-

---

परम्। द्वितीयतत्पदमध्यासपरम्। तत्र संमतिमाह— अध्यासेति। टीका पञ्चपादिका। अनुभूयमानावन्वयव्यतिरेकौ यस्येति विग्रहः। ननु पुरोवृत्तिद्रव्यस्य शुक्तित्वादिविशेषरूपविशिष्टस्यैव रजतकारणाज्ञानावृतत्वाभ्युपगमे तस्यैवाधिष्ठानत्वं स्यात्। न त्विदंत्वरूपविशिष्टस्येदमंशस्य, सविलासाज्ञानविषयस्यैवाधिष्ठानत्वात्। तथा चाधिष्ठानारोप्ययोरेकज्ञानविषयत्वनियमात् 'शुक्तौ रजतम्' इति भ्रमाकारः स्यात्। न स्याच्च 'इदं रजतम्' इति प्रतीत्याकारः, इदमंशस्याधिष्ठानत्वाभावादित्यत आह— अत एवेति। अध्यासोपादानाज्ञानविषयत्वादेवेत्यर्थः। शुक्त्यंश इति। शुक्तित्वविशेषरूपेण पुरोवर्त्यवच्छिन्नचैतन्यमित्यर्थः। इदमंशस्याधिष्ठानत्वाभाव इष्ट इत्याशयेनाह— इदमंश इति। ननु तस्याधारत्व आगतमेवाधिष्ठानत्वं तयोर्भेदाभावादिति, नेत्याह— सविलासेति। विलासो रजतादिविक्षेपः। विषयत्वमावृतत्वम्। अतद्रूपोऽपीति। तत्पदमध्यस्तरजतादिपरम्। तथा चाध्यस्तरजताद्य-

रोप्यबुद्धौ स्फुरंश्चाधार इति संक्षेपशारीरकेऽपि विवेचनादिति ॥

अपरे तु— 'इदं रजतम्' इतीदमंशसंभिन्नत्वेन प्रतीयमानस्य रजतस्येदमंशाज्ञानमेवोपादानम्। तस्य चेदमाकारवृत्त्यावरणशक्तिमात्रनिवृत्तावपि विक्षेपशक्त्या सह

भेदरहितोऽपि तदभिन्नत्वेन स्फुरन्नित्यर्थः । अधिष्ठानस्यैवारोपितरजततादात्म्याद्वस्तुगत्येदमंशस्यातद्रूपत्वमिति बोध्यम् । अस्मिन्मतेऽधिष्ठानारोप्ययोरेकज्ञानविषयत्वं नास्ति । किं त्वाधारारोप्ययोरेव तदिति न भ्रमस्य शुक्त्यंशोल्लेखापत्तिरिति भावः ॥

नन्वधिष्ठानारोप्ययोरारोपे प्रकाशमानत्वस्य संभवनाभाष्यटीकाविवरणादिषु समर्थितत्वात्तद्विरोध इत्याशङ्क्य मतान्तरं तदविरुद्धमाह— **अपरे त्विति** । संभिन्नत्वमभिन्नत्वम्, तादात्म्यमिति यावत् । **अज्ञानमेवेति** । न तु विशेषांशाज्ञानमित्येवकारार्थः । विशेषांशस्यारोपे स्फुरणाभावेन तस्याधिष्ठानत्वासंभवादिति भावः । शुक्तित्वादिरूपविशेषदर्शनस्याध्यासप्रतिबन्धकत्वात्तदभावविषयौ पूर्वोक्तान्वयव्यतिरेकाविति भावः । नन्विदमाकारवृत्त्येदमंशाज्ञानस्य निवृत्तत्वात्कथमिदमंशस्याधिष्ठानत्वम्, अत आह— **तस्य चेति** । इदमंशाज्ञानस्येत्यर्थः । नन्वज्ञानस्यावरणांशमात्रनिवृत्तिर्विक्षेपशक्त्या सहानुवृत्तिश्च क्वापि न

तदनुवृत्तेर्नोपादानत्वासंभवः, जलप्रतिबिम्बितवृक्षाधोग्रत्वाध्यासे जीवन्मुक्त्यनुवृत्तप्रपञ्चाध्यासे च सर्वा-

---

दृष्टा, अत आह— **जलप्रतिबिम्बितेति** । **प्रपञ्चेति** । जीवन्मुक्तस्याप्यन्तःकरणादिप्रपञ्चप्रतीतेः सत्त्वादिति भावः । **सर्वात्मनेति** । रजतादिभ्रमस्थले सर्वात्मनाधिष्ठानसाक्षात्कारो नास्ति, शुक्तित्वादिविशेषरूपेण शुक्तिसाक्षात्काराभावात् । अतस्तत्रेदमंशाज्ञाननिवृत्तावपि विशेषांशाज्ञाननिवृत्त्यभावात्तस्याध्यासोपादानत्वप्रसक्तिरस्ति । प्रतिबिम्बभ्रमस्थले तु जले वृक्षो नास्त्येव । 'ऊर्ध्वाग्र एवायं वृक्षः' इति सर्वात्मना विशेषदर्शनस्य सत्त्वात्सामान्यांशाज्ञानं निवृत्तं विशेषांशाज्ञानमनिवृत्तमिति विभागासंभवेन विशेषांशाज्ञानमुपादानमिति वक्तुमशक्यम् । तस्मादत्र वृक्षाधोग्रत्वाध्यासानुरोधेनैकस्यैवाज्ञानस्यावरणांशनिवृत्तावपि विक्षेपशक्तिमदज्ञानांशानुवृत्तिरुपेया । तथा जीवन्मुक्त्यवस्थायामपि ब्रह्मतत्त्वसाक्षात्कारादावरणमात्रानिवृत्तिर्विक्षेपशक्तिमदज्ञानांशानुवृत्तिश्च वाच्या । तथा रजताध्यासस्थलेऽपीदमंशाज्ञानस्योपादानत्वं संभवतीति भावः ॥

एवं बाह्यगोचरापरोक्षवृत्तीनां सर्वासामेवावरणाभिभावकत्वनियमस्य भ्रमस्थलीयेदमाकारवृत्तौ या व्यभिचारशङ्का, सा तत्रापीदमंशाज्ञाननिवर्तकत्वस्येदमंशावरणमात्रनिवर्तकत्वस्य वा सत्त्वादित्युपपादनेन निरस्ता । इदानीं प्रथममिदमाकारवृत्तिरेव भ्रम-

त्मनाधिष्ठानसाक्षात्कारानन्तरभाविन्यामावरणनिवृत्तावपि विक्षेपशक्तिसहिताज्ञानमात्रस्योपादानत्वसंप्रतिपत्तेरित्याहुः ॥

कवितार्किकचक्रवर्तिनृसिंहभट्टोपाध्यायास्तु 'इदं रजतम्' इति भ्रमरूपवृत्तिव्यतिरेकेण रजतोत्पत्तेः प्रागिदमाकारवृत्तिरेव नास्तीति तस्या अज्ञाननिवर्तकत्वसदसद्भावविचारं निरालम्बनं मन्यन्ते । तथा हि— न तावद्भ्रमरूपवृत्तिव्यतिरेकेणेदमाकारा वृत्तिरनुभवसिद्धा, ज्ञानद्वित्वानुभवात् । नाप्यधिष्ठानसामान्यज्ञानमध्या-

---

स्थले नास्ति । तत्र व्यभिचारशङ्कातत्समाधाने तु दूरत एव निरस्ते इत्याह— कवितार्किकेति । भ्रमरूपवृत्तीति । पूर्वमतद्वये इदमाकारवृत्तेरसत्त्वात्तदभिव्यक्तचैतन्यरूपमेव शुक्तिरजतादिज्ञानम्, न तु वृत्तिरूपम् । अस्मिन्मते तदभावाद्वृत्तिरूपमेव तज्ज्ञानमिति मन्तव्यम् । एतच्चाग्रे स्फुटं भविष्यति । धर्मिज्ञानरूपामिदमाकारवृत्तिं निराकरोति— तथा हीत्यादिना । सा किमनुभवसिद्धा, उत कार्यकल्प्या, अथ वा सामग्रीकल्प्या ? नाद्य इत्याह— न तावदिति । ज्ञानद्वित्वेति । 'इदम्' इत्येकं ज्ञानम् 'इदं रजतम्' इति ज्ञानमपरमित्यनुभवाभावादित्यर्थः । द्वितीयं निराकरोति— नाप्यधिष्ठानेति । अध्यासरूपं कार्यं

सकारणमिति कार्यकल्प्या, तस्यास्तत्कारणत्वे मानाभावात् । न चाधिष्ठानसंप्रयोगाभावे रजताद्यनुत्पत्तिस्तत्र मानम्, ततो दुष्टेन्द्रियसंप्रयोगस्यैवाध्यासकारणत्वप्राप्तेः । न च संप्रयोगो न सर्वभ्रमव्यापी, अधि-

---

स्वकारणमधिष्ठानगोचरसामान्यज्ञानमन्तरेणानुपपद्यमानं सत्त्वत्कल्पयति । ततश्चाधिष्ठानसामान्यज्ञानरूपेदमाकारवृत्तिः सिध्यतीत्यपि न मन्तव्यम्, अधिष्ठानसामान्यज्ञानस्याध्यासकारणत्वे मानाभावादित्यर्थः । मानाभावोऽसिद्ध इति शङ्कते—**न चेति** । इदमर्थस्य चक्षुरादिभिः संप्रयोगे सति रजतादिरूपस्याध्यासस्योत्पत्तिर्नान्यथेत्यनुभवसिद्धम् । तथा चोक्तान्वयव्यतिरेकाभ्यामधिष्ठानसामान्यज्ञानस्य रजताद्यध्यासं प्रति कारणत्वं सिध्यति । न चोक्तान्वयादिना संप्रयोगस्यैवाध्यासकारणत्वं सिध्यति, न धर्मिज्ञानस्येति वाच्यम् । तथा सत्यहंकाराद्यध्यासे संप्रयोगासंभवेन व्यभिचारापत्तेः । अतः संप्रयोगस्याध्यासं प्रति कारणत्वग्राहकाभ्यामेवान्वयव्यतिरेकाभ्यां शुक्तिरजताद्यध्यासस्थले धर्मिज्ञानस्यैव संप्रयोगसाध्यस्य कारणत्वं कल्प्यते । तथा चाधिष्ठानसामान्यज्ञानस्याध्यासकारणत्वे उक्तान्वयव्यतिरेकौ प्रमाणं भवत एवेति गूढाभिसंधिः । अभिसंधिमज्ञात्वा दूषयति— **तत इति** । उक्तान्वयादित इत्यर्थः । संप्रयोगमात्रस्य प्रमास्थलसाधारणत्वादुष्टेत्युक्तम् । धर्मिज्ञानकारणवादी स्वाभिसंधिमाविष्करोति— **न च संप्रयोग इति** । अधिष्ठानसामान्यज्ञानस्य संप्रयोग-

**ष्ठानस्फुरणं तु स्वतः प्रकाशमाने प्रत्यगात्मन्यहंकारा-
द्यध्यासमपि व्याप्नोतीति वाच्यम् । तस्यापि घटाद्यध्या-
साव्यापित्वात् ; घटादिप्रत्यक्षात्प्राक्तदधिष्ठानभूतनीरू-
पब्रह्ममात्रगोचरचाक्षुषवृत्तेरसंभवात्स्वरूपप्रकाशस्य चा-**

स्येव न व्यभिचार इत्याह— **अधिष्ठानस्फुरणं त्विति** । संप्रयोग-वैलक्षण्यार्थस्तुशब्दः । अधिष्ठानस्फुरणं कर्तृ शुक्तिरजताध्यासमि-वाहंकाराद्यध्याससमपि व्याप्नोतीत्यर्थः । **स्वत इति** । बाह्यचैतन्य-स्यावृतत्वाद्वृत्तिकृतं तत्राधिष्ठानस्फुरणं साक्षिचैतन्यस्यानावृतत्वा-दहंकाराद्यध्यासे स्वप्नप्रपञ्चाध्यासे च तत्स्वतः सिद्धमित्यर्थः । अधिष्ठानसामान्यज्ञानस्यापि व्यभिचारमाह— **तस्यापीति** । उक्तज्ञानं तच्छब्दार्थः । घटाद्यध्यासव्यापित्वाभावादित्यर्थः । तथा च धर्मिज्ञानं नाध्यासकारणमिति भावः । अव्यापित्व-शब्दितं व्यभिचारमेवोपपादयति— **घटादीत्यादिना** । घटाद्य-ध्यासस्थले शुक्तिरजताद्यध्यासस्थल इव किं वृत्तिकृतमधिष्ठान-स्फुरणम्, अहंकाराद्यध्यासस्थल इव स्वतः सिद्धं वा । नाद्य इत्याह— **घटादिप्रत्यक्षादिति** । तत्पदं घटादिपरम् । न द्वितीय इत्याह— **स्वरूपेति** । नन्वधिष्ठानप्रकाशमात्रमध्यासे कारणं स्लाघवात्, न त्वभिव्यक्ताधिष्ठानप्रकाशः । तथा च 'सन्घटः 'सन्पटः' इत्यादिरूपेष्वध्यासेषु घटाद्यधिष्ठानस्य सद्रूपस्य ब्रह्मणः स्व प्रकाशत्वादधिष्ठानप्रकाशमात्रं तत्राप्यस्तीति न व्यभिचार

वृतत्वादावृतानावृतसाधारण्येनाधिष्ठानप्रकाशमात्रस्याध्यासकारणत्वे शुक्तीदमंशसंप्रयोगात्प्रागपि तदवच्छिन्नचैतन्यरूपप्रकाशस्यावृतस्य सद्भावेन तदाप्यध्यासापत्तेः । न चाध्याससामान्येऽधिष्ठानप्रकाशसामान्यं हेतुः प्रातिभासिकाध्यासेऽभिव्यक्ताधिष्ठानप्रकाश इति नातिप्रसङ्गः, सामान्ये सामान्यस्य विशेषे विशेषस्य हेतुत्वौ-

---

इत्याशङ्क्याह— **आवृतानावृतेति** । **तदापीति** । संप्रयोगात्प्राक्कालेऽपीत्यर्थः । धर्मिज्ञानकारणवादी शङ्कते— **न चाध्याससामान्य इति** । **प्रातिभासिकेति** । अभिव्यक्ताधिष्ठानस्फुरणं प्रातिभासिकाध्यासेष्वेव कारणमाचार्याणामभिप्रेतम्, तेष्वेव दोषसंप्रयोगसंस्काररूपकारणत्रयजन्यताया अध्यासभाष्यटीकाविवरणादिषु व्यवस्थापितत्वेन संप्रयोगकारणताग्राहकप्रमाणलभ्याधिष्ठानापरोक्ष्यस्य तेष्वेव कारणत्वसिद्धेरित्यर्थः । प्रकाशपदानन्तरं हेतुपदमनुषञ्जनीयम् । **नातिप्रसङ्ग इति** । न संप्रयोगात्प्राग्रजताद्यध्यासप्रसङ्ग इत्यर्थः । रजताद्यध्यासस्य प्रातिभासिकत्वेन तदधिष्ठानापरोक्ष्याय संप्रयोगाधीनवृत्तेरपेक्षितत्वादिति भावः । **औचित्यादिति** । तथा च धर्मिज्ञानस्याध्यासकारणत्वे संप्रयोगकारणताग्राहकान्वयादेः प्रमाणस्य सत्त्वाद्बाधकाभावाच्च तस्याध्यासकारणत्वसिद्धाविदमाकारा वृत्तिः सिद्धेति भावः । अभिव्यक्ताधिष्ठानप्रकाशस्य प्रातिभासिकाध्यासेष्वपि सर्वत्र व्याप्तिर्नास्तीति

चित्यादिति वाच्यम् । एवमपि प्रातिभासिकशङ्खपीतिमकूपजलनैर्ग्याद्यध्यासान्यथानुपपत्तेरूपानुपहितचाक्षुषप्रत्ययायोगेन तदानीं शङ्खादिगतशौक्ल्योपलम्भाभावेन चाध्यासात्प्राक्कलङ्कखादिरूपाधिष्ठानगोचरवृत्त्यसंभवात् ।

कवितार्किकमतानुवर्ती दूषयति— **एवमपीति** । अधिष्ठानापरोक्ष्यस्य प्रातिभासिकाध्यासमात्रहेतुत्वे स्वीकृतेऽपीत्यर्थः । धर्मिज्ञानकारणवादे हि प्रथममिदमित्येवमाकारा वृत्तिरुदेति । तया च वृत्त्याभिव्यक्ते शङ्खजलाद्यवच्छिन्ने चैतन्ये पीतरूपनीलरूपादेरध्यास इति प्रक्रिया । तथा च तत्रेदमाकारा वृत्तिः किं शङ्खादिद्रव्यमात्रं विषयीकरोति, किं वारोप्यरूपविशिष्टं द्रव्यम् । नाद्य इत्याह— **रूपानुपहितेति** । रूपाविषयकद्रव्यचाक्षुषवृत्तिर्न संभवति, इतरथा वाय्वादेरपि चाक्षुषत्वापत्तेरिति भावः । द्वितीयेऽपि किं शुक्लरूपादिविशिष्टं द्रव्यं विषयीकरोति किं वारोप्यरूपविशिष्टम् । न द्वितीयः, आरोप्यरूपविशिष्टशङ्खादिवृत्तेरेव भ्रान्तित्वेन तस्या धर्मिज्ञानत्वाभावात् । नाद्य इत्याह— **तदानीमिति** । अध्यासात्पूर्वकाल इत्यर्थः । तदानीं शौक्ल्योपलम्भे चाध्यासाभावप्रसङ्गादिति भावः । **असंभवादिति** । तथा चाभिव्यक्ताधिष्ठानस्फुरणस्य तत्रासंभवाद्व्यभिचारेण धर्मिज्ञानं नाध्यासकारणमिति भावः । नन्वध्यासात्पूर्वं द्रव्यमात्ररूपेण शङ्खादिगोचरचाक्षुषवृत्तिरुदेत्येव, द्रव्यगोचरचाक्षुषवृत्तौ रूपविषयकत्वनियमस्याप्रयोजकत्वात् । न चैवं वाय्वादेरपि-

न च प्रातिभासिकेष्वपि रजताद्यध्यासमात्रे निरुक्तो विशेषहेतुरास्तामिति वाच्यम् । तथा सति संप्रयोगात्प्राक्पीतशङ्खाद्यध्यासाप्रसङ्गाय तदध्यासे दुष्टेन्द्रियसंप्रयोगः कारणमित्यवश्यं वक्तव्यतया तस्यैव सामा-

---

चाक्षुषत्वप्रसङ्गः, द्रव्यचाक्षुषे द्रव्यगतोद्भूतरूपस्य नियामकत्वादध्यासात्पूर्वकाले द्रव्यग्रहणेऽपि शुक्तित्वादेरिव दोषबलात्संनिकृष्टस्यापि शुक्लरूपमात्रस्याग्रहणोपपत्तेश्च । तदुक्तं भामत्याम्— 'शङ्खं च दोषाच्छादितशुक्तिमानं द्रव्यमात्रस्वरूपं गृहीत्वा' इति । शुक्तिमा शुक्लरूपमित्यर्थः । अस्तु वा तत्र शुक्लरूपविशिष्टशङ्खादिग्रहणम् । तथापि नाध्यासानुपपत्तिः, दोषबलेन रूपगतशुक्लत्वजातिग्रहणप्रतिबन्धमात्रेणापि तदुपपत्तेः । तथा च प्रातिभासिकाध्यासेष्वभिव्यक्ताधिष्ठानस्फुरणस्य व्यभिचाराभावाद्धर्मिज्ञानरूपेदमाकारवृत्तिः सिद्धा भवति । तत्सिद्धौ च तस्यामावरणनिवर्तकत्वसदसद्भावचिन्ता सालम्बनैवाचार्याणां न निरालम्बनेति चेत्, सत्यम् । अस्मिन्मतेऽयमेवास्वरसः 'उपाध्याया मन्यन्ते' इत्यनेन सूचितः । पीतशङ्खादिभ्रमस्थले वस्तुतो व्यभिचाराभावेऽपि तमभ्युपगम्य धर्मिज्ञानकारणवादी शङ्कते— **न च प्रातिभासिकेष्वपीति । निरुक्त इति ।** अभिव्यक्ताधिष्ठानप्रकाश इत्यर्थः । **तथा सतीति** । पीतशङ्खाद्यध्यासेष्वभिव्यक्ताधिष्ठानप्रकाशस्य हेतुत्वानुपगमे सतीत्यर्थः । अधिष्ठानापरोक्ष्यवत्संप्रयोगस्यापि पीतशङ्खाद्यध्यासेषु कारणत्वानुपगमे संप्रयोगात्प्रागपि

न्यतः प्रातिभासिकाध्यासमात्रे लाघवात्कारणत्वसिद्धौ तत एव रजताद्यध्यासकादाचित्कत्वस्यापि निर्वाहाद-धिष्ठानप्रकाशस्य सामान्यतो विशेषतो वाध्यासकारण-

---

'पीतः शङ्खः' इत्याद्यध्यासप्रसङ्गः । अतस्तत्परिहाराय तत्र संप्रयोगस्य कारणत्वमवश्यं वाच्यमित्यर्थः । ततः किम्, तत्राह— **तस्यैवेति** । दुष्टेन्द्रियसंप्रयोगस्यैवेत्यर्थः । सामान्यत इत्युक्तं सामान्यमेव दर्शयति— **प्रातिभासिकाध्यासमात्र इति** । प्रातिभासिकाध्यासत्वमेव दुष्टेन्द्रियसंप्रयोगकार्यतावच्छेदकं लाघवात्, न तु पीतशङ्खाद्यध्यासत्वं गौरवादित्यर्थः । ततोऽपि किम्, तत्राह— तत **एवेति** । संप्रयोगात्प्राक्पीतशङ्खाद्यध्यासप्रसङ्गपरिहाराय तत्र सामान्यतः क्लृप्तादुष्टेन्द्रियसंप्रयोगादेवेत्यर्थः । **कादाचित्कत्वस्यापीति** । सदा रजताद्यध्यासप्रसङ्गपरिहारायाभिव्यक्ताधिष्ठानप्रकाशस्य रजताद्यध्यासकारणत्वं वाच्यम् । तथा सति शुक्त्यवच्छिन्नचैतन्यरूपस्याधिष्ठानप्रकाशस्यावृततया सदा तदभिव्यक्तेरभावेन सदा रजताद्यध्यासप्रसङ्गपरिहारोपपत्तेरिति हि धर्मिज्ञानकारणावादिनस्तवाभिप्रायः । स चातिप्रसङ्गपरिहारः पीतशङ्खाद्यध्यासस्थले क्लृप्तात्संप्रयोगादेव लभ्यत इत्यर्थः । **सामान्यत इति** । 'अधिष्ठानप्रकाशमात्रमध्यासमात्रे कारणम्, अभिव्यक्ताधिष्ठानप्रकाशः प्रातिभासिकाध्यासे कारणम्' इति पूर्वोक्तकार्यकारणभावद्वयमपि न सिध्यतीत्यर्थः । ननु तस्यैव सामान्यतः प्रातिभासिकाध्यासमात्रे लाघवात्कारणत्वसिद्धावित्ययु-

त्वस्यासिद्धेः । ननु च सादृश्यनिरपेक्षेऽध्यासान्तरेऽकारणत्वेऽपि तत्सापेक्षे रजताद्यध्यासे रजतादिसादृश्यभूतरूपविशेषादिविशिष्टधर्मिज्ञानरूपमधिष्ठानसामान्यज्ञानं

क्तम्, अहंकाराद्यध्यासे साक्षिचैतन्ये स्वप्नाध्यासे च संप्रयोगासंभवेन व्यभिचारात् । न चाहंकाराद्यध्यासस्य व्यावहारिकत्वमते तत्र व्यभिचारो न दोष इति वाच्यम् । तथापि तत्प्रातिभासिकत्वमते दोषपरिहारासंभवात्साक्षिणि स्वप्नाध्यासे प्रातिभासिकत्वस्य संप्रतिपन्नतया तत्रोक्तव्यभिचारस्य दृढत्वाच्च । न च स्वप्नाद्यध्यासेऽभिव्यक्ताधिष्ठानस्फुरणं कारणम्, अन्यथा स्वप्नप्रपञ्चस्यापरोक्ष्याभावप्रसङ्गात्, बाह्यप्रातिभासिकाध्यासेषु तु दुष्टेन्द्रियसंप्रयोगः कारणमिति न तस्य व्यभिचार इति वाच्यम् । सर्वत्र प्रातिभासिकाध्यासमात्रे त्वदुक्तलाघवेनाभिव्यक्ताधिष्ठानप्रकाशस्य कारणत्वौचित्याद्बाह्याध्यासेषु संप्रयोगस्याधिष्ठानचैतन्याभिव्यञ्जकवृत्युत्पादकतया चारितार्थ्यसंभवाच्च, पीतशङ्खाद्यध्यासस्थलेऽप्यधिष्ठानचैतन्याभिव्यञ्जकवृत्तिसंभवस्य दर्शितत्वाच्चेति चेत्, सत्यम् । सूक्ष्मदृष्ट्या विचार्यमाण एवमेव । स्थूलदृष्ट्या तु संप्रयोगस्य लाघवात्प्रातिभासिकाध्यासमात्रे कारणत्वमुक्तमिति मन्तव्यम् । शुक्तिरजताद्यध्यासात्प्रागिदमाकारवृत्तिसिद्धये प्रकारान्तरेण धर्मिज्ञानस्य कारणत्वं शङ्कते— **ननु च सादृश्येति । अध्यासान्तर इति ।** पीतशङ्खाद्यध्यास इत्यर्थः ।

कारणमवश्यं वाच्यम्, दुष्टेन्द्रियसंप्रयोगमात्रस्य कारणत्वे शुक्तिवदिङ्गालेऽपि रजताध्यासप्रसङ्गात् । न च सादृश्यमपि विषयदोषत्वेन कारणमिति वाच्यम् । विसदृशेऽपि सादृश्यभ्रमे सत्यध्याससङ्गावात्, जलधिसलिलपूरे दूरे नीलशिलातलत्वाध्यारोपदर्शनात् । न च

शङ्खादेः पीतरूपादेश्च सादृश्याभावादिति भावः । तत्पदं सादृश्यपरम् । रजतादिना सह शुक्त्यादेः सादृश्यभूतो यो रूपविशेषादिस्तद्विशिष्टधर्मीत्यर्थः । स्थाण्वादौ पुरुषाद्यध्यासापेक्षितमूर्ध्वत्वादिकमादिशब्दार्थः । संप्रयोगमात्रस्येति । सादृश्यानपेक्षायामिति मात्रशब्दार्थः । अग्निदग्धं नीलरूपवत्काष्ठमिङ्गालशब्दार्थः । नन्वपेक्षितमपि सादृश्यं स्वरूपसदेवाध्यासकारणं तावतोक्तातिप्रसङ्गनिरासात्, न ज्ञातं सत्कारणम् । तथा च न धर्मिज्ञानस्य कारणत्वसिद्धिरिति मत्वा शङ्कते— **न च सादृश्यमपीति** । स्वरूपसत्कारणत्वे सादृश्यभ्रमादध्यासो न स्यात्, सादृश्यभ्रमस्थले स्वरूपसतः सादृश्यस्याभावात् । अतः सादृश्यज्ञानं भ्रमप्रमासाधारणमध्यासकारणं वाच्यमिति तद्विशिष्टधर्मिज्ञानसिद्धिरिति धर्मिज्ञानकारणवादी परिहरति— **विसदृशेऽपीति** । तत्रोदाहरणमाह— **जलधिसलिलपूर इति** । प्रवाहः पूरशब्दार्थः । जलस्य वस्तुतः शुक्लरूपवत्त्वान्नीलशिलातलसादृश्यं नास्ति । अतः सादृश्यभ्रमान्नीलाशिलातलत्वारोप इति भावः । ननु धर्मि-

'तद्धेतोरेव—' इति न्यायात्सादृश्यज्ञानसामग्र्येवाध्यासकारणमस्त्विति युक्तम्, ज्ञानसामग्र्या अर्थकारणत्वस्य क्वचिदप्यदृष्टेस्ततः सादृश्यज्ञानस्यैव लघुत्वाच्च। न च 'स्वतः शुभ्रेऽपि शुभ्रकलधौतभृङ्गारगते स्वच्छे

ज्ञानकारणतापक्षेऽपि तत्सामग्रीत्वेन दुष्टेन्द्रियसंप्रयोगोऽवश्यं वाच्यः । तथा चावश्यिकत्वादध्यासविशेषकारणतावच्छेदकं सादृश्यज्ञानसामग्रीत्वमेव, न तु सादृश्यज्ञानत्वम् । ततश्च न धर्मिज्ञानसिद्धिरित्याशयेनेङ्गले रजताध्यासप्रसङ्गं विस्मृत्य शङ्कते —न च तद्धेतोरेवेति । 'तद्धेतोरेवास्तु तद्धेतुत्वं मध्ये किं तेन' इति न्यायादित्यर्थः । धर्मिज्ञानवादी निराकरोति—ज्ञानसामग्र्या इति । धर्मिज्ञानकारणतायां हि धर्मिज्ञानं रजतादिरूपार्थोत्पत्तौ कारणमिष्यते । तथा च 'तद्धेतोरेव' इति न्यायेन धर्मिज्ञानसामग्रीभूतसंप्रयोगस्य कारणत्वमुच्यमानं रजतायर्थोत्पत्तावेव भवेत् । तच्च न संभवति, संनिकर्षस्य ज्ञान इव विषयोत्पत्तौ कारणतायाः क्वचिदप्यक्लृप्तत्वादित्यर्थः । तत इति । सादृश्यज्ञानसामग्रीत्वापेक्षया सादृश्यज्ञानत्वस्यैव कारणतावच्छेदकत्वे लाघवादित्यर्थः । तथा च धर्मिज्ञानसिद्धिरिति भावः । सादृश्यज्ञानस्याध्यासविशेषे कारणत्वाभावेऽपि व्यवस्थासंभवान्न धर्मिज्ञानसिद्धिरिति मत्वा पुनः शङ्कते— न च स्वत इति । जलस्य मुक्ताफलस्य च नैल्येन सादृश्याभावे समानेऽपि जल एव नैल्या-

जल एव नैल्याध्यासो न मुक्ताफले' इति व्यवस्थाव-द्वस्तुस्वभावादेव 'शुक्तौ रजताध्यासो नेङ्गालादौ' इति व्यवस्था, न तु सादृश्यज्ञानापेक्षणादिति वाच्यम् । स्वतः पटखण्डे पुण्डरीकमुकुलत्वानध्यासेऽपि तत्रैव

ध्यासो दृश्यते न मुक्ताफल इति व्यवस्थायां जलादिवस्तुस्वभाव एव हेतुर्नान्य इत्यर्थः । ननु पात्रगतनैल्यसंनिधानं जले तदध्यासे नियामकम्, न स्वभाव इत्यत आह— **शुभ्रकलधौतेति** । निर्मलसौवर्णपात्रविशेषगतेऽपीत्यर्थः । नन्वेवमपि जलगतनील-रूपवद्द्रव्यसंसर्गात्तत्रैव तदध्यास इति, नेत्याह— **स्वतः शुभ्रेऽपीति** । जलविशेषणमिदम् । स्वतः शुभ्रपदव्याख्यानं स्वच्छ इति पदम् । एवं क्वचित्स्वभावस्यैवाध्यासप्रयोजकत्वे कल्पिते फलित-माह— **वस्तुस्वभावादेवेति** । उक्ते पीतशङ्खाध्यास इव भृङ्गा-रादिगतजले नैल्याध्यासे सादृश्यज्ञानानपेक्षत्वेऽपि पुण्डरीकमु-कुलत्वाध्यासे तदपेक्षाया अन्वयव्यतिरेकसिद्धत्वेन तद्वच्छुक्तिरज-ताद्यध्यासेऽपि सादृश्यज्ञानभावाभावाभ्यामेव व्यवस्था । न तु वस्तुस्वभावात्, अगतिकगतित्वाद्वस्तुस्वभावाश्रयणस्य । तथा च धर्मिज्ञानकारणतासिद्धिरप्रत्यूहेति मत्वा दूषयति— **स्वतः पट-खण्ड इति** । पुण्डरीकस्य कमलस्य या मुकुलत्वावस्था तस्य **अनध्यासेऽपीत्यर्थः** । तत्रैव पटखण्ड एव । कर्तनादिना घटितः संपादितस्तदाकारः पुण्डरीकमुकुलाकारो यस्य पटखण्डस्य स

कर्तनादिघटिततदाकारे तदध्यासदर्शनेन तदध्यासस्य वस्तुस्वभावमननुरुध्य सादृश्यज्ञानभावाभावानुरोधित्वनिश्चयात्, अन्यथान्यदापि तत्र तदध्यासप्रसङ्गात् । उच्यते— सादृश्यज्ञानस्याध्यासकारणत्ववादेऽपि विशेषदर्शनप्रतिबध्येषु रजताद्यध्यासेष्वेव तस्य कारणत्वं वाच्यम् । न तु तदप्रतिबध्येषु पीतशङ्खाद्यध्यासेषु, असंभवात् । विशेषदर्शनप्रतिबध्येषु च प्रतिबन्धकज्ञान-

---

तथा, तस्मिन्नित्यर्थः । तदध्यासेति । पुण्डरीकमुकुलत्वाध्यासेत्यर्थः । तदध्यासस्यानुरोधित्वनिश्चयादिति संबन्धः । अन्यथेति । वस्तुस्वभावस्यैव तदध्यासकारणत्व इत्यर्थः । अन्यदापीति । कर्तनादिना तदाकारसंपादनात्प्रागपीत्यर्थः । 'ननु सादृश्यनिरपेक्षेऽध्यासान्तरेऽकारणत्वेऽपि' इत्यादिना प्राप्तं सादृश्यज्ञानस्याध्यासविशेषे कारणताप्रसाधनद्वारा धर्मिज्ञानस्य कारणत्वमाशङ्क्य कवितार्किकमतानुवर्ती निराकरोति— उच्यत इत्यादिना । न त्विति । 'पीतत्वाभावव्याप्यशङ्खत्ववानयम्' 'नैल्वाभावव्याप्यजलत्ववदिदम्' इत्यादिरूपविशेषदर्शनाप्रतिबध्येष्वित्यर्थः । उक्तविशेषदर्शने सत्यपि 'पीतः शङ्खः' 'नीलं जलम्' इत्यध्यासदर्शनादिति भावः । असंभवादिति । वस्तुतः सादृश्यस्य तत्रासंभवात्पुण्डरीकमुकुलत्वभ्रमवत्सादृश्यज्ञाननानुरोधित्वाच्चेत्यर्थः । ततः किम्, तत्राह— विशेषदर्शनप्रति-

सामग्र्याः प्रतिबन्धकत्वनियमेन विशेषदर्शनसामग्र्यप्य-वश्यं प्रतिबन्धिका वाच्येति तत एव सर्वव्यवस्थोपपत्तेः किं सादृश्यज्ञानस्य कारणत्वकल्पनया। तथा हीङ्गालादौ चक्षुःसंप्रयुक्ते तदीयनैल्यादिरूपविशेषदर्शनसामग्रीसत्त्वान्न रजताध्यासः। शुक्त्यादावपि नीलभागादिव्यापिचक्षुःसंप्रयोगे तत्सत्त्वान्न तदध्यासः। सदृश्या-

---

बध्येषु चेति। प्रतिबन्धकसामग्र्याः प्रतिबन्धकत्वोक्तौ दाहप्रतिबन्धकमण्यादिसामग्र्या दाहप्रतिबन्धकत्वप्रसङ्गः। तद्वारणाय ज्ञानपदम्। मण्यादेः प्रतिबन्धकज्ञानत्वाभावान्नातिप्रसङ्गः। ज्ञानसामग्र्याः प्रतिबन्धकत्वोक्तौ धर्मिज्ञानसामग्रीभूतसंप्रयोगस्याध्यासप्रतिबन्धकत्वप्रसङ्गः। तद्वारणाय प्रतिबन्धकेति ज्ञानविशेषणम्। धर्मिज्ञानस्य चाध्यासानुगुणत्वेन प्रतिबन्धकज्ञानत्वाभावान्नोक्तातिप्रसङ्गः। तथा च पक्षे साध्याभाववत्ताज्ञानं ग्राह्याभावावगाहित्वादनुमिति प्रति साक्षात्प्रतिबन्धकम्। तत्र 'साध्याभावव्याप्यवत्त्वज्ञानं प्रतिबन्धकज्ञानसामग्रीत्वेनानुमितिप्रतिबन्धकम्' इति व्यवस्था प्रसिद्धेत्यर्थः। **तत एवेति**। प्रतिबन्धकज्ञानसामग्र्याः प्रतिबन्धकत्वस्वीकारादेवेत्यर्थः। **किमिति**। तथा च धर्मिज्ञानरूपेदमाकारा वृत्तिर्न सिध्यतीति भावः। सादृश्यज्ञानस्याकारणत्वे पूर्वोक्तातिप्रसङ्गं परिहरति—**इङ्गालादाविति**। इङ्गालगतनैल्यादिर्विशेषः, तद्दर्शनसामग्री च चक्षुःसंयुक्तेङ्गालतादात्म्यरूपात्रास्तीति बोध्यम्। **नीलभागादीति**। त्रिकोणभा-

गमात्रसंप्रयोगे तदभावादध्यासः । तदापि शुक्तित्व-रूपविशेषदर्शनसामग्रीसत्त्वादनध्यासप्रसङ्ग इति चेत्, न । अध्याससमये शुक्तित्वदर्शनाभावेन तत्पूर्वं तत्साम-ग्र्यभावस्य त्वयापि वाच्यत्वात् । मम सादृश्यज्ञानरू-

---

गसंग्रहार्थमादिपदम् । तत्सत्त्वादिति । विशेषदर्शनसामग्री-सत्त्वादित्यर्थः । न तदिति । तत्पदं रजतादिपरम् । ननु यदि शुक्तिसंप्रयोगकाले रजताध्यासाभावस्तर्हि संप्रयोगोऽध्यास-कारणं न स्यादिति, नेत्याह— सदृशभागमात्रेति । तदभावा-दिति । नेत्यादिदर्शनसामग्र्यभावादित्यर्थः । शङ्कते— तदा-पीति । सदृशभागमात्रसंप्रयोगकालेऽपीत्यर्थः । अनध्यासप्रसङ्ग इति । तथा चाध्यासाभावप्रसङ्गपरिहाराय सादृश्यज्ञानं दोषत्वे-नाध्यासकारणं वाच्यम् । ततश्चोक्तदोषरूपप्रतिबन्धकसत्त्वादप्रति-बद्धा शुक्तित्वदर्शनसामग्री नास्ति । अतो रजताध्यास उपपद्यत इति धर्मिज्ञानकारणवादिनोऽभिसंधिः । अनध्यासप्रसङ्गं परि-हर्तुमुभयसंमतमर्थं धर्मिज्ञानापलापी दर्शयति— नेत्यादिना । त्वयापीति । सादृश्यज्ञानकारणतावादिनापीत्यर्थः । वाच्यत्वा-दिति । सदृशभागमात्रसंप्रयोगकाले शुक्तित्वदर्शनसामग्र्यां चक्षुः-संयुक्ततादात्म्यलक्षणायां सत्यामध्यासदर्शनेन तदनुरोधाच्छु-क्तित्वरूपविशेषदर्शनसामग्र्याः प्रतिबन्धको दोषोऽवश्यं वाच्य इति तावत्सत्यम् । स च दोषो न सादृश्यज्ञानम्, किं तु दूरत्वादिरेव । अतो दोषत्वेनापि न सादृश्यज्ञानमध्यासकारण-

ध्यासकारणदोषेण प्रतिबन्धात्तदा शुक्तित्वदर्शनसामग्र्यभावान्नुपपन्नः; तव तथाभ्युपगमे तु षड्डुटीप्रभातवृत्तान्त इति चेत्, न। समीपोपसर्पणानन्तरं रजतसादृश्यरूपचाकचक्ये दृश्यमान एव शुक्तित्वोपलम्भेन तस्य तत्सामग्र्याप्रतिबन्धकत्वात्सिद्धौ दूरत्वादिदोषेण प्रतिबन्धा-

---

मिति न धर्मिज्ञानसिद्धिरिति तदपलापिनोऽप्यभिसंधिः। धर्मिज्ञानवादी स्वाभिसंधिमुद्घाटयन्नाशङ्कते— मयेति। तवेति। धर्मिज्ञानापलापे प्रवृत्तस्य कवितार्किकमतानुवर्तिन इत्यर्थः। सादृश्यज्ञानस्याध्यासकारणत्वं त्वदनिष्टं दूरं गतस्यापि तव प्रसज्येतेति भावः। धर्मिज्ञानापलापवाद्यपि स्वाभिसंधिमुद्घाटयन्ननध्यासप्रसङ्गं परिहरति— नेत्यादिना। तस्येति। सादृश्यदर्शनस्येत्यर्थः। तत्सामग्रीति। शुक्तित्वदर्शनसामग्रीत्यर्थः। रजतरागादिदोषसंग्रहार्थमादिपदम्। ननु दूरस्थस्यापि पुंसः कदाचिच्छुक्तौ शुक्तिप्रमाया दर्शनेन दूरत्वस्यापि सादृश्यज्ञानस्येव व्यभिचारस्तुल्यः। तथा रजते रागवतोऽपि समीपोपसर्पणानन्तरं शुक्तिप्रमादर्शनेन तस्यापि व्यवहारस्तुल्यः। तथा च दूरत्वादेरपि दोषत्वं न स्यात्। यदि च क्वचिदध्यासे कदाचित्कश्चिद्दोष इत्युक्तरीत्या दूरत्वादेर्दोषत्वेनाध्यासकारणत्वं समर्थ्यते, तदा ज्वालादौ सादृश्यज्ञानरूपेणैव दोषेण 'सेयं दीपज्वाला' इत्यादिभ्रमस्य सर्वानुभवसिद्धतया तस्यापि कदाचिद्द्रजताध्यासादौ दोषत्वेन कारणत्वं दुर्वारम्। सादृश्यज्ञानस्य दोषत्वं भाष्यसंमतं

द्वा व्यञ्जकनीलपृष्ठत्वादिग्राहकासमवधानाद्वा तत्सामग्र्य-भावस्य वक्तव्यत्वात्। एवं जलधिजले नियतनीलरू-

च। तथा च देवताधिकरणे भाष्यम्— 'सादृश्यात्प्रत्यभिज्ञानं केशादिष्विव' इति। तथा बौद्धाधिकरणेऽपि— 'सादृश्य-निमित्तं प्रतिसंधानम्' इति। प्रतिसंधानं प्रत्यभिज्ञानम्। तथा च सादृश्यज्ञानस्य दोषत्वेनाध्यासकारणत्वमतानिराकरणमयुक्तमिति चेत्, सत्यम्। तथापि स्थूलबुद्धिमाश्रित्येदमिति ध्येयम्। सहकार्यभावात्सामग्र्यभावमाह— **व्यञ्जकेति**। शुक्तित्वव्यञ्जके-त्यर्थः। ग्राहकपदं नीलभागव्यापिचक्षुःसंप्रयोगपरम्। **तत्साम-ग्रीति**। शुक्तित्वविशेषदर्शनसामग्र्यभावस्योभाभ्यां वक्तव्यत्वा-दित्यर्थः। शुक्तिरजतभ्रमस्थलोक्तन्यायमन्यत्रापि योजयति— **एवमिति**। सादृश्यज्ञानरूपदोषं विना रजताध्यासवन्नीलशिला-तलत्वाद्यध्यासः संभवतीत्यर्थः। जले नीलशिलातलत्वाध्यासे हि शुक्लरूपात्मकविशेषदर्शनं जलराशित्वादिरूपविशेषदर्शनं च प्रतिबन्धकम्। ततः शुक्लरूपादिदर्शनसामग्र्यपि तत्र प्रति-बन्धिका। तथा च प्रतिबन्धकज्ञानसामग्र्यभावादेव तत्र नील-शिलातलत्वारोपः, न तु प्रथमं जले नैल्याध्यासेन सादृश्यज्ञान-संपत्तौ सत्यां तदोषान्नीलशिलातलत्वाद्यध्यास इत्यर्थः। ननु जल-धिसलिलपूरे शुक्लरूपात्मकविशेषदर्शनसामग्र्याभावोऽसिद्धः, नी-लशिलातलत्वारोपात्पूर्वकाले चक्षुःसंयुक्ते जले शुक्लरूपस्य तादा-त्म्याभ्युपगमेन चक्षुःसंयुक्ततादात्म्यरूपसंनिकर्षस्यालोकादेश्च स-त्त्वात्। तथा जलराशित्वादिरूपविशेषदर्शनसामग्र्यभावोऽप्य-

पाध्यासप्रयोजकदोषेण दूरे नीरत्वव्यञ्जकतरङ्गादिग्राह-कासमवधानेन च शौक्ल्यजलराशित्वरूपविशेषदर्शन-सामग्र्यभावान्नीलशिलातलत्वाध्यासः । विस्तृते पटे

सिद्धः, जलराशित्वव्यञ्जकतरङ्गादिप्रत्यक्षस्यापि तत्र सत्त्वादित्यत आह— नियतेति । जलधिसलिले दूरे नैल्याध्यासवत्समीपोपसर्पणानन्तरमपि तदध्यासो दृश्यते । अतस्तस्य नियतत्वम् । एतदुक्तं भवति— शुक्लरूपात्मकविशेषदर्शनसामग्री नियतनीलरूपाध्यासप्रयोजकदोषेण प्रतिबद्धा । अतः साप्रतिबद्धा नास्ति । दूरत्वदोषाज्जलराशित्वव्यञ्जकतरङ्गादेर्ग्राहकसमवधानं नास्ति । तेन जलराशित्वरूपविशेषदर्शनसामग्री च नास्ति । तथा च द्विविधप्रतिबन्धकज्ञानसामग्र्यभावाज्जलधिसलिले नीलशिलातलत्वाध्यास उपपद्यत इति । अत्रेदं बोध्यम्— जलधिसलिलपूरे नीलशिलातलत्वारोपे उक्तविधया विशेषदर्शनसामग्र्यभावस्यापेक्षितत्वेऽपि न तावता तदध्यासः । किं तु जले नीलरूपाद्यध्यासेन नीलशिलातलसादृश्यसंपत्त्यनन्तरमेव तदध्यासः । तथा च दूरे नीलशिलातलत्वाद्यध्यासवतां जलधिसलिलपूरसमीपोपसर्पणानन्तरं व्यवहारः— 'अस्मिञ्जलधिसलिलपूरे मम दूरे नैल्यनैश्चल्यादिसाम्येन नीलशिलातलत्वभ्रम आसीत्, इदानीं स भ्रमो निवृत्तः' इति । एवं तत्र तत्र 'सादृश्यदोषान्मम पूर्वमन्यथा भ्रम आसीत्, इदानीं स निवृत्तः' इति लोकव्यवहार एव सादृश्यज्ञानस्य दोषत्वेनाध्यासविशेषेषु कारणत्वसाधको द्रष्टव्य

परिणाहरूपविशेषदर्शनसामग्रीसत्त्वान्न पुण्डरीकमुकुलत्वाध्यासः । कर्तनादिघटिततदाकारे तदभावात्तदध्यास इति । नन्वेवं करस्पृष्टे लोहशकले तदीयनीलरूपविशेषदर्शनसामग्र्यभावाद्रजताध्यासः किं न भवेत्सादृश्यज्ञानानपेक्षणादिति चेत्, भवत्येव । किं तु

इति । सादृश्यज्ञानस्याध्यासकारणताग्राहकान्वयव्यतिरेकोदाहरणान्तरमप्यन्वथयति— **विस्तृत इति** । परिणाहो विस्तारः । तद्दर्शनं पुण्डरीकमुकुलत्वाध्यासप्रतिबन्धकम्, तत्सामग्रीसत्त्वादित्यर्थः । सादृश्यज्ञानकारणत्वमते हि चक्षुःसंप्रयोगस्थले चाक्षुषं सादृश्यज्ञानं धर्मिज्ञानत्वेन दोषत्वेन च रजताद्यध्यासोत्पत्तौ कारणम् । त्वगिन्द्रियसंप्रयोगस्थले च स्पार्शनं सादृश्यज्ञानमुक्तविधया रजताद्यध्यासोत्पत्तावेव कारणम् । कवितार्किकमते तु धर्मिज्ञानप्रसङ्गभीत्या सादृश्यज्ञानं कुत्राप्यध्यासे कारणं नाभ्युपेयत इति व्यवस्था । तथा च त्वगिन्द्रियेदमर्थसंप्रयोगस्थले त्वदभिमताध्यासकारणसत्त्वात्स किं न स्यादिति शङ्कते — **नन्वेवमिति** । सादृश्यज्ञानं विनाप्यध्यासप्रतिबन्धकविशेषदर्शनसामग्र्यभावमात्रेणाध्यासोपगम इत्यर्थः । किं तत्र रजताध्यास आपाद्यते किं वा रजताध्यास एवापाद्यते । आद्य इष्टापत्तिरित्याह— **भवत्येवेति** । द्वितीयं शङ्कते— **किं त्विति** । तत्र विशेषदर्शनसामग्र्यभावस्य ताम्राद्यध्याससाधारणत्वाद्रजताध्यास एव स्यादित्यत्रापादकं नास्तीति मत्वा परिहरति— **ताम्रादीति** । रङ्गसुवर्ण-

ताम्रादिव्यावर्तकविशेषदर्शनसामग्र्या अप्यभावात्तद्-ध्यासेनापि भाव्यमिति क्वचिदनेकाध्यासे संशय-गोचरो भवति । क्वचित्तु रजतप्राये कोशगृहादौ रजताध्यास एव भवति । क्वचित्सत्यपि सादृश्य-ज्ञाने शुक्तिकादौ कदाचित्करणदोषाद्यभावेनाध्यासानु-दयवदध्यासानुदयेऽपि न हानिः । तस्मान्न कार्य-

---

शकलादिसंग्रहार्थमादिपदम् । क्वचिदिति । करतलस्पृष्टलोह-शकलस्थलेऽपि क्वचिदित्यर्थः । गोचर इति । लोहशकलरूपे-दमर्थः 'किमिदं रजतम्, किं वा ताम्रम्, किं वा सुवर्णादि' इति संशयविषयो भवतीत्यर्थः । ताम्रादिव्यावर्तकविशेषदर्शनस्थले तु रजताध्यास एव भवतीत्याह— क्वचित्त्विति । यस्मिन्कोश-गृहादौ प्रायेण रजतशकलानामेवावस्थानं तत्र प्रविष्टस्य दैवा-दयःशकले करतलस्पृष्टे सति तत्र रजताध्यास एव भवति, रजतकोशगृहमिति बुद्धेस्तस्य सत्त्वादित्यर्थः । ननु क्वचित्क-रतलस्पृष्टे लोहशकले रजताध्यासाभावोऽपि दृश्यते । स च तव मते न संभवति, विशेषदर्शनसामग्र्यभावस्य तत्रापि सत्त्वेन रजताध्यासापत्तेरावश्यकत्वात् । मम तु सादृश्य-ज्ञानरूपकारणाभावात्स न भवतीति वक्तुं शक्यत इत्यत आह— क्वचित्सत्यपीति । समीपोपसर्पणानन्तरं सत्यपि सादृश्य-ज्ञाने यथा रजताध्यासाभावस्तव मत उपेयते तथा मन्मतेऽपि क्वचिदध्यासाभावो न दोषावह इत्यर्थः । तस्मादिति । कथमपि

कल्प्येदमाकारावृत्तिः । नाप्यप्रतिबद्धेदमर्थसंप्रयोगकारणकल्प्या, ततो भवन्त्या एवेदंवृत्तेर्दुष्टेन्द्रियसंप्रयोगक्षुभितावि द्यापरिणामस्वसमकालरजतविषयत्वस्याप्यस्मा -

---

धर्मिज्ञानस्याध्यासकारणत्वासिद्धेरित्यर्थः । इदमाकारवृत्तिरनुभवसिद्धा वा कार्यकल्प्या वा कारणकल्प्या वेति विकल्पत्रये प्रथमद्वितीयौ निरस्य तृतीयं निराकरोति— नाप्यप्रतिबद्धेति । इदमर्थस्य चक्षुःसंप्रयोगकालेऽन्यत्र व्यासङ्गे सतीदमर्थगोचरज्ञानानुदयादप्रतिबद्धेति विशेषणम् । यथोक्तसंप्रयोगवशाज्जायमाना वृत्तिर्भ्रान्तिरूपैव जायते । न तु भ्रान्तेः प्राचीनेदमर्थमात्रगोचरा प्रमारूपा, तत्र मानाभावादित्याशयेनाह— तत इति । इदमर्थावच्छिन्नचैतन्ये विद्यमाना रजतपरिणामिन्यविद्या दुष्टेन्द्रियसंप्रयोगरूपादध्यासनिमित्तकारणभूतात्क्षोभं कार्याभिमुख्यं प्राप्नोति । उत्तरक्षणे च रजतरूपेण परिणमते । दुष्टेन्द्रियसंप्रयोगादवृत्तिरपि तदैव जायते । तथा चाप्रतिबद्धादुष्टेन्द्रियसंप्रयोगाद्भवन्तीदमर्थगोचरा वृत्तिः स्वकालोत्पन्नरजतविशिष्टदमर्थं विषयीकरोतीत्यर्थः । स्वपदं वृत्तिपरम् । धर्मिज्ञानपक्ष इदमाकारवृत्तिरविद्यात्क्षोभिका, तदभावपक्षे धर्मिज्ञानहेतुसंप्रयोगोऽविद्याक्षोभक इति विभाग इति स्थिते; तत्रान्त्यपक्षो न युक्तः, इदमर्थसंप्रयोगस्येदमाकारवृत्ताविव रजतगोचरवृत्तावहेतुत्वाज्ज्ञानसमकालोत्पन्नरजतस्य ज्ञानात्पूर्वं चक्षुःसंनिकर्षाभावाच्च । तथा च रजतगोचरवृत्तौ सामग्र्यभाव एवेदंवृत्तेर्धर्मिमात्रगोचरतां

भिरुच्यमानत्वात्, तत्र च ज्ञानसमानकालोत्पत्तिके प्रतिभासमात्रविपरिवर्तिनि रजते तत्प्राचीनसंप्रयोगाभावेऽपि तत्तादात्म्याश्रयेदमर्थसंप्रयोगादेव तस्यापि चक्षुर्ग्राह्यत्वोपपत्तेः, 'चक्षुषा रजतं पश्यामि' इति प्रतिभासिकरजतस्य स्वसंप्रयोगाभावेऽपि चाक्षुषत्वानुभवात्। न च स्वसंप्रयोगाभावादेव बाधकान्न तच्चाक्षुषं

व्यवस्थापयतीत्याशङ्क्याह— तत्र चेति । भ्रमस्थल इत्यर्थः । प्रतिभासकालमात्रे विपरितवर्तनं सत्ता यस्य तत्प्रतिभासमात्रविपरिवर्ति, तस्मिन् । प्रतीतिव्याप्यसत्ताक इति यावत् । इदमर्थसंप्रयोगस्य रजतगोचरवृत्त्युत्पत्तावपि हेतुत्वं संभवति । न चान्यसंप्रयोगादन्यगोचरवृत्युपगमे घटेन्द्रियसंप्रयोगात्पटगोचरवृत्त्यापत्तिरिति वाच्यम् । स्वगोचरवृत्तौ स्वस्य स्वतादात्म्याश्रयस्य वेन्द्रियेण सह संप्रयोगः कारणमिति कल्पनात् । तावतोक्तातिप्रसङ्गपरिहारोपपत्तेरित्याशयेनाह— तत्प्राचीनेति । रजतप्रतिभासात्प्राचीनेत्यर्थः । तत्तादात्म्येति । रजतस्येदमर्थे कल्पितत्वाद्रजततादात्म्याश्रयत्वमिदमर्थस्य । पटतादात्म्याश्रयत्वं तु न घटेऽस्ति, पटस्य तन्नानध्यस्तत्वादिति भावः । चक्षुःसंप्रयोगानाश्रयस्यापि रजतस्य चाक्षुषवृत्तिविषयत्वकल्पने हेतुमाह— चक्षुषेति । धर्मिज्ञानवादी चाक्षुषत्वानुभवस्यान्यथासिद्धिं वदन्धर्मीन्द्रियसंप्रयोगजन्या वृत्तिर्धर्ममात्रगोचरेत्याशयेन शङ्कते— न चेति । तद्रजतमिदंवृत्तिसमकालं सदुष्टेन्द्रियसंप्रयोगजन्यमपि न

नापि दुष्टेन्द्रियसंप्रयोगजन्यम्, इदंवृत्तिसमकालं ज्ञानकारणस्येन्द्रियसंप्रयोगस्यार्थकारणत्वाक्लृप्तेः; किं त्विदंवृत्त्यनन्तरभावि तज्जन्यं तदभिव्यक्ते साक्षिण्यध्यासाच्चद्भास्यम्, चाक्षुषत्वानुभवस्तु स्वभासकचैतन्याभि-

---

भवतीत्यत्र हेतुमाह— **ज्ञानकारणस्येति** । तथा च प्रातिभासिकस्य रजतस्यैन्द्रियिकत्वपक्षेऽन्यसंप्रयोगस्यान्यगोचरवृत्तिजनकत्वमेकं कल्पनीयम् । तथा ज्ञानकारणस्य संनिकर्षस्य रजताद्यर्थोत्पत्तौ कारणत्वमपरं कल्पनीयमिति गौरवमिति भावः । यदि संप्रयोगो न रजताद्यर्थे कारणं तर्हि किं तत्र कारणम्, अविद्यामात्रस्य सदा सत्त्वेन रजताद्यध्यासस्य कादाचित्कत्वं प्रति तस्य प्रयोजकत्वानुपपत्तेरिति शङ्कते— **किं त्विति** । उत्तरमाह— **इदंवृत्त्यनन्तरभावीति** । इन्द्रियसंप्रयोगादिदमर्थमात्रगोचरा वृत्तिरुदेति । तया चाध्यासं प्रति निमित्तकारणभूतया क्षुब्धा सत्स्वविद्या रजताकारेण परिणमते । रजतस्य चेदमाकारवृत्त्यभिव्यक्तमिदमर्थावच्छिन्नचैतन्यमधिष्ठानम् । तथा च रजतं स्वगोचरवृत्तिं विनैव चैतन्यभास्यमहंकारादिवदित्यर्थः । तज्जन्यमित्यत्र तदभिव्यक्त इत्यत्र च तत्पदमिदंवृत्तिपरम् । तद्वृत्तेश्च कादाचित्कत्वाद्रजताद्यध्यासस्य कादाचित्कत्वमिति भावः । **तद्भास्यमिति** । साक्षिभास्यमित्यर्थः । न च बाह्यचैतन्यावभास्यस्य शुक्तिरूप्यादेरहंकारादिवत्कथं साक्षिभास्यत्वमिति वाच्यम् । स्वगोचरज्ञानरूपवृत्त्यनुपहितचैतन्यभास्यस्यैव साक्षिभास्यशब्दार्थत्वात् । तथा च

व्यञ्जकेदंवृत्तिजनकत्वेन परम्परया चक्षुरपेक्षामात्रेणेति

यथाविद्याहंकारतद्धर्माणामवभासकचैतन्यमविद्यादिगोचरया ज्ञानात्मकवृत्त्योपहितं न भवति, एवं शुक्तिरजतादिभासकचैतन्यमपि शुक्तिरजतादिगोचरज्ञानात्मकवृत्त्युपहितं न भवतीति तस्य साक्षिभास्यत्वमुक्तमिति मन्तव्यम् । ननु शुक्तिरजतस्य साक्षिभास्यत्वे चाक्षुषत्वानुभवविरोध इति, नेत्याह— चाक्षुषत्वानुभवस्त्विति । स्वं शुक्तिरजतम्, तद्भासकस्येदंशावच्छिन्नचैतन्यस्याभिव्यञ्जकामिदंवृत्तिं प्रति चक्षुषो जनकत्वेन शुक्तिरजतस्य चक्षुरपेक्षा वर्तते । सा चापेक्षा परम्परयैव, स्वाधिष्ठानगोचरवृत्त्यर्थमपेक्षितत्वात् । न तु साक्षात्, स्वगोचरवृत्त्यर्थमनपेक्षितत्वात् । यथाकथंचिच्चक्षुरपेक्षामात्रेण तत्र चाक्षुषत्वानुभव उपपद्यत एवेत्यक्षरार्थः । ननु 'चक्षुषा रजतं पश्यामि' इत्यनुभवो हि रजते चाक्षुषवृत्तिविषयत्वमवगाहते, न तु शुक्तिरजतगतं चाक्षुषवृत्त्यभिव्यक्तचैतन्यविषयत्वमिति वस्तुगतिः । तथा च 'परम्परया चक्षुरपेक्षामात्रेण' इति ग्रन्थेन चाक्षुषत्वानुभवस्य चाक्षुषवृत्त्यभिव्यक्तचैतन्यविषयत्वं रजतगतं विषय इति तदनुभवस्य गतिः कल्पितेति प्रतिभाति । तदयुक्तम्, शब्दवदनुभवस्य व्याख्यानानर्हत्वादिति चेत्, न । वस्तुत इदमर्थगतस्येदंत्वस्य तत्रानुभूयमानस्य यथा शुक्तिरजते संसर्गारोपस्तथेदमर्थगतस्य तत्रानुभूयमानस्य चाक्षुषत्वस्य शुक्तिरजते संसर्गारोप इत्यस्यार्थस्य प्रकृते विवक्षितत्वात् । तथा च स्वस्मिन्नारोपणीयं यच्चाक्षुषवृत्तिविषय-

वाच्यम् । तथा सति पीतशङ्खभ्रमे चक्षुरनपेक्षाप्रसङ्गात् । न हि तत्र शङ्खग्रहणे चक्षुरपेक्षा, रूपं विना केवलशङ्खस्य चक्षुर्ग्राह्यत्वायोगात् । नापि पीतिमग्रहणे, आरोप्यस्यैन्द्रियिकत्वानभ्युपगमात् । न च पीतिमा स्वरूपतो

त्वमिदमर्थगतं तल्लाभाय शुक्तिरजतस्य चक्षुरपेक्षा वर्तत इत्ययमर्थः 'परम्परया चक्षुरपेक्षामात्रेण' इति ग्रन्थस्य द्रष्टव्य इति न कश्चिद्दोषः । प्रातिभासिकरजतादेः साक्षिभास्यत्वमेव, न त्वैन्द्रियिकत्वमिति मतं दूषयति— **तथा सतीति** । अधिष्ठानस्यैन्द्रियिकत्वलाभायैवेन्द्रियापेक्षा, न त्वारोप्यस्य तदर्थमिन्द्रियापेक्षेत्युपगमे सतीत्यर्थः । **न हीति** । इदं चापाततः, पीतशङ्खभ्रमादिस्थलेऽप्यभ्यासप्राचीनधर्मिगोचरचाक्षुषवृत्तेः प्रागुपपादितत्वादिति मन्तव्यम् । **नापि पीतिमग्रहण इति** । चक्षुरपेक्षेत्यनुषङ्गः । रूपं विना केवलशङ्खस्य चक्षुर्ग्राह्यत्वायोगमुपेत्यारोपितस्य साक्षिभास्यत्ववादी शङ्कते— **न च पीतिमेति** । पीतरूपमित्यर्थः । यथा शुक्तौ रजतं स्वरूपेणाध्यस्यते तथा शङ्खे पीतरूपं नाध्यस्यत इत्यर्थः । नयनगतं यत्पित्तं पीतरूपयुक्तद्रव्यविशेषः, तस्य यः पीतिमा, तस्य पित्तद्रव्य एवानुभूयमानस्य शङ्खे संसर्ग एवाध्यस्यते, यथा जपाकुसुमादावनुभूयमानस्य लौहित्यस्य स्फटिकमण्यादौ संसर्गाध्यासस्तद्वत् । न चान्यगतस्यान्यत्रारोपाभ्युपगमेऽन्यथाख्यातिप्रसङ्ग इति वाच्यम् । अध्यस्यमानसंसर्गस्यानिर्वचनीयस्योत्पत्त्यभ्युपगमेऽन्यथाख्यातिवैलक्षण्यसत्त्वादिति

नाध्यस्यते, किं तु नयनगतपित्तपीतिम्नोऽनुभूयमानस्य शङ्खे संसर्गमात्रमध्यस्यत इति पीतिमानुभवार्थमेव चक्षुरपेक्षेति वाच्यम् । तथा सति शङ्खतत्संसर्गयोरप्रत्यक्षत्वप्रसङ्गात्; नयनप्रदेशगतपित्तपीतिमाकारवृत्त्यभिव्यक्तसाक्ष्यसंसर्गेण तयोस्तद्ग्राह्यत्वासंभवात्, पीतिमसंसृष्टशङ्खगोचरैकवृत्त्यनभ्युपगमाच्च । न च नयन-

---

भावः । पीतिमानुभवार्थमेवेति । शङ्खे पीतरूपसंसर्गाध्यासात्प्राचीनो यः पित्तद्रव्ये पीतरूपानुभवः, तदर्थमित्यर्थः । तत्र किं नयनप्रदेशगत एव पित्तद्रव्ये पीतिमानुभवः, किं वा शङ्खदेशं प्राप्य तत्रस्थे पित्तद्रव्ये पीतिमानुभवः । आद्यं दूषयति— तथा सतीति । नयनगत एव पित्तद्रव्ये पीतरूपानुभवाङ्गीकार इत्यर्थः । शङ्खतत्संसर्गयोरिति । शङ्खस्य शङ्खपीतरूपयोः संसर्गस्य चेत्यर्थः । शङ्खतत्संसर्गयोर्भानं किं पित्तपीतिमगोचरवृत्त्यभिव्यक्तेन साक्षिणा, किं वा पीतिमसंसृष्टशङ्खगोचरवृत्त्यभिव्यक्तेन साक्षिणा; नाद्य इत्याह— नयनप्रदेशेति । नयनप्रदेशगतपित्तपीतिमाकारवृत्त्या तत्प्रदेशस्थं पीतिमावच्छिन्नचैतन्यमभिव्यज्यते । तेन चाभिव्यक्तचैतन्यलक्षणसाक्षिणा सह शङ्खस्य शङ्खे समारोपितपीतरूपसंसर्गस्य चासंबन्धाच्छङ्खतत्संसर्गयोरापरोक्ष्यं न स्यादित्यर्थः । न द्वितीय इत्याह— पीतिमसंसृष्टेति । अनभ्युपगमाच्चेति । साक्षिभास्यत्ववादिनेति शेषः । शङ्खदेशं प्राप्ते पित्तद्रव्ये पीतिमानुभव इति द्वितीयं

प्रदेशस्थितस्य पित्तपीतिम्नो दोषाच्छङ्खे संसर्गाध्यासो नाङ्गीक्रियते, किं तु नयनरश्मिभिः सह निर्गतस्य विषयव्यापिनस्तस्य तत्र संसर्गाध्यासः कुसुम्भारुणिम्न इव कौसुम्भ इति संभवति तदाकारवृत्त्यभिव्यक्त्या साक्षिसंसर्ग इति वाच्यम् । तथा सति सुवर्णलिप्त इव पित्तोपहतनयनेन वीक्ष्यमाणे शङ्खे तदितरेषामपि पीतिमध्यप्रसङ्गात् । न च स पीतिमा समीपे गृहीत एव दूरे दूरे ग्रहीतुं शक्यो विहायस्युपर्युत्पतन्विहंगम इव,

---

शङ्कते— न चेति । विषयव्यापिनस्तस्येति । शङ्खरूपमधिष्ठानं व्याप्तस्य पित्तद्रव्यस्येत्यर्थः । तथा च पित्तपीतिमाकारवृत्त्या शङ्खदेशस्थस्यैव चैतन्यस्याभिव्यक्त्या शङ्खतत्संसर्गयोरापरोक्ष्यं संभवतीति भावः । कुसुम्भं रक्तद्रव्यविशेषः । तद्व्याप्ते पटे यथा कुसुम्भेऽनुभूयमानस्य रक्तरूपस्य संसर्गारोपस्तथेत्यर्थः । नयनगतपित्तद्रव्यस्य नयने सर्वैरनुभूयमानस्य नयनरश्मिद्वारा निर्गत्य शङ्खव्यापित्वोपगमे बाधकमाह— तथा सतीति । पित्तोपहतनयनः पुरुषो यदा शङ्खं पश्यति तदा तदितरेषामपि 'पीतः शङ्खः' इत्यनुभवप्रसङ्गादित्यर्थः । ननु पित्तद्रव्यस्य नयनप्रदेशाद्विषयदेशं प्रति गमनावसरे यथा पित्तोपहतनयनेन नयनदेशमारभ्य विषयव्याप्तिपर्यन्तं पीतिमा गृह्यते तथान्यैरपि नयनसमीपे मध्ये च पीतिमा गृहीतश्चेच्छङ्खदेशेऽपि ग्रहीतुं शक्यते,

इतरेषां च समीपे न ग्रहणमिति वाच्यम् । इतरेषामपि तच्चक्षुर्निकटवर्त्तिचक्षुषां पीतिमसामीप्यसत्त्वेन तद्ग्रहणस्य दुर्वारत्वात् । एवमप्यतिधवलसिकतामयतलप्रवहदच्छनदीजले नैल्याध्यासे रक्तवस्त्रेषु निशि चान्द्रिकायां नैल्याध्यासे गमननैल्याध्यासे चानुभूयमानारोपस्य वक्तुमशक्यत्वेन तत्र नैल्यसंसृष्टाधिष्ठानगोचरचाक्षुषवृत्त्यनभ्युपगमे चक्षुरनुपयोगस्य दुष्परिहरत्वाच्च; अनास्वादि-

---

नान्यथेत्यत्र दृष्टान्तमाह— विहायसीति । यथा विहंगमः पक्षी गगन उत्पतन्नुत्पतनावसरे भूप्रदेशमारभ्य येन पुंसा गृह्यते तेनैव गगनोपरिभागे दूरं गतोऽपि गृह्यते नान्यैः, तथा प्रकृतेऽपीत्यर्थः । दृष्टान्तवैषम्यमाह— इतरेषामपीति । दृष्टान्ते हि गगनोपरिभागे दूरे विहंगमं पश्यन्कश्चिदन्यं प्रत्युपदिशति— 'मम चक्षुर्निकटे त्वच्चक्षुर्न्यस्तं चेत्त्वयापि स विहंगमो द्रष्टुं शक्यते' इति । स चान्यस्तथा कृत्वा तं पश्यति । न तथा प्रकृते संभवतीत्यर्थः । अस्तु वानुभूयमानारोपस्थले कथंचिच्चक्षुरपेक्षा, स्मर्यमाणनैल्याद्यध्यासस्थलेषु तु तदपेक्षा सर्वात्मना वक्तुमशक्येत्याह— एवमपीति । जलाधारभूभागे वा जलमिश्रितद्रव्यविशेषे वा यदि नीलरूपमस्ति, तदा तत्रैवानुभूयमाननैल्यस्य जलेऽध्यास इति शङ्का भवेत् । तन्निवृत्तये सिकतामयतलस्यातिधवलत्वं नदीजलस्य चाच्छत्वं विशेषणमुपात्तम् । अच्छत्वं निर्मलत्वम् । निशि रात्रौ । चन्द्रिकायामित्यस्यापि पूर्वो-

ततिक्तरसस्य बालस्य मधुरे तिक्तताभासो जन्मान्तरानुभवजन्यसंस्कारहेतुक इति प्रतिपादयता पञ्चपादिकाग्रन्थेन स्वरूपतोऽध्यस्यमानस्यैव तिक्तरसस्यैन्द्रियिकत्वस्फुटीकरणाच्च, अन्यथा तत्र रसनाव्यापारा-

---

क्तमेव योजनं द्रष्टव्यम् । दुष्परिहरत्वाच्चेति । अत्र पीतशङ्खजलनैल्याद्यध्यासेष्वारोप्यपीतिमनैल्यादिसंसृष्टाधिष्ठानगोचरचाक्षुषवृत्त्यनुपगमेऽपि चक्षुरनुपयोगो न दुष्परिहरः, शङ्खादिधर्मिमात्रगोचरचाक्षुषवृत्तिसंभवस्य प्राग्दर्शितत्वादिति मन्तव्यम् । आरोप्यस्येन्द्रियजन्यवृत्तिविषयत्वे संमतिमाह— **अनास्वादितेति** । अस्मिञ्जन्मन्यनास्वादितो रसनेन्द्रियेणाननुभूतस्तिक्तरसो येन बालेन स तथा, तस्येत्यर्थः । मधुरे स्तन्यादौ तिक्ततावभासस्तिक्ततासाक्षात्कारः । स च जन्मान्तरीयतिक्तरसानुभवजन्यसंस्कारजन्यः, आरोप आरोप्यसजातीयपूर्वानुभवजन्यसंस्कारस्य कारणत्वादित्यक्षरार्थः । अत्र ग्रन्थे तिक्ततावभासस्य संस्कारसहकृतरसनेन्द्रियजन्यत्वं भाति, तस्य संस्कारमात्रजन्यत्वे स्मृतित्वप्रसङ्गात् । तथा च तिक्ताध्यासाधिष्ठानस्य मधुरद्रव्यस्य रसनेन्द्रियायोग्यतया परिशेषात्स्वरूपतोऽध्यस्यमानस्य तिक्तरसस्यैव रसनेन्द्रियजन्यवृत्तिविषयत्वं स्पष्टीकृतमिति भवति । समारोप्यस्यैन्द्रियिकत्वे संमतिरयं ग्रन्थ इति भावः । अध्यस्यमानस्यैवेत्येवकारार्थमाह— **अन्यथेति** । आरोप्यातिरिक्तस्यैन्द्रियिकत्वानुपगमे

तत्र बालस्य तिक्तत्वावभासस्थले रसनेन्द्रियव्यापारो न स्यात्, मधुरद्रव्यस्य तदयोग्यत्वादित्यर्थः । वस्तुतस्तु— तिक्तत्वावभास इत्यत्र तिक्तत्वपदावभासपदयोः कर्मधारयः । अवभासपदं च 'अवभास्यते' इति व्युत्पत्त्याध्यस्यमानतिक्तरसपरम्, पञ्चपादिकायामेवावभासपदस्यावभास्यमानतापदेन तथा व्याख्यातत्वात् । जन्मान्तरीयसंस्कारोऽप्यध्यस्यमानतिक्तरसोत्पत्तौ हेतुः, प्रातिभासिकाध्यासस्थलेषु दोषसंस्काराधिष्ठानसामान्यज्ञानरूपकारणत्रयस्याध्यस्यमानपदार्थोत्पत्तावेव कारणतायाष्टीकाविवरणादिष्वेव स्पष्टत्वात् । तथा च कथमनेन ग्रन्थेन स्वरूपतोऽध्यस्यमानस्यैव तिक्तरसस्यैन्द्रियिकत्वस्पष्टीकरणम् । न च तिक्तरसस्यैन्द्रियिकत्वाभावे रसनव्यापारापेक्षानुपपत्तिरिति वाच्यम् । बालस्यान्येषां वा तिक्तरसाध्यासकाले रसनेन्द्रियव्यापारसत्त्वे मानाभावात् । न च तथा सति तिक्तत्वानवभासप्रसङ्ग इति वाच्यम् । त्वगिन्द्रियजन्यमधुरद्रव्यगोचरवृत्त्याभिव्यक्ते मधुरद्रव्यावच्छिन्नचैतन्ये तिक्तताध्यासाङ्गीकारेण तिक्तताया: स्वगोचरवृत्तिं विनैव स्वाधिष्ठानचैतन्यभास्यत्वसंभवात् । अस्तु वा तिक्तताध्यासस्थले रसनेन्द्रियापेक्षा । तथापि नाध्यस्यमानतिक्तरसस्यैन्द्रियिकत्वसिद्धिः, अध्यस्यमानतिक्ततां प्रति मधुरद्रव्यनिष्ठमधुररसस्याधिष्ठानत्वसंभवेन तदधिष्ठानभूतमधुररसग्रहे तदपेक्षोपपत्तेः पञ्चपादिकागतमधुरपदस्य मधुररससाधारणत्वेन तद्विरोधाभावाच्च । न च मधुररसग्रहणे तिक्तताध्यासानुपपत्तिरिति वाच्यम् । रसग्रहणेऽपि दोषविशेषेण मधुररसत्वजातिसाक्षात्कारप्रतिबन्धे सति तत्तदध्यासो-

पेक्षानुपपत्तेः । तस्मादुदाहृतनैल्याध्यासस्थलेष्वधिष्ठानसंप्रयोगादेव तद्गोचरचाक्षुषवृत्तिसमकालोदयोऽध्यासस्तस्या वृत्तेर्विषय इति तस्य चाक्षुषत्वमभ्युपगन्तव्यम्, रूपं विना केवलाधिष्ठानगोचरवृत्त्यभावे च विषयचैतन्याभिव्यक्त्यभावेन जलतदध्यस्तनैल्यादीनां तद्भास्यत्वायोगात् । तिक्तरसाध्यासस्थले त्वधिष्ठा-

---

पपत्तेः । तस्मादारोप्यस्य साक्षिमात्रभास्यत्वं पूर्वाचार्याणां सार्वत्रिकव्यवहारसिद्धं निरपवादमिति मन्तव्यम् । इतःपरं कविताकिकमतानुसारेण यत्पञ्चपादिकाग्रन्थव्याख्यानं कृतं तदेवानुवर्त्यते । तस्मादिति । अध्यस्यमानपदार्थस्य साक्षिभास्यत्वमते पीतशङ्खाद्यध्यासेषु चक्षुरनुपयोगस्य दुष्परिहरत्वादित्यर्थः । तद्गोचरेति । अधिष्ठानगोचरेत्यर्थः । वृत्तिसमकालमुदयो यस्याध्यासस्य पीतरूपादेः स तथेत्यर्थः । अधिष्ठानसंप्रयोगजन्यया वृत्तेरारोपितरूपादिविशिष्टशङ्खादिविषयकत्वानङ्गीकारे आरोपितरूपादेरनवभासप्रसङ्ग इत्यर्थः । रूपं विना केवलाधिष्ठानगोचरवृत्त्यभावे चेति । आरोप्यपीतिमनैल्यादिसंसृष्टशङ्खादिगोचरवृत्त्यनभ्युपगमे चेति चकारार्थः । तत्पदं चैतन्यपरम् । पञ्चपादिकाग्रन्थोक्तं तिक्तरसस्याध्यस्यमानस्यैन्द्रियिकत्वं चाक्षुषाध्यासस्थल इवाधिष्ठानारोप्ययोरेकवृत्तिविषयत्वेन न भवति, किं तु तिक्तरसमात्रगोचरासनवृत्त्येत्युपपादयति— तिक्तरसाध्यासस्थले त्वि-

नाध्यासयोरेकेन्द्रियग्राह्यत्वाभावात्त्वगिन्द्रियजन्याधिष्ठानगोचरवृत्त्या तदवच्छिन्नचैतन्याभिव्यक्तौ पित्तोपहतरसनसंप्रयोगादेव तत्र तिक्तरसाध्यासस्तन्मात्रविषयरासनवृत्तिश्च समकालमुदेतीति । तिक्तरसस्य रासनत्वमभ्युपगन्तव्यम्, त्वगिन्द्रियजन्याधिष्ठानगोचरवृत्त्यभिव्यक्तचैतन्यभास्ये तिक्तरसे परम्परयापि रसनोपयो-

---

ति । तदवच्छिन्नेति । मधुरादिद्रव्यरूपाधिष्ठानावच्छिन्नेत्यर्थः । पित्तास्यदोषेणोपहतं यद्रसनं तेन सह मधुरद्रव्यरूपाधिष्ठानस्य संप्रयोगात्तत्राधिष्ठानावच्छिन्नचैतन्ये तिक्तरसाध्यास उदेति । तदैवाध्यस्यमानतिक्तरसमात्रगोचरा रासनवृत्तिश्चोदेतीत्यर्थः । ननु तिक्तरसाध्यासस्य मास्तु रासनत्वम्, तिक्तरसभानं तु केवलसाक्षिरूपमिति मतमेव कुतो नाद्रियते, तत्राह— त्वगिन्द्रियेति । चैतन्यभास्ये तिक्तरस इति । अभ्युपगम्यमान इति शेषः । परम्परयापीति । रजताद्यध्यासस्थल इव धर्मिमात्रगोचरवृत्त्युत्पादनद्वारापीत्यर्थः । धर्मिणो मधुरद्रव्यादेः रसनेन्द्रियायोग्यत्वादिति भावः । तत्र तिक्तारूपेऽध्यासे । कथमपीत्यस्य व्याख्या प्रकारान्तरेणेति । यद्यपि स्वप्नकाले केवलसाक्षिभास्येषु रसरूपादिषु रासनत्वचाक्षुषत्वाद्यनुभवस्यारोपरूपताया वक्ष्यमाणत्वेन प्रकृतेऽपि तथा समर्थनं संभवति, स्वाप्नपदार्थानामिव प्रातिभासिकतिक्तरसादेरपीन्द्रियासंनिकृष्टत्वेन सामग्र्यभावस्य तुल्यत्वात्;

गाभावेन तत्र कथमपि प्रकारान्तरेण रासनत्वानुभव-समर्थनासंभवात् । तथैव रजतस्यापि चाक्षुषत्वोपपत्तेः 'पश्यामि' इत्यनुभवो न बाधनीयः । न चासंप्रयुक्तस्य रजतस्य चाक्षुषत्वे 'प्रत्यक्षमात्रे विषयेन्द्रियसंनिकर्षः कारणम्' 'द्रव्यप्रत्यक्षे तत्संयोगः कारणम्' 'रजतप्रत्यक्षे रजतसंयोगः कारणम्' इति गृहीतानेक-

---

तथापि तं प्रकारमजानता 'तत्र कथमपि' इत्याद्युक्तमिति ध्येयम् । तथैवेति । यथा रासनवृत्तिविषयत्वमादाय रासनत्वानुभवः समर्थितस्तथा चाक्षुषवृत्तिविषयत्वमादायैव चाक्षुषत्वानुभवसमर्थनसंभवे तदनुभवस्यारोपरूपत्वकल्पनमयुक्तमित्यर्थः । न बाधनीय इत्ययुक्तम्, बाधके सति तद्बाधस्यावश्यकत्वादिति मत्वा शङ्कते— न चेति । शङ्कितं बाधकं परिहरति— संनिकर्षत्वस्येत्यादिना । आद्यनियमासिद्धेरिति । 'जन्यप्रत्यक्षमात्रे इन्द्रियसंनिकर्षः कारणम्' इति नियमासिद्धेरित्यर्थः । जन्यपदं नित्यसाक्षिरूपे प्रत्यक्षे व्यभिचारवारणार्थम् । शाब्दापरोक्षमते शाब्दभिन्नत्वमपि प्रत्यक्षविशेषणं द्रष्टव्यम् । अत्रेदं बोध्यम्— संयोगाद्यन्यतमत्वमनुगतमस्ति न्यायमते, अभावत्वादिवदखण्डोपाधिरूपं वा संनिकर्षत्वं संभवतीत्याद्यनियमविरोधो दुर्वार इति । आद्यनियमस्यासिद्धिमुक्त्वा 'जन्यद्रव्यप्रत्यक्षे इन्द्रियसंयोगः कारणम्' इति द्वितीयनियममुपेत्य प्रकृते

कार्यकारणभावनियमभङ्गः स्यादिति वाच्यम्। संनिकर्षत्वस्य संयोगाद्यनुगतस्यैकस्याभावेन आद्यनियमासिद्धेः। द्वितीयनियमस्य नैयायिकरीत्या तमसीव संयोगायोग्ये क्वचिद्द्रव्येऽपि द्रव्यत्वाध्याससंभवात्, व्यवहारदृष्ट्या यद्द्रव्यत्वाधिकरणं तद्विषयत्वेन प्रातिभासिक-

---

तस्याविरोधमाह— **द्वितीयनियमस्येति**। द्वितीयनियमस्य व्यवहारदृष्ट्या यद्द्रव्यत्वाधिकरणं तद्विषयत्वेन द्वितीयनियमाविरोधादिति संबन्धः। नियमस्य व्यावहारिकद्रव्यविषयकत्वकल्पनायां नियामकमाह— **संयोगायोग्ये क्वचिदिति**। एकत्वद्वित्वादावित्यर्थः। 'एकत्वमेकम्' इत्यादिप्रकारेण तत्रापि संख्याश्रयत्वभ्रमेण द्रव्यत्वाध्याससंभवादित्यर्थः। तथा च द्रव्यप्रत्यक्षमात्रे इन्द्रियसंयोगस्य कारणत्वनियमस्यैकत्वादौ द्रव्यत्वाध्यासकाले तत्प्रत्यक्षे व्यभिचार इत्यर्थः। अद्रव्ये द्रव्यत्वारोपे दृष्टान्तमाह— **तमसीवेति**। सिद्धान्ते तस्य द्रव्यत्वाभ्युपगमादाह— **नैयायिकरीत्येति**। 'प्रौढालोकाभावस्तमः' इति नैयायिकैरुक्तरीत्येत्यर्थः। 'गुणाश्रयत्वं द्रव्यलक्षणम्' इति जानतां तमसि रूपवत्त्वभ्रमेण द्रव्यत्वभ्रमः संभवतीत्यर्थः। ननु शुक्तिरजतादौ घटादाविव स्वभावत एव द्रव्यत्वमस्ति, अन्यथा रजतत्वादिजातिरपि तत्र न स्यात्। न चेष्टापत्तिः, उत्तरत्र तत्र रजतत्वादिजातेः साधयिष्यमाणत्वात्। ततश्च शुक्तिरजतादिकमपि व्यवहारदृष्ट्या द्रव्यत्वाधिकरणं भवति, व्यवहारदशायां शुक्तौ रजतबाधवच्छुक्तिरजते

रजते द्रव्यत्वस्याधिष्ठानमतस्यैवेदंत्ववदध्यासाच्चप्रतीत्यभ्युपगमेन च द्वितीयनियमाविरोधात्, द्वितीयनियमरूपसामान्यकार्यकारणभावातिरेकेण विशिष्यापि कार्यकारणभावकल्पनाया गौरवपराहतत्वेन तृतीयनियमासिद्धेः, 'यत्सामान्ये यत्सामान्यं हेतुस्तद्विशेषे तद्विशेषो

द्रव्यत्वरजतत्वादिजातिबाधादर्शनात् । तथा च शुक्तिरजतादेरिन्द्रियसंयुक्तस्यैन्द्रियिकवृत्तिविषयत्वोपगमे द्वितीयनियमविरोधोऽपि दुर्वार इति चेत्, सत्यम् । शुक्तिरजतादौ रजतत्वद्रव्यत्वादिजातिर्नास्तीति मतमनुसृत्य तत्र द्रव्यत्वँप्रतीति घटयति— प्रातिभासिकरजत इति । इदमर्थगतेदंत्वस्येव तद्गतद्रव्यत्वस्यापि तत्र संसर्गारोप इत्यर्थः । तथा च शुक्तिरजतं व्यवहारदृष्ट्या द्रव्यत्वाधिकरणं न भवतीति भावः । ननु 'द्रव्यप्रत्यक्षे इन्द्रियसंयोगः कारणम्' इत्युपगमे 'रजतचाक्षुषे रजतचक्षुःसंयोगः कारणम्' इति तृतीयनियमोऽपि दुर्वारः, रजतस्य द्रव्यविशेषत्वाद्रजतचक्षुःसंयोगस्य चेन्द्रियसंयोगविशेषत्वात् 'द्रव्यविशेषप्रत्यक्षे इन्द्रियसंयोगविशेषः कारणम्' इत्यस्यार्थस्य यत्सामान्यन्यायसिद्धत्वादिति शङ्कां परिहरति— यत्सामान्य इति । सामान्यकार्यकारणभावो यत्रातिप्रसङ्गावहस्तत्रैवायं न्यायो नान्यत्रेत्यर्थः । न्यायस्य तद्विषयत्वेनेति संबन्धः । तत इति । न्यायादित्यर्थः । ननु बीजसामान्यस्याङ्कुरसामान्यस्य च कार्यका

हेतुः' इति न्यायस्यापि यत्र बीजाङ्कुरादौ सामान्यकार्यकारणभावमात्रमभ्युपगमे बीजान्तरादङ्कुरान्तरोत्पत्त्यादिप्रसङ्गस्तद्विषयत्वेन ततोऽजागलस्तनायमानविशेषकार्यकारणभावासिद्धेः। न चात्रापि 'द्रव्यप्रत्यक्षे द्रव्यसंयोगकारणम्' इति सामान्यनियममात्रोपगमेऽन्यसंयोगादन्यद्रव्यप्रत्यक्षापत्तिरित्यतिप्रसङ्गोऽस्तीति वाच्यम्। 'तत्तद्द्रव्यप्रत्यक्षे तत्तद्द्रव्यसंयोगः कारणम्' इति नियमाभ्युपगमात्, अन्यथा तृतीयनियमेऽप्यतिप्रसङ्गस्य दुर्वार-

---

रणभावोपगमे बीजान्तरादङ्कुरान्तरोत्पत्तिप्रसङ्गवदिहाप्यतिप्रसङ्गसाम्यादुक्तन्यायप्रवृत्तिरस्येवेति शङ्कते— न चात्रापीति। उक्तातिप्रसङ्गपरिहाराय तत्तदङ्कुरव्यक्तिं प्रति तत्तद्बीजव्यक्तेरुक्तन्यायेन हेतुत्वकल्पनवत्प्रकृतेऽपि तत्तद्द्रव्यप्रत्यक्षं प्रति तत्तद्द्रव्यसंयोगस्यैव तेन न्यायेन कारणत्वं सिध्यति, न तु तेन न्यायेन तृतीयकार्यकारणभावः सिध्यतीत्याशयेनाह— तत्तद्द्रव्येति। ननु तेन न्यायेनातिप्रसङ्गपरिहाराय तृतीयनियम एव कुतो न कल्प्यते, तत्राह— अन्यथेति। तृतीयनियमकल्पन इत्यर्थः। अतिप्रसङ्गस्येति। अन्यरजतचक्षुःसंयोगादन्यरजतचाक्षुषापत्तिरित्येवंरूपस्येत्यर्थः। न च व्यक्तिनियमवत्तृतीयनियमोऽप्यस्त्विति वाच्यम्। अतिप्रसङ्गपरि-

त्वात् । तस्मान्नास्ति कल्पनियमभङ्गप्रसङ्गः । किं चात्र कल्पनियमभङ्गेऽपि न दोषः, 'इदं रजतं पश्यामि' 'नीलं जलं पश्यामि' इत्यादेरनन्यथासिद्धस्यानुभवस्य प्रथमगृहीतानामपि 'प्रत्यक्षमात्रे विषयसंनिकर्षः कारणम्' इत्यादिनियमानां व्यावहारिकविषये संकोचकल्पनमन्तरेणोपपादनासंभवात् । न चैवं सति 'प्रभायामेव

हारानुपयुक्तस्य तस्याजातकल्पनीयमानस्याकल्पनीयताया उक्तत्वादिति भावः । तस्मादिति । प्रथमतृतीयनियमयोरसिद्धत्वाद्द्वितीयनियमस्य चाविरुद्धत्वादित्यर्थः । ननु प्रथमद्वितीयनियमविरोधस्य दुर्वारतायाः प्रागुक्तत्वात्तदन्तःपातिन्यक्तिनियमविरोधस्यापि दुर्वारत्वाच्च नास्ति कल्पनियमभङ्ग इत्ययुक्तम्, अत आह— किं चात्रेति । शुक्तिरजतादिस्थल इत्यर्थः । अनन्यथासिद्धस्येति । स्वप्नकाले केवलसाक्षिभास्येषु रजतादिषु चानुषत्वाद्यनुभवस्येवात्राप्यारोपरूपत्वकल्पनासंभवादनन्यथासिद्धत्वमसिद्धम्, कल्पनासाम्यभावस्य स्वप्न इवात्रापि तुल्यत्वात्, अन्यथा स्वप्नेऽपीन्द्रियव्यापारकल्पनाप्रसङ्गात् । अनुभवविरोधे सति तत्काले तदुपरमश्रवणस्यान्यथानयनोपपत्तेरित्यादिकमत्रानुसंधेयम् । अनुभवस्योपपादनासंभवादिति संबन्धः । कल्पनियमानां संकोचकल्पने सति शुक्तिरजतादेरनिर्वचनीयत्वासिद्धिं शङ्कते— न चैवं सतीति । देशान्तरस्थं रजतादिकं भ्रमविषय इति न्याय-

विषयसंनिकर्षः कारणं न भ्रमे' इत्यपि संकोचकल्पनासंभवादसंनिकृष्टस्य देशान्तरस्थस्यैव रजतस्येहारोपापत्तेरित्यन्यथाख्यातिवादः प्रसारितः, अभिव्यक्तचैतन्यावगुण्ठनशून्यस्य देशान्तरस्थस्य रजतस्यापरोक्ष्यानुपपत्तेः ख्यातिबाधानुपपत्त्यादिभिर्भ्रमविषयस्या-

मतम्। तत्रासंनिकृष्टस्य कथं प्रत्यक्षत्वमित्यनिर्वचनीयख्यातिवादिभिः शङ्कायां कृतायां संनिकर्षः प्रत्यक्षे कारणमित्यादिनियमस्य भवतां मते व्यावहारिकपदार्थप्रत्यक्षविषयत्वेन संकोचवन्मम मतेऽपि तस्य प्रत्यक्षप्रमायां संनिकर्षः कारणमिति प्रत्यक्षप्रमाविषयत्वेन संकोचकल्पनोपपत्तेरन्यथाख्यातिवादस्य न किंचिद्बाधकमिति परिहारः सुवचः परेषामित्यर्थः। भ्रमरूपे प्रत्यक्षे संनिकर्षस्याहेतुत्वेऽपि नान्यथाख्यातिवादप्रसक्तिरिति परिहरति—**अभिव्यक्तेति**। अर्थस्यापरोक्षत्वे इन्द्रियसंनिकृष्टत्वं न प्रयोजकम्, किं त्वभिव्यक्तचैतन्याभिन्नत्वमिति वक्ष्यते। तथा च भ्रमविषयस्य रजतादेर्देशान्तरस्थत्वे आपरोक्ष्यं न संभवतीति शुक्तितादात्म्यापन्नं रजतं सिध्यतीत्यर्थः। अवगुण्ठनं तादात्म्यम्। नन्वेवमपि शुक्तिरजतं शुक्तिवत्सत्यमेव स्यात्। नानिर्वचनीयम्, मानाभावादित्यत आह— **ख्यातीति**। ख्यातिरपरोक्षप्रतीतिः। तया भ्रमविषयस्य देशान्तरस्थत्वमसत्त्वं च निरस्तं भवति, असतः संवित्तादात्म्याभावेन प्रत्यक्षत्वायोगात्। 'शुक्तौ कालत्रये-

निर्वचनीयत्वसिद्धेश्च । न चाधिष्ठानसंप्रयोगमात्रात्प्रातिभासिकस्यैन्द्रियिकत्वोपगमे शुक्तिरजताध्याससमये

तत्रैव कालान्तरेऽध्यसनीयस्य रङ्गस्यापि चाक्षुषत्वं

ऽपि रजतं नास्ति' इत्यबाधितबाधकप्रत्यक्षबलाद्रजतास्थितिसमयेऽपि शुक्तौ रजताभावः सिध्यति । शुक्तौ यदि रजतं न स्यात्तदा ख्यात्यनुपपत्तिः यदि तत्र तत्सत्यं स्यात्तदा शुक्तौ शुक्तित्वमिव न बाध्येत । अतः ख्यातिबाधान्यथानुपपत्त्या तस्यानिर्वचनीयत्वं सिध्यति । शुक्तिरजतस्योत्पत्तिविनाशवत्त्वाच्चानिर्वचनीयत्वसिद्धिः । एतच्च विवर्तलक्षणनिरूपणावसरे प्रपञ्चितमिति नात्र प्रपञ्च्यते । उत्पत्तिमत्त्वादियुक्तिरादिशब्दार्थः । ननु शुक्तिरजतादेः साक्षिभास्यत्ववादी शुक्तिरजतस्य स्वतादात्म्याश्रयेदमर्थसंप्रयोगादेव चाक्षुषवृत्तिविषयत्वेऽतिप्रसङ्ग इति शङ्कते— न चेति । तत्रैवेति । शुक्तावेव कालान्तरे यदध्यसनीयं तस्येत्यर्थः । कुत इति । या वृत्तिः शुक्तिरजतं विषयीकरोति शुक्तौ सैव वृत्तिः कालान्तरेऽध्यसनीयं रङ्गमपि कुतो न विषयीकरोति तस्या वृत्ते रजततादात्म्याश्रयेदमर्थसंप्रयोगजन्यत्वस्येव कालान्तरीयरङ्गतादात्म्याश्रयेदमर्थसंप्रयोगजन्यत्वस्याप्यविशेषादित्यर्थः । तथा च संप्रयोगो न रजतगोचरवृत्तिहेतुः, किं तु सादृश्यविशिष्टधर्मिज्ञानमेव हेतुः । सादृश्यज्ञानं च दोषत्वेन धर्मिज्ञानत्वेन च रजताद्यध्यासे कारणम् । रजतादिकं स्वगोचरवृत्तिं विनैव चैतन्यभास्यमिति मतमुपेयमिति भावः । तव मतेऽपि

कुतो न स्यादिति वाच्यम् । रजताध्याससमये रङ्गरजतसाधारणचाकचक्यदर्शनाविशेषेऽपि यतो रागादिरूपपुरुषदोषाभावादितस्तत्र तदा न रङ्गाध्यासस्तत एव मया तद्विषयवृत्त्युदयस्याप्युपगमात् । तस्मादिदमंशसंभिन्नरजतगोचरैकैव वृत्तिरिन्द्रियजन्या, न ततः प्रागिदमाकारवृत्तिरस्तीति नात्रेयमज्ञाननिवर्तकत्वसदसद्भावचिन्ता कार्येति ॥

शुक्तौ कालान्तरेऽध्यसनीयस्य रङ्गस्य रजताध्याससमय एवाध्यासः किं न स्यात्, अधिष्ठानस्य सादृश्यज्ञानस्य च रजतरङ्गाध्यासासाधारणत्वादिति दोषतौल्यं सूचयति— रजताध्याससमय इति । यदि च दृश्यमानसादृश्यरूपविषयदोषाविशेषेऽपि रजताध्याससमये रङ्गगोचररागात्मकपुरुषदोषस्याभावाद्रजतरागस्य सत्त्वाच्च न रङ्गाध्यास इति परिहार इष्यते तदा ममापि तुल्यमुत्तरमित्याशयेनाह— यत इति । रागादिरूपो यः पुरुषदोषस्तदभावादेः सकाशादित्यर्थः । रागादीत्यादिपदेन रङ्गस्य बुद्धौ विपरिवर्तनं गृह्यते । दोषाभावादित इत्यादिपदेन रजतरागो गृह्यते । तत एवेति । रङ्गगोचररागादेरभावाद्रजतरागसत्त्वादन्यस्माद्वा कारणाद्रजतस्यैव तत्रोत्पत्तिस्तत्काले रजतविशिष्टधर्मिगोचरवृत्तेरुदयश्चोपेयत इत्यर्थः । कवि-

अन्ये तु— अधिष्ठानज्ञानमध्यासकारणमितीदमाकारां वृत्तिमुपेत्य तदभिव्यक्तेनैव साक्षिणा तदध्यस्तस्य रजतस्याववभासंभवाच्चद्भासकत्वाभिव्यङ्ग्यतया तयैवेदंवृत्त्या रजतविषयसंस्काराधानोपपत्तेश्च रजताकारा वृत्तिर्व्यर्थेति मन्यन्ते ॥

तार्किकमतमुपसंहरति— **तस्मादिति** । धर्मिज्ञानस्य कारणत्वे मानाभावादित्यर्थः । **नात्रेति** । इदमाकारवृत्तावित्यर्थः ॥

धर्मिज्ञानस्य कारणत्वे मानाभाववचनमापातत इत्युपपादितं तत्र तत्र । तदेतदभिसंधाय तस्य तत्कारणत्वमतमेवाह— **अन्ये त्वधिष्ठानज्ञानमिति** । इदमाकारवृत्तिपक्षेऽपि रजतगोचरवृत्तिरङ्गीकर्तव्येति केचित् । तन्मतं दूषयति — **इदमाकारामिति** । अन्ये त्विदमाकारां वृत्तिमुपेत्य रजताकारा वृत्तिर्व्यर्थेति मन्यन्त इति संबन्धः । इदमाकारवृत्त्युपगमे हेतुराधिष्ठानज्ञानमध्यासकारणमितीति । इतिशब्दो हेत्वर्थः । धर्मिज्ञानस्याध्यासकारणत्वादित्यर्थः । इदमाकारवृत्तिव्यतिरिक्ता रजताकारवृत्तिः किं रजतभानार्था, किं वा तत्संस्कारार्था । नाद्य इत्याह— **तदभिव्यक्तेनैवेति** । इदमाकारवृत्त्यभिव्यक्तेनैवेत्यर्थः । द्वितीयं दूषयति— **तद्भासकेति** । न चान्यगोचरवृत्त्या कथमन्यगोचरसंस्काराधानमिति वाच्यम् । यद्वृत्त्यवच्छिन्नचैतन्ये यावन्तः पदार्थाः प्रकाशन्ते तयैव वृत्त्या तावत्सु पदार्थेषु संस्काराधानमिति प्रागुक्तत्वादिति भावः ॥

ज्ञानद्वयपक्षे 'इदम्' इत्येका वृत्तिरध्यासकारणभूता। 'इदं रजतम्' इति द्वितीया वृत्तिरध्यस्तरजतविषया। न त्विदमंशं विनाध्यस्तमात्रगोचरा सा। 'इदं रजतं जानामि' इति तथा इदमर्थतादात्म्यापन्नरजतविषयस्वानुभवादिति केचित्॥

अन्ये तु— यथेदमंशावच्छिन्नचैतन्यस्याविद्या रजताकारेण विवर्तते, एवमिदमंशविषयवृत्तिज्ञानावच्छिन्न-

---

ये तु स्वगोचरवृत्त्यैव स्वगोचरसंस्काराधानमिति मन्यन्ते तेषां मतेऽध्यस्तरजतगोचरवृत्तिरप्यस्ति। तत्र किं द्वितीया वृत्तिरध्यस्तरजतविशिष्टधर्मिगोचरा, किं वा रजतमात्रगोचरेति संशये मतद्वयेन निर्णयं दर्शयति— **ज्ञानद्वयपक्षे इत्यादिना**। द्वितीया वृत्तिः 'इदं रजतम्' इत्येवमाकारा सत्यध्यस्तरजतविषयेति संबन्धः। आकारविशेषोपादानफलमाह— **न त्विति**। द्वितीयवृत्तेर्विशिष्टविषयकत्वेऽनुभवं प्रमाणयति— **इदं रजतं जानामीति**॥

द्वितीयवृत्तेरध्यस्तमात्रविषयकत्वमिति मतमाह—**अन्ये त्विति**। ज्ञानद्वयपक्षे द्वितीया वृत्तिरविद्यावृत्तिरिति प्रतिपादयति— **यथेत्यादिना**। विवर्तते परिणमत इत्यर्थः। **एवमिति**। इदमंशविषयं यद्वृत्तिज्ञानं तदवच्छिन्नेत्यर्थः। इदमाकारवृत्त्यवच्छिन्नचै-

चैतन्यस्याविद्या रजतज्ञानाभासाकारेण विवर्तते । न त्विदमंशवृत्तिवदनध्यस्तं रजतज्ञानमस्ति । तथा च रजतस्याधिष्ठानगतेदंत्वसंसर्गभानवत् तज्ज्ञानस्याप्यधिष्ठानगतेदंत्वविषयकत्वसंसर्गभानोपपत्तेर्न तस्यापीदंविषयत्वमभ्युपगन्तव्यम् । न च रजतवदध्यस्तस्य रजत

तन्यगताविद्याध्यस्तरजतमात्रगोचरवृत्तिरूपेण परिणमते । सा च वृत्तिर्ज्ञानाभासः, क्लृप्तज्ञानकरणाजन्यत्वादित्यर्थः । **अनध्यस्तमिति** । ज्ञानाभासरूपं रजतज्ञानं रजतवत्प्रातिभासिकमेव; न त्विदमाकारवृत्तिवद्व्यावहारिकम्, ज्ञानाभासस्यापि शुक्तिरजतवदेव शुक्त्यज्ञाननिवर्तकप्रत्यक्षबाध्यत्वादित्यर्थः । ज्ञानाभासस्य रजतमात्रविषयकत्वे तस्य 'इदं रजतम्' इत्याकारो न स्यादित्याशङ्क्य ज्ञानाभासस्येदमंशविषयकत्वाभावेऽपि तस्य तदाकारः संभवतीत्याशयेनाह— **तथा चेति** । ज्ञानाभासं प्रतीदंविषयकवृत्यवच्छिन्नचैतन्यस्याधिष्ठानत्वे सतीत्यर्थः । इदमंशज्ञाने ज्ञानाभासं प्रत्यधिष्ठानभूते विद्यमानं यदिदंत्वविषयकत्वम्, तत्संसर्गौ रजतगोचरज्ञानाभासे भासते । तत्र दृष्टान्तमाह— **रजतस्येति** । रजताधिष्ठानगतस्येदंत्वस्य संसर्गो यथा रजते भासते तथेत्यर्थः । ननु ज्ञानाभासेन रजते गृह्यमाणे इदंत्वसंसर्गो गृह्यते चेदिदंत्वमपि तेनावश्यं ग्राह्यम्, इदंत्वग्रहणं विना तत्संसर्गग्रहणायोगात् । तथा च ज्ञानाभासस्य रजतविशिष्टेदमंशविषयकत्वसि-

इदंत्वसंसर्गस्य रजतज्ञानगोचरत्वात्तत्प्रतियोगिन इदंत्वस्यापि तद्विषयत्वं वक्तव्यमिति वाच्यम् । स्वतादात्म्याश्रयस्येदंत्वविषयस्यैव तस्य तत्संसर्गविषयत्वेऽतिप्रसङ्गाभावात् । न चाधिष्ठानाध्यस्यमानयोरेकस्मिञ्ज्ञाने प्रकाशनियमस्य संक्षेपशारीरकविवरणे प्रतिपादनादेकवृत्तिविषयत्वं वक्तव्यमिति वाच्यम् । वृत्तिभेदेऽपीदमाकारवृत्त्यभिव्यक्त एकस्मिन्साक्षिणि तयोः प्रकाशोपगमादित्याहुः ॥

द्धिरिति शङ्कते– न चेति । संसर्गांशस्य रजतज्ञानाभासगोचरत्वे हेतुगर्भं विशेषणम्– अध्यस्तस्येति । वक्तव्यमिति । अन्यथा घटत्वादिनिरूपितसंसर्गप्रत्यक्षस्य घटत्वादिविषयकत्वं न स्यादित्यतिप्रसङ्गापत्तेरिति भावः । ज्ञानाभासस्येदंत्वरूपप्रतियोगिविषयकत्वाभावेऽपि ज्ञानाभासं प्रत्यधिष्ठानतया ज्ञानाभासतादात्म्यापन्नस्येदमंशज्ञानस्य प्रतियोगिविषयकत्वाज्ज्ञानाभासस्य संसर्गविषयकत्वं संभवति, तावतैवोक्तातिप्रसङ्गपरिहारोपपत्तेरिति परिहरति— स्वतादात्म्याश्रयस्येति । स्वपदं ज्ञानाभासपरम् । वृत्तिभेदेऽपीति । अध्यस्तमात्रगोचराविद्यावृत्तिर्विवरणकारैरेवाभ्युपगमात्तदुक्तनियमे ज्ञानपदं साक्षिपरमेव न वृत्तिपरमिति विवरणकाराणामाशयो लक्ष्यत इति भावः ॥

ननु सर्वपदार्थानां साक्षिप्रकाशादेव प्रकाशोपपत्तेः किं वृत्त्या । घटादिविषयकसंस्काराधानाद्युपपत्तये तदपेक्षणेऽपि तन्निर्गमाभ्युपगमो व्यर्थः, परोक्षस्थल इवानिर्गतवृत्त्यवच्छिन्नसाक्षिणैव घटादेरपि प्रकाशोपपत्तेः । न च तथा सति परोक्षापरोक्षवैलक्षण्यानुपपत्तिः,

---

एवं बाह्यगोचरापरोक्षवृत्तीनामेवावरणाभिभावकत्वमिति नियमस्य भ्रमस्थलीयेदमाकारवृत्तौ व्यभिचारशङ्कायां सत्यां तद्वृत्त्यभ्युपगमानभ्युपगमाभ्यां तां परिहृत्य प्रसङ्गाज्ज्ञानद्वयपक्षे किंचिद्विचार्य पूर्वोक्तं वृत्तिनिर्गममाक्षिपति— **नन्विति । किं वृत्त्येति । वृत्तिरेव मास्तु, तन्निर्गमो दूरापास्त एवेत्याशयः । ननु** केवलसाक्षिण एव विषयानुभवरूपत्वे कालान्तरे विषयानुसंधानं न स्यात्, अनुभवनाशलक्षणसंस्काराभावात् । तथागन्तुकवृत्त्यनङ्गीकारे चक्षुराद्यनुविधानं न स्यात्, नित्यसाक्षिणि चक्षुरादेरनुपयोगात् । अतो वृत्तिरादर्तव्येत्याशङ्क्य तामङ्गीकरोति— **घटादीति । ननु** विषयप्रकाश एव तन्निर्गमफलमिति, नेत्याह— **परोक्षस्थल इवेति । ननु,** प्रत्यक्षपरोक्षज्ञानयोर्वैलक्षण्यमनुभवसिद्धम् । तच्च प्रत्यक्षस्थले वृत्तिनिर्गमाभ्युपगमे निर्वहति । बहिर्निर्गतवृत्त्यवच्छिन्नचैतन्यमपरोक्षज्ञानमनिर्गतवृत्त्यवच्छिन्नचैतन्यं परोक्षज्ञानमिति, नेत्याह— **न च तथा सतीति ।** वृत्त्यनिर्गमे सतीत्यर्थः । इन्द्रियजन्यं ज्ञानं प्रत्यक्षं तदजन्यं ज्ञानं

शाब्दानुमित्योरिव करणविशेषप्रयुक्तवृत्तिवैजात्यादेव तदुपपत्तेः ॥

अत्र केचिदाहुः— प्रत्यक्षस्थले विषयाधिष्ठानतया यदवच्छिन्नमेव चैतन्यं विषयप्रकाशः। साक्षात्तादात्म्यरूपसंबन्धसंभवे स्वरूपसंबन्धस्यान्यस्य वा कल्पनायोगादिति तदभिव्यक्त्यर्थं युक्तो वृत्तिनिर्गमाभ्यु-

---

परोक्षमिति वैलक्षण्योपपत्तेरित्यर्थः। यथा शाब्दज्ञाने शब्दरूपकरणविशेषप्रयुक्तं शाब्दत्वरूपं वैजात्यं यथा वानुमितावनुमितित्वं तथेत्यर्थः। करणविशेष इन्द्रियमनुमानादि च, तत्प्रयुक्तं वृत्तिषु वैजात्यं प्रत्यक्षत्वादिजातिरूपमुपाधिरूपं वा, तस्मादेवेत्यर्थः ॥

वृत्तिनिर्गमं साधयति— अत्र केचिदाहुरिति। विषयाधिष्ठानतया विषयावच्छिन्नं यच्चैतन्यं तदेव विषयप्रकाशः। न जीवचैतन्यम्, तस्य विषयं प्रत्युपादानत्वाभावेन साक्षात्तादात्म्यसंबन्धाभावादित्यर्थः। अन्यस्य वेति। परम्परासंबन्धस्य वेत्यर्थः। तादात्म्यरूपसंबन्धसंभवे स्वरूपसंबन्धकल्पनायोगात्, साक्षात्संबन्धसंभवेऽन्यस्य संबन्धस्य कल्पनायोगादिति विभागः। ततः किम्, तत्राह— इति तदभिव्यक्त्यर्थमिति। विषयावच्छिन्नब्रह्मचैतन्यस्यैव विषयप्रकाशकत्वात्तस्य चावृतत्वादावरणाभिभवरूपाभिव्यक्तिसिद्ध्यर्थमित्यर्थः। ननूक्तयुक्त्या परोक्षस्थलेऽपि वि-

षगमः । परोक्षस्थले व्यवहिते बह्वयादौ वृत्तिसंसर्गायोगादिन्द्रियवदन्वयव्यतिरेकशालिनो वृत्तिनिर्गमद्वारस्यानुपलम्भाच्चानिर्गतवृत्त्यवच्छिन्नचैतन्यमेव स्वरूपसंबन्धेन विषयगोचरमगत्वाभ्युपगम्यत इति ॥

अन्ये त्वहंकारसुखदुःखादिष्वापरोक्ष्यं साक्षाच्चैतन्यसंसर्गिषु कल्पनामिति घटादावपि विषयसंसृष्टमेव चैतन्यमापरोक्ष्यहेतुरिति तदभिव्यक्तये वृत्तिनिर्गमनं समर्थयन्ते ॥

षयावच्छिन्नब्रह्मचैतन्यमेव विषयावभासकं स्यात् । ततश्च तत्रापि तन्निर्गमः प्रसज्येतेति, नेत्याह— **परोक्षस्थल इति** । वृत्तिनिर्गमनहेतुसंनिकर्षाभावादित्याशयेनाह— **व्यवहित इति** ॥

वृत्तिनिर्गम उपपत्त्यन्तरमाह— **अन्ये त्विति** । **संसर्गिषु कल्पनामिति** । संसर्गस्तादात्म्यम् । विषयापरोक्ष्ये क्वचित्कल्पितप्रयोजकत्वस्य संसर्गस्यैवान्यत्रापि संभवे तत्त्यागायोगादिति भावः । **विषयसंसृष्टमेवेति** । न तु तदसंसृष्टं जीवचैतन्यमित्येवकारार्थः । **तदिति** । विषयावच्छिन्नब्रह्मचैतन्याभिव्यक्तय इत्यर्थः ॥

प्रत्यक्षे वस्तुन्यावरणाभिभवस्यावश्यिकताप्रतिपादनपूर्वकं तद-

इतरे तु— शब्दानुमानावगतेभ्यः प्रत्यक्षावगतेः स्पष्टता तावदनुभूयते। न हि रसालपरिमलादिविशेषे शतवारमाप्तोपदिष्टेऽपि प्रत्यक्षावगत इव स्पष्टतास्ति, तदनन्तरमपि 'कथं तत्' इति जिज्ञासानुवृत्तेः। न च शब्दान्माधुर्यमात्रावगमेऽपि रसालमाधुर्यादिवृत्त्यवा-

---

भिमवार्थं वृत्तिनिर्गमनमिति प्रतिपादयति— इतरे त्विति। ननु शब्दाद्यवगतेऽप्यर्थे स्पष्टता किं न स्यादिति, नेत्याह— न हीति। परिमलं सुगन्धः। आदिपदं रसालगतरससंग्रहार्थम्। 'आम्रफले मधुररसादिरस्ति' इत्येवंरूपादाप्तवाक्याच्छतवारमुक्तादपि मधुरत्वादिसामान्यविशिष्टतयैव रसादिज्ञानं भवति, न तु मधुरत्वव्याप्यजातिविशेषविशिष्टरसादिज्ञानम्। तथा च रसादिगतजातिविशेषज्ञानाभावादेव जातिविशेषजिज्ञासोपपद्यते, न तु शब्दादवगमेऽपि स्पष्टत्वाभावादित्याशयेन शङ्कते— न च शब्दादिति। माधुर्यं मधुररसः। माधुर्यादिमात्रावगमेऽपि शब्दादसाधारणजातिविशेषावच्छिन्नमाधुर्यावगमो नास्तीति संबन्धः। असाधारणो यो जातिविशेषस्तदवच्छिन्नतया माधुर्यावगमो नास्तीत्यर्थः। जातिविशेषावगमाभाव उपायाभावं हेतुमाहे— रसालेत्वादिना। रसालस्य यन्माधुर्यादि, तद्वृत्तेर्योऽवान्तरजातिविशेषः, तद्वाचकशब्दाभावादित्यर्थः। तद्बोधकशब्दमङ्गीकृत्यापि शक्ति-

न्तरजातिविशेषवाचिशब्दाभावात्तत्सत्त्वेऽपि श्रोत्रा व-
स्थागृहीतसंगतिकत्वाच्छब्दादसाधारणजातिविशेषाव -
च्छिन्नमाधुर्यावगमो नास्तीति जिज्ञासानुवृत्तिर्युक्तेति
शङ्कयम् । 'रसाले सर्वातिशायिमाधुर्यविशेषोऽस्ति'
इत्यस्माच्छब्दात्तद्गतावान्तरजातिविशेषस्याप्यवगमात् ।
न ह्ययं शब्दस्तद्गतं विशेषं विहायान्यगतं विशेषं
तत्र बोधयति, अप्रामाण्यापत्तेः । न च तद्गत-
मेव विशेषं विशेषत्वेन सामान्येन रूपेण बोध-

ग्रहाभावात्तदवगमो न संभवतीत्याह— तत्सत्त्वेऽपीति । तस्ये-
ति । अवान्तरजातिविशेषवाचकशब्दस्येत्यर्थः । न च शङ्क्य-
मिति संबन्धः । तद्वाचकपदाभावेऽपि तद्बोधको वाक्यरूपः श-
ब्दोऽस्ति । तेन च जातिविशेषावगमोऽप्यस्ति । तथा चावगते
जातिविशेषे स्पष्टत्वाभावादेव जिज्ञासेत्याशयेनाह— रसाल इ-
त्यादिना । अयं शब्दः किं तद्गतं जातिविशेषं बोधयति, किं
वान्यगतम् । आद्यमङ्गीकरोति— तद्गतावान्तरेति । द्वितीयं
दूषयति— न ह्ययमिति । तत्रेति । रसालमाधुर्यादावित्यर्थः ।
तात्पर्यविषय एव शब्दस्य प्रामाण्याभ्युपगमादिति भावः । न
चाप्रामाण्ये इष्टापत्तिरिति वाच्यम् । आप्तवाक्यस्य तदङ्गी-
कारायोगादिति भावः । माधुर्यगतजातिविशेषावगममङ्गीकृत्य
शङ्कते— न च तद्गतमेवेति । सामान्येनेति । विशेषत्वं रसा-

यति, न विशिष्येति जिज्ञासेति वाच्यम् । प्रत्यक्षेणापि मधुररसविशेषणस्य जातिविशेषस्य स्वरूपत एव विषयीकरणेन जातिविशेषगतविशेषान्तरविषयीकरणाज्जिज्ञासानुवृत्तिप्रसङ्गात् । तस्मात्प्रत्यक्षग्राह्येऽभिव्यक्तापरो-

---

लमाधुर्यगते जातिविशेषे इव फलान्तरमाधुर्यगतेषु जातिविशेषेष्वपि सत्त्वात्सामान्यरूपमिति भावः । न विशिष्येति । जातिविशेषगतविशेषविशिष्टतया जातिविशेषं न बोधयति । तथा च रसालमाधुर्यगतजातिविशेषस्य स्वरूपेण शब्दादवगतत्वेऽपि स्वगतासाधारणविशेषविशिष्टतयानवगतत्वादेव जिज्ञास्यत्वमिति भावः । जातिविशेषगतोऽसाधारणविशेषः किं जातिरूपः, किं वा जातिविशेषाश्रयेतरावृत्तित्वे सति जातिविशेषाश्रयवृत्तित्वरूपोपाधिर्वा । नाद्यः, जातौ तदनङ्गीकारात् । न द्वितीयः, रसालमाधुर्यगतजातिविशेषे प्रत्यक्षेणापि तदग्रहणेन प्रत्यक्षावगतेऽपि जातिविशेषे जिज्ञासानुवृत्तिप्रसङ्गात् । तस्मात्प्रत्यक्षेणापि स जातिविशेषः स्वरूपेणैव गृह्यत इति वक्तव्यम् । स्वरूपेण तदवगमश्चोक्तशब्दादप्यस्त्येवेति शब्दावगतस्यापि स्पष्टत्वे तत्र जिज्ञासानुवृत्तिर्न स्यादित्याशयेनाह— प्रत्यक्षेणापीति । तस्मादिति । प्रत्यक्षावगत इव शब्दादिगम्येऽर्थे स्पष्टत्वाभावादित्यर्थः । अनुभवसिद्धायाः स्पष्टतायाः प्रयोजकमाह— अभिव्यक्तेति । अपरोक्षत्वं स्वप्रकाशत्वम् । एकरसत्वमेकरूपत्वम् । अभिव्यक्त

श्चैकरसचैतन्यावगुण्ठनात्स्पष्टता जिज्ञासानिवर्तनक्षमा । शब्दादिगम्ये तु तदभावादस्पष्टतेति व्यवस्थाभ्युपगन्तव्या । अत एव साक्षिवेद्यस्य सुखादेः स्पष्टता, शाब्दवृत्तिवेद्यस्यापि ब्रह्मणो मननादेः प्रागज्ञानानिवृत्तावस्पष्टता, अनन्तरं तन्निवृत्तौ स्पष्टतेति वृत्तिनिर्गममुपपादयन्ति ॥

नन्वेतावतापि विषयावारकाज्ञाननिवृत्त्यर्थं वृत्तिनि-

यदपरोक्षैकरसं चैतन्यं तत्तादात्म्यात्प्रत्यक्षग्राह्ये स्पष्टता विषयताविशेषरूपेत्यर्थः । अनेन विषयगतस्पष्टताप्रयोजकीभूता या विषयचैतन्याभिव्यक्तिरावरणनिवृत्तिरूपा, तस्याः सिद्धये वृत्तिनिर्गमनमपेक्षितमिति सूचितम् । आवरणनिवृत्तेः स्पष्टताप्रयोजकत्वेऽन्वयव्यतिरेकौ दर्शयति—अत एवेत्यादिना । अभिव्यक्तचैतन्यसंसर्गादेवेत्यर्थः । शाब्दवृत्तीति । शब्दजन्या वृत्तिर्मननाद्यनुष्ठानात्प्रागसंभावनाविपरीतभावनाभ्यां प्रतिबद्धत्वादज्ञाननिवर्तिका, तदनुष्ठानानन्तरमप्रतिबद्धत्वादज्ञाननिवर्तिकेति भावः ॥

मन्वेतावतापीति । 'अत्र केचिदाहुः' इत्यादिना मतत्रयोपन्यासात्मकग्रन्थेनापीत्यर्थः । विषयावारकाज्ञानस्य पुरुषगतत्वमतेऽनिर्गतवृत्त्या निवृत्तिसंभवेऽपि तस्य विषयावच्छिन्नचैतन्यगतत्वपक्षे तन्निर्गमापेक्षा स्यादित्याशङ्क्यानिर्गतवृत्त्यैव विषयगता-

र्मम इत्युक्तम्। तदयुक्तम्, विषयावच्छिन्नचैतन्यगतस्य तदावारकाज्ञानस्यानिर्गतवृत्त्या निवृत्त्यभ्युपगमेऽप्यनतिप्रसङ्गात्। न च तथा सति देवदत्तीयघटज्ञानेन यज्ञदत्तीयघटाज्ञानस्यापि निवृत्तिप्रसङ्गः; समानविषयकत्वसत्त्वात्, अहमर्थविषयचैतन्यनिष्ठयोर्ज्ञानाज्ञानयोर्भिन्ना-

---

ज्ञानस्यापि निवृत्तौ नास्ति बाधकमित्याशयेनाज्ञानं विशिनष्टि— विषयावच्छिन्नचैतन्यगतस्येति। ननु ज्ञानाज्ञानयोर्निवर्त्यनिवर्तकभावलक्षणे विरोधे समानाश्रयत्वे सति समानविषयकत्वं तन्त्रम्। समानाश्रयत्वं च वृत्तिनिर्गमे सति संभवति, अज्ञानाश्रये विषयचैतन्ये वृत्तिरूपज्ञानस्यापि स्थितिलाभात्। तन्निर्गमाभावे तु तयोः समानाश्रयत्वासंभवात्समानविषयकत्वमात्रं विरोधप्रयोजकं पर्यवस्यति। तथा चातिप्रसङ्ग इति शङ्कते— न च तथा सतीति। वृत्तिनिर्गमानुपगमे सतीत्यर्थः। सत्त्वादिति। देवदत्तीयघटज्ञानयज्ञदत्तीयघटाज्ञानयोरिति शेषः। अहमर्थेति। वृत्तिनिर्गमाभावे सति ज्ञानमहमर्थनिष्ठमेव, न विषयचैतन्यनिष्ठम्। विषयावारकाज्ञानं च विषयचैतन्यनिष्ठमेव, न त्वहमर्थनिष्ठम्। तथा च समानाश्रयत्वं बाधितत्वान्न प्रयोजककोटिप्रविष्टमित्यर्थः। समानाश्रयविषयत्वमिति। ज्ञानाज्ञानयोर्विरोधे समानाश्रयत्वे सति समानविषयकत्वं प्रयोजकं परिकल्प्य तन्निर्वाहाय वृत्तिनिर्गमे स्वीकृतेऽप्युक्तदोषतादवस्थ्येन तयोर्विरोधे, उक्तप्रयोजकादन्यदेव

श्रयत्वेन तयोर्विरोधे समानाश्रयत्वस्यातन्त्रत्वादिति वाच्यम् । समानाश्रयविषयत्वं ज्ञानाज्ञानयोर्विरोधप्रयोजकमङ्गीकृत्य वृत्तिनिर्गमाभ्युपगमेऽपि देवदत्तीयघटवृत्तेर्यज्ञदत्तीयघटाज्ञानस्य च घटावच्छिन्नचैतन्यैकाश्रयत्वप्राप्त्यातिप्रसङ्गतादवस्थ्येन 'यदज्ञानं यं पुरुषं प्रति यद्विषयावारकं तत्तदीयतद्विषयकज्ञाननिवर्त्यम्' इति पृथगेवाज्ञानविरोधप्रयोजकस्य वक्तव्यतया समानाश्रयत्वस्यानपेक्षणात् ॥

प्रयोजकं कल्पनीयम् । तच्च वृत्तिनिर्गमं विनैव सिध्यति । अतो विरोधप्रयोजकोपपादकतयापि वृत्तिनिर्गमो न सिध्यतीति समुदायार्थः । देवदत्तीयेति । यज्ञदत्तीयघटाज्ञानाश्रये घटावच्छिन्नचैतन्ये देवदत्तीयघटज्ञानरूपवृत्तेर्निर्गमद्वारा संबन्धे सति देवदत्तीयघटज्ञानयज्ञदत्तीयघटाज्ञानयोः समानाश्रयत्वे सति समानविषयत्वं लभ्यते, न च देवदत्तीयघटवृत्त्या यज्ञदत्तीयघटाज्ञाननिवृत्तिरस्तीत्युक्तदोषतादवस्थ्यमित्यर्थः । यदीदं प्रयोजकं न भवति किं तर्हि तत्प्रयोजकं वृत्तिनिर्गमनिरपेक्षं पूर्ववादिनस्तवाभिप्रेतम्, तत्राह— यदज्ञानमिति । तदिति । तदज्ञानं तत्पुरुषीयतद्विषयकज्ञाननिवर्त्यमित्यर्थः । तथा च प्रयोजकशरीरे यं पुरुषं प्रतीत्यनेन यदीयेत्यनेन च 'यज्ञदत्तं प्रति विषयावारकाज्ञानस्य यज्ञदत्तीय-

अत्राहुः— वृत्तिनिर्गमानुपगमे ज्ञानाज्ञानयोर्विरोध-प्रयोजकमेव दुर्निरूपम्। 'यदज्ञानं यं पुरुषं प्रति' इत्याद्युक्तमिति चेत्, न। परोक्षज्ञानेनापि विषयगताज्ञाननिवृत्तिप्रसङ्गात्। अपरोक्षत्वमपि निवर्तकज्ञानविशेषणमिति चेत्, किं तदपरोक्षत्वम्? न तावज्जातिः। 'दण्ड्ययमासीत्' इति संस्कारोपनीतदण्डविशेषविशिष्टपुरुषविषयस्य चाक्षुषज्ञानस्य दण्डांशेऽपि तत्सत्त्वे तत्रा-

---

ज्ञानेनैव निवृत्तिः, न देवदत्तीयज्ञानेन' इति नियमलाभान्नोक्तातिप्रसङ्ग इति सूचितम्॥

वृत्तिनिर्गमं साधयितुमुपक्रमते— **अत्राहुरित्यादिना। किं तदिति।** अपरोक्षत्वं जातिरुपाधिर्वेति किंशब्दार्थः। आद्यं दूषयति— **न तावदिति।** पूर्वं दण्डविशिष्टतया गृहीते विष्णुमित्रे वर्तमानकाले दण्डवियुक्ते प्रत्यक्षप्रत्यभिज्ञानं संस्काररूपोपनायकसहितादिन्द्रियाज्जायते— 'अयं विष्णुमित्रो दण्ड्यासीत्' इति। तत्र दण्डांशे प्रत्यक्षत्वमस्ति, न वा। आद्ये दोषमाह— **दण्डांशेऽपीति। निवृत्त्यापातादिति।** न चात्रेष्टापत्तिर्वक्तुं शक्या, 'स दण्ड इदानीं कीदृशः' इति जिज्ञासानुदयप्रसङ्गादिति भावः। नन्वज्ञाननिवृत्त्यनुभवयोरभावेऽपि दण्डांशे प्रत्यक्षत्वं कल्प्यते। कल्पकं चेन्द्रियसंनिकर्षजन्यत्वम्। संनिकर्षश्च स वि-

पि विषयगताज्ञाननिवृत्त्यापातात् 'दण्डं साक्षात्करोमि' इति तदंशेऽप्यापरोक्ष्यानुभवापत्तेश्च । अननुभवेऽपि संस्कारं संनिकर्षं परिकल्प्येन्द्रियसंनिकर्षजन्यतया तत्र कल्पनिकापरोक्ष्याभ्युपगमेऽनुमित्यादावपि लिङ्गज्ञानादिकं संनिकर्षं परिकल्प्य तदङ्गीकारापत्तेः । दण्डांश आपरोक्ष्यासत्त्वे तु तस्य जातित्वायोगाज्जातेर्व्याप्यवृत्तित्वनियमात्, तदनियमेऽप्यवच्छेदकोपाधिभेदानि-

---

षयप्रत्यासत्तिरिति मतमनुसृत्य संस्कारः कल्प्यत इत्याशङ्क्याऽतिप्रसङ्गमाह— **अननुभवेऽपीत्यादिना** । अनुमितौ लिङ्गज्ञानं संनिकर्षः, उपमितौ सादृश्यज्ञानं संनिकर्षः, शाब्दे पदार्थोपस्थितिः संनिकर्षः, अर्थापत्तावनुपपद्यमानपदार्थज्ञानं संनिकर्षः, अभावज्ञाने प्रतियोगिज्ञानं संनिकर्ष इति कल्पनया प्रत्यक्षप्रमाणपरिशेषापत्तेरिति भावः । **तदङ्गीकारेति** । अपरोक्षत्वाङ्गीकारापत्तेरित्यर्थः । दण्डांशेऽपि न प्रत्यक्षत्वमस्तीति द्वितीयकल्पं दूषयति— **दण्डांश इति** । **व्याप्यवृत्तित्वनियमादिति** । अन्यथैकस्यामेव प्रत्यभिज्ञायां तत्तांशे संस्कारजन्यतया स्मृतित्वापत्तौ जातिसंकरापत्तेरिति भावः । **तदनियमेऽपीति** । जातेर्व्याप्यवृत्तित्वनियमाभावेऽपि प्रकृते प्रत्यभिज्ञायां विष्णुमित्रांशे प्रत्यक्षत्वं दण्डांशे तद्भावश्चास्तीति वक्तव्यम् । ततश्चावच्छेदकभेदं विना

रूपणेन तस्याव्याप्यवृत्तिजातित्वायोगाच्च । नाप्युपाधिः, तदनिर्वचनात् । इन्द्रियजन्यत्वमिति चेत्, न । साक्षिप्रत्यक्षाव्यापनात्, अनुमितिशाब्दज्ञानोपनीतगुरुत्वादिविशिष्टघटप्रत्यक्षे विशेषणांशातिव्यापनाच्च । क-

---

प्रतियोगितदभावयोरेकत्रवृत्त्ययोगादुपाधिभेदो वाच्यः । स च दुर्निरूपः । तस्मादपरोक्षत्वजातेः स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वरूपाव्याप्यवृत्तित्वायोगाद्व्याप्यवृत्तिजातित्वमेव वाच्यम् । तत्र च दूषणमुक्तमिति भावः । ननु प्रकृते उपाधिभेदानिरूपणमसिद्धम्, लौकिकसंनिकर्षजन्यत्वतदभावयोर्वा संस्काराजन्यज्ञानत्वतदभावयोर्वा विष्णुमित्रविषयकत्वतदभावयोर्वापरोक्षत्वतदभावौ प्रत्युपाधित्वसंभवादिति चेत्, न । उक्तोपाधीनामपि भावाभावरूपतया तदर्थमुपाध्यन्तरापेक्षायामनवस्थाप्रसङ्गादिति भावः । अपरोक्षत्वमुपाधिरिति पक्षं दूषयति— नापीति । अनिर्वचनमसिद्धमिति चेत्तत्र वक्तव्यम् । किमिन्द्रियजन्यत्वमपरोक्षत्वम्, किं वा तत्संनिकर्षजन्यत्वम्, सिद्धान्त्यभिमतं वा । तत्राद्यमनूद्य दूषयति— इन्द्रियेति । सुखादिप्रत्यक्षरूपे नित्यसाक्षिण्यव्याप्तिमुक्त्वाव्याप्तिमप्याह— अनुमितीति । यस्मिन्घटेऽनुमानेन वा शब्देन वा गुरुत्वमनुभूतम्, तस्मिन्निन्द्रियसंनिकर्षे सति 'घटोऽयं गुरुः' इति प्रत्यक्षं भवति । तत्र विशेषणीभूतगुरुत्वांशेऽतिव्याप्तेरित्यर्थः । ननु

रणान्तराभावेन तदंशे परोक्षेऽप्युपनयसहकारिसामर्थ्यादिन्द्रियस्यैव जनकत्वात्, अनुगतजन्यतावच्छेदकाग्राहिणोऽनेकेष्विन्द्रियजन्यत्वस्य दुर्ग्रहत्वाच्च । तद्ग्रहे च तस्यैव प्रथमप्रतीतस्यापरोक्ष्यरूपत्वोपपत्तौ प्रत्यक्षानुभवायोग्यस्येन्द्रियजन्यत्वस्य तद्योग्यापरोक्ष्यरूपत्व-

---

गुरुत्वस्येन्द्रियायोग्यतया परोक्षे तदंशज्ञाने तज्जन्यत्वमसिद्धमित्यत आह— करणान्तरेति । परोक्षेऽपीति । यथा रुचिदत्तमतेऽनुमितौ मनसः कारणत्वं तथेति भावः । न चेन्द्रियत्वेनेन्द्रियजन्यत्वमपरोक्षत्वम्, गुरुत्वांशाज्ञाने च तथा न तज्जन्यत्वमिति नातिव्याप्तिरिति वाच्यम् । तथापि साक्षिप्रत्यक्षाव्याप्त्यनिरासादिति भावः । अनेकेषु रूपादिसाक्षात्कारेषु तज्जन्यत्वं दुर्ग्रहम्, अनुगतजन्यतावच्छेदकाभावेन तज्ज्ञानं विना जन्यत्वज्ञानासंभवादित्याह— अनुगतेति । ननु 'साक्षात्करोमि' इत्यनुभवसिद्धः कश्चिदखण्डोपाधिरेव जन्यतावच्छेदकोऽस्त्वित्याशङ्क्य तर्हि स एवापरोक्षत्वं भवेन्नान्यदित्याह— तद्ग्रहे चेति । अवच्छेद्यजन्यत्वग्रहात्पूर्वमेवावच्छेदकग्रहस्यावश्यिकत्वात् 'साक्षात्करोमि' इत्यनुभवयोग्यस्यापरोक्षत्वस्य तदयोग्यधर्मरूपत्वायोगाच्चेत्यर्थः । अस्तु तर्ह्युक्तावच्छेदकोपाधेरेवापरोक्षत्वरूपत्वम् । स किं व्याप्यवृत्तिरव्याप्यवृत्तिर्वा । नाद्यः, 'दण्ड्ययमासीत्' इति प्रत्यक्षे दण्डांशेऽतिव्याप्तेः । न द्वितीयः, अवच्छेदकभेदानिरूप-

कल्पनायोगात्। एतेनेन्द्रियसंनिकर्षजन्यत्वमापरोक्ष्यम्; उपनयसहकृतेन्द्रियजन्यपरोक्षांशे च न संनिकर्षजन्यत्वम्, अनुमितावप्युपनीतभानसत्त्वेन प्रमाणान्तरसाधारणस्योपनयस्यासंनिकर्षत्वादित्यपि शङ्का निरस्ता। संयोगादिसंनिकर्षाणामननुगमेनाननुगमाच्च। यत्तवा-

---

गात्। न च विष्णुमित्रविषयकत्वावच्छेदेन तत्रापरोक्षत्वरूपोपाधिरस्ति, दण्डविषयकत्वावच्छेदेन तत्रैव तदभावोऽप्यस्तीति वाच्यम्। तथा सति दण्डांशे विष्णुमित्रविषयकत्वाभावस्य वक्तव्यतया तत्र प्रत्यक्षे विष्णुमित्रविषयकत्वतदभावयोरविरोधायावच्छेदकान्तरापेक्षायां पूर्वोक्तानवस्थाप्रसङ्गात् अखण्डोपाधिस्वीकारे जातिमात्रविलयप्रसङ्गाच्च नोक्तोपाधिपक्षः संभवतीति भावः। उपाधिपक्षे द्वितीयविकल्पं निराचष्टे— **एतेनेति**। अव्याप्त्यादिदोषप्रसङ्गेनेत्यर्थः। इन्द्रियजन्यत्वमपरोक्षत्वमिति पक्षे या अतिव्याप्तिरुक्ता, सा तत्संनिकर्षजन्यत्वं तदिति पक्षे नास्तीत्याह शङ्कते— **उपनयेति**। करणान्तराभावेनेन्द्रियजन्यत्वसत्त्वेऽपि तत्संनिकर्षजन्यत्वं नास्ति, उपनयस्य संनिकर्षत्वासंभवात्संनिकर्षान्तराभावाच्चेति भावः। दूषणान्तरमाह— **संयोगादीति**। संयोगसंयुक्तसमवायादिसंनिकर्षाणामननुगमेन संयोगादिष्वननुगतसंनिकर्षत्वाभावेनेति यावत्। **अननुगमाच्चेति**। इन्द्रियसं-

भिमतमापरोक्ष्यं तदेव ममाप्यस्त्विति चेत्, न । तस्य शाब्दापरोक्षनिरूपणप्रस्तावे प्रतिपादनीयस्य तत्रैव दर्श-

---

निकर्षजन्यत्वस्येति शेषः । तथा च घटतद्रूपरूपत्वशब्दशब्दत्वसुखादिगोचरसाक्षात्कारेषु 'साक्षात्करोमि' इत्यनुगतप्रत्यक्षं न स्यादिति भावः । उपाधिपक्षे तृतीयोपाधिमाशङ्कते— **यत्त्वाभिमतमिति** । तव सिद्धान्तिनो यज्ज्ञानगतमपरोक्षत्वं संमतं तदेव मम मतेऽप्यस्तु । तथा चापरोक्षत्वस्याज्ञाननिवर्तकज्ञानविशेषणत्वसंभवान्न परोक्षज्ञानेन तन्निवृत्तिप्रसङ्ग इति भावः । मदभिमतापरोक्षत्वस्य ज्ञाने न तन्निवृत्तिप्रयोजकत्वं संभवतीति सिद्धान्ती दूषयति— **न तस्येति** । मदभिमतापरोक्षत्वस्येत्यर्थः । प्रस्तावः प्रकरणम् । तच्च तृतीयपरिच्छेदावसाने द्रष्टव्यम् । **तत्रैव दर्शनीययेति** । ज्ञानस्यापरोक्षत्वं हि न करणविशेषप्रयुक्तम्, किं त्वपरोक्षार्थाभिन्नत्वम् । इदं चापरोक्षत्वं विषयावभासकचैतन्यरूपज्ञाननिष्ठम्, न वृत्तिनिष्ठम् । अतो न साक्षिप्रत्यक्षव्याप्तिः । अर्थापरोक्ष्यं च स्वव्यवहारानुकूलचैतन्याभिन्नत्वम् । स्वपदमर्थपरम् । तद्व्यवहारानुकूलं च चैतन्यं निवृत्तावरणं तत्तदधिष्ठानचैतन्यमेव । तथा च घटाद्यर्थस्य स्वव्यवहारानुकूलेन स्वाधिष्ठानचैतन्येन स्वगोचरवृत्त्यभिव्यक्तेन तादात्म्यलक्षणभेदसत्त्वात्स्वव्यवहारानुकूलचैतन्याभिन्नत्वरूपमपरोक्षत्वमुपपन्नम् । तथाहंकारादिषु तदधिष्ठानभूतस्य केवलसाक्षिरूपतत्प्रत्यक्षज्ञानस्य बाह्यघटादिषु तत्तदाकारवृत्त्युपहितस्य घटादिप्रत्यक्षज्ञानरूपस्य घटा-

नीयया रीत्याज्ञाननिवृत्तिप्रयोज्यत्वेन तन्निवृत्तिप्रयोजकविशेषणभावायोगात्। तस्मात् 'तरति शोकमात्मवित्' इति श्रुतस्य ब्रह्मज्ञानस्य मूलाज्ञानाश्रयभूतसर्वो-

---

धिष्ठानचैतन्यस्य च तेन तेन विषयेण तादात्म्यसत्त्वादपरोक्षार्थाभिन्नत्वरूपमपरोक्षत्वमुपपन्नमिति हि तत्र दर्शनीया रीतिः। **प्रयोज्यत्वेनेति**। विषयचैतन्यगताज्ञाननिवृत्तौ सत्यां विषयस्य घटादेः स्वव्यवहारानुकूलचैतन्याभिन्नत्वरूपमपरोक्षत्वं लभ्यते। विषयस्य तल्लाभे सति तज्ज्ञानस्यापरोक्षार्थाभिन्नत्वरूपमपरोक्षत्वं लभ्यते। तथा च विषयचैतन्यगताज्ञाननिवृत्तेः पूर्वं ज्ञानस्यापरोक्षत्वालाभेन सिद्धान्त्यभिमतस्य ज्ञानगतापरोक्षत्वस्य विषयचैतन्यगताज्ञाननिवृत्तिप्रयोज्यस्याज्ञाननिवृत्तिं प्रति प्रयोजकत्वासंभवादित्यर्थः। तन्निवृत्तिं प्रति प्रयोजकतया निवर्तकज्ञानविशेषणत्वायोगादित्यक्षरार्थः। **तस्मादिति**। 'यदज्ञानं यं पुरुषं प्रति' इत्यादिरूपे निरुक्ते विरोधप्रयोजकेऽपरोक्षत्वस्य निवर्तकज्ञानविशेषणत्वासंभवादित्यर्थः। तस्मादज्ञानाश्रयचैतन्यसंसर्गनियतत्वं निवर्तकज्ञानविशेषणं वाच्यमिति संबन्धः। परोक्षज्ञानस्याज्ञाननिवर्तकत्वप्रसङ्गवारणायेति शेषः। ननु विषयसंसृष्टस्य वृत्तिज्ञानस्य विषयगताज्ञाननिवर्तकत्वं क्वचिदप्यक्लृप्तमित्याशङ्क्य ब्रह्मगोचरवृत्तिज्ञाने क्लृप्तमित्याशयेनाह— **ब्रह्मज्ञानस्येति**। मूलाज्ञानाश्रयभूते सर्वोपादाने ब्रह्मणि संसर्गनियतस्येत्यर्थः। यदा ब्रह्मगोचरवृत्तिज्ञानमुदेति तदा नियमेन ब्रह्मसंसृष्टमेवोदेतीत्यत्र हेतु

पादानब्रह्मसंसर्गनियतस्य मूलाज्ञाननिवर्तकत्वात् । ऐन्द्रियिकवृत्तयस्तत्तदिन्द्रियसंनिकर्षसामर्थ्यात्तत्तद्विषयावच्छिन्नचैतन्यसंसृष्टा एवोत्पद्यन्त इति नियममुपेत्याज्ञानाश्रयचैतन्यसंसर्गनियतत्वं निवर्तकज्ञानविशेषणं वाच्यम् । तथा च सति 'यदज्ञानं यं पुरुषं प्रति यद्विष-

---

वेन सर्वोपादानत्वमुपात्तम् । कार्यमात्रस्य जन्मप्रभृत्युपादानभूतब्रह्मणा सह संसर्गनियमे सति ब्रह्मगोचरवृत्तिज्ञानस्यापि स्वनिवर्त्यमूलाज्ञानाश्रयभूते ब्रह्मणि संसर्गनियमोऽप्यर्थसिद्ध इति भावः । ब्रह्मज्ञानस्याज्ञाननिवर्तकत्वे मानमाह— **तरति शोकमिति** । शोकपदमज्ञानपरम् । आत्मपदं प्रत्यगभिन्नब्रह्मपरम् । श्रुतस्येति पदात्पूर्वमज्ञाननिवर्तकत्वेनेति शेषः । परोक्षवृत्तीनां विषयचैतन्यसंसर्गाभावादैन्द्रियिकवृत्तीनां तत्संसर्गे को हेतुः ? तत्राह— **तत्तदिन्द्रियसंनिकर्षसामर्थ्यादिति** । अनेन परोक्षवृत्तीनामज्ञानाश्रयविषयचैतन्यसंसर्गनियतत्वरूपविशेषणाभावात् 'यदज्ञानं यं प्रति' इत्याद्यंशसत्त्वेऽपि न तत्रातिप्रसङ्ग इति सूचितम् । पर्यवसितं प्रयोजकं दर्शयति— **तथा चेति** । उक्तविशेषणे सतीत्यर्थः । घटावच्छिन्नचैतन्ये तदावारकाज्ञानानि बहूनि सन्ति । तेषां मध्ये कानिचिद्देवदत्तं प्रति तदावारकाणि कानिचिच्च यज्ञदत्तादिकं प्रति तदावारकाणि । एवं प्रतिविषयं पुरुषभेदेनानेकाज्ञानानि सन्ति । तथा च विषयावारकाज्ञानानां

मध्ये यदज्ञानं यं पुरुषं देवदत्तं प्रति यद्विषयावारकं यस्य विषयस्य घटस्यावारकं तदज्ञानं तदीयेन देवदत्तीयेन तद्विषयेण तद्घटविषयकेण तदज्ञानाश्रयचैतन्यसंसर्गनियतात्मलाभज्ञानेन निवर्त्यमित्यर्थः। तदज्ञानेति पदेन देवदत्तं प्रति घटावारकाज्ञानमभिधीयते। तदज्ञानाश्रयचैतन्यं घटावच्छिन्नचैतन्यम्, तत्र यः संसर्गस्तन्नियतस्तद्व्याप्य आत्मलाभो यस्य घटगोचरवृत्तिज्ञानस्य तज्ज्ञानं तदज्ञानाश्रयचैतन्यसंसर्गनियतात्मलाभम्, तच्च तज्ज्ञानं चेति विग्रहः। आत्मलाभ उत्पत्तिः। नियमश्च 'यदा यदा घटगोचरवृत्तिज्ञानस्य घटेन्द्रियसंनिकर्षजन्यस्यात्मलाभस्तदा तदा घटावच्छिन्नचैतन्ये तस्य घटगोचरवृत्तिज्ञानस्य संसर्गः' इत्येवमात्मकः। तदुक्तं प्राक्— 'ऐन्द्रियिकवृत्तयस्तत्तद्विषयावच्छिन्नचैतन्यसंसृष्टा एवोत्पद्यन्त इति नियममुपेत्य' इति। अत्र 'यदा यदैन्द्रियिकवृत्तीनामुत्पत्तिस्तदा तदा विषयचैतन्ये तासां संसर्गः' इति हि नियमः स्पष्टं भासते। एवं विषयान्तरेषु पुरुषान्तरेष्वज्ञानान्तरेषु ज्ञानान्तरेषु चेदं प्रयोजकं विशिष्य विशिष्य योजनीयम्। ननु, परोक्षवृत्तीनां विषयचैतन्यसंसर्गाभावेनोक्तप्रयोजकाक्रान्तत्वादज्ञाननिवर्तकत्वप्रसङ्गो नास्तीत्युक्तमयुक्तम्, क्वचित्परोक्षवृत्तेरपि विषयसंसर्गसत्त्वात्। तथा हि— 'हृदयपुण्डरीके नाड्यः सन्ति' इति वाक्याज्जायमानाया वृत्तेः कदाचिदन्तःकरणे हृदयपुण्डरीकस्थे नाडीहृदयान्यतरवस्त्ववच्छेदेन जनने सति तस्या वृत्तेस्तदन्यतरवस्त्ववच्छिन्नचैतन्यसंसर्गसत्त्वात् तदावरणनिवर्तकत्वप्रसङ्गः। न चेष्टापत्तिः, तदा तदन्यतरवस्तुनि जिज्ञासानुद-

वावारकं तत्तदीयतद्विषयतदज्ञानाश्रयचैतन्यसंसर्गनिय-
तात्मलाभज्ञाननिवर्त्यम्' इति ज्ञानाज्ञानयोर्विरोधप्रयो-
जकं निरूपितं भवति । न चैवं सति नाडीहृदयस्वरूप-
गोचरशाब्दज्ञानस्याप्यज्ञाननिवर्तकत्वप्रसङ्गः, तस्य क-
दाचिदर्थवशसंपन्ननाडीहृदयान्यतरवस्तुसंसर्गसंभवेऽपि
विषयसंसर्गं विनापि शाब्दज्ञानसंभवेन तत्संसर्गनिय-

यप्रसङ्गादिति शङ्का नियतपदेन निरस्तेत्याह— न चैवं सतीति । विरोधप्रयोजकस्य नियमगर्भत्वे सति शाब्दज्ञानस्याप्यज्ञाननिवर्तकत्वप्रसङ्गो न चेति संबन्धः । 'यदा यदा हृदयादिगोचरशाब्दवृत्तेरुदयस्तदा तदा तस्या वृत्तेर्हृदयाद्यन्यतरवस्त्ववच्छिन्नचैतन्ये संसर्गः' इति नियमो नास्तीति हेतुमाह— तस्येति । तादृशशाब्दज्ञानस्येत्यर्थः । ऐन्द्रियिकवृत्तीनां हि तत्तदिन्द्रियगोलकावच्छिन्नान्तःकरणप्रदेशेषूत्पत्तिनियमः संभाव्यते । इन्द्रियनिरपेक्षवृत्तीनां त्वन्तःकरणे जायमानानां प्रदेशनियमे कारणाभावाद्धृदयादिगोचरशाब्दवृत्तिः कदाचिद्दैवयोगाद्धृदयाद्यवच्छेदेनान्तःकरणे जायते, कदाचित्तु हृदयादिप्रदेशं विहाय प्रदेशान्तरावच्छेदेन सा तत्र जायत इति निरुक्तनियमो नास्तीत्यर्थः । अत्र 'तस्य' इति षष्ठ्याः सप्तम्या पञ्चम्या च संबन्धः । तस्मादिति । वृत्तिज्ञानस्याज्ञानाश्रयविषयचैतन्यसंसर्गं विना तन्निवर्तकत्वासंभवादित्यर्थः ॥

तात्मलाभत्वाभावात् । तस्माज्ज्ञानाज्ञानविरोधनिर्वाहाय वृत्तिनिर्गमो वक्तव्य इति ॥

अन्ये तु विषयगताज्ञानस्य लाघवात्समानाधिकरण-ज्ञाननिवर्त्यत्वसिद्धौ वृत्तिनिर्गमः फलतीत्याहुः ॥

अपरे तु बाह्यप्रकाशस्य बाह्यतमोनिवर्तकत्वं सामानाधिकरण्ये सत्येव दृष्टमिति दृष्टानुरोधाद्वृत्तिनिर्गमः सिध्यतीत्याहुः ॥

एवं ज्ञानाज्ञानयोर्विरोधप्रयोजकनिर्वाहकत्वेन वृत्तिनिर्गमनं प्रसाध्य तत्रैव हेत्वन्तराणि मतभेदेनाह— **अन्ये त्वित्यादिना** । **लाघवादिति** । विषयगताज्ञानस्यान्वयव्यतिरेकाभ्यां ज्ञाननिवर्त्यत्वग्रहदशायां लाघवात्समानाधिकरणज्ञाननिवर्त्यत्वं गृह्यते, न तु व्यधिकरणज्ञाननिवर्त्यत्वमित्यर्थः । एतदुक्तं भवति— अज्ञानस्य विषयचैतन्यगतत्वात्तन्निवृत्तिलक्षणं ज्ञानकार्यमपि तद्गतमेव । तथा चाज्ञाननिवृत्तिरूपकार्यस्य स्वकारणभूतज्ञानेन सहेन्द्रियसंनिकर्षसामर्थ्यात्सामानाधिकरण्यलक्षणसंबन्धसंभवे तस्यागायोगात्कार्यकारणयोः सामानाधिकरण्यस्यौत्सर्गिकत्वादिति ॥

बाह्यतम इति । अन्धकारेत्यर्थः । **सत्येवेति** । अन्यत्र विद्यमानादालोकादन्यत्र तमोनाशो न दृष्ट इत्येवकारार्थः । अज्ञानस्यापि विषयावारकत्वेन बाह्यतमःसदृशत्वाद्वृत्तिरूपस्य

केचित्त्वावरणाभिभवार्थं वृत्तिनिर्गमानपेक्षायामपि चिदुपरागार्थं प्रमातृचैतन्यस्य विषयप्रकाशकब्रह्मचैतन्याभेदाभिव्यक्त्यर्थं वा तदपेक्षेत्याहुः ॥

अथ किंप्रमाणकोऽयं जीवब्रह्मणोरभेदो यो वृत्त्या-

वृत्त्यारूढचैतन्यरूपस्य वा प्रकाशस्यावरणनिवर्तकत्वेनालोकसदृशत्वाज्ज्ञानाज्ञानयोरप्यन्धकारालोकयोरिव समानाधिकरणयोरेव निवर्त्यनिवर्तकभावः कल्प्यते । तच्च सामानाधिकरण्यमज्ञानाश्रये विषयचैतन्ये वृत्तिज्ञानस्य संसर्गरूपम् । स च संसर्गो वृत्तिनिर्गमाधीन इति भावः ॥

एवं विषयचैतन्यगताज्ञाननिवृत्तिरनिर्गतवृत्त्यापि संभवति, अतो वृत्तिनिर्गमनाभ्युपगमो व्यर्थ इत्याक्षेपे तन्निर्गमं विना तन्निवृत्तिर्न संभवतीति तदभ्युपगमः सफल इति समाधानं दर्शितम् । इदानीं विषयचैतन्यगताज्ञाननिवृत्त्यर्थं वृत्तिनिर्गमनं नापेक्षितमिति पूर्वपक्ष्युक्तमङ्गीकृत्यापि वृत्तिनिर्गमनं साधयति— **केचित्त्विति** । इदं च प्रकारद्वयं प्रागेव प्रपञ्चितमिति नेह प्रपञ्च्यत इति बोध्यम् ॥

प्रमातृचैतन्यशब्दितजीवस्य ब्रह्माभेदे नास्ति प्रमाणमिति शङ्कते— **अथेति** । अयमभेदः किं वेदान्तप्रमाणकः, किं वा तदन्यप्रमाणकः ? तत्र न तावदाद्यः कल्पः संभवति, वेदान्ताना-

भिव्यज्येत । वेदान्तप्रमाणक इति घण्टाघोषः । सर्वेऽपि वेदान्ता उपक्रमोपसंहारैकरूप्यादितात्पर्यलिङ्गैर्विमृश्यमानाः प्रत्यगभिन्ने ब्रह्मण्यद्वितीये समनुयन्ति । यथा चायमर्थस्तथा शास्त्र एव समन्वयाध्याये प्रपञ्चितः । विस्तरभयान्नेह प्रतन्यते ॥

इति शास्त्रसिद्धान्तलेशसंग्रहे प्रथमपरिच्छेदः ।



मुपासनादिपरत्वप्रतीतेः । न द्वितीयः, जीवब्रह्माभेदस्यौपनिषदत्व-श्रुतिविरोधादिति भावः । तत्राद्यं कल्पं परिगृह्य समाधत्ते— **वेदान्तेति** । तेषामुपासनादिपरत्वं दूषयति— **सर्वेऽपीति** । वेदान्तानां क्व तात्पर्यमिति विमृश्यमानाः सर्वेऽपि वेदान्ता अद्वये जीवाभिन्ने ब्रह्मणि समनुयन्ति समन्वयं तात्पर्यं लभन्ते । तात्पर्यज्ञापकानि लिङ्गानि कथयति— **उपक्रमेति** । आदिपदमभ्यासादिसंग्रहार्थम । के ते वेदान्ताः, कथं वा तेषूक्तानां लिङ्गानां सत्त्वम्, को वा तैर्लिङ्गैस्तात्पर्यावगमप्रकार इत्याकाङ्क्षायामाह— **यथा चेति** । सर्वेषां वेदान्तानामयमेव परमतात्पर्यविषयी-

भूतोऽर्थः, न तूपासनादिरिति प्रपञ्चितमित्यर्थः । अत्रापि कुतो न प्रपञ्च्यते, तत्राह— **विस्तरेति** । ग्रन्थविस्तरभयादित्यर्थः ॥

श्रीकृष्णं मनसा ध्यात्वा श्रीकृष्णं संप्रणम्य च ।
व्याख्यातोऽयं परिच्छेदः श्रीकृष्णपरितुष्टये ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानन्दसरस्वती-
चरणारविन्दसंलग्नरजोभूतस्याच्युतकृष्णानन्दतीर्थस्य कृतौ
शास्त्रसिद्धान्तलेशसंग्रहव्याख्यायां कृष्णालंकारा-
ख्यायां प्रथमपरिच्छेदः समाप्तः ॥

